ॐ त्रिभवोत्तमाय नमः

भिक्षु-अवलोकितसिंहप्रणीत-

धर्मसमुच्चयस्य समीक्षात्मकं सम्पादनम्

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
विद्यावारिधि (Ph. D.) इत्युपाधये प्रस्तुतः शोध-प्रबन्धः

(A CRITICAL EDITION OF THE DHARMA-SAMUCCAYA
OF
BHIKSU AVALOKITA SIMHA)

१९८६

निदेशकः
प्रो० महाप्रभुलाल गोस्वामी
दर्शनसंकायाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
फा० शु० ६, सं० २०४२

गवेषकः
विजयशंकर चौबे
तुलनात्मकदर्शनाचार्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
२० मार्च सन् १९८६

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ॐ त्रिभवोत्तमाय नमः

भिक्षु-अवलोकितसिंहप्रणीत-

धर्मसमुच्चयस्य समीक्षात्मकं सम्पादनम्

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

विद्यावारिधि (Ph. D.) इत्युपाधये प्रस्तुतः शोध-प्रबन्धः

(A CRITICAL EDITION OF THE DHARMA-SAMUCCAYA
OF
BHIKSU AVALOKITA SIMHA)

१९८६

निर्देशकः
प्रो० महाप्रभुलाल गोस्वामी
दर्शनसंकायाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

फा० शु० ६, सं० २०४२

गवेषकः
विजयशंकर चौबे
तुलनात्मकदर्शनाचार्यः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

२० मार्च सन् १९८६

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी ।

श्री विजयशङ्कर चौबे तुलनात्मकदर्शनाचार्यः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य विद्यावारिधिः (पी-एच०डी०) इत्युपाधये 'भिक्षु-अवलोकितसिंह प्रणीतधर्मसमुच्चयस्य समीक्षात्मकं सम्पादनम्' इति विषयामधिकृत्य मन्निर्देशने महता परिश्रमेण मौलिकमिमं शोध-प्रबन्धं रचितवान् इति प्रमाणयन् तत्परीक्षणार्थं विदुषां पुरः पुरस्सारयेति ।

दिनाङ्कः ७।५।८९

मार्गनिर्देशकः

महाप्रभुलाल गोस्वामी

(डॉ० महाप्रभुलाल गोस्वामी)
दर्शनसङ्कायाध्यक्षः
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी ।

---:o:---

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्म निवेदनम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मनिवेदनम्

प्रस्तुत: धर्मसमुच्चयनाम्ना ख्यात: ग्रन्थ: वाराणसीस्थ-श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य श्रमणविद्यासंकायस्य भूतपूर्व-सङ्कायाध्यक्षस्य प्रो० जगन्नाथोपाध्यायस्य नेपालयात्रायां तत्रत्ये श्रीराष्ट्रिय-अभिलेखालये पाण्डुलिपिरूपेण प्राप्त:। प्राचीनेष्विव अस्मिन् ग्रन्थेऽपि लेखकस्य नामोल्लेखातिरिक्तं किञ्चिदपि नोपलभ्यते। एवं अयमपि ग्रन्थ: प्राचीनां भारतीयां परम्परामनुसरन् स्वस्य भारतीयत्वं प्रतिपादयति ।

ग्रन्थस्य भाषा हैब्रिडसंस्कृतम् प्रतीयते । इयं भाषा अपभ्रंश-मिश्रिता किं वा अपभाषामिश्रिता विद्यते । अतएव अस्य ग्रन्थस्य रचनाकाल: संस्कृतसाहित्यस्य मध्ययुगोऽनुमीयते ।

अस्य ग्रन्थस्य अद्यावधि कापि अन्या प्रतिलिपि: न प्राप्यते, न वा क्वचिदपि अभिलेखालये पुस्तकालये वा दृश्यते । इदमनुमीयते यत् अयं ग्रन्थो बौद्धानां भारतवर्षस्य त्यागेन सहैव ख्रिष्टाब्दस्य एकादशशताब्द्यां स्वदेशमत्यजत् । अत एव अहं दाढ्र्येन अस्य प्रामाणिकत्व स्थापने समर्थोऽस्मि । अस्य ग्रन्थस्य द्वितीया प्रतिलिपि: यावन्न अन्विष्यते, तावत् इदमेव वक्तुं शक्यते यत् अयं ग्रन्थ: बौद्धधर्मस्य स्वर्णयुगे तेषाम् 'आचारसंहिताया:' प्रख्यापनाय केनापि अवलोकितसिंह-भिक्षुणा ईसात: अष्टशताब्द्यां विरचित:। ग्रन्थस्य लेखने लेखकेन त्रिपिटकप्रभृतीनां ग्रन्थानां सम्यग्रूपेण अनुहरणं कृतं विद्यते ।

सम्प्रति या पाण्डुलिपि: प्राप्ता: तस्या: विज्ञानसम्मत-विश्लेषणात् इयं धारणा दृढा भवति, यत् अस्या: लिपिकरणं पञ्चशतवर्षं पूर्वमेवश्यमेवाभवत् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मिन् ग्रन्थे षट्त्रिंशत् वर्गाः सन्ति। येषामध्ययनेन बौद्धाचारसंहितायाः सम्यग्रूपेण अल्पबुद्धीनामपि जिज्ञासा अनया शाम्यति। अस्याध्ययनेन एव बौद्धधर्मस्य सामान्यजनतायां प्रचारः प्रसारो वा कियद्बाहुल्येन आसीदिति ज्ञायते ।

ग्रन्थकारः स्वकीयं ग्रन्थं रचनादृष्ट्या चतुर्षु भागेषु विभक्तवान् । प्रथमोदाने तत्र दशवर्गा विभक्ताः सन्ति । तद्यथा --

"जितधर्मकायपरिवर्तौ ह्यनित्यता ।
अप्रामादकायतृष्णास्त्री च मथेन ते दश:।।"

द्वितीये-

चित्तवाक्कर्मसंयोजनमथपापम् ।
नरकप्रेततिर्यक्षु अशौर्यं दशमं विदु:।।

तृतीये-

करुणादानं शीलक्षान्तिवीर्यमथध्यानम् ।
प्रज्ञानिर्वाणमार्गं च भिक्षुर्दशमं विदु: ।।

चतुर्थे च-

पुण्यदेवसुखमित्रास्तुति: षष्ठं विदुर्बुधा: ।
तद्वैपुल्यसधर्मयदाकृतस्य स्मृत्युपस्थिते: ।।इति।।

इत्थं प्रथमोदाने तेषां समस्तानां दुर्गुणानां तथा च त्याज्यकर्मणां प्रतिपादनं विद्यते । ये भिक्षुधर्म स्वानुवर्णेन प्रथमदिवसे एव परित्याज्या: आसन्। अन्येषु उदानेष्वपि गुणानामगुणानां च त्याज्यात्याज्यविमर्श: विद्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवम् अयं धर्मसमुच्चयो ग्रन्थः आदितः अन्तपर्यन्तं भगवतः बुद्धस्य उपासनया प्रारभ्य चतुरशीतिश्लोकाभ्यधिकषट्शताधिकद्विसहस्रात्मकः भिक्ष्ववलोकितसिंहेन विरचितः। अयं बौद्धधर्मस्य सूत्रवैपुल्यसम्पन्नः ग्रन्थः अद्वितीयो महनीयश्च विद्यते ।

अस्य ग्रन्थस्य सम्पादनकार्ये नियोजने प्रो० जगन्नाथोपाध्यायमहोदयस्य महती अनुकम्पा विद्यते । यतो हि तेन महाभागेनैव महता प्रयासेन नेपालदेशात् अस्य पाण्डुलिपिः छायाङ्कनपूर्वकम् अत्र आनीता, सम्पादनाय च मह्यं प्रदत्ता । यद्यपि स्वयमस्मिन् कार्ये अक्षमं जानामि, तथापि अयं गुरोः महत्याः कृपायाः वात्सल्यपूर्णस्य आशीर्वादस्य च सुमहान् प्रभावः विद्यते, यत् सम्प्रति अस्य सम्पादनं सुकरमभवत् । अतस्तस्य ज्ञापनं स्वकार्यधार्ष्ट्यकत्वयोः प्रकाशनं मेव मन्ये । ग्रन्थस्य सम्पादनकार्ये प्रो० उपाध्यायमहाभागानाम् सततमभिरुचिः माम् सततं समचालयत् ।

अस्मद् पूज्यगुरुवर्यैः दर्शनसङ्कायाध्यक्षैः प्रो० महाप्रभुलालगोस्वामिमहोदयैः मार्गनिर्देशनपूर्वकं यत् काले काले साहाय्यं प्रदत्तं तत्कृते तेभ्यः आभारं निवेदयामि । एवम् अन्येऽपि तुलनात्मकधर्मदर्शनविभागस्य प्राध्यापकेन डा० राधेश्यामधरद्विवेदिमहोदयेनापि ग्रन्थस्योदात्तात्मकाध्ययने अन्येषां धर्मदर्शनतत्त्वानां तुलनात्मकाध्ययने यथा मार्गो निर्दिष्टः स कथमपि विस्मरणीयो नास्ति । अत एव तेभ्योऽपि आभारं व्याहरामि । एवमेव बौद्धदर्शनविभागस्य अध्यक्षः प्रो० रामशङ्कर त्रिपाठी तथा च योगतन्त्रविभागे नियुक्तः अध्यापकः पं० श्री जगन्नाथशास्त्रितैलङ्गमहोदयः अपि अस्मिन् कार्ये काले काले विचारविमर्शपूर्वं सहायकोऽभवत्। अत एव द्वयोः अपि आभारमविस्मरणीयो । 'धर्मसमुच्चय'-ग्रन्थस्य सम्पादनकार्ये, समीक्षालेखनकार्ये, तथा अशुद्धिनिवारणे अस्मत्-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सतीर्थ्ययो श्रीनलिनीकान्तमणित्रिपाठिनः श्री बनारसीलालस्य च चिरस्मरणीयः सहयोगः मया उपलब्धः। एतत्कृते तौ उभावपि धन्यवादार्हौ स्तः। श्री भगवानयादवोऽपि अस्य शोधप्रबन्धस्य शुद्धातिशुद्धटङ्कणाय धन्यवादार्हः।

अन्ते मन्दबुद्धेर्मम उडुपेन सागरोल्लङ्घनमिव दुष्करोऽयं प्रयासः विदुषां समक्षं शोधप्रबन्धरूपेण प्रस्तूयते। आशासे, सुधियः नीरक्षीरविवेकन्यायेन दोषान् विहाय गुणान् स्वीकरिष्यन्ति। विदुषां स्तोकं मनोरञ्जनं जिज्ञासाशमनं च अस्य ग्रन्थस्य साफल्यमिति मन्ये इति।

भावत्कः

(विजयशंकर चौबे)

वाराणसी
फा० शु० ६, सं० २०४२
२० मार्च, १९८६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयानुक्रमणिका

			पृ० सं०
	आत्मनिवेदनम् —	--	
	पाण्डुलिपिप्रतिकृतय: (छायाचित्राणि)	--	
(१)	प्राक्कथनम् —	--	१-४६
(२)	श्रीधर्माधिकृत्य धर्माचार्यस्य सम्मति:	--	४७-५७
(३)	ग्रन्थस्य विषयवस्तुसंदोह:	--	५८-१२१
(४)	धर्मसमुच्चय: (षट्त्रिंशद्वर्गात्मक:)	--	
	:१: जितवर्ग: प्रथम: --	--	१२२-१२६
	:२: धर्मोपदेशवर्गो द्वितीय:	--	१२७-१३२
	:३: कायजुगुप्सावर्गस्तृतीय:	--	१३३-१३५
	:४: परिवर्तवर्गश्चतुर्थ:	--	१३६-१४४
	:५: अनित्यतावर्ग: पञ्चम:	--	१४५-१७७
	:६: अप्रमादवर्ग: षष्ठ:	--	१७८-२११
	:७: कामजुगुप्सावर्ग: सप्तम:	--	२१२-२४६
	:८: तृष्णावर्गोऽष्टम:	--	२४७-२६७
	:९: स्त्रीजुगुप्सावर्ग: नवम:	--	२६८-२८१
	:१०: मद्यजुगुप्सावर्गो दशम:	--	२८२-२९०
	:११: चित्तवर्ग: एकादश:	--	२९१-३०९
	:१२: वाग्वर्गो द्वादश:	--	३१०-३१९
	:१३: कर्मवर्गस्त्रयोदश:	--	३२०-३२५
	:१४: संयोजनवर्ग: चतुर्दश:	--	३२६-३३३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

			पृ०सं०
:१५:	पापवर्गः पञ्चदशः	--	३३४-३४४
:१६:	नरकवर्गः षोडशः	--	३४५-३६४
:१७:	प्रेतवर्गः सप्तदशः	--	३६५-३७०
:१८:	तिर्यग्वर्गोऽष्टादशः	--	३७१-३७२
:१९:	क्षुधावर्गः एकोनविंशः	--	३७३-३७५
:२०:	कौशीद्यवर्गो विंशः	--	३७६-३८०
:२१:	करुणावर्गः एकविंशः	--	३८१-३८४
:२२:	दानवर्गो द्वाविंशः	--	३८५-३९१
:२३:	शीलवर्गस्त्रयोविंशः	--	३९२-४०४
:२४:	क्षान्तिवर्गश्चतुर्विंशः	--	४०५-४०७
:२५:	वीर्यवर्गः पञ्चविंशः	--	४०८-४०९
:२६:	ध्यानवर्गः षड्विंशः	--	४१०-४१२
:२७:	प्रज्ञावर्गः सप्तविंशः	--	४१३-४१४
:२८:	निर्वाणवर्गोऽष्टाविंशः	--	४१५-४१६
:२९:	मार्गवर्गः एकोनत्रिंशः	--	४१७-४२०
:३०:	भिक्षुवर्गः त्रिंशः	--	४२१-४४७
:३१:	पुण्यवर्गः एकत्रिंशः	--	४४८-४५७
:३२:	देववर्गो द्वात्रिंशः	--	४५८-४७४
:३३:	सुखवर्गो त्रयस्त्रिंशः	--	४७५-४८४
:३४:	मित्रवर्गश्चतुस्त्रिंशः	--	४८५-४८७
:३५:	राजाववादवर्गः पञ्चत्रिंशः	--	४८८-४९३
:३६:	स्तुतिवर्गः षट्त्रिंशः	--	४९४-४९७
(५).	सन्दर्भग्रन्थाः --	--	४९८-४९९

---:०:---

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पाण्डुलिपिप्रतिकृतयः

(छायाचित्राणि)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(क)

१२७ वर्जं चाडैशतिमम: : १६ ।। ऽ प्राणेपुत्रस्य देहमुत्साभिव
त्स्य स्मृत्युपस्थिनै: सूत्रवरादिगाथामथोद्धेता: पुरत्पम
३१५ र्वनिर्दे: समाऊनुवैतिमत्यागवानेन। मोहर्षिवांबदिशी
धर्मपर्यायसमाप्तः ।। वैपुल्यमहागोगोर्दविस
न्तुकीर्तिश्रीकाधिकः वस्त्रान्तानंतमहत्तांयंयुनोदः

(क)

राष्ट्रिय अभिलेखालय
नेपाल
विषय: ९६८७
पुस्तक नाम: धर्म (१७ — ५ ५.
स. सं. ५-५२
वि. सं. ६८
पत्र सं: २२८
नाकार

NATONAL ARCHIVES
NEPAL
Subject:
Manuscript-Name:
C. No.
S. No.
Folio. No
Size.

ख ११८
६०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(क)

१२५॥ वर्ज्जैः वीडैशतिनमः : १८ । प्रदानेपुंत्वदेवस्तुत्वामिव
त्वस्मृतुपस्थितेः सूत्रत्राहिगाबासयोर्हगाः :पुरुपम
(३५) कैनिरैः सम्पाङनवैनिसत्यगवानेन। मोहधिंवांवदिवी
धर्म्मपर्यायसनात्रः ॥ वैपुलमहागंभीरेदविस
त्तुगीतिश्रीकाधिकः वस्त्वान्तोनरं महत्तां यगुणे हा

[N.1]

ॐ नमो बुद्धाय॥ ॥श्रुतिरागचों
तमयानमर्श्रिवेतामाय॥ १ ।ग
[illegible]॥ १॥ [illegible]

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(रव)

[illegible] १२८८

This book belongs to
[illegible] Siddhi HarSt.
Ta[illegible]bahal No. 83

ॐ नमो [illegible]॥ ॥ प्रणम्य सर्वविदं

निर्मलश्रीर्गुरुर्ज्ञानमालानिभमयस्तारक [illegible]

गुणानीदर्शनमेव प्रणम्य [illegible] नमाय

॥१॥ [illegible] गराद्

॥ [illegible] चननम्यरा:

॥२॥ अप्रमादस्तथा [illegible] श्रीयोरम्यस्तथाद्ध

नि॥ [illegible] नाम्यास: [illegible] मायननानि

यता॥३॥ दानशील [illegible] ति मेत्री [illegible]

न॥ [illegible]

॥४॥ [illegible]

[illegible] ॥ [illegible] प्रमाद [illegible] हेतव:

॥५॥ [illegible] प्रमाद [illegible]

[illegible]

[illegible] ॥६॥ [illegible]

[illegible]

[illegible]

(रव)

श्रीराष्ट्रिय अभिलेखालय
संग्रह
विषय: [illegible]
पुस्तक नाम: [illegible]
[illegible] ५- १२४
[illegible] ५५
[illegible] ५८
आकार २२१/२ × ११३/४

NATONAL ARCHIVES
NEPAL
Subject:
Manuscript-Name
C. No.
S. No.
Folio. No
Size.

वि ८६
३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

२क

This book belongs to
Shri Harsha
Ta[illegible]bghal No. 83

ॐ [illegible]य ॥ ॥प्रसन्नसर्वीतेद
निर्मलश्रीगुरुं श्रीजम्बालानिमपतांकं हत्वा
गुणानोदर्हूलमेनप्रणाम्यनस्यात्रिमवीनमाय
॥१॥ लब्ध्वा मनुष्यपस्थानं दुर्लभं गुरुस्मागराद्
॥ गर्भाद्यं [illegible]म्यामि सो कला वनन्मरा:
॥२॥ अप्रमादस्तथाप्यत्राविर्यारम्भस्तथाह
नि॥ ज्ञानाभ्यासः सनाते यो मोक्षस्यायननानि
यत्र॥३॥ दानशीलदमक्षांतिमैत्री भंतसुधिंत
न॥ कारुण्यं जुदंतो येभ्यां शांतिरसेप्रदिदेनवः
॥४॥ चापलं पापसेरैः क्रूरताविनयस्त
था॥ मिथ्याद्दृष्टिप्रमादश्च नरकस्याग्रदेनवः।
॥५॥ मात्सर्य[illegible]कदुःखाना [illegible]प्रमादस्यापि
वर्ति तु भाव्य॥ तत्र्वैर्भूमि[illegible] तन्मनस्यप्रेतनु
पस्थाननिर्लिसंडाक्यां॥६॥ अज्ञानसेवाजडता
बबुद्धेसहुर्वेताशःप्रियमेथुनतं॥ आस्यस
क्ति प्रवलस्वनिद्रानिर्धप्तत्तेत्तवपूर्वनिदेनु ॥७॥
अनुभीषिनिर्वकृत्वातायवां[illegible]मानसे मन्त्र॥ दु
र्णतराणंतुकर्मणांसंपूरतेनै ॥८॥ चात्मान
अपि सम्यक्[illegible] ॥९॥ [illegible]
ना[illegible] ॥१०॥ [illegible]

२ख

[illegible]मस्याचितु[illegible]॥
[illegible]॥
[illegible]॥
[illegible]॥ ॥अथ[illegible]
[illegible]
[illegible]॥ [illegible]॥

This book belongs to
Pt. Shri Harsha
Tajmahal[illegible] No. 83
[illegible]

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राक्कथनम्

ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राक्कथनम्

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राक्कथनम्

आदिश्लोके श्रमणोत्तमं बुद्धं नमस्करोति यः खलु सर्वमलहीनः निर्मलश्रीः कृपागुणेन सकलजनसमदृष्टियुक्तः सन् क्लेशजालनिमग्नलोकं समुद्धरणेच्छया सदा तत्परो वर्तते। ग्रन्थप्रयोजनप्रसङ्गप्रदर्शनच्छलेन कथयति यत् लोकजीवनतत्पराः गाथाः विपुलबौद्धसाहित्यसागरात् समुद्धृत्य लोकानां कृते सद्धर्मोपदेशं करिष्यामि। मोक्षापरपर्यायस्य निर्वाणस्य कृते प्रमादत्यागः श्रद्धावीर्यं अर्थात् धामाधैर्यं ज्ञानस्य पुनः पुनः अनुशीलनं सतां संसर्गः च अपेक्षिताः। अर्थात् मोक्षस्य कृते अन्तःकरणविशुद्धिरपेक्षिता, सा च विना धर्माचरणं न संभाव्यते इति मोक्षसाधनत्वेन एतेषां षडायतनानां सर्वशास्त्रसम्मतानां निरूपणम् एभिः क्रियते। एतेषां पूर्वोक्तानां कर्तव्यधर्माणाम् अभ्यासेन दानं शीलता दमः क्षान्तिः मैत्री भूतेषु अहिंसा-करुणा- मुदिता उपेक्षा च जायते। एतेषां दानादीनां प्राप्तौ अनायासेनैव शान्तिः जायते। अतः इमाः शान्ति-प्राप्तिहेतवः सन्ति। एतस्यैव अर्थस्य बोधाय श्रीमदाद्यशङ्कराचार्यप्रदर्शिते ब्रह्मजिज्ञासाधिकार-सम्प्राप्तौ रूपेण प्रदर्शनं विधते। यथा हि साधनचतुष्टयसम्पन्न एव ब्रह्मजिज्ञासाधिकारि भवति। तेषु च साधनेषु द्वितीयस्थानीयः उपायः शमदमतितिक्षोपरतिः श्रद्धा च मनसः विजयः। अर्थात् वशीकृतावस्थासमः दमस्यैव द्वितीयसंज्ञा वशीकारः साधनया विजितं मनः तत्त्वविषय-विनियोगः योग्यं भवति। इयं योग्यतैव दमशब्दार्थः। विषयतितिक्षा च शीतोष्णादिद्वन्द्वसहिष्णुता विषयोपरमश्च विषयभोगात् निवृत्तिः। तत्त्वज्ञानं प्रतिक्षिप्ता अतएव श्रुताबुक्तम् -"तस्मात् शान्तोदान्त उपरतः तितिक्षुः श्रद्धाविष्टो भूत्वा आत्मनि एव आत्मानं पश्येत् सर्वमात्मानि पश्यति" इति बृह० ४।४।२३।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बौद्धदर्शनेऽपि एतेषां फलसाधनानां प्राधान्येन विनियोगो वर्तते । तेन च सर्वैः लोकैः सह साम्यं भजते । साम्यं भजमानाः करुणाप्लुता सकलजनहिताय प्रवृत्तिमनुवते । अन्यत्र समाहितः इत्यस्यापि निर्देशः वर्तते तत्र शान्ताः दान्ताः उपरतास्तितिक्षवः समाहिताः इति पाठः वर्तते। अयं पाठः नृसिंहतापन्युपनिषादि षष्ठखण्डे वर्तते । वस्तुतः षडङ्ग-साधनानां समवायः एव अत्र अपेक्षितः अतएव अप्रमादः श्रद्धा वीर्यं अदम्भ-धृतिः ज्ञानाभ्यासः सतां श्लेषः अपेक्षितः वर्तते । तत् फलमपि सर्व-भूतेषु आत्मभावप्राप्तिः तेन च दानशीलदमः इत्यादि प्राप्यते एतत् विरुद्धं च नरकापरपर्यायस्य दुःखसाधनं चापल्यं पापसंश्लेषः क्रौर्यं अयथाभूतं वचः मिथ्यादृष्टिः प्रमादश्च । आर्यानाङ्गकृते एतद् विरुद्धा-चरणमेव पूर्वोक्तसाधनसमवायप्रातिरूपं सुखसाधनम् । तानि च मात्सर्यं ईर्ष्या कटुवाक्यता-प्रमादसेवा क्षुद्रविरतिः तत्त्वेषु द्रोहरतं मनः इत्येतद् शून्यम् । तस्मात् धर्माचारिरतैः सज्जनैः एतत् सर्वथा परित्याज्यमेव । तिर्यगादियोनौ असद्धर्माचरणेन प्राप्तिर्भवति। तस्मात् कायवाङ्मानसं अशुभं कर्म सर्वथा हेयमेव ।

मनुस्मृतौ च धृतिक्षमादीनामवश्यकर्तव्यत्वेन् धर्मान्तर्गतत्त्वं प्रति-पादितम्। धृतिः अर्थात् संतोषः परे न अपकारे कृतेऽपि तं प्रति अपका-राचरणरूपं क्षमा विकारहेतौ सत्यपि अर्थात् विषयसन्निधानेऽपि मनसः अविकारित्वं दमः। अर्थात् मनसो दमनम् । आचार्यैः गोविन्दरा-जादिभिः द्वन्द्वशीतातपसहिष्णुत्वमेव दमः इति प्रोक्तम्। अन्यायेन पर-धनादिग्रहणं स्तेयं तद्भिन्नमेवास्तेयम्। शास्त्रानतिक्रम्यमृद्जलादिभिः देहादेः शोधनं शौचम् । विषयेभ्यः इन्द्रियाणां निवारणम् इन्द्रिय-निग्रहः। शास्त्रादितत्त्वज्ञानं धीः। यथार्थतत्त्वज्ञानं विद्या, यथार्था-भिधानं सत्यम् ,सत्यमपि क्रोधसाधने क्रोधानुत्पत्तिः अक्रोधः। एतद्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दशविधं धर्मस्वरूपमनुस्मृतौ उक्तम् । एतस्य दशविधस्य धर्मस्यानुष्ठानेन समाहितः सन् मानवः परां गतिं लभते। एतस्मिन्नपि धर्मसमुच्चयात्मके ग्रन्थे सद्धर्मस्वरूप-विश्लेषणप्रसङ्गे एतच्छाया समुपलभ्यते । सद्धर्मपदेन यद्यपि अविकलम् एतद् धर्मस्वरूपं नाङ्गीकृतं तथापि वाचोभङ्गया एतत् सर्वं जीवनोन्नत्याधायकं धर्मस्वरूपं कर्तव्यतया निर्दिष्टं तत्र नास्ति विप्रतिपत्तिः[1] । याज्ञवल्क्यस्मृतावपि धर्मस्वरूपनिरूपणप्रसङ्गे यज्ञानुष्ठानं सदाचारः इन्द्रियनिग्रह अहिंसा-दानं वाङ्यचित्तवृत्तिनिरोधपूर्वकं याथातथ्येन वस्तुतत्त्वज्ञानमेव आवश्यकम्। अनंतरं प्राणिनां सामान्यधर्मनिरूपणप्रसङ्गे मनुस्मृतिप्रोक्तमेव धर्मस्वरूपमविकलं प्रोक्तम् । तथा हि-

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम्।। (याज्ञ० १।१२२)

एतस्यैव धर्मस्वरूपस्य साम्यं धर्मसमुच्चयेऽपि चतुर्थश्लोके उपलभ्यते ।

अयं धर्मः न केवलं बौद्धानां स्मार्तानां वा, अपितु यत्र कुत्रापि धर्मस्वरूपं निरूपितं तत्र सर्वत्र एतस्य सामान्यधर्मस्य विरोधः नोपलभ्यते। गीतायामपि धर्मस्वरूपनिरूपणप्रसङ्गे एतदेव प्रकारान्तरेण प्रतिपादितम्[2]। विष्णुस्मृतावपि सामान्यधर्मशब्देन किञ्चिद् वैलक्षण्यप्रदर्शनपूर्वकं तथा धर्मस्वरूपं निरूपितम्। यथा धर्मसमुच्चये प्रदर्शितेषु धर्मेषु साम्यातिशयं भजते। तथाहि--

---

१- धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। (मनु०६।९२)

२- शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।। (गीता० १८।४२)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ।।
आर्जवं लोभशून्यत्वं देव ब्राह्मणपूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते।।

एवमेव बार्हस्पत्यस्मृतावपि सामान्यधर्मस्वरूपं प्रतिपादितम् गौतमेन दया सर्वभूतेषु क्षान्तिः अनसूया अनायासः मङ्गलम्, अकार्पण्यं अस्पृहा चेति आवश्यकमनुष्ठेयत्वेन निरूपितम् ।वस्तुतस्तुधर्मसमुच्चये प्रतिपादितं मानवकर्त्तव्यस्वरूपेण महाभारतप्रतिपादितावारस्य अवितथं साम्यं वर्तते। तथाहि-

सत्यं दमस्तपः शौच सन्तोषो ह्रीः क्षमाऽऽर्जवम् ।
ज्ञानं शमो दया ध्यानमेष धर्मः सनातनः ।।
सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः ।
तपः स्वधर्मवर्तित्वं शौचं संकरवर्जनम् ।।
सन्तोषो विषयत्यागो ह्रीरकार्यनिवर्तनम् ।
क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता ।।
ज्ञानं तत्त्वार्थसंबोधः शमश्चित्तप्रशान्तता ।
दया भूत हितैषित्वं ध्यानं निर्विषयं मनः।। इति ।।

देवलोऽपि धर्मसमुच्चये प्रतिपादनप्रसङ्गे शौच-दानं तपः श्रद्धा गुरुसेवा क्षमा दया विज्ञानं विनयःसत्यमिति उक्तम् । अग्रे पुनरपि महाभारते सामान्यधर्मस्वरूपनिरूपणप्रसङ्गे उक्तम् - यस्य सर्वथा साम्यं धर्मसमुच्चये प्रतिपादितधर्मस्वरूपेण वर्तते । अक्रूरता अहिंसा-अप्रमादः संविभागिता आतिथेयं सत्यं अक्रोधः परदाररतिः सन्तोषः शौचं सदाऽनुसूयता आत्मज्ञानं तितिक्षा श्चेति साधारणो धर्मः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रत्नावल्यामपि धर्मस्य एकान्तकल्याणकरत्वम् । अतः धर्मोदयाय धर्मस्वरूपं वक्तुम् उपक्रमते । धर्माभ्युदये सति नैःश्रेयसस्योदयः भवति। तत्र च श्रद्धायाः धर्माचरणे प्राधान्यं तत्त्वज्ञाने प्रज्ञायाः भवतु नामप्रज्ञायाः प्राधान्यं तथापि श्रद्धाया प्राधान्यं नातिरोहितम् । धर्मच्युतौ पारतंत्र्यं द्वेषः मोह कारणं वर्तते। किन्तु यः सम्यक् परीक्ष्य कायवाङ्मानसं कर्म परात्महितं विज्ञाय कुरुते स एव प्राज्ञः। अनन्तरं धर्मस्वरूपं निरूप्य तत्-फलनिरूपणं कृतं धर्मान्नाचरणे च कीदृशं कुत्सितं फलं भवति, कथं च तस्य कर्मणः अशुभत्वं इत्यऽपि सम्यक् प्रतिपादितम् । प्रसङ्गायचं रत्ना-वलीशब्दैरेव तन्निरूप्यते तथाहि --

कायवाङ्मानसं कर्म सर्वं सम्यक् परीक्ष्य यः ।
परात्महितमाज्ञाय सदा कुर्यात्सपण्डितः ।।
अहिंसा चौर्यविरतिः परदारविवर्जनम् ।
मिथ्यापैशुन्यपारुष्याबद्धवादेषु संयमः।। (रत्ना० प्र० परि०७-८)
दानशीलक्षमास्पष्टं यः सद्धर्ममहापथम् ।
अनादृत्य व्रजेत् कायक्लेशाे दण्डकोत्पथैः।। (रत्ना० प्र० परि० १२)

अतः धर्मसमुच्चयेत एव धर्मा निरूपिताः, परन्तु विपरीताचरणे कीदृशी अशुभगतिः कादृशञ्च शुभकर्माचरणे फलं भवति इति फलनिर्देश-पूर्वकं साधारणधर्मस्य विस्तृतं व्याख्यानं प्रथमे त्रिवर्गे साधुप्रतिपादितम्। अतः अन्यग्रन्थेषु साधारणधर्माणां यद्यपि नाम्ना कीर्तनं वर्तते, तथापि फलाफलनिर्देशपूर्वकं यथा धर्माचरणे प्रवृत्तिसम्पादनाय विशदं विश्लेषणं कृतं धर्मसमुच्चयाख्ये ग्रन्थे तथा नान्यत्रेति वर्तते एतस्य ग्रन्थस्य वैशिष्ट्यम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मोपदेशाख्य द्वितीयवर्गे आदौ गुरोर्माहात्म्यमेवोपवर्णितम् । निर्वाणगामिनं कल्याणकरं धर्मं यः उपदिशति एवं भूतः सर्वबन्धनछेत्ता प्राणिनां गुरुर्भवति। अस्मिन्नेव प्रसङ्गे सन्मार्गदेशकत्वं सद्धर्मप्रवर्तकत्वं गुरोः उक्तम् - भवसागरतारकः गुरुर्भवति। नाऽत्र संदेहः यत् गुरुवादस्य न केवले भारते वर्षे अपितु सर्वत्रैव गुरोर्माहात्म्यं सम्यक् उपवर्णितम्। अत एव नु वंशस्य द्वैविध्यं साधुप्रतिपादितम् एकः विद्यावंशः अपरः जन्मवंशः। विद्यावंशस्य जात्यादिसर्वभेद शून्यत्वम् । गुरुकुले वसन्तश्छात्राः लोकोपकारिणीं विद्यामुपलभ्य लोके प्रवृष्टः सन् साभ्युदयाय लोकाभ्युदयाय च प्रयतन्ते । भवसागरोत्तरणाय गुरुव्यतिरिक्तः न कोऽपि सहायः भवति। अतएव वर्तते प्रसिद्धिः --

अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरुवे नमः।।

किमन्यत् -

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्री गुरुवे नमः।।

धर्मसमुच्चयस्य यन्त्र आध्यात्मिका ग्रन्थः। अतः आध्यात्मिकदृष्ट्या गुरोर्माहात्म्येन कश्चित् शास्त्रसिद्धान्तःप्रकाश्यते गुरुमनुक्ता क्रिया सर्वथैव निष्फला जायते। अतः कस्यामपि क्रियायां गुरोर्मार्गनिर्देशः सर्वथा अपेक्षितः। शास्त्रं गुरुमूलं भवति। अतः 'शिवतमः प्रभुगुरुरेव इति यत्नतः गुरुमाश्रयेत्[१]। उपनिषद् कालात् एव गुरोर्माहात्म्यं

१- गुरुमूलमिदं शास्त्रं नान्यः शिवतमः प्रभुः ।
अतएव महेशानि! यत्नतो गुरुमाश्रयेत् ।।(पिच्छिलातंत्रम्, पृ०६३)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गौरवञ्च सर्वथा सुस्थिरं वर्तते ।गुरुः गौरवं गुरुत्वं च सर्वथा वैशिष्ट्यो-
द्बोधकमेव रुद्रयामलेऽपि उक्तम् -- 'प्रयत्नेन उत्तमः गुरुः कर्तव्यः'।

मुण्डकोपनिषदि कर्मफलसमवाय परीक्षायां नित्य वस्तुकर्मणां
नोत्पद्यते तदा वैराग्ये प्रवृत्तिर्भवति। अतः समित्पाणिः भूत्वा ब्रह्मनिष्ठस्य
गुरोः समीपे गन्तव्यम् । ब्रह्मज्ञः[1] गुरुः संयतेन्द्रियं उपसन्नं प्रशान्तचित्तं
शिष्यं यथा तत्त्वविद्यामुपदिशेत् । सत्यकामस्य जाबालस्य सन्मार्गलाभार्थं
आचार्यगौतमस्य समीपे गमनं सर्वथा सुप्रसिद्धमेव सत्यकामः गुरुन् कथयति
भवत् सदृशं[2] आचार्यं प्राप्य श्रुतं मया यत् गुरुमुखात् उक्तैव विद्यालाभकरी
भवति ।

धर्मसमुच्चयेऽपि गुरुविषये उक्तञ्च यत् मोहमयपाशछेदकः[3] शिवमार्ग-
प्रदर्शकः सन्मार्गदर्शकः कुमार्गनिनिवारकमेव[4] गुरुःप्रोक्तः। स एव धर्मप्रवरः
येन धर्मेण मनुजाः भवसागरं तरन्ति ।एतस्यैव अर्थस्य प्रतिपादकं अन्यदपि
वाक्यं सुप्रसिद्धम् । यथाहि--

१- परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो-
निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्-
समित्पाणिःश्रोत्रियं ब्रह्मनिष्ठम् ।।
तस्मै स विद्वानुपसन्नाय सम्यक्-
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।। (मुण्डकोपनिषद-
१।२।१२-१३)

२- श्रुतं ह्येव मे भगवद्दृशेभ्यः आचार्याद्धैव विद्याविदिता-
साधिष्ठं प्राप्नोयत।- (छान्दोग्योपनिषद् ४।९-६)

३- धर्मसमुच्चयः २।२

४- धर्मसमुच्चयः२।३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्णधारं गुरुं प्राप्य लब्धावयं प्लववदृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरात्।।

वस्तुत: गुरुकृपयैव वस्तूनां प्रकाश: भवति। अत: सर्वप्रयत्नेन गुरोराराधना सर्वथा अपेक्षिता। देववदेव गुरोर्भक्ति: करणीया । तेन च अकथिता अपि तात्त्विका अर्था: प्रकाशन्ते । अत: भवसागरनिवृत्त्यै अर्था: प्रकाशन्ते । अत: भवसागरनिवृत्त्यै गुरुभक्तिरेव एक: समीचीन: पन्था:। यथाहि उक्तञ्च --

यस्य देवे परा भक्तिर्यथादेवे तथा गुरौ ।
तस्यैतेऽकथिता ह्यर्था: प्रकाशन्ते महात्मन:।।

बुद्धसदृशं गुरुं प्राप्य बुद्धस्य शासनं सम्प्राप्य यो मानव: धर्मरतो न भवति नूनमेव असौ पश्चात् तापदग्धो भवति। अत: मर्त्या: धर्मरतौ भूत्वा नित्यं व्यासक्तमना: कामशून्या: पुत्रदाराप्रसक्ता: भवेयु:। अन्यथा अन्यकरणं परित्यज्य न किमपि अन्यद्भाव्यते। चित्तवशा: देहिन: सर्वे: दोषै: परिव्याप्ता: यथा कथञ्चि जीवनं यापयंति। अत: चित्तानुकूलं कार्यं ये अनुतिष्ठन्ति ते सदा दु:खाकुला एव तिष्ठन्ति। यत: चित्तवशीभूता: जना: दुर्गतिं प्राप्नुवन्ति। सर्वत्रैव चित्तासक्तिशून्यस्य जनस्य प्रशंसा उपलभ्यते । चित्तवशीकारस्य एव निश्चित: पन्था: गुरुणासूपदिष्टा सन्त: सद्धर्मरता: पापात् विरता: तिष्ठन्ति। एवमेव श्रेयसे शान्तं च नित्यं उपपद्यते। सद्धर्मश्रवणेनैव मन: प्रसन्नतामधिगच्छति। सुमहत् सुखञ्च विन्दति अत: गुरुमुखात् शास्त्राद् वा सद्धर्मश्रवणं करणीयम् । तेन च धर्मात्मासौ कदापि पापाचरणेऽप्रवृत्तो कर्मफलं श्रुत्वा ज्ञात्वा च निर्वाणमधिगच्छति। अत: आदौ सद्धर्मश्रवणमेवावश्यकम् । श्रवणानन्तरं मननेन तदानुकूलाचरणेन च धर्मसाक्षात्तत्त्वज्ञ: विमोक्षाय यतते । अत: यथोपनिषदादौ आत्मश्रवणादीनामेव श्रवणमनन-निदिध्यासनादिनां निर्देश: कृत:। श्रवणं-मननं-निदिध्यासनञ्च न

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लौकिकसुखप्राप्तये अपितु अलौकिकं निर्वाणरूपफलाधिगत्यर्थं आचर्यते। वस्तुतः स्कन्धायतनधातूनां स्वरूपं विज्ञाय श्रद्धा विभावितः तृष्णां प्रहाय सुगत-देशितां संसारवैमुख्यसम्पादिकां चेष्टां सद्धर्मश्रवणेन कुरुते। ये हि तत्त्व-ज्ञाः सद्धर्मदेशनानुकूलाचरणा ते मृत्युकालेऽपि प्राप्तां वेदनां नानुभवन्ति। सम्यग्ज्ञानेन च दग्धाः क्लेशवृक्षाः पुनर्न जायन्ते। अतः सद्धर्मः श्रोतव्यः, ज्ञानवृद्धः उपासितव्यः तेन च सद्धर्मानुकूलाचरणः प्रशान्तात्मा प्रमाद-वर्जितः सर्वथा सुखमश्नुते। सद्धर्माचरणञ्च प्रदीपवत् अज्ञानान्धकार-निवारकं भवव्याधिप्रमादं मदमानामोघम्। अन्ते च शान्तस्य निर्वाणस्य प्रापकम्। अतः शान्तपदप्राप्तिरूपफलकामनया सद्धर्माचरणमेव करणीयम्। नान्यः उपायः भूतले प्राणिनां निःश्रेयसे विद्यते इति।

श्रौतसिद्धान्तेऽपि एतस्यैव सिद्धान्तस्य साधुसमर्थनमुपलभ्यते तथाहि-मनुस्मृतौ पितुरपि गुरुत्वमुपवर्णितम् न केवलं गुरुत्वमेव वर्णितं अपितु उपाध्यायापेक्षया पितुः प्राधान्यं, आचार्यापेक्षया पितृपेक्षया मातुः प्राधान्यं, गौरवातिशयात्। आचार्यो हि स वेदाध्यापकः उपाध्यायः वृत्त्यर्थाध्यापकः। गुरुश्च शास्त्रानुसारि सकलकर्मकर्ता[1] कर्मणः द्वैविध्यं प्रतिपादितम्। एकं प्रवृत्तं कर्मोक्तमन्यच्च निवृत्तम्। प्रवृत्तकर्मणा स्वर्गादीनां लौकिकसुखानाञ्च प्राप्तिर्जायते। निवृत्तिकर्मणा निःश्रेयः निर्वाणमुप-लभ्यते। निष्कामज्ञानपूर्वं कर्मनिवृत्तमुच्यते। निवृत्तेन कर्मणा भूतानि अत्येति। किमन्यत् स्थावरजङ्गमेषु तादात्म्यादहमेव सर्वत्रास्मि इति पश्यति। मय्येव च सर्वमवस्थितं एतस्यैव निरूपणं धर्मसमुच्चयाख्ये ग्रन्थे द्वितीय-ऽध्याये षष्ठश्लोके कृतम्। तत्र हि लिखितं यत् कामासक्तानां पुत्र-

---

१- उपाध्यायान्दशाचार्य आचार्याणां शतं पिता।
सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते॥

(मनु ०२।१४५)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दारानुरक्तानां व्यासक्तमनसां देहिनां सर्वथा अन्तकत्वप्राप्तिर्जायते । एतेन एतद्सिद्धं भवति यत् निवृत्तमार्गाचरणे कामनारहितानां पुत्रदाराधनासक्तानां सर्वविध सुखप्राप्तिर्जायते । ज्ञानिनामेव सर्वथा श्रेष्ठत्वं प्रतिपादितम्। तप: विद्या च परं नि:श्रेयस्करं तपसा पापमपहन्ति विद्याऽन्तकत्वविनाशो भवति। इदं कर्म नैश्रेयसम् । अतएव सर्वं सत्त्वारुच्च समाहित: सन् आत्मनि पश्येत् । एतादृश: ज्ञानवान अधर्मे कदापि मतिं न कुरुते । मार्कण्डेयमहापुराणेऽपि व्यासक्तमनसां दुर्गतिरेव प्रदर्शिता । आत्मसंयमेन मुक्ते: साधनमहर्निशं ममत्वपापपङ्कदिग्ध: अनेकभवसंभूतधर्मपङ्काङ्क्त: असद्वासनया सर्वथा परिदुष्ट: क्लेशमेव अहर्निशमुपभुङ्क्ते। अत: पुत्रदारप्रसवित: कामासक्तचित्ता च सततं दोषा: एव ।

सप्तमेऽस्तोकेऽपि बद्धचित्तस्य अहर्निशं संकल्पसमाकुलस्य अबद्धचित्तस्य देहिन: न कदापि कल्याणं जायते । अत: सद्वासना प्रक्षालितद् हृदया सुगतिं प्राप्नुवन्ति। अत: निर्मम: निरहङ्कृत: इतस्तत: विमुक्तसङ्ग: मितशायि एव सदा भूतदयया कारुण्यपूर्णचित्त: सुखमश्नुते । वस्तुत: ममत्वातिशयाङ्क्त: लोक: अभिष्टकामनासंपूर्तौ व्यग्रचित्त: समाकुल: बहुभिर्दोषै: आबद्धो भवति। तैत्तिरीयाद्युपनिषद् साधु उक्तम् "न कर्मणा न प्रजयाधनेन त्यागेनैके अमृतत्त्वमानशु:"। परतत्त्वं विदितवद्भि: वीतरागै:

१- याज्ञ० स्मृति० १२।१६

२- रुचि: प्रजापति: पूर्वं निर्म्ममो निरहङ्कृत:।
अक्रूरो मितशायी च चचार पृथिवीमिमाम्।। (मा० पु०६५।१)

३- आत्मन: संयमोयोऽयं क्रियते सुनियन्त्रणात्।
स मुक्तिहेतुर्न भवत्यश्रावपि परिग्रहात् ।।
प्रक्षाल्यतेऽनुदिवसं यदात्मा निष्परिग्रहै:।
ममत्वपङ्कदिग्धोऽपि विद्याम्भोभिर्वरं हि तत्।। ::

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्त्वाभिमुखेन सफलं प्राप्यते। अतः सप्तमे श्लोके कामक्रोधलोभमोहादि-दोषजन्यस्य अविद्या स्मृता रागद्वेषाभिनिवेशाख्यस्य पंचक्लेशस्य हानाय चित्तशुद्धिः सद्धर्माचरणं नितान्तमपेक्षितं इति ।

अष्टमेऽपि सिद्धिमभिलषतः पुरुषस्य कृते इन्द्रियदमनस्य नितान्तमपेक्षा वर्तते । अतिभयङ्करस्य दुर्दमस्य इन्द्रियवासनाक्रान्तस्य चित्तस्य यावत् ज्ञानेन सद्धर्माचरणे च वशीकारित्वं न जायते तावत् भव-सागरात् विमुक्तिः सर्वथा असंभवैव। अतः वीतरागः सन्नेव शत्रुभूतं दोषाविष्टं चित्तं अवरोधयेत्। अत एव चित्तवशीकाराय उपायप्रदर्शन-प्रसङ्गे उक्तं चित्तवशीत्वं प्राप्ति आप्तजनोपदिष्टेन धर्मेण संभाव्यते। इन्द्रियवर्गस्य निरोधः[1] आत्मसद्धर्माचरणेन भवति इति सद्धर्माचरणं नितान्तमपेक्षितम् । अतएव नियतेन्द्रियैः आत्मनः प्रक्षालनं युक्तं पूर्वकर्म शुभाशुभैः फलैः तदुपभोगैश्च कर्मदायो भवति। परन्तु अनभि-सन्धितम् कर्म एव न बन्धाय यतः करुणात्मकं कर्म कुर्वतः जनस्य सर्वं प्रक्षालितं भवति। न च असौ अविवेकेन पापकर्मणा बध्यते। धर्माचरणं विद्यापरिप्राप्तिसाधनम्। अतः सदनुष्ठानात् अधोगतिः क्वापि न संभाव्यते, संयमः मुक्तये एव । तस्मात् विवेकपूर्वकं कृतं

:: अनेकभवसंभूत कर्मपङ्काङ्कितो बुधैः ।
आत्मा सद्वासनातोयैः प्रक्षाल्यो नियतेन्द्रियैः।।
(भा० पु० ६५। १०-११-१२)

१- आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।
(कठो० १।३-४)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्म न कदापि बन्धाय इति निश्चयपूर्वं वच:। एतस्यैव विश्लेषणमग्रे सद्धर्मफलश्रवणानिरूपणप्रसङ्गे धर्मलक्षणाचरणे प्रवृत्तिं सम्पादयता धर्मसमुच्चयकर्त्रा उक्तम् -- सम्यग् ज्ञानेन क्लेशवृन्ददाहे सति अनासक्तिपूर्वकं कर्म कुर्वत: न कदापि बन्धो जायते। अत: श्रुत: पर: ब्रह्मोपासनतत्पर: सद्धर्मशील: जरामरणशून्यतैव अपितु दु:खविमुक्तिपूर्वक: श्रेयसम्प्राप्तिरपि संभाव्यते। अत: विवेकेन सद्बुद्धिकाम: ज्ञानाग्निदग्धकर्मबन्धनानुरूपाचरणेन विवेकपूर्वकस्य धर्मस्य कर्तव्यता सूचिता। सद्धर्म: यदि नष्टो भवति तदा पापै: आबद्ध: सर्वथा विफलजीवन: जन्ममरणरूपभवपरम्पराबद्ध: एव तिष्ठति। अत: धर्मनाश: कदापि सद्बुद्धिकामिना अभ्युदयाय जायते[१]।

सद्धर्मश्रवणानन्तरं यदि तदनुकूलाचरणे प्रवृत्तो न भवति तदा अन्येषां जनानां सद्भावेऽपि सद्धर्मधननाश: नितरामेव जायते। एतादृशस्य गुरुत्वशून्यस्य असद्धर्माचरणेन पापाक्रान्तस्य सर्वाऽपि क्रिया व्यर्था जीवनञ्च व्यर्थमेव। यत: प्रत्यहं पापाचाररतस्य तस्य प्रमादयुक्तस्य ऊसरभूमौ उप्तं बीजमिव जातमपि जीवनं निष्फलमेव भवति। अत: श्रुतार्थदृष्टि: अपेक्षिता यथा सद्धर्माचरणे प्रवृत्तस्य अन्यथा सद्गुरुश्रवणविमुक्तदृष्टि: चक्षुर्भ्यां विनिर्मुक्तं जीवनं यथा निष्फलं तथैव तज्जीवनमपि दृष्टिरहितं संजातम्। वस्तुत: अधर्माचरणं व्याधिसेवनमेव यथा व्याधे: निवारणाय औषधादीनां आवश्यकता एव मेव अधर्मानुष्ठाननिवृत्त्यै सद्धर्माचरणमकामेनाऽपि सद्धर्म: अनुष्ठेय:। तदैव जीवनस्य साफल्यं स्यात्। एतस्यैव विषयस्य विशिष्टप्रसन्नाधर्मोपदेशाख्यौ द्वितीयोवर्गौ कृता:। धर्मानुसारिणा सदैव सुखावहा दुर्गति

१- "किन्तु विद्यापरिप्राप्तौ हेतु: कर्म न संशय:"।।

(भा० पु० ६५।१६)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निवार्य प्रदीपकल्पेव महद्बलं जायन्ते । तस्मात् सुखार्थिभिर्जनैः सद्धर्मोऽनुष्ठेयः। प्रमादमदमत्ताः असद्धर्माचरणरता पुनः पुनः जन्ममरणमेव अनुभवन्ति न कदापि शान्तं निर्वाणं अखेदजनकं सम्यग्ज्ञानपुरःसरम् उपैतीति जीवनसाफल्याय सद्धर्माचरणमेवकरणीयम् ।

धर्मसमुच्चयस्य तृतीयवर्गः कायजुगुप्साख्यः वर्तते । वासनासरित् लोके शुभाशुभाभ्यां प्रवहति । अशुभमार्गेण प्रवहमानासीत् शय्यासनादिभिः कामोपभोगैः कायिकसुखेव जीवनं यापयति । विषयासक्तः कामोन्मुखो जायते कायस्यैव सर्वथा प्राधान्यात् दाक्षिण्यस्य कायिकसुखस्य सर्वस्वं मन्यमानः गृहदारादिभोगैः धनादीनां संगृहीत्वा जीवनं यापयति । तथा च असद्धर्माचरणरतः सन् गमनागमन पर एव संतिष्ठते । तेन च सद्धर्माचरणरतोः कायस्य हितं कामयमानः आत्मनः वैचक्षण्यं प्रदर्शयन् वृथैव जीवनं निष्फलं करोति उक्तञ्च शास्त्रकारैः योगवासिष्ठे --

द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च ते ।
प्राक्तनो विद्यते राम द्वयोरेकतरोऽथ वा ॥

किं धर्माधर्मावुभावपि त्वां नियोजयत उतैकतः इति विकल्पः एकतरपक्षोऽपि शुभोऽशुभो वेत्यर्थात्सिद्धो विकल्पः।

वासनौघेन शुद्धेन तत्र चेदद्य नीयसे ।
तत्क्रमेणाऽऽशु तेनैव पदं प्राप्स्यसि शाश्वतम् ।

तत्र तेषु पक्षेषु । ततस्तर्हि तेनैव क्रमेण शुभवासनाप्राप्तिरतेनैवाऽऽचरणेन प्रयत्नान्तरनिरपेक्षेण शाश्वतं पदं मोक्षम् ।

अथ चेदशुभो भावस्त्वां योजयति संकटे ।
प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता स्वयम् ॥

भावो वासना । तर्हि यत्नोऽशुभविरोधिशास्त्रीयधर्मानुष्ठानं तेन स्वयं जेतव्यः न तु युद्धे मृत्युमेकेनैव पुरुषान्तरमुखेन जेतुं शक्यः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ।
पौरुषेण प्रयत्नेन योजनीया शुभे पथि: ।।

शुभमार्गस्य प्रयत्नैरपेक्ष्यैऽप्यशुभमार्गं शास्त्रीयप्रयत्नेन निवार्य शुभमेव तस्य स्थाने समाचरेत् । अशुभेषु परस्त्रीद्रव्यादिषु । शुभेषु शास्त्रार्थदेवताध्यानादिषु । पुरुषार्थेन पुरुषयत्नेन प्रबलेन । यथा शिशुर्दुष्कर्माणान्निवार्य कर्मणो योज्यते माणिमुक्ताकर्षणान्निवार्य कन्दुकाद्याकर्षणे योज्यते तथा चित्तमपि सत्सङ्गेन दुःसङ्गाचरितपरीतविषयान्निवारयितुं शक्यम् । रोगशोकपरितापबन्धनव्यसनमलमूत्रादिशरीरं कायशब्देनोच्यते । धर्मसमुच्चयेऽपि कायस्य स्वरूपं प्रदर्शयता उक्तम् बहुना रोगाद्यनर्थानां भाजनं अशुच्यङ्गस्य निकरं कायशब्देनोच्यते श्लोक ३।३ । तत्त्वज्ञानिभि: मरणस्य कायायत्तत्वम् तथा च जीवितस्य च क्षणादूर्ध्वं स्थिति स्यान्नवेति मरणं सदा उपस्थितमेव। अतएव कालिदासेनोक्तम् मरणं प्रकृति: स्वभावा । कर्मविभोगार्थमेव आयुषा: प्राप्ति: अनन्तरं काष्ठलोष्टसमं चैतन्यशून्यजातितले सर्वजनहेयं शरीरं तिष्ठति । दृश्यते लोके यौवनादिमदै: मुग्धा: पुरुषा: लोककल्याणभावनां सद्धर्माचरणं च परित्यज्य धनधान्यमदैर्मत्ता: आत्मन: अहितमाचरन्त: पापाविद्धा: औषधं संप्राप्य नाशमभ्युपैति । एतदेव दृष्ट्वा कदाचित् गौतम: संसाराद्विनिवृत्त: कायमलत्वं परित्यज्य सद्धर्माचरणेन निर्वाणपुरगामिकं तत्त्वं मनुष्यस्य कृते धार्मिक: सद्धर्ममार्ग: प्रकाशित:। अधर्माचरणस्य च हेयता प्रतिपादिता । सद्धर्माचारी पुरुष एव ज्ञानतरणि: समुत्कृष्य मानवीयं अत्युत्कृष्टं श्रेयसामालयं प्राप्नोति । गन्धर्वनगरोपमं क्षणभङ्गुरं चपलं असारं जरामरणादियुतं शरीरं प्राप्यापि न तत्र मदो भवति । शुभाशुभानां क्षेत्रं दु:खानामालयमिदं शरीरम् । एतस्य शरीरस्य साफल्यं तदैवसंभाव्यते यदा ज्ञानशीलदयादानै: सफलं शरीरं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सद्धर्मालङ्कृतं भवति ।अतएव अनर्थं अनित्यं दुःखावहं दोषमूलं इदं शरीरं संप्राप्य ध्यानाभ्यसनैर्बलात् क्लेशसमूहान् निःसारयेत् क्षणदार्णं ज्ञात्वा शरीरजां धातुं समवेत्य मोक्षमार्गं अनुसरति सद्धर्माचरणेन इत्येव बुद्धिसारांशः ।

चतुर्थःवर्गःपारवतार्ख्यः वर्तते । तत्र यो हि पुरुषः इन्द्रियशमने दमने च निरपेक्षः वर्तते, असौ इन्द्रियपरवशः सन् काममोहितचित्तः अशुभेषु कार्येष्वेव सततं आबद्धो भवति। कामातानां न कामः कदाचिदपि उपभोगेन न शाम्यति। चञ्चलेन्द्रियचित्तस्य कामतृष्णया तृषितस्य तदा कामोपभोगेव कालः परिवर्धते। अनित्यवस्तुषु देहिनः दारिद्र्यसुखे सुखाभिर्वित्तं सुखं कामयमानः। स्त्रीदर्शनेव कालः परिवर्धते। कालः न प्रतीयते अपितु मोहितस्य तृष्णया जातिमरणपरम्पराबद्धस्य जनस्य अयं कालः परिवर्धते। लाभैः सदा अतृप्तमनसः शान्तिसुखरहितस्य जनस्य सर्वथा दुःखोपहतस्य जनस्य कालः परिवर्धते । सततं शरीरमेव आत्मेति-मन्यमानस्य जनस्य औद्धत्यप्रवृत्तस्य गात्रशोभायामेव दत्तचित्तस्य लाभैः अतृप्तस्य सदा कालः परिवर्तते। एतादृशः कालाबद्धस्य रूप-वेदना-विज्ञान-संज्ञा संस्काराख्य पंचस्कन्धबद्धस्य पंचेन्द्रियविषये भोगरतस्य चित्तसंयुक्तं बाह्यभिः व्यामुग्धस्य कार्याकार्यविवेकशून्यस्य विनिपातानभिज्ञस्य आसक्तमनसः प्रतिदारं विनिपातः पदे-पदे जायते इत्यत्र नास्ति कश्चित् सन्देहः। प्राक्तनं वासनाजालं असत्ये कर्मणि नियोजयति श्रेयसः प्रच्यावयति । नात्र संदेहः यत् देहासक्तिः अशुभे मार्गे एव प्रेरयति। यदि मनुष्यः अनासक्तो भवति तदा सत्यपि देहेन्द्रियादिव्यवहारे तत् प्रत्यावृत्त्यभावात् भावितसंसारबीजं अस्तमायाति। पूजन-वन्दन सत्कारादि सुखे प्राप्तेऽपि संसारिनः कायासक्तस्य इव हर्षानोदेति। न च दैन्यमनुभवति। धनहानिधिक्कारादिदुःखे सम्प्राप्तेऽपि न दीनो भवति।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देहाद्यासक्तिशून्यत्वात् विवेकादहराहित्यात् हर्षादिराहित्यं नूनं एव उत्पद्यते । सुषुप्त्यवस्थोऽपि तदा अवबुद्ध इव तिष्ठति। रागद्वेष - भयादीनां अनूपं वरणान्यपि अनन्तर व्योमवद् अस्पृष्टः निर्दोषस्वभावत्वात् सततं मैत्री करुणामुदितोपेक्षादिभावविशिष्ट्यात् सुखमनुभवति। आसक्तिशून्यत्वात् कर्तृत्वराहित्यं अहंकारशून्यत्वं शान्तसंस्कारकलनः कुर्वाणोऽपि निष्कलः संश्चलोऽपि निश्चलः संतिष्ठते। एतादृशः शीलसम्पन्नः पुरुषः औद्धत्यादिरहितः जायते ।तेन च न लोकः उद्विजते न च लोकादसौ उद्विजते । कर्मजालेन कदापि आबद्धः वासनावशात् सत्पथः न परिभ्रष्टो जायते । कार्मिकपाशबद्धस्य इन्द्रियादिवासनासम्बद्धस्य सत्पथात् भ्रान्तिः जायते। तेन च हिताहित कार्याकार्यस्य शरीरानुकूलतां संचिन्तयन् नदीप्रवाह इव संसारप्रवाहे प्रवहति। अतः परं सौख्यं यदि अभिलषितं तदा शुभेषु रत्नाकरवनेषु प्रवेश एव श्रेयान् । यदि कामर्मोहिताः जनाः [redacted] जायन्ते, तदा सर्वदा दोषैः आबद्धाः मृत्युना क्रोडस्थभागाः तिष्ठन्ति । तृष्णाग्निदग्धाः कामर्मोहिताः सदा स्त्रीजनासक्तहृदया कदाचित् विप्रयोगकृतं दुःखमनुभवन्ति ।कदाचित् च विपत्तिव्याधिशोकेभ्यः उद्विग्नाः तिष्ठन्ति ।सद्धर्माचरणाः तत्त्वज्ञानिनः सर्वभूतहितेरता भवन्ति। शुभकार्याण्येव सेवन्ते। यथा शूलिकेन बद्धाः पशवः गृहपञ्जरे एवं विनश्यन्ति तथैव कामिनामपि स्थितिः जायते । वासनापरिबद्धाः मरणमपि नावगच्छन्ति ।तस्मात् यदि गतकल्मषैः शान्तिः अपेक्षिता, तदा मनसः अप्रमादकरस्य वासनाशून्यत्वं नितान्तमपेक्षितम् । मृत्योः स्मरणं अशुभानां परिवर्जनं पञ्चस्कन्धेषु अनासक्तिः सद्धर्माचरणे विवेकबुद्धिः कायादिषु ममत्वाभिमानशून्यत्वं श्रेयसे जायते। अन्यथा विप्रयोगान्तं संयोगं स्मारं स्मारं सदा असत्पथाचारिनः मूढाः धर्मविरहिता मृत्युमुखे गच्छन्ति। अतः सत्पथाचरणं सद्धर्मबुद्ध्या सततमनुष्ठेयम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पंचम: अनित्यतावर्ग: वर्तते । अस्मिन् वर्गे सर्वेषां कार्यजातानां तद्जन्यसुखादानाञ्च अनित्यत्वं क्षणिकत्वं प्रतिपादितम्। आत्मन: वास्तविकसुखं कामयमानानां जनानां कृते सांसारिकस्य क्षणिकसुखस्य परित्याग: नितान्तमपेक्षित:। पूर्ववर्गेन संसारचरितचर्वं अभ्यासेन अरीभूतं महद्दु:खाय कल्पते इति संसारादनासक्तिरेव सुखसाधनम् । सकलस्य कार्यजातस्य मृत्यु: अवश्यम्भावी। इयमेव प्रतीति: बौद्धानां यत्सत् तत् क्षणिकं यथा जलधरा: सन्तश्च भावा अमी इत्यादि बौद्धसिद्धान्तानुरागिभि: स्पष्टमुद्घोषितम् । अत: संसृतिजन्यं सुखं परित्यज्य सद्धर्माचरणपूर्वकं आत्मसुखस्य प्राप्तिरेव श्रेयसे उद्घोषिता। वस्तूनां अनित्यत्वप्रतिपादनेन तत्र नास्तिकता: नूनमायाति तथा च प्रसङ्गायचं प्रतिपादयति। अस्मिन् परिवर्ते क्षयान्तं हि सुखं सर्वम् उपसंहरति च अलिप्त: पापधर्मै: न स गच्छति दुर्गतिम्। उपक्रमोपसंहारयो एकवाक्यत्वनियमात् तद्वशादेव वस्तुतात्पर्यनिर्णयात् लौकिकसुखप्राप्ति चेष्टा निवृत्ति-पूर्वकं पारमार्थिकस्य आत्मसुखस्य प्राप्तये एव काचित् चेष्टा मानवै: करणीयेति प्रतिपादयति ।

कामस्य त्रैविध्यं प्रतिपादयता आचार्येणोक्तम् -- कामास्त्रिविधा: बाह्या आन्तरा वासनात्मकाश्चेति । उपार्जितमोदकादयो बाह्या: आशामोदकादय आन्तरा: पथिगततृणादिवदापातत: प्रतीता वासनात्मकाश्च । समाहितोऽशेषवृत्तिक्षयात्सर्वान्परित्यजति ।अस्ति चास्य मुखप्रसादलिङ्गगम्य:सन्तोष:। स च न कामेषु किं त्वात्मन्येव कामानां त्यक्तत्वात्। बुद्धे:परमानन्दरूपेणाऽऽत्माभिमुखत्वाच्च । न चात्र सम्प्रज्ञातसमाधिं विनाऽऽत्मानन्दो मनोवृत्त्योल्लिख्यते, किन्तु स्वप्रकाशचिद्रूपेणाऽऽत्मना। सन्तोषश्च न वृत्तिरूप: किन्तु तत्संस्काररूप:। एवं विधैर्लक्षणवाचकै: शब्दै: समाहितो भाष्यते ।अत एव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गीतायामुक्तम् मनोगतानां सर्वेषां कामानां परित्यागेन मनुष्य: सर्वथा असंतप्त: सन्तुष्ट: सन् स्थितप्रज्ञ: जायते[१]। दु:खं हि रागद्वेष वशादेव जायते । रजोगुणविकारात्मिका सन्तापरूपा या प्रतिकूला-चित्तवृत्तिरेव दु:खं प्रतिकूलवेदनीयत्वमेव दु:खस्य लक्षणम् । यदा हि रजोगुणात्मकं दु:खं जायते तदा तमोगुणविकारात्मिकाया: भ्रान्ति-रूपाया: चित्तवृत्तेरुदेन अहं पापीमानदुरात्ममानं धिक् इति उद्वेगा-त्मिका जायते । एवमेव प्राप्तकर्मप्राप्तित्वात् भोगादपि उद्वेग: जायते। तस्मात् कामपरित्याग: नितान्तमपेक्षित:। अस्मिन् सर्गे लौकिक-विषयानामासक्तिरेव दु:खाय तस्यैव च विश्लेषणं महतासंरम्भेण कृतम् । यथा सुखास्वाद: अनित्य: परं वञ्चक: कामवशात् प्राप्त: सन् दु:खायैव कल्पते । पुण्यादीनां देवलोकप्राप्तावपि यदा तत: पतति तदा मरणान्तं दु:खं जायते। तच्चदु:खं नरकजन्य दु:खात् महत्तरम् । अत एव यथा दायान्तस्य कामनावशात् प्राप्तस्य राज्यवृक्षरूपस्य दु:खस्य हेयत्वं तथैव दायान्तस्य फलान्तस्य श्रेयसे कृतस्य कर्मणोऽपि हेयत्वमेव। अतएव सकलस्य समुच्छ्रयस्य नितान्तं नाश: जायते, इति काम: सर्वथा हेय एव। फल:तस्य अनित्यत्वं अध्रुवत्वं चेति। एतस्य विषयस्य बहुभि: उदाहरणै: अस्मिन् वर्गे निदर्शनं कृतं दिग्दर्शनमात्रमत्र क्रियते, यथाहि धर्मसमुच्चये- ५।१६-२०-२१-२३। अत एव प्रज्ञाया: प्रतिष्ठार्थं राजस-वृत्तीनां तामसवृत्तीनां च निरोध: अपेक्षित: तेन च निस्पृह: स्थितप्रज्ञ: सन्तुष्टस्य तिष्ठति। अन्यदपि, हान्यवृद्धि: स्वस्मिन् आरोप्य तामसवृत्तिविशेषस्नेहात्मनि आरोप्य गुण कथनं प्ररोचनार्थमेव । अत: पुण्यात्मके अपुण्यात्मके च कर्मणि राग:द्वेषश्च सर्वथा अनपेक्षितावेव।

१- प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्ट: स्थितप्रज्ञस्तदोच्यते।। (गीता२।५५)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि उभयोरपि अनभिस्नेहः तत् प्रारब्धवशात् तत् प्राप्यानन्तरमपि शुभाशुभं प्रति नाभिनन्दति न द्वेष्टि स एव लोके सद्धर्माचारी भवति।

बुद्धस्य गतिमस्य या प्रवृत्तिर्भवति साधनायां तत्राऽपि कर्णपाशस्य इव बन्धनं जराव्याध्यादिकं आदायैव जायते। तस्यापि निर्देशः अस्मिन् वर्गे विहित एव। यथा हि कर्णपाशो जरादण्डो व्याधिदण्डो महावनं इत्यादयः। अनन्तरं पुण्यवशात् दिव्यलोकस्य दिव्यसुखस्य प्राप्तावपि क्षीणे पुण्ये दैन्यदारवर्जितत्वञ्च स्वाभाविकमेव। तस्मात् सद्धर्मैव प्रवृत्तिः सुखावहा। मायाबुद्बुदफेनाभं गन्धर्वनगरोपमं सर्वं लोकं मत्वा काममोहं परित्यज्य सद्धर्मेऽभिरुचिः करणीया। तृष्णा विषाग्निदाया लोकाः सुखमश्नुवते। कामभोगैः कदापि तृप्तिः न संभाव्यते। तृष्णा काम-विमोहिता देवा अपि कालवशमागताः नरके निपतन्ति। कालपाशं सर्वथा त्रैधातुकं दुःखाय एव। तृष्णामोहविवशाः कालाशनि निर्दग्धाः विषय-घवसंग्रहाः संतृप्ताः प्रमादकलुष्यपुण्यचित्ताः यदा कालवशात् मृत्युमुखं प्रविशन्ति, तदा लोलुपानां तेषां तृष्णानैव रक्षिका भवति। जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्य च इत्यपि गीतावचनवत् विशदविवेचनं अस्मिनवर्गे कृतमाचार्येण। परन्तु तृष्णायाः एव प्राधान्यं तस्मात् तृष्णापरित्यागेव सद्धर्माचरणं सम्भाव्यते। वस्तुतः अश्वघोषेणाप्युक्तम् - स्नेहच्छायात् केवलमेति शान्तिम् बुद्धेन लोके नाशसंरक्षिका इयमेव धार्मिका सम्यक् देशिता। तस्य निदर्शने बहवः श्लोकाः अत्र सन्निबद्धाः। तत्र हि उक्तम् जन्मजाते मृत्युरवश्यं भवति सुकृतं कर्मदीयते आयुषि क्षणिकान् सर्वं यौवनं नश्वरं न च नित्यः स्वर्गः केनापि उपलभ्यते। अपितु ततः प्रच्यवते एव सुरापि तत्र प्रमादमदमोहिता उत्पद्यते फेनबुद्बुदसन्निभा विनश्यन्ति। सर्वं शान्तिमेव सुखदुःखादिकं न जानन्ति मूढाः, मृत्युरहस्यं कदा प्राप्स्यंति। सन्निहिते मृत्यौ न स्त्रियः न बान्धवाः साहाय्यमाचरन्ति, यथा वायुना समुदीरिता जलदा आयान्ति-यान्ति कलौ-कलौ पुष्पाणि फलन्ति आयान्ति प्रतियान्ति च।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न स्थायित्वस्तु। अपितु प्राणाशकेः एव उत्पत्तिः । परम्परादुःखस्य अपरिहार्याः उक्तं तेन जातिः दुःखाय जरादुःखाय मरणादुःखाय प्रिय-विश्लेषोऽपि दुःखाय । एवञ्च फलमवलोक्यापि लोकाः नोद्विजन्ते इति अपूर्वमेव मोहमाहात्म्यम् ।प्रमादिनपुरुषाः तृष्णाया मोहपाशा-बद्धाः दुःखप्रतिकाराय सन्द्धा क्षणिकसुखावाप्तये च सततं मोहान्धाः सन्ति। इमं लोकं प्राप्यकृतस्य कर्मणः अचिरेणैव कालेन स्मारयिष्यति। सुखविहारिणं मृत्युराजः पृतहुतं चलनदाणिकं जीवितञ्च विनाश्येत् । अतः दुःखाद्भयं मृत्योर्भयं चाकलय्यानित्यं सुखं परित्यज्य सद्धर्मे रतिः क्रियते एव। स्त्रीभवतु पुरुषो वा प्रव्राजी भवतु गृहस्थो वा जलेतिष्ठतु स्थले वा कुलीनः दुष्कुलीनो वा सुरूपः विरूपो वा कठोरमृदुलो वा धनिकः निर्धनो वा सगुणः निर्गुणो वा कस्मिन्नपि स्थाने तिष्ठतु मृत्युराजः कदापि न मुञ्चति। अतः न कालः वृथैव कलनीयः अपितु चलाचलविधिं परिज्ञाय तत्त्वदर्शिः पापैः धर्मैः असङ्गलिप्तैः स्थिरधीः स्थितप्रज्ञः सन्। तृष्णादि मोहरहितः सद्धर्मे रतिः कुर्यात् ।अत एव रत्नावल्यां नागार्जुनेन् उक्तम् --' धर्म एव सर्वथा कल्याणकरः ।सद्धर्म-भाजने एव सिद्धिःसंभाव्यते धर्माभ्युदयानन्तरमेव नः श्रेयसोदयः भवति । यतःविना धर्माभ्युदयं कल्याणस्य प्राप्तिः न कथमपि संभाव्यते ।सुखस्य अभ्युदयफलत्वं मोक्षस्य न श्रेयसफलत्वम् । धर्माचरणे श्रद्धायाः तत्त्वावेदने च प्रज्ञाया एव प्राधान्यम् । अतः श्रेयः वै सम्पत्तये द्वेषात् भयात् मोहात् पारवश्यात् वा धर्मातिक्रमणं कदापि न कर्तव्यम् । सम्यक् परीक्ष्य परा-त्महितं च विज्ञाय शारीरिकं वाचिकं मानसिकं च कर्म कुर्यात् ।अहिंसायाः चौर्यविरते परदाराराहित्यस्य मिथ्या च पैशुन्यञ्च पारुष्यावद्यस्य महत्तायाश्चेन संयमः करणीयः लोभद्रोह परित्यागःनास्तिकस्य दृष्टि-परिवर्जनञ्च सद्धर्मपरिवर्जनं च उज्ज्वलकर्मणां मार्गः आश्रयणीयः । एतद्विपरीतकाः दशदोषाः सन्ति। यस्य च कृष्णफलत्वं तथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हिंसादय:। मद्यपानपरित्याग: सम्यगाजीवननिर्वाह: अनिर्दयत्वं सादरं दानं पूज्यजनसत्कार: मैत्रीभावश्च सद्धर्म: उच्यते। केवलात् शरीरतापनात् धर्मो भवति इति मिथ्या कथा, अपितु स्कन्धादि सापेक्षा वस्तुभि: सह द्वेषाभावस्य सर्वथा परित्याग: कृपादृष्टिश्च धर्मस्य मूलं तत्त्वम्। दानं शीलक्षमादिकमेव बौद्धधर्मस्य सद्धर्म:। रत्नत्रयेण एतेषां एव यत्र तत्र परिशीलनं कृतं आचार्यै: एतद् दानादिकं परित्यज्य कायक्लेशग: मार्ग: सर्वथा अनादरणीय एव। एतद् विरुद्धाचरणं श्रेयसे कामयमाना: घोरान् संसाराटवीं अनन्तअपादपां क्लेशव्यालसमवलीढां संसेवन्ते चेत् जरामरणजात्यादिभि: क्लेशै: पीड्यमाना: जीवनमापयन्ति। रत्नावल्या: आदित: एकादशश्लोकपर्यन्तं एतस्य विषयस्य विश्लेषणं कृतमाचार्येण तस्यैव उपविद्धानां धर्मसमुच्चये विभिन्नै: परिवर्तै: कृतम् यस्य केचनांशा: समोद्धिता:।

अस्मिन्वर्गे सर्वस्य वासनावशप्राप्तस्य दु:खप्रदत्वं विनिवेदितम्। भूतानां कथञ्चित्सुलाभो भवति तथापि विनिपात: अवश्यम्भावी यत: जलदरङ्ग चञ्चलमेव जीवितं तदा कथमिव वासनावशप्राप्तस्य वस्तुन: नित्यत्वं स्यात्। देवा भवतु, नागा भवतु, गन्धर्वा वा भवन्तु सर्वस्य कर्मण: क्षणिकत्वं अन्ते च दुर्गति: एव। अत: वासनाया: परित्याग: सर्वथा अपेक्षित:।

षष्टेवर्गे च प्रमादतरस्य जनस्य मोक्षप्राप्ति: सर्वथा सुदुर्लभा। प्रमादस्य सर्वथा हेयत्वं अस्मिन्वर्गे संसूचितम्। वह्नेरिव विषस्य इव प्रमादोन्मादिता दु:खाय प्रभवति। अप्रमत्ता: मर्त्त्या: संस्कृता: परमां शान्तिं प्रयान्ति। प्रमादस्य विपाकपत्वात् अमृतकाम: प्रमादं परित्यज्येत्। प्रमादकपाग्नि: हर्षं दहति विषयैर्मोहिता: प्रमादवशात् दु:खमपि कामैमाना: नरकं व्रजन्ति। प्रमादेन कदाचित् सुखप्राप्ति: न संभाव्यते। प्रमादविरता: एव जना: अच्युतं स्थानं प्राप्नुवन्ति।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादवशादेव च प्राणाशुभकर्माणः देवलोकादपि पतन्ति। तस्मात् प्रमादस्य चंचलां तीव्रां गतिं विलोक्य नित्यं सुचरितैः भाव्यम्। संसारो हि प्रमादमूल एव। तस्मात् प्रमादवशात् संसारे दुःखसागरे मज्जन्ति निमज्जन्ति च। चलं हि सुखं, संयोगः वियोगान्तः, सुखं पतनान्तं, यौवनं जरान्तम्, अतः शुभाशुभेन कर्मणा बद्धाः देहिनः संसारे भ्रमन्ति। तस्मात् प्रमादस्य परं दोषाकरत्वं विभाव्य प्रमादपरित्यागः सर्वथैव करणीयः। दुर्लभं मानुषं जन्मसंप्राप्य प्रमादवशात् सुकृतकर्मच्युताः भवन्ति। अन्यथा नरके वासः सुनिश्चितः, पुनःपुनः संसारे आगमनमपि सुनिश्चितं एव। अतः प्रमादरहितैः पुरुषार्थः मोक्षप्राप्तिमूलकः बन्धनच्छेदकः सेवनीयः। यथा यथा सद्धर्मेषु विरागः निर्वाणे च प्रवृत्तिः तथा तथा विमलज्ञानं जायते। प्रमादो हि मद्यपानादपि सुदुष्करं दुःखमूलस्य [illegible] मूलं आहार-मैथुनादिकं यथा आकीटपतंगादिनां तथैव इयं प्रवृत्तिः स्वाभाविकी एव। प्रमादादेव देवा अपि सुखसाधनात् विरताः कैवल्यविरहिताः भवन्ति। न च प्रमादिनः मदेनमोहिता ध्यानतत्पराः भवन्ति, न वा अशुभवासनां परित्यजन्ति, न वा धर्मचारिणः भवन्ति। फलतः प्रमादः विनिपाताय नरकाय एव जायते। प्रमादोपहतामूढाः दुर्गतिपरम्परां प्राप्याऽपि नृत्यन्ति हसन्ति च, नखेदमाप्नुवन्ति। व्याधिं जरां मृत्युञ्च पश्यन्तोऽपि प्रमादवशात् न पश्यन्ति। चापल्यादिकमेव प्रमादस्य अङ्कुरं, दुःखञ्च ततः उत्पद्यते, दुर्गतिश्च प्राप्यते। तस्मात् प्रमादः न निःश्रेयसे न वा अभ्युदयाय इति प्रमादः सद्धर्मानुरागिभिः सर्वथैव हेयः। ते नैव च लोकसिद्धिमाप्तुं समर्थाः भवन्ति इति। अस्मिन् वर्गे प्रमादस्य हेयता प्रतिपादनाय बहवः दृष्टान्ताः प्रदर्शिताः, प्रमादस्य हेयत्वं च समर्थितम् इति।

सद्धर्मे यदि अभिरुचिर्नजायते तदा मनुष्यः प्रमादी भवति। प्रमत्तः सन् विषयकांक्षां कुर्वन्ति, विषयासक्तिवशात् कामेषु मतिर्जायते। कामश्च बन्धनस्य परं कोटिमाप्नयते। घोरनरकयातनासाधनभूतः काम एव

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यत्र नास्ति, तेषामपि विप्रतिपत्तिः । कामोरगदष्टः कदापि सुखं नाश्नाति, निशितधारेण क्षुरेण स्वकमात्मघातं कर्तुं सततमुद्यतास्तिष्ठति । बौद्धधर्मसाहित्येषु विघ्नोत्पादकः काम एव मारनाम्ना तत् साहित्येषु एतस्य परिचयो विद्यते । अन्य साहित्येषु काम एव अधिपतिः बोधिसत्त्वः सद्धर्मतत्परः यदा बुद्धत्वप्राप्तौ सर्वथा सन्निहितो भवति, तदा मार एव विघ्नाय उदितो भवति । अतः मारोपरि विजय सिद्धिलाभाय समवेदितः। रूपस्य साफल्याय त्रिवर्गनिसेवनमेवावश्यकम्[1] यदा वैराग्यं भवति तदा धर्ममाप्तुं कामपरित्यागः नूनमपेक्षितः। युवावस्थैव कामावस्था अस्यामवस्थायां न कोऽपि इन्द्रियेभ्यो रक्षां कर्तुं समर्थो भवति। "कामस्य पूर्वं हि वयः सत्यं न शक्यरक्षितुं इन्द्रियेभ्यः" राजगृहस्य तपोभिरामे एका देवकन्या स्थविरं प्रति कथयति--

"अभुत्वा भिक्खसि भिक्खु । न हि भुत्वा न भिक्खसि ।
भुत्वा न भिक्खु । मा तं कालो उपच्चगा[2] ।।"

बुद्धेनापि तम्-- वार्धक्यस्य मृत्योश्च भयमवगत्य ज्ञातिजनान् परित्यज्य सद्धर्मशरणं प्राप्तवान्। विषधरेभ्यः आकाशपतितवज्रेभ्यः वायुमिश्रिताग्निभ्यः न तथा बिभेमि यथा विषयेभ्यः। अनित्यो हि कामः ज्ञानरूपी धनस्य तस्करः मायासदृशः मानवहृदयं मोहेन पातयति न कदाचिदपि कामेन तृप्तिर्जायते। वल्कलधारी कन्दमूलफलाहारी भुजङ्गसदृश[3]लम्बायमानजटाधारी तपस्वी जनोऽपि कामासक्तः गर्ते पतति ।

१- तस्मात्त्रिवर्गस्य निषेवणेन त्वं रूपमेतत्सफलं कुरुष्व ।
धर्मार्थकामाधिगमं ह्यनूनं नृणामनूनं पुरुषार्थमाहुः।। (बु० च० ४।३०)

२- सं० नि० जा०

३- नाशीविषेभ्योऽपि तथा बिभेमि नैवाशनिभ्यो गगनाच्च्युतेभ्यः।
न पावकेभ्योऽनिलसंहितेभ्यो यथा भयं मे विषयेभ्य एभ्यः।। (बु० च० ११।८)
चीराम्बरा मूलफलाम्बुभक्षा जटा वहन्तोऽपि भुजङ्गदीर्घाः।
यैर्नान्यकार्या मुनयोऽपि भग्नाः कः कामसंज्ञान् मृगयेत शत्रून्।।
(बु० च० ११।१७)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कामाग्निरेव विपत्तिमूलभूत:। मदोन्मत्त: पुरुष: नष्टाङ्गतिमाप्नोति। एवमेव बहव: दोषा: कामस्य प्रदर्शिता यै: शास्त्रे यत्कामवशात् निपति-तस्य जनस्य शतधा विनिपातो भवति। कदाचित्तुब्रह्मचर्यव्रतो तपोनिष्ठ: कुमार: मारमवोचत्। रे प्रमत्तबन्धो पापिन् ! किमर्थमागच्छति नेच्छामि पुण्यं श्रद्धा प्रज्ञा सद्धर्म एव ममाहितकारी दाराणोऽपि मान्सेविच: शान्तो भवति सद्धर्माचरणेन कदाचिदपि कामापेक्षा न भवति यथोक्तं पालि-त्रिपिटके प्रधानसुत्तनिपाते --

पमत्त बन्धुपापिमयेनत्थेन इधागतो ।
नदीनमपि सोतानि अयं वातो विसोसये।।
किं च मे पहितत्तस्स लोहितं नूपसस्सये ७।।९।।

लोहिते सुस्समानम्हि पित्त सेम्हं च सुस्सति।
मंसेसु खीयमानेसु भिय्यो चित्तं पसीदति ।
भिय्यो सति च पञ्ञा च समाधि मम तिट्ठति।।१०।।

कामस्य सेनायां अरति:,क्षुत्पिपासा, तृष्णा,स्त्यानं मृद्धि-भीरुत्वं विचिकित्सा,माया स्तम्भ: इत्यादय: सन्ति ।गुणानां अवज्ञैव कामस्य मुख्यमुद्देश्यं कामासक्तेरपेक्षाया मरणमेव श्रेय: प्रज्ञैव काम-विजय: संभाव्यते । प्रज्ञैव सुप्रतिष्ठिता, अप्रमत्त: सन् लोके कल्याण-मश्नुते । सद्धर्माचारिणां समीपे काम: कदापि नागन्तुं शक्नोति । अत एव धर्मसमुच्चयेऽपि बहूनी उदाहरणानि प्रदर्शितानि कामस्य परि-त्यागाय यत्न: करणीय इति उक्तम् पालित्रिपिटके प्रधानसुत्तनिपाते--

ये ते तं न प्पसहन्ति सेनं लोको सदेवको ।
तं ते पञ्ञाय गच्छामि आमं पत्तं व अस्मना।।९।।

अकामस्स ते गामिस्सन्ति यत्थगन्त्वा न सोचरे।।२१।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदा मनुष्यः सदा पाषाणवत् सुदृढो भवति, तदा काकादिवत् मारः किमपि कर्तुं न प्रभवति। अन्ते उदासीनः विफलः प्रयासः शोकापन्नः अप्रमत्तजनं परित्यज्य प्रमादयुक्तं पुरुषमाप्नोति ।वस्तुतः कामस्य तादृशी शक्तिः विद्यते यद्वशात् सर्वोऽपि तदनुकूलाचरणे प्रवृत्तो भवति, यदा मानवः दृढव्रती, तपस्वी बोधिसत्त्वावस्थां प्राप्नोति, तदा [redacted] कामस्य भीतिः न भवति। यदि कामानुगः पुरुषो भवति, तदा नूनमेव पदे पदे विनिपातः जायते, दुःखञ्चानुभवति । सद्धर्मशून्यस्य जायते अतएव अत्र उक्तम् इन्द्रियाणि मोहयित्वा नरके पातयति, वह्निः दूरात् न दाहकः,परन्तु रागाग्निः संकल्पवशादेव दाहं जनयति । यथा यथा रागाग्निर्ज्वलति तथा तथा दुःखाकुलो जायते। कामसेवनात् नरके पातः सुनिश्चितैव। तस्मात् सुखार्थिभिः सदा कामः परित्यक्तव्यः सद्धर्मश्च आचरणीयः, कामयमानां कदापि तृप्तिर्नभवति। पुनः पुनः सेव्यमानः कामः प्रवर्धत एव। अमरा रागविवशाः विषयतत्पराः मोहरोगेण वञ्चिताः सन्तः नूनमेव देवलोकात् निपतन्ति। आध्यात्मिकसुखस्य षोडशीं कलामपि कामसुखं तृष्णादि भवसुखं नार्हति ।अनलसदृशः कामः विषयवासनया पुरुषं विनाशयति। कुकर्मफलमोहितः कामविषं समास्वाद्य कुकर्मफलं उपभुङ्क्ते, दुःखं च अनुभवति। मोहान्धाः कामपङ्कप्रवञ्चिता बालिशा इव मक्षिका इव रमन्ति। तस्मात् अनित्यं कामसुखं कदापि नाभिलषणीयः, कामभोगेषु संसक्तः पथ्यापथ्यं न जानाति। गन्धर्वपुरतुल्येषु ज्वालामालोपमेषु विचित्रेषु कामेषु सुराः अपि निपतन्ति। तस्मात् वितृष्णोपमः वरः कामः सदा परित्यक्तव्यः ।कामसंकल्पाः देवरोगः जायते,रोगात् क्रोधः प्रभवति क्रोधाभिभूतः मोहमाप्नोति, निर्वाणसुखं परित्यज्य अनित्यं कामसुखं संसेवते।

---

१ - ' प्रधानसुत्तनिपाते श्लोक २२-२३-२४।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत: काममलं परित्यज्य कामपङ्कात् विमुक्त: निर्मल: शान्त: विमुक्त: सद्धर्माचरणरत: एव निर्माणमधिगच्छति । अत: सद्धर्माभिलाषिभि: नित्यसुखकामनया कामविरति: करणीया एव ।

कामादि विषया पूर्ववर्गे निरूपिता: तेषां सर्वे यावन्त: विषयानां मूलं कारणम् तृष्णैव विद्यते । यावत् वासनात्मिकाया: तृष्णाया: नाशो न भवति, तावत् सद्धर्माचरणचर्चा कैवल्य बुद्धिश्च कुलकन्थैव विद्यते। ऐहिकस्य पारलौकिकस्य फलभोगविरागस्य यदा त्यागो भवति, तदा विरागात्मकतृष्णाक्षय: जायते। अत एव शुभाशुभमिश्रितस्य फलस्य उपलब्धि: मानवयोनिरूपेण जायते। मनुष्य: स्वभावत: एव पुण्यानुष्ठाने न प्रवृत्तो भवति, अपितु निम्नगाप्रवृत्ति: स्वाभाविकी। अर्थात् अशुभमार्गेनैव वासनासरित् प्रवहति। एतदपि सत्यं यत् पापं तु कुर्वन्ति परन्तु तत्फलं नेच्छन्ति पुण्यात् विनिवृत्तोऽपि पुण्यफलं इच्छन्ति एव यत: पापात् अशुभफलप्राप्तिर्भवति ।अशुभफलाच्च दु:खं भवति, शुभधर्मणा: मनुष्य: देवयोनिमाप्नोति, अशुभकर्मणा च नरकयोनिमाप्नोति। अत: अस्मिन् मानवजन्मनि नित्यानित्य वस्तुविवेकपूर्वका सद्धर्मे प्रवृत्तिरेव। उक्तञ्च विश्वरूपाचार्येण —

शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं गतिम् ।
उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवश: ।।

तृष्णा हि दृढभावनया त्यक्तविचार: विषयग्रहणे प्रवृत्तो भवति। तत्राऽपि तृष्णाया: द्वैविध्यं एका हि मलिनवासना अपरा हि शुद्धवासना। मलिनवासनया जन्म जायते, शुद्धवासनया च जन्मविमुक्ति: ।मलिनवासनया अज्ञानातिशयो भवति। शुद्धवासनया च धर्माचरणे प्रवृत्तिर्भवति, तदा भावना भ्रान्तिपरम्परा सदा विनष्टा भवति। सद्धर्माचार: एव मलिनवासना निवर्तको भवति। उक्तञ्च जीवन्मुक्तिविवेके वशिष्ठवचनम्—

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥
भावितं तीव्रसंवेगादात्मना यत्तदेव सः ।
भवत्याशु महाबाहो ! विगतेतरसंस्मृतिः ॥
तादृग्रूपो हि पुरुषो वासनाविवशीकृतः ।
संपश्यति यदेवैतत् सद्वस्त्विति विमुह्यति ॥
वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत् ।
भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मोहवशादिव ॥

(यो०मु०त्रि०, पृ० १०२)

अथ च स्वस्वदेशाचारकुलधर्मभाषाभेदतद्गतापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः सामान्यम् उदाहरणम् । विशेषं तु भेदानुक्त्वा पश्चादुदाहरामः। यथोक्तं बृहदारण्यकोपनिषदे' यथाकामो भवति तत्क्रतुर्भवति, यत् क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते' इति । रागाग्निः स्वर्गेऽपि दाहमुत्पादयति, द्वेषाग्निः पशु-पक्ष्यादि योनावपि दहति। पापेऽपि मोहाग्निः दाहमुत्पादयति, सर्वत्रैव तृष्णाग्निः अनुस्यूतः वर्तते। मानेर्ष्या धूम विशिखं संकल्पेऽपि दोषमुत्पादयति, लोभाग्निः सर्वान् लोकान् दहति, धनं प्राप्य यथा यथा अनलः वर्धते तथैव मनः दु:खमनुभवति। अधर्मरतः कदापि तृष्णाया विमुक्तो न भवति। दिवानिशं धनलोभेन दह्यते, विषयाग्निः भस्मसात् करोति । भवाभिलाषिणी तृष्णा भवजेन दु:खेन सन्तापयति। जालबद्धाः मत्स्याः यथा शनैःआकृष्टाः भवंति तथैवतृष्णाबद्धाः जनाः मृत्युना आकृष्टा भवन्ति। विद्वान् भवतु बालिशो वा, तृष्णाविष्टः सदैव विषयाग्निना दह्यते। स नूनं स्व कामवशंगतः दाणिक्यं प्राप्यापि तृष्णाग्निना पुनः पुनः अपरितुष्टः तृष्णावशः दु:खमश्नुते ।सतृष्णस्य कुतः तुष्टिः,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वितृष्णा: एव विशोकी भवति, ये हि तृष्णावशगताश्च: न सन्ति, ते सुखमनुभवन्ति। त एव च परमां गतिमाप्नुवन्ति। लोभाभिभूत: जन: तृष्णाग्निरिव दह्यते। न कदापि सन्तोषसुखं प्राप्नोति उक्तमस्माभि: यत् पश्चात् तापोद्भवं दु:खम् अन्ते प्राप्नुवन्ति जना:। अत: त्रिपथगां तृष्णां नदीं पारेत्यैव विरक्त: सन् सद्धर्माचाररत: निर्वाणमधिगच्छति, कदापि तस्य हानिर्न जायते ।

वासनाक्षयवशादेव कदापि तत्त्वज्ञानं प्राप्नोति। तत्त्वज्ञानं मनोनाश: वासनाक्षय: च एते मिथ: कारणतां प्राप्य दु:साध्यं निर्वाणसुखं प्रापयन्ति। प्रदीपज्वाला सन्तानवत् वृत्तिसन्तानरूपेण परिणीयमानम् अन्त:करणं पुन: पुन: अभिवर्धते। अत: तस्य निरोध: आवश्यक:। तस्य च क्षय: सद्धर्माचरणेन जायते, यावत् तत्त्वज्ञानं न भवति, तावत् चित्तसम: न संभाव्यते । यावत् न तृष्णाक्षय: तावत् तत्त्ववेदनं दूरे गतम्, यावत् वासनानाशो न भवति, तावत् तत्त्वावगमनस्य चर्चाऽपि वृथा जायते। तस्मात् तृष्णा दूरत: परिहर्तव्या । काम: तृष्णाकन्य-फलस्य प्राप्तौ हविषा कृष्णवर्त्मेव भूय: अभिवर्धते । तस्मात् विषया-नामासक्तिरेव करणीया। यद्यपि सर्वथा निर्विषयं मन: न स्थातुं शक्नोति, तथापि सद्धर्माचरणेन दैवसम्पद्रूपे विषये सद्धर्माचरणवृत्ति:सम्पादनीया। गीतायामपि षोडशोऽध्याये सद्धर्माचरणार्थं दुर्वासनाया: परित्यागार्थं इमे उपाया: प्रदर्शिता -

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थिति: ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।१।।

अहिंसा सत्यमक्रोधस्त्याग: शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।२।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तेज: क्षमा धृति: शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ।।३।।

दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ।।४।।

(गीता १६।१-४)

रत्नावल्यामपि नागार्जुनेनोक्तम् 'धर्मस्य च अपरिज्ञानात् अहंकार: अनुवर्तते, तत् शुभाशुभं कर्म ततो शुभाशुभं जन्म भवति। तस्मात् दानशील-क्षमाधर्मे आदरवान् सन् धर्मनिष्ठानि कार्याणि कुर्यात् तेन च कीर्ति:[१] सुखं परलोकसुखं जायते। अत: तृष्णाविमुक्तिपूर्वकं धर्मरति:करणीया:।

तृष्णावर्गानन्तरं स्त्रीजुगुप्सावर्ग: प्रारभ्यते। अस्मिनवर्गे धननाशस्य जीवनोपायस्य पापस्य च मूलं कारणं स्त्रिय एव। लोकद्वयविनाशाय अनर्थकर्माचरणाय एव एतस्या: जन्म नित्यं इयं सरागकुशला विधुतक्षमावचन्च-लहृदया न कदापि लोकानामभ्युदयाय जायते। संश्लेष समेऽपि विश्लेष-स्मरणात् अनन्तरं दाह: सञ्जायते । दारुणास्त्रिय: रागेण स जायन्ते, यथा हुताशना दानेन स जायन्ते, नूनमेव वह्निसमुद्भव: ताप: यथा दु:खाय तथा देहिनां स्त्रीसमुद्भव: राग: नाशाय एव जायते । इयं हि मुख्यत:

१- धर्मस्यास्यापरिज्ञानादहंकारोऽनुवर्तते ।
तत: शुभाशुभं कर्म ततो जन्म शुभाशुभम्।।
तस्माद्यावदविज्ञातो धर्मोऽहंकारशातन:।
दानशीलक्षमाधर्मे तावदादरवान् भव।।
(म० वि० गो० संस्करणे मुमुर्षति: इति पाठ:)

धर्मात्कीर्ति: सुखं चैव नेहभीर्न मुमुर्षता ।
परलोकसुखं स्फीतं तस्माद्धर्मं सदा भज।

(क्रमश: रत्नावली-२।२४-२५-२७)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वलोकविनाशाय अस्या: कोऽपि प्रियो नास्ति। यथा सततमानतत्परा: लोकाभ्युदयविनाशाय न तथा अन्यद्वस्तु। यथा हि भ्रमर: पुष्पं शुष्कं त्यजति, तथैव योषिदपि चित्तेन अर्थरहितं पुरुषं त्यजति। स्त्रीवन्धनं नरकपाताय स्त्रीसमुद्भव: दाह: सदा कार्यदायकारी एव चलचेतसां विश्वासशीलानां पुरुषाणां विनाश: स्त्रीणां कृते जायते। स्त्रिय: रागमोहितं पुरुषं मृगवत् मोहयन्ति। प्राप्ते व्यसने च परित्यजन्ति। अतएव घृतमिश्रं मधु: यथा जीवनदायाय तथैव स्त्रीपाशबद्ध: न कदापि मुच्यते। स्त्रिय: नानाविधेषु मर्त्येषु षट्पदाङ्गना इव संचरति। यदि पुरुष: सर्वदा आसक्त: तदा अनर्थव्याधिसंयुक्त: सद्धर्मविहीन: दुष्कर्मतत्पर: मोक्षकथामपि न शृणोति। स्त्रीणां चंचलता तथा स्वाभाविकी यथा भास्करस्य प्रभा। अत: कदापि विमुक्तिर्न जायते। दीपशिखा इव तस्या: सौहार्दं चंचलमनित्यञ्च। अयं पुष्पछन्न: सर्प: इव भस्मछन्न: अनल: इव रूपच्छन्न:। दुरात्मा इव स्त्रीस्वभाव: इति तत: कदापि विनाश: संभाव्यते। अत: विषवृक्षसमानाय: सद्धर्मतत्परै: पुरुषै: सर्वथा त्याज्या एव। दानशीलादितत्पराणां जनानां कृते मदमोहरागद्वेषेर्ष्या शरीरभूता: इमा: नार्य: सर्वथा परित्याज्या एव। सर्वेष्वेवदर्शनेषु स्त्रियं प्रति अतिशयासक्ति: दोषावहा उक्तम् परन्तु गार्हस्थजीवनं यदि कोऽपि निरासक्तरूपेण अन्याश्रमवासिनां कृते उपकारदृष्ट्या पञ्चविधयज्ञसम्पादनदृष्ट्या यदि स्वीकरोति तदा अनर्थाय न जायते, अपितु तेन जीवनस्य सार्थक्यमेव जायते। अन्यथा सन्तानोच्छेदा लोकपरम्परैव सर्वथा उच्छिन्ना स्यात् परन्तु बौद्धसिद्धान्ते गार्हस्थ्यजीवनं प्रति न तथा वर्तते आग्रह: यथा भिक्षुजीवने। अत: तत्र एक एव आश्रम: विद्यते नान्यस्य आश्रमस्य कुत्रापि संस्थितिरङ्गी क्रियते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामवशात् स्त्रियं प्रति प्रवृत्तिर्भवति इति आदौ मूलभूतस्य कामस्य दुःखावहत्वं प्रतिपादितम्। अनन्तरं स्त्रीजुगुप्सावर्गे नारीणां निन्दा कृता। तेन च ज्ञायते यत् कामः हेयः स्त्रियश्च हेयाः। इदानीं कामिनां मद्यमांसादौ स्वाभाविकी प्रवृत्तिर्जायते। मद्यपानं विना स्त्रीरतिः न पूर्णतां प्राप्नोति। अतः अस्मिन् धर्मसमुच्चये प्रसङ्गागतः स मद्यजुगुप्सावर्गः निर्दिष्टः। सत्यमेतद् यत् मद्यं हि उत्तमं विषमेव। मद्यसेवनेन कुशलाः धर्माः नश्यन्ति अर्थात् सद्धर्मे न भवति प्रवृत्तिः यतः बुद्धिः कार्याकार्ये विवेकशून्या असंस्थिता जायते इति मद्यं नाशस्य कारणमेव। मद्यपानात् कदाचारे पापकर्मणि प्रवृत्तिर्जायते। मद्यं हि धनक्षयसाधनं रागस्य क्रोधस्य च विवर्धकं मोहस्य उद्दीपकम् च। अर्थात् सर्वेन्द्रियविनाशहेतुभूतमनर्थसाधनं मद्यं इत्यत्र नास्ति काचिद् विमतिः। मद्यपानात् पुरुषाः पशुसमाः जायन्ते, यदि सौख्यं सुखदं जीवनं न इच्छति तदा मद्यं परित्यज्येत्। मद्यं हि नरकस्य द्वारम्। व्याध्यादिमूलं धर्मरत्नदाहकरं ब्रह्मचर्यविघातकञ्च जनः मद्यपानेन लघुतां प्राप्नोति, ज्ञानकर्मणि न रमते कदाचारप्रभृतः पापमेव उत्पादयति। मद्यव्यसनं सम्पत्तिदाहकरं बुद्धिभ्रमजनकञ्च। तस्मात् मद्यस्य दर्शनं स्पर्शञ्च दूरतः परिवर्जयेत्। तथा भिक्षुणा अवलोकितसिंहेनोक्तम् --

> दर्शनात् स्पर्शनात् पानात् मद्यं मोहयते नरम्।
> तस्मात् स मद्यपानं च दूरतः परिवर्जयेत्॥
>
> (धर्म समु० ६। २५)

मद्यपानात् निश्चेष्टः काष्ठसदृशः निश्चलःभुविपतितो भवति। भवतुनाम मनीषी धार्मिको वा मद्यपानेन तेषामपि व्यामोहः संजायते एव। अतः साधूक्तम् --

> रसेन शोभनं मद्यं परिणामेव दारुणम्।
> परिणामफलं पापं नरकेषूपपद्यते॥ (धर्मसमु० ६।३५)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्युक्तम् पीतं जनयते मोहं मोहात् पापेषु प्रवृत्तिर्जायते, दारुणं दैन्यं च उत्पद्यते । मद्यनिषेविनः पुरुषाः महामोहं, विष-मोहं उपभुञ्जते । तस्मात् दुर्गतिकारि मद्यं सर्वथा परित्यजेत् । मद्य-पानेन मनुष्यः लघुतां प्राप्नोति । धर्मो हीयते वाक्पारुष्यं भवते नाम्नश्च विनाशः मद्यपानेन जायते। तस्मात् समाहितैः धर्मशीलैः परमं पदं यत्र मृत्युर्न विद्यते, तदाप्तुं इष्यते चेत् मद्यं परिवर्जयेत्। रत्नावल्यामपि मद्य-सेवनं सद्धर्माचारविरुद्धं तेन च अकार्ये प्रवृत्तिः कार्यहानिः धनक्षयश्च जायते इत्युक्तम् --

मद्यात्परिभवो लोके कार्यहानिर्धनक्षयः ।
अकार्यकरणं मोहात् मद्यं त्यज ततः सदा।।

(रत्ना० द्वि० परि० ४६)

मद्यपाननिषेधः भारतीयपरम्परायाः मूलाधारः भारतीयधर्म-दृष्ट्या मद्यपानप्रमत्तः पुरुषः कार्याकार्यविवेकशून्यः भवतीति। न केनापि आचार्येण मद्यपानं समर्थितम् । किमत्र वक्तव्यमस्ति यत्र सर्वेष्वेव धर्मेषु मद्यपानस्य निषेध एव वर्तते, न तु केनापि रूपेण तस्यामपि अवस्थायां इदानीमपि अवलोक्यते अस्माभिः यत् भारतीयसर्वकारः सर्वथा मद्यपान-निषेधनियमपरिपालनाय बद्धपरिकरो विद्यते। सर्वत्रैव सांस्कृतिकदृष्ट्या अर्थादिव्ययदृष्ट्या गार्हस्थ्यजीवनपरीक्षा दृष्ट्या च मद्यपाननिषेध-नियमः परिपाल्यते । बहूनि एतादृशानि चित्राणि यत्र तत्र निर्दिष्टानि सन्ति। येन जीवननियमव्यवस्था परिलक्षिता भवति । अतः मद्यपानं कदापि सद्धर्माचरणदृष्ट्या न केनापि समर्थितम्। अत एव अत्र उन्मत्ता-स्त्रीजुगुप्सावर्गनिरूपणानन्तरं मद्यजुगुप्सावर्गः प्रारब्धः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मिन् वर्गे चित्तस्य स्वरूपं विद्यते । चित्तं हि अगाधं विशालं तीव्रं सर्वसत्त्वगतं महत् सर्वस्य जगतः राजवत् सम्प्रवर्तते । इदं हि चित्तं यदा कर्म करोति तत् कर्म सद्धर्मपरम्पराप्राप्तं चेत् तर्हि दुर्गतिं परित्यज्य अमलं निर्वाणमधिगच्छति । चित्तशब्दः मनोऽपरपर्यायः । मनोऽनुसारिण एव धर्माः भवन्ति । श्रेष्ठाः मनोजाः भवन्ति । सुप्रसन्नेन मनसा यदि कर्म क्रियते तदा स्वायत्तं चित्तं सर्वान् क्लेशान् तथैव निर्णाशयति, यथा सूर्योदयः तमांसि । चित्तात् प्रबलः अपरः शत्रुः न विद्यते । चित्तदग्धाः सत्त्वाः कालदग्धा इव न कार्याय क्षमन्ते । यो हि पुरुषः अजितेन्द्रियः मूढः सन् चित्तं स्वायत्तं न करोति, अपितु तदधीनः सन् बाल इव आचरति निर्वाणं तस्य दूरत एव गच्छति ।

अन्यदर्शनेष्वपि वासनाक्षयस्य मनोनाशस्य च क्रमः निरूपितः। मनोनाश एव चित्तवर्गे सम्यक् निरूपितः। वासनाबन्ध एव बन्धः । वासनाक्षय एव मोक्षः । आदौ मानसीवासना एव त्याज्या । सत्यामपि विषयवासनायां शान्तस्नेहमनः वशी करोति, लोकवासना, शास्त्रवासना, देहवासना एव मानसवासनाः । दम्भदर्पादयः सम्पत्तिविषयाः वासनाशब्देनोच्यते । शब्दस्पर्शरूपरसगन्धाः विषया यदि चित्तेन काम्यमानाः, तदा चित्तं सर्वथा आबद्धमेव तिष्ठति । मानसीवासना न भोगोन्मुखी अपितु भुज्यमाना संस्काररूपेण संतिष्ठते अत्र इयं चिन्ता यदि वासनायाः काचित् मूर्तिः स्यात् तदा तत्परित्यागः संघटते । यथा सम्मार्जनी समुत्थित धूलिं तृणवत् हस्तेनोद्धृत्य बहिः प्रक्षिपति न तु एतस्याः परित्यागः सम्भवति । यथा निद्राया अमूर्तत्वेऽपि तत् परित्यागरूपेण उपवासजागरणे अनुष्ठीयेते, तथैव अत्राऽपि सद्धर्माचरणेन चित्तस्य कालुष्यं रागद्वेषादिकं निवर्तयेत् । तेन च मैत्री-करुणा-मुदिता-उपेक्षा च जायन्ते । रागः चित्तं कलुषीकरोति, यदि मैत्रीभावना जागर्ति तदा सुखिप्राणिषु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वेष्वेते मदीया इति भावः समुदेति । सुखं स्वकीयमेव सम्पद्यते । चित्तं रागशून्यं जायते । निवृत्ते च रागे सरः सलिलमिव चित्तं प्रसीदति । यदा स्वेषामिव परेषां सर्वेषां प्रतिकूलं न भूयात् इति दुःखिप्राणिषु करुणा- उदेति, तदा वैरा दोषनिवृत्तौ चित्तं प्रसीदति ।चित्तवर्गे आत्मौपम्येन भूतेषु दया वर्णिता, यथा (कारुणाशीला) पापताप-वशात् पश्चात्तापो न भवति । पापिजनेषु चित्तस्य उपेक्षां भावयन् स्वयमेव पापात् निवर्तते । पुण्यपुरुषे मुदितामावे तद्वासनया स्वयमेव अप्रमत्तः सन् पुण्येषु प्रवर्तते सुखिषु मैत्रीं भावयतः न केवलं रागनिवृत्तिः, किन्तु असूयेर्ष्यादयोऽपि निवर्तन्ते । परगुणानामसहनरूपा चित्तदशा न जायते । गुणेषु दोषाविष्करणरूपा असूयाऽपि न जायते, तथा च मैत्रीवशात् परकीयं सुखं स्वकीयमेव सम्पद्यते इति चित्तं प्रसीदति । चित्तस्य शुभकर्मणि रागद्वेषशून्या यदि प्रवृत्तिर्जायते तदा शुभैः कर्मभिः देवत्वं लभ्यते । मैत्र्यादिभिश्चित्तं ते प्रसादयन्ति। अतः चित्तस्नेहशून्यता सर्वथा अपेक्षिता। इत्थं प्रकारेण चपलं विषमयं चित्तं सर्वथा दुःखावहम् भवति। अतः समाहितचित्तैः भाव्यम् । समाहितचित्तः निश्चितचित्तः धीरः जनः सुखमवाप्नुते ।

अस्मिन् वाग्वर्गे प्रशंसाप्रसङ्गे उक्तम् यत् पारुष्यं सदा वर्जयेदेव यतः माधुर्याभिरतः पुरुषः निर्वाणमधिगच्छति। वाचः सत्यं प्रयोगमेव कुर्यात् मिथ्याभूतावाक् विवर्जयेत् । यतः असत्यवाचः प्रयोक्तारो जनाः नरकं गच्छन्ति। एतावता सत्यवचनस्य प्राधान्यं मिथ्यावाक्यस्य च निन्दा अत्र सूचिता दूषितं वचः कदापि कल्याणाय न भवति ।मिथ्यावाक सदा नाशाय एव भवति। सत्यहीनाः पुरुषा सदा पापाभिरताः दुःखिता एव तिष्ठन्ति । सत्यहीनाः पुरुषाः दूरादेव मोक्षामागत् जीवनं यापयन्ति । अतः मोक्षार्थिभिः सदा सत्यमेव उच्चारणीयम् ।धर्मस्कन्ध-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरूपणे स्मृत्यादावपि सत्यस्य महती प्रशंसा दृश्यते । 'अहिंसा सत्यमस्तेयं' इत्यादिना स्मृतिवचनेन अनृतस्य कष्टकरत्वं सूचितम् । किमधिकं मातृपित्रादयः न तथा त्राणे समर्थाः भवन्ति, यथा सत्यम् । अतः अनृतं कदापि न वदेत् अनृतस्य निन्दैव अस्मिन् प्रकरणे सूचिता। सर्वदुःखस्य बीजं मिथ्यावचनमेव। सत्यञ्च सुखस्य साधनम् सत्यवादी सर्वस्य प्रियो भवति। परं सत्यमेव दीपकं बुद्धेन दर्शितम् । तस्मात् सत्यद्वेषः सदा नाशाय भवति। सत्येन रहितः पुरुषः शाश्वतं स्थानं नाधिगच्छति । न वा लोकः लोकोत्तरं स्थानम् मृषैव सकलगुणनाशिका । मृषावादः सर्वस्य शुभस्य छेदकः । किमधिकं सकल सत्त्वोपघातकः मृषावादी एव भवति । अतः सुखार्थिभिः मृषा न वक्तव्यम् । यतः मृषावादः नरकस्य प्रधानं साधनम् ।सर्वस्मिन्नेव धर्मे सत्यस्य महत्त्वं सम्यक् उपवर्णितम् । अतः अस्मिन् संवर्गे वाचः विशुद्ध्यर्थं सुखलाभार्थं शुभनिर्वाणप्राप्त्यर्थं सत्यवादः अपरिहार्यः । अस्मिन् वर्गे कतिपयश्लोकानां विच्छेदः वर्तते । उपलब्धेषु श्लोकेषु सत्यस्यैव प्रतिष्ठा प्रदर्शिता ।

वाचः मृषातिरिक्तसत्यभाषणस्यैव सार्थक्यम् ।परन्तु सत्यभाषणमपि यदि कर्मणालङ्कृतं न भवति चेत् तदा भारतीयदृष्ट्या तस्य वैफल्यमेव । यतः आचारे(कर्मण्येव) ज्ञानस्य परिसमाप्तिः। ज्ञानं भारं क्रियां विना' इति आचार्याणामुद्घोषः ।सुकृतं दुष्कृतञ्च कर्म भवति। तत्र अनुष्ठितं सर्वमपि कर्म देहिभिः उपभुज्यते । यतः देहिनः कर्मबद्धा एव भवन्ति । दुष्कृतेन कर्मणा: कृष्णाडम्बरावृतः न कदापि साधु फलं भुङ्क्ते । दुष्कृतेन कर्मणा न केवलं एकस्मिन् भवे, तत्फलभोगः, अपितु आगामिनि सर्वस्मिन् भवे तत्परम्परा परिचलति । शुभाशुभं सर्वं कर्म गच्छन्तं नरमनुगच्छन्ति । दुष्कृतैः कर्मभिः अधोगतिः सुकृतैः शोभनगतिः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यथा बीजं फलमश्नुते । त्रिषु धातुषु कर्मविपाकः परिदृश्यते । यादृशं कर्म भवति, तादृशं फलं प्राणिभिः उपभुज्यते । कर्मवशादेव एकः दुर्गं तरति, अन्यः तत्रैव अवतिष्ठते अन्येन कृतं कर्म नान्येन उपभुज्यते । दुश्चरितं तत् कर्तुरेव परिपाकाय जायते । तत्र च मन एव बन्धमोक्षयोः कारणम् । मनसा विप्रमोहिताः जना पापकर्मरताः बुद्धशासनेऽपि तमसावृते संसारे दुःखमुपभुंजते । कर्मवशादेव प्रजा जायते म्रियते च ।तत्-वशादेव दुःखमनुभवन्ति । साधुकर्मकर्तुः विपरीतं फलं न जायते । नरके गमनमहेतुकं नास्ति । अपितु कर्मवशादेव तत्प्राप्तिः यथा प्रमादी पाधीना तथैव फलं कर्माधीनम् । कर्मवशगा एव सर्वे प्राणिनः सुखं कर्मायत्तं मनोबद्धा तदेकशरणाः धर्मप्रच्युता भवन्ति । सर्वे संस्काराः जलबुद्बुदसदृशा अनित्या इति शोभनमेव कर्म इह लोके परलोके च सुखसाधनाय जायते ।

इत्थं प्रकारेण कर्मरज्ज्वा सर्वे बद्धाः तथा च निर्वाणनगरं गन्तुं ते कदापि समर्था न भवन्ति। अतो विगतज्वराः ज्ञानपरायणा जनाः धन्यं स्थानं प्राप्नुवन्ति। मनीषिणः अहैतुकीं फलप्राप्तिं नैव स्वीकुर्वन्ति । कर्मपाशबद्धा हि जनाः कदापि परमां शान्तिं नाधिगच्छन्ति। परम्परया ते कर्माणि नियता संसारे पुनः पुनः आगच्छन्ति, दुःखपङ्के च निमज्जन्ति। मूढचेतसः दुःखाभिसक्तस्य जनस्य कदापि सुखप्राप्तिर्न संभाव्यते । अतः ज्ञानमेव प्रमुक्तिमार्गानुगामिनां गतिः। मोहवञ्चिताः दुःखमेव, सुखमन्वाना दुःखमुपभुञ्जते । अतः ज्ञानं एव निर्वाणप्राप्तिसाधनं ज्ञानं च शोभनाचरणा । अत एव औद्धत्यं मद्यपानं हिंसा, परदारादि-दर्शनं लोभादिप्रवृत्तिः देवनरकस्य साधनम् ज्ञानेन मुक्तिर्भवति, क्लेशनिवारणं भवति, क्लेशकाष्ठानि ज्ञानाग्निना दंदह्यन्ते ।एकं ज्ञानमेव साधनम् । भवाब्धितरणाय ज्ञानेनैव प्रदीपेन ज्ञानिनः निर्वाणगामिनः भवन्ति । अतः ज्ञानयोगेन संयुक्तः जनः ज्ञानाग्निना क्लेशं निवारयेत् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मिन् पञ्चदशे प्रकरणे पापवर्गः निरूपितः। पापं हि सदैव कटुकफलाय भवति । अन्ते मूढमति फलभोगकाले परितापं प्राप्नोति । अतः पापस्य कर्मणः फलं दुःखमेव नरक प्राप्तिश्च । यथा अल्पेन वह्निना सर्वे द्रुमा दह्यन्ते, तथैव पापेन नरकं यान्ति, पापसमः कश्चिद् शत्रुः नास्ति । पापकारी सदैव कष्टमनुभवति । पापस्य सदा परित्यागः करणीयः पापिनः निर्वाणात् बहु दूरं तिष्ठन्ति। सुकृतकारिणः सुखमाप्नुवन्ति । पापाचारिणः सदैव शुभद्वेषिणो भवन्ति। पापफलं सदा आदि मध्यान्त कटुकं भवति । पापिनः लोकविगर्हिता जायन्ते । पापस्य नास्ति प्रायश्चित्तम् । धर्मो हि तत्त्वमार्गान्नायको भवति । पापकर्मकारिणः घोरे नरके पतन्ति। सद्भिः विगर्हितं पापं सदा नरकाय उपकल्पते । शुभकर्माजितेन्द्रियः इह लोके शुभमेधते, देवलोके च जायते । पापस्य कर्मणः फलं प्रतिकूलमेव भवति, दुर्गतौ च पातयति । पापकारी नित्यं कामवशानुगः भवति । ईर्ष्या-द्वेषरहिता जनाः शुभचारिणः न नरके निमज्जन्ति। पापमित्रं संप्राप्य नाशमेति पङ्के च निमज्जति ।अतः गुणदोषपरिज्ञाता जनः सदा पापं परित्यजेत् ।पापाचर्री पुरुषः आत्मनः शत्रुरेव जायते । विषयारामचपला बुद्धिः रागानुचारिणी जायते। तेन च दुःखाग्निना दाह्यमेवति ।दुष्कृतस्य फलं दुःखमेव पापस्य फलं नरकमेव । ये दुःखं विस्मृत्य कामवशानुगाः भवन्ति, ते सदैव तृष्णावासनानुविद्धाः वासनात्मके जगति जायन्ते म्रियते च । एकेनैव पापकर्मणा जनाः चक्रवत् जगति भ्रमन्ति। नरकसुखस्य तु प्राप्तिः कदापि न संभाव्यते ।मोहपीडिताः प्राणिः सदा उद्वेगे एव तिष्ठन्ति, दुःखन्यानुभवन्ति ।परमधामस्य सर्वदुःखविवर्जितस्य सुखस्य तु आशापि वृथैव । जीविकाहेतावपि विचक्षणः पापं नैव कुर्यात् । यतः अनागतस्य दुःखस्य नास्ति प्रतीकारः पापविपाकः नरकप्राप्तिरेव । पापानलसंदग्धः नरकं प्राप्नोति । सर्वे एव पापैः नरकद्वारं अनावृतमेव तिष्ठन्ति। अतः विषकल्पं पापं परित्यज्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखकरं धर्मं सदा सेवेत् । सत्यं दानं शान्तिः अपापमित्रता सर्वभूताभिरतिः स्वर्गस्य साधनम् । अतः स्वर्गसाधनभूतं सुकृतं कर्म सदाचरणीयम् दुःखकरं पापञ्च दूरादेव परित्यजेत् ।

धर्मसमुच्चये नरकवर्गे दुष्कृतकर्मकर्ता नरकं गच्छति । नरकस्य च विचित्रवर्णनेन यथा भवेत् तथा स्वरूपं तस्य निर्दिष्टं भ्रष्टाः जनाः नरके गच्छन्ति। अकीर्तिसंयुक्ताः जनाः नरकदुःखमेवोपभुञ्जते । नरकात् अवाङ्गमुखाः जनाः नृपतन्ति। कुदृष्टाः मोहपाशावृताः घोरे नरके निवसन्ति। मद्यादिसेवकाः मूढाः शुभकर्मवञ्चिताः नरके निपतन्ति मृत्युकाले समुत्पन्ने दारादीन् केऽपि न रक्षन्ति । अतः पुत्रदारादिपरवशः न भवेत् । येन परां शान्तिं प्राप्नुयात् तादृशमेव कर्म कुर्यात् । पुत्राः मित्राणि अन्ये च स्वजनाः दुराचारिणः सहयोगं नैव कुर्वन्ति । रागद्वेषानुगा पापकर्मवशात् दुःखमुपभुङ्क्ते । पापानि नाभ्युदयाय अपितु मोहावृतैः जनैः कृतानि कर्माणि पापजनकानि नरकसाधनानि भवन्ति। घोरे नरके सम्प्राप्ते अश्रुविमोचनेन निस्तारः न सम्भाव्यते । द्वेष्टा कदापि धर्मचारी न भवति। अपितु रागादिभिः शत्रुभिः दग्धाः दुःखमेव प्राप्नुवन्ति । तत्र भयङ्करे नरके विभीषणानि दुःखानि भोक्तव्यानि भवन्ति । अस्मिन्नेव प्रकरणे विभिन्नानां नरकानां घोरावस्था उपवर्णिता । तत्र भयङ्करदुःखानां वर्णनं कृतम् एतावता एतद्गम्यते यत् दुष्कर्मवशात् दुःखप्राप्तिर्भवति इति दुष्कर्मणिप्रवृत्तिः कदापि न करणीया । अपितु अपवर्गसाधनानि कर्माणि एव करणीयानि । एतस्य वर्गस्य एतदेव विशिष्टं प्रयोजनमुपवर्णितम् अस्मिन् धर्मसमुच्चयग्रन्थे । अतः मोहवशात् दुराचारिभिः न भवितव्यम् ।

धर्मसमुच्चयस्य सप्तदशः प्रेतवर्गः वर्तते। विना दानं तत्फलप्राप्ति तथैव न संभाव्यते, यथा विनैव बीजवपनं वृक्षात् फलप्राप्तिः। दानेनैव अभीष्टस्य फलस्य प्राप्तिर्जायते । किमन्यत्र प्रेतः एतस्मात् स्थानात् लोकान्तरं सम्प्राप्य दानं विना कस्यापि सुखस्य तथैव नास्ति आशा, यथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विना दीप्तिं आलोकः न लभ्यते । सुकर्मफलभोक्तारः एव जनाः भवन्ति। विना सुकृतं प्रेतः क्षुत्पिपासामयेन वह्निना दह्यते । क्षुत्पिपासात्मकात् वह्नेः सर्वथैव प्रेतानां दुःखानि जायन्ते । क्लेशान्धकारः वदनः स्यात-दीपिकः दुःखितः सन्नेव जीवति। अशुभस्य अशुभफलप्राप्तिः अनिवार्यैव । स्वर्गसोपानप्राप्तिस्तु कदापि न संभाव्यते । किमन्यत्र घोरयमलोकस्य प्राप्तिस्तु भविष्यति एव । परन्तु इहापि दुःखमाप्नोति । स्वकृतस्य कर्मणः स्वयमेव भोगः न तु अन्येन । क्षुत्पिपासाग्नेः शान्तिः लव-मात्रमपि नैव जायते । दुःखाद् घोरतरं दुःखं प्राप्य नरः सदा शुष्यति। महातीक्ष्णैः वज्रदंष्ट्रैः काकोलूकैः परिभक्षितः चरमं दुःखमाप्नोति । तस्मात् सुकृतं कर्म सदैव आचरणीयं येन अस्माकं सुखलाभः स्यात् । पाप-कर्मजन्यफलप्राप्तिः नेह लोके न वा परत्र जायते इति सुकृतकर्मणः आचरणं सदैव करणीयं मोक्षानुगामिभिः सुखाभिलाषिभिः ।

अधर्माचरणात् कीदृशं फलं जायते ,इत्यस्य वर्णनप्रसङ्गे तिर्यग्-वर्गः धर्मसमुच्चये उक्तः । द्रोहवशात् यदि कश्चन कस्यापि वधं करोति परस्परं च उच्छिष्टभोजनं करोति । तदासौ तत्कर्मवशात् तिर्यग्योनिमा-साद्य सर्वथा दुःखितः तिष्ठति । मोहापहृतचित्ताः शीलदानादिशून्याः तृष्णाविडम्बिताः पुरुषाः स्वपक्षपातित्वात् [redacted] पक्षियोनौ एव उत्पत्तिं लभन्ते । भक्ष्याभक्ष्य गम्यागम्य विवेकशून्याः पञ्चेन्द्रियमूढाः क्रोधेर्ष्यासम्पन्ना जनाः तिर्यग्योनावेव जायन्ते। अतः मात्सर्यमुत्सार्य दुष्कृतं परित्यज्य मनुष्याः सदा रागद्वेषशून्याः भवेयुः तेषामेव सफलं जन्म । त एव सदा सद्भिः पूज्याः। अतः शुद्धसत्त्वैर्भाव्यम् ।

क्षुद्विमोहिता जनाः दुःखेन सर्वथा अशुभमाचरन्तः-[redacted] मिलिताः भवन्ति। लोकान् क्षुदग्निरेव दहति आत्मनिर्वाणस्य तु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कल्पान्तरेऽपि कथा वृथा । क्षुधायां यादृशं बलं तादृशमनलस्यापि नास्ति। भोजनार्थमेव सर्वः दुष्कर्म करोति। तृष्णैव अत्र कारणम् । क्षुत्पिपासा तृष्णाविषादग्धस्य यादृशं दुःखं तादृशं कदापि अनलेन न जायते। अतः दुःखपरित्यागार्थं दुर्गतिनिरोधार्थं च तृष्णाप्रधानस्य क्षुद्रूपस्य विषरूपस्य परित्यागः समुचितः। दानशीलविभूषित एव जनः कल्याणपरम्परामश्नुते ।

मायादम्भः पारुष्यञ्च ज्ञानशून्यं निपातस्थानम्। असाधुनां संश्लेषं प्राप्य मिथ्यादर्शनवशात् नाशः जायते। देशकालशून्यसंरम्भः अनर्थभूमिमाश्रयते ।धैर्यनाशः स्मृतिभ्रंशता अकालमृत्युः इति एतेषां प्राप्तिः संजायते । अकर्मफलतत्त्वज्ञः धर्माधर्म बहिष्कृतः सदा नाशमेति ।कौशीद्यमतिनिद्रा च सदा नाशकारणं भवतः। धर्मवर्जितं कामसेवनं लोभातिशयात् कदापि न करणीये। एतेषां सर्वेषां कौशीद्यमेव मूलम् । कृतस्य कर्मणः फलमवश्यमेव भुज्यते । पापसेवी प्रचण्डः सदा धर्मविद्वेषकः कौशीद्यमेव सेवते । कौशीद्यं हि प्रमादविषसाधनं भवति। कौशीद्यं सर्वेषामधर्माणां साधनं महतः दुःखस्य कारणम् । तस्मात् शुभाचारी कौशीद्यं परिवर्जयेत्। कौशीद्यविहितो नरो जीवन्नपि न जीवति। आहारतत्परः तत्त्वसाधनरहितः उत्पन्ने मृत्युकाले स्वयमेव दह्यते। तस्मात् शीलसम्पन्नो जनः कौशीद्ये कदापि मतिं न कुर्यात्। कुकर्मरताः शान्तिशून्याः त्रिदोषानलसंतृप्ताः लोके परं कष्टमाप्नुवन्ति। दशविधानि कौशीद्यानि शास्त्रे वर्णितानि, तेन च पापप्राप्तेः नरके वासो भवति। सर्वेषु भूतेषु कृपा हितकारिणी भवति, यथा धन्याः सुखमुत्तमं प्राप्नुवन्ति, सदा सर्वभूतहिते रताः च भवन्ति । अथ च-

शीलवाक्करुणान्विताः जनाः देवलोकमाप्नुवन्ति ।

कारुण्यविभूषितं चित्तं निर्वाणपथमधिगच्छति । सदैव तेषां धर्मः अभिवर्धते । कारुण्यमव्ययं धनं वर्तते । अस्मिन् कारुण्यवर्गे कारुण्यस्य विशिष्टवर्णनं कृतम् । उक्तं च तत्त्वम्-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"एकस्त्योचरं ब्रह्म एकस्यानुचरं शिवम् ।
एकविद्या परं तात ! मैत्री चैवा सुखावहा।।

कर्त्तव्य: पुरुषैस्तस्मात् कृपासंवेगमानसैः ।
दानं शीलं क्षमामैत्री ज्ञानाभ्यासश्च निर्मलः।। इति ।।

(धर्मसमु० २१।२७-२६)

द्वाविंशः दानवर्गाख्यः वर्तते । करुणावशात् चित्तगतकल्मष-निवृत्त्यर्थं दाने प्रवृत्तिर्भवति। दानरहितः पुरुषः अधमः एव भवति । मात्सर्यादिदोषरहितः पुत्रदारवशानुगः लोके आयाति याति च ।लोभ-ग्रन्थिविमोक्षणं न तस्य जायते । तेन च तमोनाशस्य संभावनैव नास्ति। दानमेव सदा प्रशस्तं कर्म ।दानेनैव दुःखात् विमुक्तिर्जायते। यावत् तृष्णा तिष्ठति, तावत् ज्ञानिनोऽपि दानशीलाः न भवन्ति। लोके सर्वेषु दर्शनेषु, सर्वेषु धर्मेषु च सुखावहं दानमेव प्रशस्तं कर्म विद्यते । सुखाय सर्वः जनः सचेष्टो भवति। सुखं विना दानं कदापि न संभाव्यते। दानवशादेव शीलवृद्धिः तृष्णानिवृत्तिश्च जायते। अदानात् मृतः सन् प्रेतभूमिं सम्प्राप्य क्षुत्पिपासाभ्यां दह्यते। सुधार्मिक एव चक्रवर्ती राजा भवति। कालज्ञः शीलवान् अज्ञानात् उच्यते । अतः देवत्वप्राप्त्यर्थं दाने स्वाभाविकी प्रवृत्तिः करणीया। लोकः दानेन प्रियत्वमाप्नोति, तुष्टिमधिगच्छति श्रीमान् च भवति। गुरुभ्यः शोभनकर्मभ्यः यद् दीयते तत् सदा सुखाय एव भवति । दानरहितः पापाचारी भवति। दानं मातृवत् पितृवदेव नित्यं सुखावहं भवति। दानेन शीलसम्पत्तिः जायते ।

शीलं धनेषु उत्तमम् । मानवाः शीलेन देवलोकं प्राप्नोति। दुश्चरितं परित्यजति मोहान्धसंसारात् विनिवृत्तो भवति। शीलरहितः मृत्युनाऽपि न बिभेति। सदा कार्याकार्यतत्त्वज्ञः शीलवान् भवति। शीलस्य फलं विपुलं सुखमेव । शीलरहितः पुरुषः कदापि प्रसन्नो न तिष्ठति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि शीलं परित्यजति जनः, तदा नरके गच्छति दुःखञ्चानुभवति । शील-धारी क्षमावान् सुदर्शनो भवति । तस्मात् सुप्रसन्नेन मनसा शीलं रक्षणीयम्। शीलं बहुविधं भवति । मानवाः शीलमाश्रित्य सम्यक् दर्शनतत्पराः जायन्ते । दानधर्मशीलाः शान्तिमधिगच्छन्ति । सत्यमेतद् यत् शीलादृते अन्यत् सुख-साधनं नास्ति । तस्मात् देवसुखं यदि अभीष्टं तदा शीलं समाचरेत् ।

अस्मिन् वर्गे चतुर्विंशवर्गे सर्वेषां धनानां सत्यऽपि विनाशे क्षान्तेः कदापि विनाशो न भवति ।सर्वप्राणिप्रियः क्षमावान् भवति। निखिलदोष-शून्यः इहलोके परत्र च यशसामपि वर्धते। क्रोधविषस्य क्षान्तिरेव परमौ-षधम्। सर्वेषां तपसां परमं तपः क्षान्तिरेव । दुःखविघातिका सुखावहा क्षान्तिरेव । इयमेव स्वर्गसोपानभूता शिवात्मिकामातेव सन्मार्गदायिनी।

वीर्यवर्गाख्यः पञ्चविंशवर्गः वर्तते । अस्मिन् वर्गे क्रियायाः प्रशंसा विद्यते। मानवः बलेनैव सद्धर्मे प्रवृत्तो भवति । उत्साहाख्यबलस्य प्राप्तिः बले-नैव जायते। शक्त्या बोधितत्त्वस्य प्राप्तिः। जरामरणवर्जितमनुत्तमं स्थानं नरः ज्ञानेनैव प्राप्नोति । सर्वथा असौ वीर्यवशात् शान्तेन्द्रियः जायते ।

षड्विंशः ध्यानवर्गः वर्तते। एकाग्रचित्तं सर्वदोषरक्षितं भवति । एतेन निर्वाणाभिरतिः जायते । इन्द्रियजा दोषाः विनाशं गच्छन्ति, समाधिजसौख्यं च प्राप्नुवन्ति। अच्युतसुखं ध्यानजमेव भवति। प्रज्ञा समाधि-बलसंयुक्ता सर्वथा हितकारिणी भवति। यत्र पितरौ न गच्छतः ,तत्र प्रज्ञा गच्छति । दानशीलतपोध्यानैः प्रज्ञायाः प्राधान्यं वर्धते। प्रज्ञाबलमेव उत्कृष्टं बलम्। अमृतानां परं ज्ञानं श्रेयसामुत्तमं निधिभूतम्। अतः गत स्पृहैरेव प्रज्ञा सेवनीया ।

अष्टविंशतितमः वर्गः निर्वाणाख्यः वर्तते। अतएव अस्मिन् वर्गे क्लेशदाया निर्वाणमार्गमधिगच्छन्ति। मनीषिजनस्य तत्र गतवतः पुरुषस्य न वा जातिः न वा मृत्युः न वा दुःखप्राप्तिः।भवरागविवर्जितस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मित्रामित्रविहीनस्य निर्वाणं नातिदूरे तिष्ठति। चतु: सत्यविधिज्ञस्य शान्तस्य निर्वाणं नातिदूरे तिष्ठति। स दोषनिर्मुक्त: एव मुनि: उच्यते। अत: निर्वाणार्थिभि: शुभकर्म कर्तव्यम् । एतदेव शाश्वतं शान्तं स्थानम् ।

अस्मिन् ब भिक्षुवर्गे सर्वभूतहिते एतस्य मित्राचारसम्पन्नस्य अहिंसकस्य पितृवत् सर्वभूतानां दर्शकस्य प्रशंसा विद्यते । एतादृशी एव तद्-विषये सर्वेषां जनानां दृष्टि: भवति। लोष्ठकाञ्चनेव समादृष्टि: येषां जनानां विद्यते, स अनन्तसुखमाप्नोति । तादृशस्य पुरुषस्य अर्थानर्थ-लाभालाभ-सुखदु:खभावनासु सर्वत्र समदृष्टिरेव विद्यते ।एतादृश: पुरुष: सदा सन्तुष्ट: विषयतृष्णाशून्य: तत्त्वज्ञ: भिक्षु: भवति। प्रत्युत्पन्न-क्रियायोगै: कर्मासक्त: कदापि न जायते। स आनन्दयुक्त: प्रियदर्शन: प्रज्ञाधीर: प्रत्यहं सुखमाप्नोति वेदनाफलं तस्य न जायते ।मोहात्मके जगति कदापि तेषामावृत्तिर्न भवति । शान्तेन्द्रिय: दृढमति: कामशून्य: भिक्षु: आर्याष्टाङ्गेन मार्गेण निर्वाणमश्नुते। जरामरणतत्त्वज्ञ: सुरा-सुरनमस्कृत एव भिक्षुर्भवति। स कदापि भोजनाय स्त्रीदर्शनाय च सचेष्टो न भवति । पुत्रदारं परित्यज्य शान्त: बोधिमार्गानुयायिभिक्षु: प्रशंसनीय:, कदापि बन्धनेन आबद्धो न भवति परं कर्मतत्त्वज्ञो दक्ष: च जायते । निर्वाणार्थं सर्वां क्रियां कुर्वन् न कदापि दु:खभागमलिनो वा जायन्ते। न कदाचित् नरकाय तस्य क्रिया भवति, न वा अशुभं तस्य वर्तते ।निर्वाणे सचेष्ट: भूतले सापि सततं ब्रह्मचारी बुद्ध: सन्तुष्ट: अध्यायिभिक्षुर्भवति । भिक्षु: ध्यानरत: राजसेवाशून्य: अरण्यस्थ विहारादिषु निवसन् कुशलधर्मं कुर्वन् व्यसनशून्य: भिक्षुर्भवति। स कदापि क्लेशेन दह्यते। नाशो शुभाशुभानां कर्मणां फलं मुच्यते । नित्यं ध्यानपरायण: शान्तचित्त: छिन्नबन्धन: कल्याणपथगामी भवति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुण्यवर्गाख्य: एकत्रिंश: अध्याय: वर्तते । पुण्यम् उत्तमरत्नभूतं दीप्तिसन्निभम् अदार्यं सदा मातृपितृवत् रक्षकं वर्तते । पुण्यवन्त: पुरुषा सुखमाप्नुवन्ति । त्रिदिवं च गच्छन्ति । सुखार्थिभि: सदा पुण्यकर्मैव करणीयम् सिकताणु यथा न घृतं तथैव पापकर्मणा सुफलकथा वृथा । धर्माधर्मप्रधाने जीवलोके पुण्यमेव सुखरूपेण परिकल्प्यते । धर्मा एव गच्छन्तमनुगच्छन्ति । धर्म: परा गति: परमत्राणभूता सर्वदा सुखसाधिकारश्च । धर्मवीर एव सुखान्वितो भवति। अलिप्तपापै: धर्मै: निर्वाणमार्ग: अधिगम्यते । विधाया: एतदेव फलं यद् मानवा धर्मे कर्मणि सदा आस्थावान् भवति । शीलं ज्ञानं दानं च सदा पुण्यजनकानि । अतएव अभ्युदयार्थिभि: पुण्यकर्माचरणीयम् । सत्यदानमैत्री सम्यक्दृष्टिभि: विमलं मन: त्रिदिवस्या स्थानं प्राप्यते । अत्र द्युोतनादीपनात् देवनात् वा देवशब्द: दीप्ति अपरपर्याय: । तथा च दीप्तिस्वरूपता प्राप्त्यर्थं कुकर्मपरित्यक्तव्यम् । तदैव मित्रवान् देवानामन्तिकं गच्छन्ति । मनुष्याणां सुगति: देवत्वप्राप्तिश्च धर्माधीना । तस्मात् देवसाधकं पुण्यं कर्मकरणीयम्। शुभहेतु मेव सकलं सुखसाधनम् । तस्मात् पुण्यकर्मपरित्याग: कदापि न करणीय: । एतस्मिन् वर्गे सुकृतजन्मन: किं किं फलं जनै: आप्यते। तस्य विशदं विवेचनं कृतमाचार्येण । परन्तु एतत् तु निर्दिष्टं यत् विना बीजं फलप्राप्तिर्नभवति । तस्मात् शीलादिशून्य: जन: स्वर्गं मुक्तिज्ञानन्च प्राप्तुं न भवति । सुकृतकर्मणि लोकानां यथा प्रवृत्तिर्भवेत् तदर्थं अन्येच्छाधीनविषयस्य सुखस्य कर्मविपाकरूपत्वात् तावत् तत्फलप्राप्तिर्नसंभाव्यते यावत् पुण्यकर्मणि प्रवृत्तिर्न भवति ।

अस्मिन् सुखवर्गे सुखस्य स्वरूपनिरूपणं उहापोहकुशलै: आचार्यै: कृतम्। तत्र उक्तम् तृष्णाविरहितं परमं शान्तं सुखं प्राप्नुवन्ति जना: । तेन च शान्तिलाभ: जायते। योगिनाम् एव शान्तमालयं सम्प्राप्य सदा दु:खविरहित: सुखपूर्ण: जन: तिष्ठति। सुखन्च नाहेतुकं दृष्टं तस्मात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखार्थिभि: पूर्वोक्तं तत् साधनं पुण्यादिकं सर्वथा करणीयम् । अनागतस्य दु:खस्य प्रतिघाताय इन्द्रियजन: तृष्णाविरति: एव श्रेयस्करी । एवमवगम्यते यत् मैत्रीकरुणामुदितोपेक्षाणां सुखदु:खपुण्यापुण्यविषयाणां भावनात: चित्तप्रसादनं इत्येतस्य योगसूत्रस्य पूर्ण: प्रभाव: प्रदर्शितेषु वर्गेषु वर्तते इति । अतएव अनन्तरं मित्रवर्गाख्य: चतुस्त्रिंशवर्ग: उक्त:। तत्र मैत्रीभावप्राप्तिरेव अभीष्टा । शुभार्थिभि: पुरुषै: शुभसाधनं पुण्यं कर्म सदाचरणीयम् । पापकर्म दूरादेव परित्यजेत् शीलसम्पन्नं कर्म यदाचरति तदा ऐश्वर्यविहीनस्य एवं ज्ञानहीनस्यापि कुलं संगतिसम्पन्नं ज्ञानमयं च जायते । तथा च राजाववादवर्गे उक्तम् राजाधार्मिक: स्वर्गप्राप्तौ समर्थ: भवति । लोभनिर्मुक्त: राजा महीं पालयन् श्रेष्ठ: भवति । वृद्धदर्शी गुरुपूजक:, दानशील: धर्मवादी, जितेन्द्रिय: कृष्णामहीं देवलोकत्वं प्रापयति । राजाकदापि स्त्रीवशो न भवेत्, साधूनां सेवक: भवेत् । मिथ्या दर्शनविरहित: शीलरत: मेरुरिवाचल: भवेत् । निद्रामलविनिर्मुक्त: सङ्गदोषविवर्जित: सदैव पूज्यो भवति। धर्मेण प्रजा: पालयन्, धार्मिकराजा दुरलोके महीयते अनादिबलेन कर्मणा सुखप्राप्तिर्जायते। नृप: सदा सद्गुणशालिनीं बुद्धिमाश्रयेत् ।

अन्ते च ग्रन्थस्य स्तुति: कृता। तथा तस्य समाधाननाम्ना ग्रन्थान्तरेषु निर्देश: विद्यते । अस्मिन् वर्गे किमेतस्य ग्रन्थस्य अध्ययनेन फलं का च उपलब्धि: इत्येषां विषयानां तात्पर्यं निर्देशरूपेण निरूपणं कृतम् । अस्मिन्नेव वर्गे एतदाचारफलं सम्यक् निरूपितम्। तत्र च सर्वसत्वेषु बान्धवत्वं भवबन्धनभेदकत्वं विभेददृष्टिशून्यत्वं सम्यग्ज्ञानदीप्तिपूर्वकं सम्यग्दृष्टिलाभार्थं त्रिदोषमलशोधनपूर्वकं सर्वसंकटनिराकरणार्थं सर्वबीजफलप्राप्त्यर्थं लोकनाथस्य शान्तप्रतिमां दर्शनम् भवभयेभ्य: निर्वृत्ति: शान्तपदस्य प्राप्ति: च वर्णिता:। तत्त्वचिन्तका: पुरुषा: एतद्दृष्टिं समारुह्य भवसागरं तरन्ति। ज्योतिषां परं ज्योति: आप्नुवन्ति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वजगद्धिताय प्रवृत्ता: सन्तो पुरुषोत्तमपदवीं लभन्ते। अत: ज्ञानलोकाय अक्षयपरमपदप्राप्त्यै एतदनुरूपाचरणं विधेयम् । यत: क्लेशहीना: जना: श्रीसम्पत्तिं लभन्ते । अत एव धर्मसमुच्चयोनाम एषाग्रन्थ: मोहान्धकार-निवारक: विद्वेषरहितलोके सम्प्रथित: विराजते । अत: एतदनुकूलमा-चरणं कर्त्तव्यं इति परम: उपदेश: । अत्र च पूर्ववर्त्तिना सर्वेषां बौद्धा-चार्याणां तदनुकूलानाञ्च ब्राह्मणधर्माणां सारांश: संगृहीत:, कर्त्तव्य-त्वेन च सन्निदृष्ट: अत्र न सम्प्रदायाग्रह: न वा कश्चित् धर्मविशेषे आसक्ति: । उदारश्च विचार: अत्र संग्रथित: विराजते ।अत: ब्राह्मण-धर्माणामपि विषये न तादृशी विरोधभावना अत्र संगृहीता, येन ग्रन्थ-कर्त्तु: धर्मविशेषविषये आग्रह: प्रतीयेत्। नूनं एष ग्रन्थ: सकलजनहिताय सकलजनसुखाय कर्त्तव्यमार्गनिर्देशाय एवेति अलं इति विस्तरेण ।धन्येयं समन्वयभावना आचार्यस्य अत्र केनापि रूपेण असद्धर्मपक्षपात: न संलक्ष्यते अस्माभिस्तु एवं चिन्त्यते यत् अस्मिन् धर्मसमुच्चये कर्त्तव्यभावनैव विरोध-भूमिं परित्यज्य संग्रथिता। नूनं एतादृशाचरणेन बुद्धत्वप्राप्ति: पुरुषो-त्तमत्वलाभश्च अवश्यमेव स्याताम् इति ।।

---:0:---

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्री धर्मादित्यधर्माचार्यस्य

सम्मतिः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्रीधर्मादित्यधर्माचार्यनामकेन भिक्षुणा "इण्डियन हिस्टोरिकल क्वार्टर्ली" (प्रथमो भागः मार्च, १९२५) ग्रन्थे अयं ग्रन्थमधिकृत्य एकः प्रबन्धो लिखितः। तत्र महत्त्वशालिन्यो बह्व्यः सूचनाः परिदृश्यन्ते। अतस्तस्य प्रबन्धस्याविकलांऽशो मया अत्र प्रस्तूयते --

---

१९२२ तम ईशाब्दे अप्रैलमासे पं० श्रीहर्षवज्राचार्येण काठमाण्डु राज्यपुस्तकालयस्याध्यक्षात् विद्यालयाध्यापकस्य एका सूचना प्राप्ता यत् प्राचीननेपालीसंस्कृतभाषयोर्मध्ये एकं मौलिकं हस्तलिखितपुस्तकं तेन (कुत्रचित्) दृष्टम् इति। नेपालराज्यस्य काठमाण्डूनगरस्य समीपे कस्यचित् उपासकस्य गृहे इदं पुस्तकं तेन प्राप्तम्। इयं पाण्डुलिपिः कस्यचित् गृहस्य अन्तराले अन्धकारावृतकोणे स्थितेषु पुस्तकेषु निक्षिप्ता अन्वेषणरता तेन प्राप्ता।

पाण्डुलिपिरियं धर्मसमुच्चयनामकग्रन्थस्यासीत्। अयं खलु ग्रन्थः धर्माणां (त्रिपिटकधर्माणां) एकसंकलनात्मको मूलरूपः। अत्र बौद्धैरधिकृतानां नियमानां बुद्धेनोपदिष्टानां सिद्धान्तानां च सारतः आकलनं दृश्यते। तत्र प्रथमश्लोके स्वगुरुं प्रति नमस्कारं विधाय संकलनकर्ता इत्थमुक्तवान् --

सद्धर्मस्मृत्युपस्थानं सूत्रं वैपुल्यसागरात्।
गाथाः समुद्धरिष्यामि लोकलोचनतत्पराः॥ इति॥

पुनश्च अन्या पंक्तिः इत्थमापतति —

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"वैपुल्यसद्धर्मे यदा हि तस्य स्मृत्युपस्थिते ।
गाथा: सूत्रवराद् हि मायोघृता:" ।। इति ।।

अनेनेदं स्पष्टं प्रतिभाति यत् भिक्षु: अवलोकितसिंह: अस्य संकलनकर्ता आसीत् । स च सर्वमस्य वस्तुजातं सद्धर्मस्मृत्युपस्थानसूत्रात् नि:सार्य वैपुल्यभीरोदाघसूत्रात् च संक्षिप्ततया संकलितवान् ।अत्रऽहं मन्ये एतान्यपि सूत्राणि तथैवासतां यथा इदमुपलब्धं हस्तलेखपुस्तकम् ।

सद्धर्मस्मृत्युपस्थानसूत्रं निश्चितमेव सूत्रपिटकस्य पवित्रतमो ग्रन्थ: आस्ते । किन्तु इदानीं दु:खपुर:सरं निवेद्यते, यत् पुस्तकमिदं व्यक्तिगत आलोचनाय नोपलभ्यते । सूत्रमिदं स्वतन्त्रभूतं मन्ये नेपालदेशे भारते वा तदानीं इदमवश्यमेव दृष्टम् ततश्च संकलनकर्त्रा इदं (धर्मसमुच्चय:) नि:सारितम्। पर्याप्ततया इदं प्रदर्शयितुं शक्यते, यत् नेपाले तदानीं एक-पुस्तकमवश्यमेव आसीदिति ।

भारते इदं सूत्रमासीदिति संकेतस्य अयमभिप्राय:। वयं तत्र बोधिचर्यावतारस्य सूत्रसमुच्चयस्य च कर्तारं स्मारयाम:। अयं हि नेपाल-देशस्य पाण्डुलिप्युद्धृतसङ्केतेन इदं ज्ञायते यत् शान्तिदेव: राज्ञो देव-वर्मण: पुत्र: आसीत् । यो हि पश्चाद् बौद्धभिक्षुत्वं त्रिपिटकज्ञानं च प्राप्य नालन्दाविश्वविद्यालये आचार्यो जात:। अयं पश्चाद् मुमुक्षु-समाधिमवाप्य तस्मिन् पूर्णतां च विधाय'भुसुक्' जात:। तथापि यदा विषयेऽस्मिन् विप्रतिपत्तय: उत्थिता: तदा तेन स्वग्रन्थानां संकलनं व्यधायि । ततोऽयं हस्तलिखितो ग्रन्थ: तेन संकलित:। एतेन ज्ञायते यत् अस्य अन्या: अपि कृतय: आसन् । या: खलु सप्तदशाब्दत: पूर्वं लिखिता अभूवन् । अयं खलु सन्दर्भ: एतेन तथ्येनापि सुस्पष्टं ज्ञायते यत् तेन 'शिक्षासमुच्चये प्रथमपरिच्छेदे अद्यामातस्य सद्धर्मस्मृत्युपस्थानसूत्रं तत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उल्लेखि । अतो निश्चितं यत् सूत्रमिदं समुच्चयात् पूर्वमासीत् । तच्च दशवर्षपूर्वम् आहोस्वित् ततोऽधिकं वा भवेत् । उत्तरग्रन्थाः सिसिल-बण्डेलमहोदयेन अनूद्य सम्पादिताः । स तत्र उल्लिखितवान् -- अयं खलु ग्रन्थः प्रवर्तमानं पापं प्रतिरोधयितुं प्रभवति। किन्तु अहमत्र विश्व-सीमि यत् अयमतीवमहत्त्वपूर्णो ग्रन्थः आसीत् । यतो हि एतेन विना भिक्षु- अवलोकितसिंहः प्रभूतं तथ्यं स्वधर्मसमुच्चयार्थं नैवाप्तुं शक्नोति स्म । तस्य बृहत्तरस्वरूपं प्रदर्शयितुं ग्रन्थोऽयं पालिधम्मपदस्य श्लोकेभ्यः पञ्चगुणिताधिकश्लोकयुक्तः आस्ते ।

अन्यत् प्रमुखं पुस्तकं सूत्रं वा यदि हि भिक्षु- अवलोकितसिंहेन तत्र संदृष्टं तत् खलु वैपुल्यमहागम्भीरमहोदधिसूत्रमस्ति । यद्यपि सूत्रमिदं इदानीं नेपालराज्ये नोपलभ्यते, तथापि इदमतीव विस्तृतं महत्वपूर्णं च ग्रन्थरत्नमासीत्, यस्मिन् बौद्धदर्शनस्य सिद्धान्ताः उल्लिखिता भवन्ति स्म । धर्मसमुच्चयोऽपि इदमेव प्रमाणीकरोति। नेपालराज्ये अस्य सूत्रस्य अन्येषां च वैपुल्यसूत्राणां स्थितिः तत्र भ्रमणशीलयात्रिभिर्ज्ञायते । चीन-देशीययात्रिणः उक्तवन्तो यत् नेपालराज्ये वैपुल्यसूत्राणां विभागा आसन्। अथ च एतस्य निर्माणमेव प्रमाणयति, यत् तदानीं तत्र प्रभूततमं वैपुल्य-साहित्यं भारतनेपालयोः प्राच्य-एशियायामपि च आसीत् इति धर्मपाल-बोधिसत्त्वाख्येन काञ्चीपुरस्थितेन शतशास्त्रवैपुल्यसूत्रस्य टीकायामुद्धृतं चीनयात्रिणा ह्वेनसाङ्गेनापि स्वकीयभारतविवरणे अमृतायुर्ध्यान-सूत्रस्य ज्ञानवैपुल्यसूत्रस्य अथ च आर्यधर्मवैपुल्यसंग्रहसूत्रस्य च केचन संदर्भाः उद्धृताः। शिक्षासमुच्चये यत् उद्धरणं प्राप्यते तत् वैपुल्यसूत्रेभ्यः निर्मितस्यास्य ग्रन्थस्य प्रमाणीकरणे पर्याप्तं भवति ।

'धर्मसमुच्चय' सूत्रं हस्तपत्रेषु १२।२६[१] परिमिते प्राचीनभूर्जपत्रे त्रयोदश पञ्चदशाब्द विशिष्टलिपिभेदैः नेपालदेशे प्रायशो विलिखितं प्राप्यते। अस्य लेखनशैली स्वरूपा अथ च दृष्टिसौन्दर्यमयी उपलभ्यते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शैलीयं खलु कासुचित् ग्रन्थावलीषु एव उपलभ्यते ।

इयं खलु पाण्डुलिपि: १०६ पत्रेषु लिखिता। प्रत्येकस्मिन् पत्रे षट् पंक्तय: प्रत्येकस्मिन् पंक्तौ ६३ अक्षराणि सन्ति । इयमुभयोरपि पृष्ठयोर्लिखिता वर्तते । पत्राणि मध्याकारयुक्तानि शताब्दितश्च सुरक्षितानि सन्ति । पत्रेषु लेखनमतीव अस्पष्टमासीत् । इदमपि दुर्भाग्यपूर्णं वर्तते यत् अस्य ग्रन्थस्य कानिचित् पत्राणि यथा ४६, ५३,२,५७, ६७,८१ संख्याकानि अनुपलब्धानि सन्ति । तथापि अस्य हस्तलिखितपुस्तकस्य स्वरूपं नूतनतां प्रकाशयति । यद्यपि कानिचित् पत्राणि त्रुटितानि अस्पष्टानि च दृश्यन्ते, इदं मन्ये आधुनिकसंरक्षकानाम् असावधानदृष्ट्या आपतितमिति ।

फलत: हस्तलिखितस्य अस्य ग्रन्थस्य केचन परिच्छेदा: नष्टप्राय भागै: प्रभाविता भवन्ति एव । यतो हि अस्य संकलनकर्ता अन्ते इत्थम् अभ्यलेखि- तेन ग्रन्थे यत् धर्मस्य स्वरूपं विस्पष्टीकृतं तत् २६८४ श्लोकेषु सुनिश्चितम् । वैपुल्यसूत्रेभ्य: सञ्चित्य शब्दा: अथ च संख्या यथा तेन अत्र वर्णिता तेन सुनिश्चितं यदत्र धर्मसमुच्चये कतिसंख्याका: स्तबका वर्तन्ते इति न सम्यक् ज्ञायते । अत: एतस्य पूर्वपृष्ठेभ्य: किञ्चिदपि साधर्म्यं नास्ति ।

अत्र बौद्धभिक्षु: अस्मिन् उपदेशे एवं वदति यत् वैपुल्यमहागम्भीरोदधिसूत्रराड् भिक्षुणा अवलोकितसिंहेनोद्धृतम् इति। अयं चतुरशीतिश्लोकाधिकषट्शतोत्तर सहस्रद्वयश्लोकात्मको(२६८४) ग्रन्थ:। अत्र वैपुल्यगम्भीरोदधिसूत्र: स सकलमिदं वस्तुजातं नि:सार्य २६८४ श्लोकेषु तदर्थजातं विवेचितवान्। अत्र श्लोकानां द्विरावृत्तिरप्यनुग्रहसहायिका प्रतिभाति। अस्या: पाण्डुलिपे: कतिपयानि पत्राणि

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Name of the Subject - Its English interpretation

11. Citta	Varga	-	Chapter	the mind.
12. Vāk	"	-	"	Speech
13. Karma	"	-	"	Action
14. Samyojana	"	-	"	Wordly londage.
15. Pāpa	"	-	"	Sin
16. Naraka	"	-	"	hell
17. Preta	"	-	"	Preta or ghost.
18. Tiryyak	"	-	"	Beast.
19. Ksudha	"	-	"	hunger.
20. Kausidya	"	-	"	Indolence.
21. Karunā	"	-	"	Mercy.
22. Dāna	"	-	"	liberality.
23. Shila	"	-	"	moral practice.
24. Ksānti	"	-	"	Patince.
25. Viryya	"	-	"	Strenousness.
26. Dhyāna	"	-	"	Meditation.
27. Prajñā	"	-	"	Wisdom.
28. Nirvān	"	-	"	eternal freedom.
29. Mārga	"	-	"	The way
30. Bhiksu	"	-	"	The Buddhist monk.
31. Punya	"	-	"	Righteousness.
32. Deva	"	-	"	God.
33. Sukha	"	-	"	Happiness.
34. Mitra	"	-	"	A friend.
35. Rajāvavāda	"	-	"	admonition to the king
36. Stuti	"	-	"	Eulogy.

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्रुटितानि । इदानीमुपलब्धश्लोकेषु मध्ये केवलं २०० श्लोकाः एव विवेचनार्हाः उपलभ्यन्ते । प्रायः तत्र षोडशाक्षराणामनुष्टुप् छन्दसा श्लोकाः मिलन्ति । अत्र संस्कृतभाषा अतीव सरला विविध-अर्थानुगता ऋजुः च वर्तते । सर्वे खलु पारिभाषिक शब्दाः बौद्धत्रिपिटकेषु उपलभ्यन्ते।

धर्मसमुच्चयस्य विषयवस्तु पालि-भाषायां लिखितस्य धर्मपदस्य विषयवस्तुतः पञ्चगुणाधिकमस्ति। धर्मसमुच्चयः षट्त्रिंशत्वर्गेषु विभक्तः। प्रत्येकवर्गस्य संमिश्रितः पूर्णः पंक्तिबद्धः विषयस्य बौद्धानां परिच्छेदानुसारं इह नामपुरःसरम् आङ्ग्लभाषान्तरयुक्तश्च प्रस्तूयते, यथा जितवर्गतः स्तुतिवर्गपर्यन्तम् --

Name of the Subject			Its English interpretation
1. Jita	Varga		Chapter on the Victories.
2. Dharmaopadesa	"	- "	The preaching of the law.
3. Kāya Jugupsā	"	- "	The abhorrence of the body.
4. Parivarta	""	- "	Changefulness.
5. Anityatā	"	- "	The impermanence.
6. Apramāda	"	- "	The Vigilance or lustless-activity.
7. Kāmajugupsā	"	- "	The abhorrence or renunciation of sensual pleasures .
8. Trisnā	"	- "	Desire.
9. Strījugupsā	"	- "	The abhorrence of the woman.
10. Madyajugupsā	"	- "	The a bhorrence of the intoxicating liguors.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Name of the Subject				Its English interpretation
11. Citta	Varga	-	Chapter	the mind .
12. Vāk	"	-	"	Speech
13. Karma	"	-	"	Action
14. Samyojana	"	-	"	Wordly londage.
15. Pāpa	"	-	"	Sin
16. Naraka	"	-	"	hell
17. Preta	"	-	"	Preta or ghost.
18. Tiryyak	"	-	"	Beast.
19. Ksudha	"	-	"	hunger.
20. Kausidya	"	-	"	Indolence.
21. Karunā	"	-	"	Mercy.
22. Dāna	"	-	"	liberality.
23. Shila	"	-	"	moral practice.
24. Ksānti	"	-	"	Patince.
25. Viryya	"	-	"	Strenousness.
26. Dhyāna	"	-	"	Meditation.
27. Prajña	"	-	"	Wisdom.
28. Nirvān	"	-	"	eternal freedom.
29. Mārga	"	-	"	The way
30. Bhiksu	"	-	"	The Buddhist monk.
31. Punya	"	-	"	Righteousness.
32. Deva	"	-	"	God.
33. Sukha	"	-	"	Happiness.
34. Mitra	"	-	"	A friend.
35. Rajāvavāda	"	-	"	admonition to the king
36. Stuti	"	-	"	Eulogy.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत्र न केवलं संस्कृतस्य पालिभाषाया वा धर्मपदस्य पुनराख्यानमेवास्ति, प्रत्युत वैपुल्यगंभीरोदधिसद्धर्मस्मृत्युपस्थानसूत्रयोः आधारेण स्वतन्त्ररूपेण संकलनमस्ति। अयं समुच्चयः कतिवर्गेषु कतिपयसंदर्भैः समन्वितोऽस्ति। यथा अनित्यता-अप्रमादवर्गाभ्यां तत्र सन्निवेशः दृश्यते, तथैव कुत्रचित् पुनः परिष्कारोऽपि अवलोक्यते। बौद्धपारिभाषिकग्रन्थेषु शब्दाः तथैव प्राप्यन्ते यथा अस्मिन् ग्रन्थे ते उपलभ्यन्ते।

विभिन्नैर्विचारैः इदं सुस्पष्टमेव जायते यत् धर्मसमुच्चयो न केवलं रूपान्तरणम्, अपितु महत्त्वशाली यद्ग्रन्थः विशिष्टतासंयुक्तोऽस्ति। ततोऽप्यधिकं सुस्पष्टता धर्मपर्यायाणामस्मिन् संग्रहे वर्गीकरणमुपलभ्यते। विद्वान संकलनकर्ता अस्य ग्रन्थस्य धर्मसमुच्चयनामा धर्मपर्याय इति नामान्तरं लिखति।

अस्मिन् ग्रन्थे बहूनि विचारजातानि सुस्पष्टीकृतानि सन्ति। मन्ये बौद्धशब्दानां विश्लेषणार्थमेव अस्य संकलनमिति। चिन्नविहारस्य भिक्षु सुगीतज्ञानस्य वर्णनमनुसृत्य ग्रन्थोऽयं परोपकारार्थं कृतम् इति। अत्यधिकदायित्वं निभालयता तेन नाम्नः अनुकृतिः स्वरूपं च तथैव स्वीकृते यथा धम्मपदे वर्गाः सन्ति। तथा च तत्साहित्यमनुसृत्य पश्चात् धर्मपर्यायरूपेण धर्मस्य स्वरूपं बुद्धेन प्रत्यपादि। अस्मिन् वर्गे ललितविस्तरस्य आर्यगण्डव्यूहसूत्रस्य च आर्यव्यूहमहाधर्मपर्यायरूपेणानुकरणं कृतम्। आर्यव्यूहमहाधर्मपर्यायसूत्रम् आर्यगण्डव्यूहे उद्धृतमस्ति। इदं च तत्र लिखितम् एतस्य लेखनस्य मूलं पूर्णं बुद्धत्वावाप्तिः कपिलवस्तुनः शुद्धोदनस्य कुमारस्य कृते आसीत्। एतस्मिन् प्रसङ्गे बहूनि प्रमाणानि न सन्ति व्याख्यानाय। अतो वैपुल्यसूत्रधर्मपर्याययोर्मध्ये विभेदस्य तथा मूलरूपं नास्ति यथा ललितविस्तरधर्मपर्याय वैपुल्यसूत्रयोर्मध्ये परिगण्यते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भिक्षुणा अनुकरणकर्त्रा अस्य ग्रन्थस्य लेखनतिथिः सम्वत् वैशाखकृष्णचतुर्थी २६३ इति स्वलेखनावसरे उल्लिखिता । अस्य ग्रन्थलेखकस्य २६३ इति संवत् सम्भवतः नेपाली संवत् वर्तते। तत्र च नेपालभूपालानां रुद्रदेवमहाशयानां शासने अस्यानुकरणं इत्यपि लिखितम्। इदानीं नेपालसंवतानुसारं १०४५ संवत्सरः प्रचलति । श्री सुवोत्तमी ज्ञानेन चित्रविहारे यत् लिखितं तदनुसारं अस्य ग्रन्थलेखनस्य समयः वैशाखकृष्णचतुर्दशी ११७३ ई० पश्चात् भवति ।

अयं खलु कालः इतिहासस्य छात्राणां कृते अतीव मूल्यवान् वर्तते। यतो हि एतेन बौद्धग्रन्थलिखितप्रकारेण भिक्षुसङ्घस्य नेपाले तात्कालिकी अवस्थितिः ज्ञायते । सामान्यतः शैव-ब्राह्मणेषु, गोरखानेवारवासीयेषु च अयं विश्वासः प्रचलति, यत् नेपाले श्रीमदाद्यशङ्कराचार्याः तस्य अनुयायिनश्च आगत्य बौद्धानां धर्मस्य साहित्यस्य च विनाशं कृतवन्तः स्म । इदमेव मुख्यं तथ्यम् आस्ते यत् हि खलु अबौद्धैः बौद्धकृत्यानां कृते तदानीं यावत् कृतस्य प्रदर्शनमास्ते। वस्तुतस्तु वयं भिक्षु-भिक्षुणी-सङ्घयोर्बौद्धसाहित्यस्य संस्कृतेश्च ह्रासस्य कारणं राज्यकृतमसाहाय्यमेवास्ति इति मन्यामहे। यतो हि तदानीं सहस्रवर्षेभ्य पूर्वं तेभ्यो निन्दैव प्रचलिताऽऽसीत्। भिक्षुद्वयोः नामसंकलनकर्त्रा अनुकरणकर्तृरूपेण प्रदर्शयति यत् तदानीं भिक्षुसङ्घः भिक्षुण्यश्च जीविता एव आसन् बौद्धविधीनां उपदेशः तदानीमपि आसीत्। इति भिक्षु ज्ञानोचितसिंहस्य अनेन ग्रन्थसंकलनेन सुस्पष्टतया ज्ञायते । अयं ग्रन्थः जनानां बुद्धत्वाधिगमाय संरचितः। अथ च धर्मस्य विभिन्नसाधनमनुसृतवतां जनानां पारस्परिककलहशमनाय विरचितः। पुनश्चास्य ग्रन्थस्यैकमेव उद्देश्यमेवासीत् यद् बौद्धधर्मस्य उपदेशानां लोककल्याणाय प्रचारम्-प्रसारणम् च ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नेपालराज्ये राजाबौद्धानां मुख्यप्रभावस्य द्योतको भवति स्म। नेपालराज्यपरम्परा प्रदर्शयति यत् रुद्रदेवमहाराजः राजपूतसम्प्रदायानुग्रहः सूर्यवंशस्य पूर्ववर्तिनो अंशुवर्मणः प्रतिमागभूतः आसीत् । तत्र वामदेवः प्रथमः राजपूतसम्प्रदायस्य राजा आसीत् । माण्डदेवः तस्य पौत्रः खलु षोडशवर्षाणि यावत् राज्यं विधाय स्वपुत्राय नरसिंहदेवाय राज्यं समर्पितवान् । ततस्तेन एव: माण्डुदेवसंस्कृतविहाराख्यः महाविहारः आरचितः। तदनन्तरं भिक्षुत्वं परिगृह्य निर्वाणं परिगृहीतम्। एषां त्रयाणामपि तेषां विवरणं अपि तत्र नास्ति तथापि तस्य पुत्रस्य राजारुद्रदेवस्य नाम आयाति। यो हि खलु सप्तवर्षाणि यावत् राज्यं विधाय स्वपुत्राय मित्रदेवाय राज्यं प्रदाय सङ्घे परिवव्राज । स खलु औकुलिविहारनामके राजाशिवदेववर्मणा विरचिते विहारे वासं विधाय तस्य पुनर्निर्माणं कृतवान्। अयं राजा खलु दीपङ्करबुद्धस्य एकां प्रतिमां तत्र समादाय तन्नाम्ना एकं दानमहोत्सवं प्रवर्तितवान्, यत्र उपासकानां दानानि संगृह्यन्ते स्म। स विहारस्थितानां भिक्षूणामावश्यकजीवन-यात्रार्थं विहारभूमेः अपि व्यवस्थां कृतवान्। स च स्वपौत्रस्य जयदेव-मल्लस्य दायविषयेऽपि सूचितवान् । इदञ्च लिखितमप्यास्ति, यत् अयं राजा बौद्धधर्मस्य विकासार्थं सोत्साहेन कार्यं कृतवान्। नूतनं विहारं विरचितवान् पुरातनञ्च व्यवस्थापितवान्। ततः स्वेच्छया निर्वाणमवाप। स स्वनिर्मिते विहारे अध्ययनं साधनां च विधाय कमपि भिक्षुं तत्र अन्यः साम्प्रदायिकानाम् असहिष्णुतां वर्धयितुं नैव प्रेरयत्। अष्टशतवर्षपूर्वोऽय-मितिहासः ।

चित्रविहारनामकात् हस्तलिखितात् इदमपि समधिगतं यत् तत्र नेपाले बहवः अन्ये विहाराः आसन्, किन्तु तेषु कस्मिंश्चिदपि विहारे पाण्डुलिपीनां लेखनस्य चर्चैव न प्राप्यते। अत्र हेतुं न विद्मः यत् इमे विहाराः परिवर्तिताः सन्तः पारम्परिकैतिहासिकं चर्यामेव न तथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रस्तुवन्ति, आहोस्वित् नेपालराज्यस्य बाधादोषात् तत्र वर्षाः न प्राप्यन्ते इति ।

अथ च इमं ग्रन्थमधिकृत्य श्री हाजिमेनाकामुरा नामकेन बौद्धविदुषा ('Survey of Indian Buddhism page 175) इत्यत्र किञ्चिद् विशेषमुल्लिखितम्। तदपि महत्त्वशालीति विदुषां परितोषाय यथाऽत्राविकलं प्रस्तूयते -

<u>Dhamma- Samuccay-</u>

No.10. - Mitsutoshi moriguchi I B K[1] Vol 16 No. 1 march 1968, 352 - 354.

No.13. - Dhammasamuccaya compendium de la loi 1ere partie (chap. I a V) par Lin li- kouang. Texte Sanskrit edite avec la version tibetaine et les version chinoises et, traduit en francois . paris, Adrien Maisonneuve 1946. Reviewed by H.W. Bailey JRAS[2] 1947, 121-122, 2e Partie (Chap. VI a XII)per

---

1. Indogaku Bukkyōgaku kenkyū (Journal of Indian and Buddhist Studies) Edited by the japanese Association of Indian and Buddhist studies Tokyo. Department of Indian philosophy University of Tokyo.
2. Journal of the Royal Asiatic Society of great Britain and Ireland . London.

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

lin li-kouang. Revision de André Bareau J.W. de jong et paul Demieville, avec des appendices par J.W. de jong 1969. 3e Partie (Chap XIII a XXXVI) 1973. The Chinese Version of it is 10 Vols. Taisho No. 728, Translated into chinese by etc. in the sun period. This was translated into japanese by jikō Hazama in KIK[1] KyōshūbyVol Vol.14. The Sanskrit text was edited. Lin Li- kouang Dharma-Samuccaya Compendium de do Loi 1ere Partie (chap. IaV) Texte Samskrit edite avec la version tiedaine et les versions chinoses et traduit en from cais paris 1946. Reviewed by Hideo Kimura, Bukkyōgaku kenkyū NS.[2] Jan. 1949. The first chapter was translated into Japanese by H. Kimura in Ryūko Ku Daigaku Gokuhō Dec. 1941. P P-1-19 and the fourth chapter also by him in Bukkyōgoku ken kyū No. 2 march 1949 P P. 28 -45 of yamada Bongo Butten P P. 106-108.

---

1. Kokuyaku Issaikyō Tokyo, Daito Shuppausha, 150 Vols. completed in 1978.

2. New- Series.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ग्रन्थस्य विषयवस्तु-

संक्षेपः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ग्रन्थस्य विषयवस्तुसंक्षेपः

अस्तीयं संस्कृतविदुषां शैली यत् ते स्वकीयग्रन्थस्य, बालानां सुखबोधाय प्रतिपाद्यस्य च विषयस्य सम्यग् वैशद्याय वर्गनाम्ना, परिच्छेदनाम्ना, अध्यायनाम्ना, प्रकरणनाम्ना वा विभाजनं कुर्वन्ति। अयञ्च ग्रन्थो ग्रन्थकर्त्रा वर्गभेदेन विभक्तः। तथा च ग्रन्थोऽयं षट्त्रिंशद् वर्गेषु समाप्तिमितः। अत्र प्रतिपाद्यानां विषयाणां वर्गेण सहैव नामग्रहणं कृतमिति, तेन नामपठनेन सहैव मन्दानामपि तत्र सुखेन प्रवृत्तिः स्यादिति महत् सौकर्यम्। ते च वर्गा नाम्ना यथा :-

प्रथमो जिनवर्गः, द्वितीयो धर्मोपदेशवर्गः, तृतीयः कायजुगुप्सावर्गः, चतुर्थः परिवर्तनवर्गः, पञ्चमोऽनित्यतावर्गः षष्ठोऽप्रमादवर्गः, सप्तमः कामजुगुप्सावर्गः, अष्टमस्तृष्णावर्गः, नवमः स्त्रीजुगुप्सावर्गः, दशमो मद्यजुगुप्सावर्गः एकादशश्चलवर्गः, द्वादशो वाचावर्गः, त्रयोदशः कर्मवर्गः, संयोजनवर्गश्चतुर्दशः, पापवर्गश्च पञ्चदशः। षोडशो नरकवर्गः, सप्तदशः प्रेतवर्गः अष्टादशस्तिर्यग्वर्गः दुःखवर्ग एकोनविंशः, विंशः कौशीद्यवर्गः, करुणावर्गः एकविंशः, द्वाविंशो दानवर्गः, त्रयोविंशः शीलवर्गः शान्तिवर्गश्चतुर्विंशः, वीर्यवर्गस्तु पञ्चविंशः, षड्विंशो ध्यानवर्गः, प्रज्ञावर्गः सप्तविंशः, अष्टाविंशश्च निर्वाणवर्गः, मार्गवर्ग एकोनत्रिंशः, भिक्षुवर्गस्त्रिंशः, पुण्यवर्गश्चैकत्रिंशः, द्वात्रिंशो देववर्गः, त्र्यधिकत्रिंशः सुखवर्गः मित्रवर्गश्चतुस्त्रिंशः, पञ्चत्रिंशो राजवादवर्गः। अन्तिमश्च स्तुतिवर्गः, षट्त्रिंशः। एवमयं ग्रन्थः षट्त्रिंशद्वर्गेषु प्रतिपाद्यं सदाचारविषयां स्वस्मिन् संगृहीतवान्। एतद्विभाजनशैल्यां नामग्रहणसमकालमेव अस्मिन् वर्गे को विषयः प्रतिपादितः इति स्पष्टमवबुध्यते। इति परमकारुणिकेन ग्रन्थकर्त्रा जिज्ञासूनां झटित्यवबोधायात्र नामग्रहणपूर्विका विभाजनशैली स्वीकृता। वयं च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वर्गविभागो नास्माभिः कृतः, अपितु ग्रन्थकत्रैव स्वयं विहितः। तथा-चोक्तस्तेन प्रतिदशवर्गान्ते वर्गाणां विभाग उदानश्लोकैः ।--

(१) जित-धर्म-आर्यवर्गाः परिवर्तो ह्यनित्यता ।
अप्रमादः काम-तृष्णे स्त्री च मद्येन ते दश।[1]

(२) चित्तवाक्-कर्म-संयोजनाः पापं च पञ्चदश ।
नरक-प्रेत-तिर्यक्-बाल,कौशीद्यं दशमं विदुः।।[2]

(३) वर्गाः करुणा-दान-शील-क्षान्ति-वीर्यमथापि च ।
ध्यान-प्रज्ञाऽथ निर्वाण-मार्गो भिक्षुश्च ते दश।[3]

(४) पुण्य-देव-सुख मित्र-राज-स्तुतिवर्गान् विदुर्बुधाः ।
स्मृत्युपस्थितये संगृहीतो वैपुल्य(धर्म)संग्रहः।। इति।।[4]

इत्थमनेन ग्रन्थकर्त्रा सर्वेऽपि बोधिपाक्षिका धर्माः यैर्विना निर्वाणाधिगतिरसम्भवा, वैपुल्यधर्मसंग्रहतः संगृह्यात्र विशदं व्याख्याताः। एषां धर्माणामहर्निशं स्मृत्या ध्यानेन च निर्वाणाभिलाषुकः क्रमशो निर्वाणपदमधिरोढुं शक्नोतीति ग्रन्थस्य प्रयोजनम् ।

:१: <u>प्रथमो जितवर्गः</u>

ग्रन्थस्यास्य प्रथमे जितवर्गे भगवता बुद्धेन स्वगुणोत्कर्षेण देव-मानवतिर्यग्योनिषूद्भूताः सर्वे सत्त्वा जिताः' इति भगवतो गुणोत्कर्षबोधनमेव ग्रन्थस्य उद्देशः स्थापितः। तत्र ग्रन्थकर्त्रा विघ्नोपशान्तये मङ्गलं विधाय सद्धर्मस्मृत्युपस्थानरूपं प्रयोजनमुक्त्वा सर्वप्रथमं भगवतो-

---

१- पु० पृ० ने० ५६ क० १०।५१

२- पु० पृ० ने० ८८ ख० ३० २०। ३३

३- पु० पृ० ने० १०८ ख० ३०।९२

४- पु० पृ० ने० १२४ ख० ३६। ८७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दास्याप्तानि उक्तानि ।तानि यथा— सत्कर्मस्वप्रमाद:,गुरौशास्त्रे च श्रद्धा, कुशलकर्मणि,वीर्यारम्भ:,धैर्यम्,ज्ञानाभ्यास:,सत्सङ्गश्चेति।ततो दानशीलादय: शान्तिसम्प्राप्तिहेतव: उक्ता: ।चापल्य-पापसंश्लेषणादिकानि नरकगामीनि प्रयोजनानि उक्तानि ।प्रसङ्गप्राप्तानि प्रेतेषु तिर्यक्षु च उद्भवसाधकानि कारणान्युक्तानि ।

अशुभकर्मभि: कार्यहानि: सत्कर्मपरम्परया च कार्यसिद्धि: , प्रमादवर्जनपूर्विका च श्रेयसे बुद्धि: अनुत्तमसुखसाधिकेति प्रतिपादितम् । ततश्च शीलस्य,परोपकारस्य, श्रद्धाया: मैत्रीकरुणयो: प्रशंसानन्तरं रागद्वेषविमुक्तस्य प्रमादरहितस्य सन्तुष्टस्य सर्वप्राणिष्वनुकम्पिन एव समविक्तस्य विज्ञासो: कार्यसाफल्यं साधितम्। एवमेव धर्मदानरतो घोरो मात्सर्यैर्ष्याविमुक्त एव योगी निर्वाणमधिगच्छति ।कार्याकार्यविधिज्ञस्य शान्तस्य गुरुपूजारतस्य ध्यानाध्ययनतत्परस्याशठस्य अतिदक्षस्य नित्यं च प्रियवाक्यकुशलस्यैव कार्यसिद्धिर्भवति । एवमेव देशकालविधिज्ञस्य साध्यासाध्यं च जानत: शक्योपाय विधानतत्परस्यैव कार्यं सिद्धयति । तथैव योगिना अक्रोधेन क्रोध:, क्षमया क्रूरता अधर्मश्च धर्मेण हन्यते । सत्येन मृषावाक्यं, समाधिना पैशुन्यम्, मार्दवेन पारुष्यम्, च जेतुं शक्यते। मैत्र्या प्राणातिपात:(हिंसा),दानेन स्तेयमि तेतुं शक्यते । अविद्या विद्यया, रात्रिर्दिवसेन, कृष्णपक्षश्च शुक्लपक्षेण जित इति सर्वैरनुभूयते ।

इत्थेवं गुणानां प्रशस्तिवाचनानन्तरम् अन्ते उदाहरणपूर्वकम् अर्हत: प्राशस्त्यमुट्टङ्कितम् ।तथा हि तेनोक्तम्— मेरुणा पर्वता इव, वटेन वनमालिका इव, आदित्येन ग्रहतारका इव, दानेन दारिद्र्यमिव, मार्दवेन शाठ्यमिव, सत्येनासत्यवादी व, वह्निना तरुसम्पद इव,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तोयेन पिपासेव, भोजनेन बुभुक्षेव सिंहेन मृगा इव, दयया अदयेव, यथा जिता: ; एवं स्वगुणोत्कर्षमाहात्म्येन बुद्धेन भगवता सर्वे कुटिलवादिनस्तीर्थ्या जिता:, यथा सुरैरसुरा जिता आसन्निति ।

:२: द्वितीयो धर्मोपदेशवर्ग: -

ग्रन्थकर्त्रा गुरो: सद्धर्मस्य निर्वाणगामिन: पथ: ज्ञानस्य च माहात्म्यं फलं च विस्तरशो निरूपितम् । तथा हि --

"छित्त्वा मोहमयं पाशं यो हि देशयते शिवम् ।
सन्मार्गदेशक: प्रोक्तो दुर्मार्गविनिवारक: ।।"[1]

इत्यनेन गुरोर्लक्षणमुक्तम् । सद्धर्मस्य च--

"येन धर्मेण मनुजास्तरन्ति भवसागरम् ।
सद्धर्मप्रवर: प्रोक्तो न धर्मो लौकिको हि स: ।।"[2]

इत्येवं लक्षणमुक्तम् । गुरोर्मुखादनेन सद्धर्मश्रवणेन जिज्ञासो: चित्तं प्रसादमृच्छति, चित्तबन्धे चास्य सुमहत् पुण्यं भवति। अयं सद्धर्म एव निर्वाणप्राप्ते: साधनम्। अनेन मानव: धर्मलक्षणतत्त्वज्ञो भवति । एतत्साहाय्येन सुगतदेशितां संसारविमुखां कथां श्रुत्वा तृष्णाप्रहाणेनाक्षयं पदमाप्नोति । श्रुतिमान् पुरुष: प्रवृत्तिनिवृत्तिलक्षणं सम्यग्ज्ञात्वा धर्मश्रवणेन सम्यग्ज्ञानी भवति। तेन च सम्यग्ज्ञानेन क्लेशवृक्षा: समन्ततो दग्धा भवन्ति। मृत्युकालोपपन्नस्य वेदनार्तस्य तस्य देहिनो हृदि स्वल्पापि व्यथा न भवति, श्रुतालम्बनत्वात् । सद्धर्मश्रवणं कृत्वा वृद्धांश्चोपास्य पण्डितो जनोऽन्ते जरामरणवर्जितं पदं प्राप्नोति ।

१- ध० पु० ने० २ ख० २१२

२- ध० पु० ने० २ ख० २१३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्मात्सर्वत्र मैत्रीभावनाकामः सद्बुद्धिकामः दृढवीर्यपराक्रमेप्सुश्च सद्धर्मश्रवणे मनो दद्यात्। अन्यथा सद्धर्मघननष्टस्य, गुरूपासनावर्जितस्य च पापैरुपहतस्य मानवस्य जीवनं विफलमेव। एतादृशः प्रमादिनः पापमित्रस्य देहिनस्तु जीवनम् उष्णरे मुक्तं बीजमिव निष्फलमेवास्ति। अतो मुमुक्षोः कृते शास्त्रमेव दृष्टिः विचक्षणैः कथिता। तथा ह्युक्तम्-

श्रुतिदृष्टिविनिर्मुक्तम् अधर्माहुर्विचक्षणाः।
न वदन्त्यर्थं विनिर्मुक्तम् अर्थ[1]मित्यभिधीयते[2]॥ इति॥

इतो विपरीतमधर्मानुष्ठानं तु व्याधिसेवनोपममेव। अतो ग्रन्थकर्त्रा धर्मसेवने आग्रहः कृतः। तद्धर्मसेवनं स्वल्पं वा स्याद् बहु वा इत्यन्यदेतत्। उपसंहाररूपेण च तेन कथितम् --

तस्माज्ज्ञानगुणान्मत्वा ज्ञानं सेवेत पण्डितः[3]।
न ह्यज्ञानेन संयुक्तं पुमान् कश्चित् प्रतिभवेत्॥

धर्मानुसारिणी श्रद्धा धार्येयेति अन्ते श्रद्धामाहात्म्यं तेनोक्तम्। इयं श्रद्धा तमसि प्रदीपकल्पा, व्याधितानामौषधमिव, अधनानां धनदात्री, दरिद्राणां (अकिंचनानां) च महद् बलमिति। किमधिकम्, प्रमादमदमत्तानां सा प्रमादविघातिका। एतादृशस्य श्रद्धालोर्गुरूपमकस्य धर्मेऽप्रमादरतस्य च माहात्म्यं ग्रन्थकर्त्रैव मुद्घोषितम् --

स हि यत्नात् पदं शान्तं निर्वाणं मुनिभिर्वृतम्[4]।
तद् प्राप्यत्यचिरेण सम्यग्ज्ञानपुरःसरम्॥ इति॥

१- अर्थम् = शास्त्रम्।
२- बृ० पु० नै० ५ अ० २।१०
३- बृ० पु० नै० ५ अ० २।१५
४- बृ० पु० नै० ५ अ० २।१८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

:३: तृतीयः कायजुगुप्सावर्गः -

केचित् चार्वाकमतानुयायिनो दार्शनिकाः स्वदेहमेव आत्मानं मन्यमानास्तदर्थमेव सर्वं प्रयतन्ते इति तान् अस्मिन् वर्गे प्रताडयन्नाह - ग्रन्थकारः --

"क्षणे क्षणेऽपि कायोऽयं क्षीयते न निवर्तते ।
तथा यौवनमदैर्बाला मुह्यन्ते मुग्धचेतसः ॥

धनधान्यमदैर्मत्ताः कुर्वन्त्यहितमात्मनः ।
तन्नाशमुपयात्येवं स च पापेन दह्यते[1] ॥ इति ॥"

कथयति च --

"न मनुष्या मनुष्यास्ते येभ्यो धर्मो न रोचते[2]"।

वस्तुतः इदं शरीरं प्राप्य मानवेन ज्ञानप्लवमारुह्य भवसागरस्तरणीयः। यतो हीदं शरीरं विद्युज्ज्वालासदृशं च क्षणभङ्गुरम् ,चपलम्, जरामरणयुतं च । अतो मानवेन ज्ञानशीलदयादानैरेतच्छरीरं सफलं करणीयम् ।

यो हि शरीरधातुं परित्यज्य हिरण्यादिधातुषु रतो भवति, स धातूनां ज्ञाने अज्ञ एव । हिरण्यादिधातवो दुःखावृता एवेति दुःखाद् दुःखोदय एव भवति। तस्मादनर्थकं तद् दूरतः परिवर्जयेत् । दुष्टसंग्रहः दुःखमयः। एतद्वर्जनं सुखमयम् । तस्मात् शरीरवान् धातून् पण्डितोऽवरतः प्रत्यवेक्षेत । यतो हि तेषां स्वलक्षणं ज्ञात्वैव प्राणिनो निर्वाणं प्राप्नुवन्ति ।

१- बु० पु० ने० ६ अ० ३।६-७

२- बु० पु० ने० ६ अ० ३।८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

:४: परिवर्तवर्गश्चतुर्थः -

परिवर्तनम् + परिवर्तः = परिणामः । जायते, अस्ति, वर्धते विपरिणमते, अपक्षीयते, नश्यति इत्येते षड्भावविकाराः । परिणामश्च कालमपेक्षते इति सर्वतः प्रथममस्मिन् वर्गे ग्रन्थकारः कालमेव विवृणोति -'कालोऽयं परिवर्तते' इति। कस्येत्यपेक्षायामाह-- 'चञ्चलेन्द्रियवित्तस्य'। अर्थात् जन्ममरणवश्यस्य, तृष्णया मोहितस्य, औद्धत्यप्रसक्तस्य, मायालङ्करणे निरतस्य, कामेनातृप्तमनसो विनिपातनभिज्ञस्य, वितर्कोपहतस्य, पूर्वदुःखानभिज्ञस्य, विप्रयोगानभिज्ञस्य सत्पथात् परिभ्रष्टस्य हिंसारतस्य, अथ च नष्टसम्बुद्धमार्गस्य बालस्य(मूढस्य) कालोऽयं परिवर्तते । स दुःखमग्नो भवतीत्यर्थः ।

अतो दुःखापघाताय शुभकर्मणि आसक्ति विधेया । काञ्चनेषु शैलेषु वैदूर्यशिखरेषु रम्येषु भूमिभागेषु वासवत्या शुभं कर्म क्रीयते मानवस्येति तेन शुभकर्मरक्षार्थं यतनीयम् । कामपूर्त्यै देवानां स्तुतिराराधना वापि न करणीया । यतो हि देवा अपि विषयासक्ताः मानवस्य पारमार्थिकं हितं न जानन्ति। एतादृशो हि तृष्णाग्निपरिचारिता कामसंमोहिता भोगेष्वासक्ताः। स्त्रीजनासक्तहृदयाः पापमित्रसंसर्गिणः सर्वास्ववस्थासु संसारभयभीरवः अतत्त्वज्ञा जना लौकिकं सुखं भुक्त्वाऽपि मृत्युमेव प्रपद्यन्ते । यतो हि उपभोग्या विषयास्तादृशा एव, जनस्तु परिवर्तते । अतः पण्डितेन एकान्तमनसा नित्यं शुभं कार्यं प्रयत्नतः। अशुभं च सदा वर्ज्यम्। यथा गृहपञ्जरे शौनिकेन बद्धाः पशवः एकैकशो विनश्यन्ति, एवमियं भूमिः कामिनां नश्वरसुखार्थमास्ति, ते हि बालिशाः च्युता उत्पन्नाश्च भवन्ति वारं वारम् । ते च विषयोन्मुखा अवश्यम्भावि मरणमपि न पश्यन्ति। अन्ते च तेषां तादृशानां कामवशंगतानां पश्चात्तापेन दाह एवावशिष्यते। यतो हि संयोगो वियोगान्त एव भवति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतो विवेकिना मरणं सञ्चिन्त्य कर्तव्यं निर्वाणायम् । यतो हि निष्कामा वीतरागा एव शाश्वतीं शान्तिमधिगच्छन्ति । मृत्योरर्थमनुस्मृत्य स्वकीयं मनो निर्दुष्टं शान्तं च करणीयमप्रमादपरम् । तथागता अपि एवमेव निर्वाणाभिमुखं श्रेष्ठं मार्गमाहुर्यत् मृत्योर्नित्यं स्मरणम्, अशुभानां च सततं वर्जनं कर्तव्यमिति ।

:५: अनित्यतावर्गः पञ्चमः -

निर्वाणाभिमुखेन पुद्गलेन अस्य जातो विषये अनात्मत्वम्, अनित्यत्वम्, दुःखमयत्वं चैव चिन्तनीयम् । अनित्यत्वं च विशेषतः । तथा हि— क्षयान्तं हि सुखं सर्वम् । किमपि सुखं न ध्रुवम्। एष हि मृत्युः गच्छन्तं तिष्ठन्तं शयानं क्रीडन्तम्, स्थविरं गृहस्थं वा, सुखितं दुःखितं वा, अगुणवन्तं गुणवन्तं वा, दुःशीलं शीलवन्तं वा, व्रतस्थम् अव्रतस्थं वा, प्रमत्तमप्रमत्तं वा, कामधातूपपन्नम्, आरूप्यधातूपपन्नं रूपधातूपपन्नं वा, प्राणिनं कर्मपाशो जरादण्डो व्याधिदण्डो रक्षो-पमो भूत्वा कदाचिदपि आदातुं जानाति ।

अथ च सर्वमपि सुखं विषदुग्धमिश्रितमिति तद् विसर्जनीयम् । सर्वोऽपि समुच्छ्रयः पतनान्त एव । क्षीणपुण्यस्य दासस्य स्वदारोप-र्जितस्य चानुपमं दुःखं भवति । तृष्णाविषयमूढस्य शोकोपहतचेतसो देवस्यापि स्वशरीरच्यवनमवश्यम्भावि। सुखानुभूतेः पश्चात् दुःखापत्तिस्तु अतीव कष्टतरा। देवलोकात् पतमानस्य दुःखं नरकवासादपि कष्टकरम् । अतः सर्वं सौख्यं पतनान्तं दुःखान्तं वा अस्ति। सर्वं जन्ममरणान्तमस्ति। यथा उदितः सूर्योऽस्तं यास्यत्येव कदाचित्, एवं सर्वस्यापि जातस्य प्राणिनो मरणं ध्रुवम्। इत्येवं येऽपि सुखप्रमत्ता देवास्तेषामपि सुखम-शाश्वतम्। किमेते नावबुध्यन्ते — पतनान्तं सदा सुखमिति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखमोहिता एवेमं लोकं अजरामरणवत् पश्यन्ति। तृष्णावशात् सुखस्य पतनान्तत्त्वं च नावगच्छन्ति। एते तृष्णा विवशा देवा सुखाद् विमुच्यन्ते। वस्तुतस्तु सर्वे चराचरजात: पदार्था बहिरेव मनोहरा: अन्ते सर्वेषामपि नाशो ध्रुव: ।सर्वं च सुखं गन्धर्वनगरोपमं मायाबुद्बुदोपमं चास्ति । अत: सर्वमपि भोग्यं क्षणिकम् ।इति तस्यानित्यस्य भोग्यस्य तृष्णैव दु:खमूलभूता ।जैवातुकमिदं जगत् कालपाशयोजितमस्ति,परन्तु तृष्णाविमुग्धा लोकास्तं न पश्यन्ति ।कालपाशबद्धस्य जनस्य न कोऽपि त्राता। अत: —

धर्मतेयं सदा लोके सम्यक्बुद्धेन देशिता ।
उभयस्य क्षयो नाशो जनस्योपरि वर्तते ।।

जातौ सत्यां यथा मृत्युरवश्यं स्थित एव हि ।
क्षीयते सुकृतं कर्म आयूंषि क्षणिकानि हि[1] ।।इति।।

एतदनित्यत्वपरिज्ञानाय धर्मविनये संवरो भणीयो निर्वाणाभिमुखै: पुरुषोत्तमै: ।ज्ञेयं चैतद् यत् न नित्यं लभ्यते स्वर्गो न नित्यं क्षणासम्पदेति ।प्रमादमदमोहिता: सुरा अपि नाशमाप्नुवन्ति ।यत: पतनान्ता हि विभूतयो भवन्ति गन्धर्वनगरोपमा: फेनबुद्बुदसन्निभाश्च। भौतिकं सौख्यं दातारोऽपि न मृत्युकाले त्रातार:। सर्वस्यापि सुखस्य कालवशात् संयोगोऽपि विनाशमाप्स्यति। तथा च —

जातिदु:खा,जरा दु:खा,मरणं दु:खमेव च ।
प्रियैश्च सह विश्लेषो दु:खस्यैषा परम्परा[2]।

१- बु० पु० ने० १३ का ५।५६-५७
२- बु० पु० ने० १५ का ५।८७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्किमपि उत्पद्यते तन्नश्यत्येव, मरिष्यत्येव क्षणिकत्वात् । अतः सुखस्य नाशो मृत्युश्चावश्यम्भावी। एतादृशसुखविहारिणोऽसन्तुष्टा एव तिष्ठन्ति। सुखस्य विनाशित्वात् मरणस्य च निश्चितत्वात् धर्मे रतिः कार्या: । यतो हि प्रियैः वियोगो निश्चितः। अतः धर्मे रतिरपेक्षिता: धर्मस्यैव मुख्यत्वात् ।

मनः पाशैर्बन्धनैर्जनो बध्यते । परन्तु दुःखकाले मृत्युकाले वा न कोऽपि सहायको भवति। दिवसे सुखरं व्यतीतेऽपि रात्रिः सुखदैव भविष्यतीति नेदं सुनिश्चितमिति श्रेयसे मतिः कार्या, अन्यथा एकदिनं मृत्युरागोऽवमर्दयिष्यत्येव । कालवशात् कदाचित् सुखादपि दुःखमभ्युपामि-गयति, यतो हि सर्वं हि भौतिकं सुखं दुःखमिश्रितम्। सर्वाण्येव वस्तूनि उत्पादस्थितिभङ्गयुक्तानि। अतो मरणस्यावश्यम्भावित्वात्, सर्वस्य जातस्य च च्यवनस्वभावत्वात् मृत्योः पूर्वमेव श्रेयोऽर्थिना पुरुषेण स्वहितमाधेयम् । अनित्यत्वान्मृत्युः सर्वं रसं पिबति। कालवशात् प्राप्तं यौवनमप्यनित्यम् । अतस्तस्य विलयोऽवश्यम्भावी ।

विश्लेषः सर्वबन्धानां मृत्युरित्यभिधीयते ।
भयोपेता भूतानां दुःखानामुदधिः समः[1] ।।
कालधर्मो महावेशो मृत्युरित्यभिधीयते[2] ।।

अतः श्रेयसे एव मतिः करणीया, न तु प्रमादे । यतो हि गतं यौवनं नायाति। तैलक्षये दीपनाश इव कर्मक्षये सुखस्य यौवनस्य नाशो भवत्येव। एतदनित्यत्वागमादेव मुग्धानामधर्मे रतिर्भवति। लोभवशाच्च मृत्योरुपेक्षा

१- पु० पु० नं०२१ क० पृ।१६७

२- पु० पु० नं०२२४० पृ।२०४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्रियते । मोहावृताश्च जनाः मृत्युं वियोगं च जानन्तोऽपि नावगच्छन्ति। अतः धर्मस्कन्धः संगो वा दुःखास्पदः। तत्त्वदर्शी सर्वेषामपि पदार्थानां चलत्वं सम्प्रधार्य पापकर्मभिरलिप्तो भवेत्। तेन स दुर्गतिं नाधिगच्छति, निर्वाणाभिमुखश्च भवतीत्यनित्यतावर्गसंक्षेपः ।

:६: अप्रमादवर्गः षष्ठः -

मदनं मदः, मादो वा प्रकर्षेण अत्यधिकम् मादः प्रमादः। अयं मद् धातुः व्याकरणशास्त्रे स्तुतौ, मोदे(हर्षे) ग्लेपने(दैन्ये), गर्वे, आलस्ये, स्वप्ने, कान्तौ, गतौ च पठ्यते। अत्र प्रकरणे हर्षः, ग्लेपनम्, गर्वः गतिः -- इत्येतेऽर्था यथा-- प्रसङ्गमभिप्रेताः। तथा च धर्माचरणे, विरतिः उपेक्षा वा, शुभधर्मेषु आलस्यम्, तेषां जानताऽप्यकरणम्, अशुभानामकुशलानां च कर्मणां सेवनम्, तेषु रागो वा 'प्रमाद' इत्यभिधीयते। 'सर्वेषु शुभकर्मणि कुशलकर्मणि च प्रमादो न विधेयः' इति एतद्वर्गलेखनमिषेण ग्रन्थकारस्य निर्वाणाभिमुखानां जिज्ञासूनां कृते उद्बोधनमस्ति। स कथयति --

"यः प्रमादरतो जन्तुर्नासौ मोक्षाय कल्पते ।
प्रमादविषमूढस्य निर्वाणं दूरमेव तत्[1]"।। इति ।।

एतदेव विशदयति-- प्रमादः प्राणिनां उत्तमः शत्रुः । प्रमादात्तु देवा अपि नरके पतन्ति, किं पुनः मर्त्याः। प्रमादो गाढं विषम्। अप्रमादोऽमृतपदम्, प्रमादश्च मृत्युपदं प्रापयति जनान्। प्रमादोन्मत्ता दुःखमधिगच्छन्ति, न च परमां शान्तिमधिगन्तुं शक्नुवन्ति। धर्मविमूढस्य कृते स्वर्गः कल्पनामात्रम्। प्रमादहीनः शुभकर्मकारी सौभाग्यं विन्दति ।

१- बु० पु० नं० २३ का ६।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमत्तस्तु न कदापि मोदते ।

वस्तुतस्तु प्रमादाग्नेर्धूम एव दर्पः ।अतः प्रमादस्य विषवत् परित्यागः कार्यः । अन्यथा नरकप्राप्तिः सुलभा। प्रमादः सर्वानर्थमूलम्। दुःखं प्रमादस्य कटुकं फलम्। यो हि मन्दबुद्धिः प्रमादपरस्तस्य पशुना न कोऽपि भेदः। देवलोकं समासाद्यापि प्रमादिनस्ततश्च्यवनं सुकरमेव । प्रमादवशगस्य नरस्य नाशोऽवश्यम्भावी। अतो मूढ एव प्रमादस्य वशीभवति ।

संसारोऽयं प्रमादमूलकोऽस्ति ।कामो नरकस्य हेतुः।अविद्या च प्रमादमूलिकाऽन्धकारात्मिका। अतः प्रमादोन्मादतिमिरेतत् प्रतिसार्य ध्येयम् --

"संयोगो विप्रयोगान्तः, पतनान्तं सुखं सदा ।
जरान्तं यौवनं सर्वं, क्षान्तिः सर्वदेहिनाम्।।[1] इति ।।

शुभाशुभकर्मभिर्बद्धा जना नटवदिह संसारे नृत्यन्ति, यतो हि संसारः कर्मनाटकस्कन्धः। प्रमादो विषवद् हानिकरः। तेन दग्धो न कदापि सुखी भवेत्। प्रमादः परमो दोषः ।सुज्ञमपि प्रमादेन नश्यति। अतः प्रमादमूलः संसारः अप्रमादश्च सद्गतिरिति सुधीभिरनुलवं ध्येयम् ।

दुःखाद्भीरुभिः प्रमादः परित्याज्यः ।अन्यथा तेषां प्रप्रणाशः सुनिश्चितः। प्रमादमूढा नरकमेव व्रजन्ति। प्रमादवागुराबद्धस्तृष्णाया विषयार्णवे मग्नोवारं वारं भ्रमत्येव क्रीडति। तथापि चातृप्त इव तिष्ठति। कामानलसंदग्धो नरो प्रमादेन विमोहितो व्यसने पतति। दहति च प्रमादः सर्वस्वं पामरम्। प्रमादो मित्रवदाचरन्नपि च शत्रुवद् व्यवहरति।सर्वांश्चानर्थान् करोति। प्रमादोपहतः कल्याणवर्जितो नरकं याति ।

१- पु० पु० नि० २५ अ० ६।३४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादिनो भोजने मैथुने चैव सदा रतास्तिष्ठन्ति । अतस्तेषां विनिपात: पदे पदे। नर: सुदुर्लभं मानुषं जन्म प्राप्यापि यदि सत्कर्म न करोति तदा वृथैव तस्य जीवनम्। प्रमादसेविनो नरा दूरत: परिहर्तव्या:। प्रमादतृष्णा रागवृद्धिकरी। अत: सुखार्थिना प्रमादे न मति: कार्या । प्रमादं विषं मत्वा तत्परित्यागिनो धन्या एव। यतो हि धात्वायतन-सम्मोह: श्रेयसि विघ्नकारक: ।

सद्धर्माचरणं भूतेषु करुणा च श्रेयसे जायेत्। मृत्युकाले सम्प्राप्ते दु:खानि दृढानि भवन्तीति श्रेयोऽर्थिभि: प्रमादरहितैर्भाव्यम् । सन्तोष एव एव च निर्वाणसाधनम्। सर्वधर्मविरागश्च श्रेय: साधनम् । अनागतविधिज्ञो निर्बन्धो भवति। अप्रमादरतो निर्वाणस्यान्तिके स्थित:। प्रमादस्तु सर्वेषां परवादीनामपि समान इति मोक्षावधर्ममूलं धर्माचरणं विधेयम्। यतो हि प्रमादशून्या धर्मरता एव जना देवत्वं प्राप्नुवन्ति ।

मद्यपानात्मक: प्रमाद: सर्वथा हेय:। यतो हि प्रमादमत्तो गतिपञ्चके भ्राम्यति । प्रमादविरहितश्चाक्षयं पदं प्राप्नोति। प्रमाद: पतनसाधनमिति स न सेवितव्य: । प्रमादी न कदापि सुखभाक्। प्रमाद: शुभनाशकर एव । प्रमादिनो ज्ञानशून्या भयं दु:खं चाविगणय्य पशुभि: समाना लोके विचरन्ति। प्रमादिनां कृते मृत्योरागमनाकुलम् । अपितु प्रमादो मृत्यो: पर्याय एव। अतोऽप्रमाद एव स्वर्गमार्ग: ।

प्रमादविषावृतस्य तिस्र: शत्रव: -- जरा, व्याधि:, मृत्युश्चेति। सत्क्रियया क्षमास्तितुरोऽपि हेतुया:। प्रमादविरहिणो लोकत्रयेऽपि नश्यन्ति। प्रमादशून्योऽच्युतं सुखमाप्नोति। यतो हि प्रमादवशाद् वियोग:, वियोगाच्च दु:खं नाप्यते। अत: प्रमादवर्जनं सुखसाधनम् । प्रमादिन: कार्याकार्य-विमूढत्वाद् विनाश:सुनिश्चित:। अस्मान्निर्वाणं दूरे तिष्ठति। धर्मिण एव सुखमाप्नुवन्तीति शास्त्रघोष: ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मद्येन सुरा अपि प्रमादं यान्ति। मद्यप्रयोगेण जनानां नरके पातो भवति। मद्यात् कामक्रोधाच्च तत्त्वं नानुद्रष्टुं शक्नोति नरः। प्रमादिनां वस्त्वार्थेऽपि ध्यानानि प्रणश्यन्ति। अत एव निष्कामा बुधा अप्रमादं प्रशंसन्ति। अप्रमत्ता जनाः संयमेन युक्ता जराव्याधिविनिर्मुक्ता मरणनिर्भया विहरन्ति। परं प्रमत्तः संसारान्नैव मुच्यते। प्रमत्तानां विषयाभिमुखीभूतानां विनिपातो ध्रुव एवास्ति। प्रमादः श्रेयसां नाशकृत् परं बन्धनं भवति।

सुखाभिलाषी प्रमादं परिवर्जयेत्। अप्रमादी एव निर्वाणमधिगन्तुं शक्नोति। प्रमत्तो जनोऽसमर्थ एव शुभकर्माणि कर्तुम्। नरकगमनभिलाषिभिः प्रमादपरित्यागपूर्वकं ज्ञानरतैर्भवितव्यम्। अप्रमत्ताः सदा तृप्ताः सन्तः सुखमेधन्ते। प्रमादात् रागः रागाच्च द्वेषः तेन च नरकगमनं ध्रुवम्। प्रमादशून्यं प्रारूढः सन् शिवं स्थानमधिरोहति। प्रमादो हि दुर्गतीनां नेता।

देवर्षिब्रह्मचारिणोऽपि यदि प्रमत्तास्तर्हि ते पशुभिः समाना एव। प्रमादानुसारिणः पापकर्मबन्धनं प्राप्नुवन्ति। प्रमादः सर्वेषां शुभधर्माणां शत्रुरेव। प्रमादिनो भवचक्रजालं भेत्तुमशक्ताः। तृष्णया त्रैधातुकमिदं यन्त्रितमस्ति। तृष्णाभीता एव धर्मध्यानं लभन्ते। किं बहुना--

'प्रमादः परमं दुःखम्, अप्रमादः परं सुखम्।
समासाल्लक्षणं प्रोक्तम्, अप्रमादप्रमादयोः[1]॥' इति॥

1- द्र० उ०नि० २४ अ० ६। ११९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

:७: कामजुगुप्सावर्गः सप्तमः -

कामः = स्त्री रागाद्यात्मकं विषयसुखम्। जुगुप्सेति च 'उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे' इत्यमरकोशप्रामाण्येन निन्दार्थकः शब्दः। कामस्य जुगुप्सा, निन्दा, गर्हणेत्यर्थः। अर्थात् ग्रन्थकारेणास्मिन् वर्गे निर्वाणाभिलाषिणां हृदि वैराग्योत्पादनार्थं वैपुल्यसंग्रहतः काम (विषय) जुगुप्सात्मकाः श्लोकाः संगृहीताः। तथा चायमादिमः श्लोकः --

'न कामेषु रतिं कुर्यात्, कामाः परमवन्चकाः।
संसारबन्धना घोराः सर्वे नरकहेतवः।।'[१] इति ।।

कामस्य परिणामो दुःखात्मक एव सर्वदेति कामस्य क्षुरधारापेक्षयापि भयङ्करत्वं विद्यते। कामवशा नरकालयं गच्छन्ति। अतः कामविषयस्य सर्वथा परित्यागः करणीयः। कामा जनं नरके पातयन्ति। परिवर्जितकामस्तु निर्वाणाभिरतोऽकुशलं नानुसेवते। परं पञ्चेन्द्रियविषयासक्तरागाग्निर्विषयैर्नैव तृप्यति। रागाग्निर्दूरादपि दाहमुत्पादयति, तृष्णासमीरणबलात्।

रागान्धैः सुखं प्राप्यापि तप्यत एव। यतो हि विषया न कदापि सुखकारका भवेयुः। अथ च विषयेन्धनैर्न कामाग्निः कदापि शान्तिमधिगच्छति। मोहवेष्टितं सुखमनुभवन् देवोऽपि पशुवदेव। कामः कदापि न तृप्त्याधायकः श्रुतः। कामान्धाः कत ऽयविमूढा जायन्ते। कामा असारा वन्चकाश्च सन्ति। तेषां वर्जनेन नैष्ठिकं सुखं भवति।

१- ,, पृ० पृ० नं० ३४ श्लो ७।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तेषां सेवनं न नरक हेतुः ; यतो हि कामसुखमापातरम्यम् ।कामपरित्यागः सदैव कल्याणाय भवति। कामसेवनं चादौ मध्ये अन्ते वा दुःखावह एव । अकृतबुद्धयः कामकृतामेव प्रीतिं कुर्वन्ति। रागकृतोदाहः पतङ्गवत् कामिनं नाशयति ।

केचित् पामराः विषं पीत्वापि जीवेयुः, परं कामविषपीतस्य जीवनं दुर्लभमेव । काममोहितः सर्वथा दग्धो भवति। यस्य चित्तं कामेषु रज्यते, स व्यसने समुत्पन्ने परितप्तो भवति।प्रकृतिदुर्बलाः काममदोन्मत्ता जाति भ्रमन्तो नरकादि महद् भयं न पश्यन्ति। शतशः सहस्रशो वा लब्धाः कामा अपि नश्यन्ति - इति तेषु न विश्वसनीयम् ।

कामव्यसनेन मनुष्या नित्यं निरयमेव गच्छन्तीति स्वहिते मनो विधेयम् ।यतो हि ज्ञानवो धैर्यवेन्द्रियाणां विषयैस्तृप्तिर्नायते कामिनां व्यसने प्राप्ते कोऽपि रक्षको न भवति । गन्धर्वनगरप्रख्याः कामा बन्धका एव भवन्तीति वस्तुतथ्यम्। कामवशगानां जनानां कृते दुःखं सुनिश्चितमस्ति । तस्य काममदान्धस्य कदापि शर्म न सम्भाव्यते ।

आध्यात्मिकसुखापेक्षया कामजं सुखं सर्वथा हीनम्। तथा चोक्तम् --

"यच्च कामसुखं लोके, यच्च तृष्णादिभवं सुखम् ।
एतस्याध्यात्मिकस्येदं कलां नार्हति षोडशीम्[१]।। इति।।

सेव्यमानः कामोऽहर्निशं वर्धत एव । कामासक्तानां नरके पतनं ध्रुवमिति ततः कामहीनतैव श्रेयस्करी।कामचारिणां ज्ञानं दुर्लभमेव ।कामा

१- ५० पु० नं० अध्या० ७।६३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मित्राण्यपि दुःखायैव सन्ति ।सर्वमपि कामसुखं धनच्छायात्मकं क्षणिकमस्ति। अतः कामाः कदापि न सेव्याः ।

बालिशाः काममेव सर्वस्वं मन्यन्ते । ते विषफलोपमान् कामानास्वाद्य दुष्कर्मफलं प्राप्नुवन्ति। आकाशस्य यथा नान्तो तथा कामस्यापि। तस्य चानन्तत्वात्तः कथं तृप्तिः स्यात्। अतः कामास्तापायैव, न तु शान्त्यै । शान्तिः सुखमूला, कामास्तु असुखायैव सन्ति ।कामबद्धा मोहबालिशा भवन्ति ।विषयरूपः कामपाशः परमदारुणः।कामार्तो मृगवत् वनाद् वनं धावति । तत्र कामजा विषयास्तस्य कल्याणनाशका भवन्ति। रथचक्रवत् सदा भ्रान्ताः काममुग्धा जनाः भवन्ति। निर्वाणाभिमुख एव कामचर्यां विहाय शान्तिमधिगच्छति । अन्यथा कामास्तु विद्युद्गुणोपमाश्चञ्चला एव । कामेषु इन्द्रियाणां तृप्तिरसम्भवा, तृप्तौ च तत्त्यागोऽपि न सम्भाव्यते । अतः कामोदयव्ययौ सम्यगवेक्ष्यौ। अथ च --

* ज्ञानांकुशेन वार्यन्ते विषयास्तत्त्वदर्शिभिः ।
येऽमुक्ताश्चपलास्तीव्राः सर्वानर्थकरा मताः[१]।। इति।।

:८: तृष्णावर्गोऽष्टमः -

अस्मिन् वर्गे ग्रन्थकारेण तृष्णामधिकृत्य तत्त्वबुभुत्सोरुद्बोधनं कृतम् । तृष्णेति स्पृहा । विषयभोगानां पौनःपुन्येन प्राप्तीच्छेत्यर्थः। तामेव विवृणोति --

*कर्मदायाद् विमुच्यन्ते नरकात् पापकारिणः ।
त्रिषु धातुषु बध्यन्ते नरास्तृष्णावशानुगाः[२]।। इति ।।

१- धृ०पु० नं० ४३ अ० ७।१०१

२- धृ० पु० नं०४४ अ० ८।३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नरकाग्नि: केवलं गात्रं दहति, परं तृष्णाग्निर्नृणां गात्रं च मानसं च दाहं करोति। तस्मात् तृष्णाग्निर्नरकाग्नेर्विशिष्टतर:। रागाग्नि: स्वर्गे दह्यते। तिर्यग्योनौ द्वेषाग्निर्विशिष्टतरं भवति। मोक्षाग्नि: पापादिरेव दहति, परं तृष्णाग्नि सदैव सर्वत्र दाहको भवति। एवमेव लोभवह्निरपि यथा यथा विषया भोक्तुं प्राप्यन्ते तथा तथा वर्धत एव। अतो नास्ति लोभसमोऽरिर्भुवि। लोभेन प्राणी मृत्युमुखं प्रविशति। लोभवशादेव राजानोऽन्यं राजानं हन्ति।

तृष्णाविषशून्य: समलोष्टाश्मकाञ्चनो लोभाङ्गारविमुक्त एव निर्वाणस्यान्तिकं गच्छति। अनिवारितलोभस्य जिह्वालोर्निर्वाणं दूरत: स्थितम्। परन्तु भवाभिलाषिणीं नन्दीं विहाय य: सद्धर्ममाचरति, तस्य भवजं दु:खं स्वप्नेऽपि न विद्यते। विपरीते च, तृष्णावशान् जनान् मृत्यु: शम्बूक इव कर्षति। तृष्णा आपातरम्या: विपाके दु:खावहा च। परदारेषु परधनेषु च तृष्णोपजीविनोऽवश्यं नरकगामिनो भवन्ति। तृष्णया प्रेरिता मुनयोऽपि दु:खमेव लभन्ते।

यथेन्धनं प्राप्य वह्निर्ज्वलति तथैव कामभोगवशीकृतो जनो विवशो भूत्वा दह्यत एव। तृष्णाबाधया शून्यस्तु परमां शान्तिमधिगच्छति। तृष्णयाऽसम्बन्धितो निर्मुक्तपापकल्मषो भूत्वा वीतशोकश्चरति। अतो दु:खास्पदां तृष्णां बुद्धिमान् न कदापि सेवेत। यतो हि तृष्णापाशाकृष्टो नारकं कष्टमनुभवति। तथा विमुग्धा सर्वदोद्विग्ना एव तिष्ठन्ति। सतृष्णस्य बहवो असंख्या वितर्का जायन्ते। कामास्वादप्रसक्ता विषयिणो दु:खमेवाधिगच्छन्ति। तृष्णाविमुक्तास्तु विमला भवन्ति। स्त्रीसेवी प्रमादी तृष्णापरवशो भवति। तेन च पारवश्येन कथ्यन्ते नरके तापा:। तृष्णानदीषु विषयपरवशा एव जना निमज्जन्ति। रागेण वञ्चिता: सुरा अपि सम्मूढा त्रिदोषकाष्ठसम्भूताग्नौ पतन्ति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पञ्चतीर्थ(स्कन्ध)समुद्भवा तृष्णानदी पञ्चशीर्षसर्पदंश इव मृत्युद एव भवति। घृतसिक्तानलवत् तृष्णाग्निर्विषयभोगैर्वर्धत एव। तृष्णया जना विविधयोनिषु परिभ्रमन्ति दुःखजालसमग्नाः। वीततृष्णास्तु निर्बन्धो जनः परमां गतिमाप्नोति। तृष्णाविसर्गो ज्ञानाय प्रवर्तयति जनम्। अतो विषयेन्धनसंपाद् भयमेवोचितम्।

तृष्णावशानुगा जना विविधा योनीर्लभन्ते। परिकांक्षिणो नित्यं दुःखभाजो भवन्ति। लोभाभिभूतस्य विनिपातः पदे पदे। धनतृष्णारता आजीवनं धनोपार्जनतत्परा जीवन्ति। ते मृत्युकाले विवशा एव धनं त्यजन्ति। अतः प्राज्ञो लोभमभिनवमपि भिक्षुरूपेण वर्तमानं परित्यजेत्, यतो हि तृष्णाक्षयविमुक्तिरेव जनानां श्रेयस्करी। आकांक्षाशून्यतैव कल्याणकरी। अमुग्धा एव यति जीवनस्य महत्त्वमवगच्छन्ति। तृष्णया विरहिताः शुभाशुभपरित्यागिन एवान्ते जरामरणरहिता भवन्ति। अतो ज्ञानेन तृष्णावृक्षस्य छेदनं कर्तव्यम्। तथा चोक्तम् —

तृष्णानदीं त्रिपथगां प्रमादावर्तदुस्तराम्[२]।
प्रज्ञानावं समाश्रित्य पारं गच्छत्यनामयम्।। इति।।

महेच्छतैव जनदुःखकारणभूता। अल्पेच्छता च सुखम्। अत एवोक्तम्—

`हेया तृष्णा प्रयत्नेन इदमुक्तं परीक्षकैः।
एष पन्थाः शिवः श्रेष्ठो येन तृष्णा वशीकृता।।` इति।।

---:o:---

१- बु० पु० ने० ४८ अ० ८।९७

२- बु० पु० ने० ४६ अ० ८।१०८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(९) स्त्रीजुगुप्सावर्गो नवम:

स्त्रीणामनर्थमूलत्वं साधितं ग्रन्थकारेण अस्मिन् वर्गे तेनोक्तम्--

स्त्रियो मूलं हि पापस्य धननाशस्य सर्वथा ।
स्वहिते ये न निरता: कुतस्तेषां भवेत् सुखम्[1] ।। इति ।।

स्त्रियो हि अनर्थपरतया: शाठ्येर्ष्याबहुलाश्चैव प्रायो भवन्ति । ता हि नित्यं सरागकुशला आपातमधुरा विपाके च वज्रविधा विद्युत्स्वभाव-हृदयाश्च दृश्यन्ते । तासूपस्थितासु कुतो निर्वाणप्राप्ति: ।

महर्षिभि: स्त्रिया: सर्वलोकविनाशस्य सर्वधर्मदायकस्य नरकस्य च हेतव: प्रोक्ता: । इमा: मुखतो मधुराभाषा:, हृदयेन विषाक्ता भवन्ति। आसां सौहार्दं चञ्चलम्, अनवस्थितत्वादिति। नासां कश्चित् प्रियोऽस्ति । इमा: वञ्चनाहेतुकुशला: नित्यं स्वार्थपरायणाश्च सन्ति। कृतमुपकारं, कुलं, विक्रमं वा कस्यापि नैता: स्मरन्ति ।

"भवन्ति सम्पदो यत्र रमयन्ते तत्र योषित: ।
व्यसनेषु विरक्तास्तु त्यजन्ति पुरुषं ध्रुवम्[2] ।।"

निर्बलं निर्धनं च पुरुषमिमा: शीघ्रं शीघ्रं त्यजन्ति । यथा हि भ्रमरी शुष्कं शीघ्रं त्यजन्ति। [redacted] तथैव स्त्रिय: वित्तेन रहितं पुरुषं त्यजन्ति। स्त्रीसमुद्भवो राग: सर्वेषु रागेषु अन्यतम:।तेन रागेण दग्धमनसो नरा: प्रत्यक्षाण्यपि पापानि अकुशलानि च कर्माणि न पश्यन्ति। स्त्रियो विनाशानन्तरं पुरुषं तथैव त्यजन्ति, यथा सर्प: स्वनिर्मोकम्। इमा दारुणहृदया न केनाप्युपायेन वशीकर्तुं शक्यन्ते ।

१- पु० पु० ने० ४६ का० ६।१

२- पु० पु० ने० ५० का० ६।१७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एता हि प्रकृतिखयौ यौवितां सञ्चारिणी- सर्विदं पुरुषं भूयो भूयोऽभियन्ति, व्यसने च तं त्यजन्ति। पूर्वमेता: पुरुषं मृगवन्मोहयन्ति, व्यसने(संकटे) च समुपस्थिते न तस्योपकारं स्मरन्ति, न तं सत्कुर्वन्ति । न च तस्य सन्ततयोऽपि तासां कृते प्रिया: सन्ति । इन्द्रजालमय्यो नार्य: सर्वानेव देवासुरनरान् मोहयन्ति। यथोक्तम्--

"एतदग्रं च पाशानां यदिदं स्त्रीमयं दृढम् ।
अनेन बद्धा: पुरुषा: भ्रमन्ति भवचारके ।।"[१]

स्त्रीमयं बन्धनम् अप्रमाणमनभिज्ञेयं च भवति। अनेनापातरम्येण पाशेन बद्धा: पुरुषा भवार्णवान्न मुच्यन्ते ।भ्रान्तवचनैर्विभ्रान्तं मूर्खाणां स्वनै: बन्धनाकुशला: स्त्रिय: पुरुषं क्षिप्रं हरन्ति। अर्थादानेषु कुशलास्ता: एकं नरं बन्धयित्वा अन्यं नरं प्रयान्ति । इमा उपायशतैरपि न शक्या: रक्षितुं नरै: । नार्यो ऽनर्थव्याधिमृत्यूनां दुष्कृतानां कर्मणां च परं हेतुभूता: सन्ति ।

यथा यथा नरस्तासामनुकूलो भवति तथा तथा तास्तं बन्धयन्ति। तासां चित्तं पुष्पच्छन्नसर्पवत् भस्मच्छन्नवह्निवच्च कपटच्छन्नं भवति ।विषवृक्षसमा: नार्य: परिवर्ज्या: समन्तत: । य: स्त्री विवर्जितो भवति धीमान् ,सोऽस्मिल्लोके मुच्यते । यथा नाग्नि: शीतस्य कारणम्, नापि सूर्यस्तमसो हेतु:; एवमेव नारीणां चित्तमपि न सौहृदमयम् । यथा सरित: कदापि उर्ध्वगा न दृष्टा:, एवमेव अश्मनो गतिरपि न दृष्टा ; तथैव स्त्रीणां सौहृदं न दृष्टम् ।

१- यो० वा० नि०पू०।स० ८।३८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतो य आत्मनो भूतिमिच्छति स सदैव नारीणां वर्जनं कुर्यात् । इत्थेवं बहुप्रकारेण नारीं जुगुप्सयित्वा उपसंहरति ग्रन्थकार:--

"उद्युक्तो वीर्यवान् धीरो धार्मिक: स्त्रीं विवर्जयेत् ।
ददातो हेतुफलज्ञो नर: कल्याणवान् भवेत्[1] ।।"

(१०) मद्यजुगुप्सावर्गो दशम:

"मद्यपानं न सेवेत मद्यं हि विषमुत्तमम् ।
नश्यन्ति कुशला धर्मा मद्यपाननिषेवणात्[2] ।।

इति सिद्धान्तं विस्तारयितुमारभते मद्यजुगुप्सावर्गं ग्रन्थकार:। तथा चाऽस्य वर्गस्य संक्षेप: --

यो नित्यं मद्यं सेवते, तस्य बुद्धिरस्थिरा भवति। तस्य बलबुद्धी विनश्यतो । तस्मान्मद्यं विवर्जयेत् । मद्यपाननिषेवणादनिष्टा: पापका धर्मा उत्पद्यन्ते । मद्यं धनदायकरम्, पापकरम्, कौशोद्यकरं चोक्तम् । रागस्य मोहस्य क्रोधस्य चोद्दीपकम्, अनर्थस्य मूलम्, च सर्वेन्द्रियविनाशे हेतुभूतं मद्यमस्ति। इति तत् सर्वदोषास्पदम् मद्येन प्रेतलोके नरके वा पतनमवश्यम्भावि । शास्त्रवद्गुणोऽपि पार्थिवा मद्येन लघुतां यान्ति। विप्राश्च ज्ञानाज्ञानविवेकशून्या भवन्ति ।मद्यं हि बुद्धिसम्मोहजनकं लोकद्वयविनाशकं नरकसाधनं चास्ति । मद्यं मनीषिणामपि पाशभूतम्। स्त्रियोऽपि बालाश्चापि मद्यपायिनमुपहसन्ति ।अतो मद्यं मरणादपि निकृष्टतरम् ।

१- पु० पु० नं०५४५०६।६१

२- पु० पु० नं०५४५० १०।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मद्यपाने षट्त्रिंशदादीनवाः शास्त्रकारैरुक्ताः। तेषां परिवर्जनार्थं मद्यं दूरतस्त्यजेत्। मद्यपानं विदुषोऽपि मलिनीकरणाय भवति। वस्तुतो मद्यं बुद्धिं नाशयति, तेन च सुखमपि नश्यति। मद्यनिषेविणो जनाः पशुभिः समाना एव। विषोपमं मद्यमिति येऽवगच्छन्ति तेषामेव श्रेयः। मद्यनिषेवणात् पुरुषस्य धर्मविचारणाशक्तिर्विनश्यति। अत स एकस्मिन् काले नष्टधर्मा भवति। स ईर्यापथं न जानाति, न कालं नापि देशनां स्मरति। स धर्मतो विरुद्धं तुच्छं किमपि भाषते। एवं बहूक्त्वा वर्गम् उपसंहरति —

"समाहिता धर्मशीलाः पुरुषा मद्यवर्जकाः।
ते यान्ति परमं स्थानं यत्र मृत्युर्न विद्यते[1]॥ इति॥

(११) चित्तवर्ग एकादशः

चित्तं विवृणोति ग्रन्थकारः —

अगाधं विषमं तीव्रं सर्वसत्त्ववशं महत्।
चित्तं सर्वस्य जातो राजवत् सम्प्रवर्तते[2]॥ इति॥

चित्तसंयमिनस्तज्ज्ञाः परमां गतिं प्राप्नुवन्ति। एतच्चित्तं चञ्चलं सततसमाध्यवस्थातो व्युत्थापयति दुर्गतये। आद्यन्तममलं तच्च निर्वाणाय। मनसः सुप्रसाद एव कल्याणाय जायते चित्तवशगो जनः चित्तमनुधावति। ततः स निर्वाणाद् दूरमेव तिष्ठति। नरकं चान्तेऽधिगच्छति। अतश्चित्तस्य दमनं शमनं वा श्रेयसे एव।

१- धु० पु० नं० ५६ का० १०।५०

२- धु० पु० नं० ५६ का० ११।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वमपि सुखं दुःखं वा चित्तपरिणाम एव । चित्तस्य कर्मण्येव संसारः। यतो हि चित्ताधीनः पापमाप्नोति, पापेन च संसारः। अतः केनापि चित्तवशेन न भवितव्यम्, अपितु धर्मवशेन भवितव्यम् । यतो हि धर्मचारी सुखी नित्यम्, पापचारी न शर्मभाक् । तृष्णया मोहिताः सत्त्वाः चित्तस्य वशमागताः। भित्तिचित्रवत् चित्ते एव शोभनाशोभन-कर्माणि विद्यन्ते । चित्ताधीनानि कर्माण्यतः स्वचित्तं दान्तं कुर्यात् ,यतो हि चित्तस्य दमनं सुखावहम्। सर्वं दुःखं चित्तस्य लघुवेष्टितम् ।

चित्तेन भ्रान्तो दुःखमेवाश्नुते । संकल्पविकल्पकुटिलं मनो नरकायोपकल्पते । शुद्धं च चित्तं शुभे कर्मणि प्रवर्तते ।चित्तकल्पित एव संसारो मायोपम एव ।

विक्रान्तं चित्तं तोयवत् न धैर्यवच्च भवति । तद्धि उत्तमं सुखं नयति। चञ्चलं मनः संसारे गतिं धारयति ।

"सुखमाक्षितचित्तो यो नित्यं धर्मानुदर्शकः ।
न दोषवशमायाति यथा दिव्यस्तमोनुदः।।[1]

यैः कुटिलगामि चित्तं विनीतं ते नरा शुभभागिनो भवन्ति । धृत्या चित्तधारिणः सुखमश्नुवते। परं चित्तवशगो न शुभां गतिमाप्नोति। यथा कर्म तथा सर्वविषयाः चित्तचाञ्चल्यहेतवः। अतो दान्तेनैव मनसा तत्त्वदर्शनं कर्तुं शक्यते । नृणां चित्तं योगवाहि वायुवच्चञ्चलम् ।शरीरे वातादीनां दोषास्तु शरीरनाशावधिः। शरीरे नष्टेऽपि ते नष्टा भवन्ति। परं चित्तदोषाः जन्माज्जन्मान्तरं धावन्ति। चित्तशुद्धौ ध्यान-मेवोपायः। तथा चात्मायत्तं चित्तमेव सुखाय भवति। अन्यथा चाविद्वानां

१- धु० पु० नै०५६ का०११।५६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चिरं दुर्गतिं प्रति धावति। व्यसनेषु च नरं पातयति। तथा चात्रोपसंहारश्लोकः --

'विषमं वपुः तीक्ष्णविषाढ्यं महाबलम्।
धीरश्चैवं निर्जितं यैरिते लोके सुखिनो मताः[1]।। इति।।

(१२) वाग्वर्गो द्वादशः

'निर्वाणाभिलाषुकः पुरुषाणाम् असत्यां च वाचं सर्वथा विवर्जयेत्' इति सिद्धान्तः। तमेव कवि विशदयति --

'मृषा वाचं न भाषेत, सदा प्रत्ययकारिकाम्।
यया बध्यति संसारे सुगतिं नैव पश्यति[2]।।

मृषा वाचा हि सर्वधर्माणां ध्वान्तरूपा। सर्वपापप्रसूतिका च। अतो धीरो नानृतं वदति, यतोऽनृतवादिता कष्टा। अतोऽन्यथा सत्यं सर्वधर्माणां प्रदीपमूलम्, साधूनां रत्नवत् प्रियम्, स्वर्गस्य च परं वर्त्म कथितं महर्षिभिः। सत्यहीनास्तु पुरुषाः पशुतुल्याः प्रकीर्तिताः। तथोक्तम् --

'पन्थाश्च मोक्षधर्माणां धनानां धनमुत्तमम्[3]।
पापकैश्च परित्राणं सत्यमुक्तं मनीषिभिः।।

ज्योतिषां परमं ज्योतिः चक्षुश्चक्षुष्मतामपि।
द्रविणेन विना सत्यं भूषणस्यापि भूषणम्[4]।। इति।।

१- पृ० पृ० नं० ४२ अ० ११।१०७
२- पृ० पृ० नं० ४२ अ० १२। ४
३- पृ० पृ० नं० ४२ अ० १२।१४
४- पृ० पृ० नं० ४२ अ० १२।१५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्याश्रयिणः पुरुषा अन्ते परमां गतिं प्राप्नुवन्ति ।सत्येन भूषितः श्रीमान् देववच्छोभते। न माता न पिता न मित्राणि न बान्धवास्तथा त्राणं कुर्वन्ति यथा सत्यवाक्। तस्मात् पुरुषेण सत्यपरेण भवितव्यम् । यतो हि अनृतं तु विषाग्नितुल्यमस्ति। सर्वं च लोके प्रवर्तितं यथा किमनृताश्रितमेव । पारुष्यमनृतं वह्निनां परमो वह्निः यः सागरमपि निर्दहेत् । रत्नं त्यक्त्वा पाषाणग्रहणमिव अनृता वाक् ।

सत्यं कल्याणानां निधानम्, असत्यं च पापानाम्। अतएव तद् दुःखोदयम्, कटुकफलं दुःखेन सह पच्यते । विपरीतं च सत्यं सर्वतो धर्म्यम् दोषेषु परमं दोषभूतं सदा दुःखनिषूदनं बोधितम् । अनृतं क्षिप्रविषं वामयमपि नृणां जिह्वायां प्रतिष्ठितम् । तत्र सत्यममृतमूलम्, असत्यं च विषोपमम्। अनृतवचः प्राधान्येन देशे देशे जन्ममृत्युप्रदं दृष्टम् ।

अभिजातस्य निष्कर्षो द्विजातीनां च भूषणम् ।
दर्शनं मोक्षमार्गस्य सत्यमित्यभिधीयते[१] ।। इति ।।

अनादिनिधनेऽस्मिन् लोके तृष्णापाशग्रस्तानां नराणां नान्यत् त्राणं सत्यं विनेति धर्मविदां वचः। यथा नगा वज्रवध्या आसंस्तथैव क्लेशाः सत्यवध्याः सन्ति। असत्यभाषिणः क्रूरस्वभावाः बिलेशयाः सर्पा इव न शान्तिमधिगच्छन्ति । न तेषामसत्याश्रयिणां सौख्यं विद्यते , आदित्येन यथा तमः ।

प्रसङ्गतः अस्मिन्नेव वर्गे हिंसायाः (व्यापादस्य) अपि दोषा वर्णिता ग्रन्थकर्त्रा । तथा हि --

---

१- बृ० पु० ने० ४४ अ० १२।४०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

`व्यापादयति जनं व्यापादः परिकीर्तितः ।
अव्यापादः परं श्रेयो न व्यापादः कथञ्चन ।।
अव्यापादपरा ये तु ते यान्ति पदमच्युतम्[1]।। इति ।।

परस्य दुःखं दृष्ट्वाऽपि सत्त्वः सत्त्वोपघातकः पुमान् नरकगामिको भवतीति व्यापदः सर्वथा हेयः ।

सत्यवादी सदा इन्द्रियनिग्रही भूत्वा देवताभिः पुरस्कृतो भवति, लोकस्य च प्रियो भवति। अन्ते च देवैः सह देवलोकेषु मोदते। मृषा वाक् च सद्मूलगुणनाशिकाऽस्ति ।

`जिह्वासंग्रथितैः पाशैः नरकस्याग्रहेतुकैः ।
छेदा च धर्महेतूनां मृषावादः प्रवर्तते[2] ।।इति ।।

अतस्तत्त्वदर्शिभिर्निन्दितमनृतं धीमान् सर्वतः परिवर्जयेत् । अन्ते च सत्यं स्तौति ग्रन्थकारः --

`सत्यं स्वर्गस्य सोपानं निर्वाणद्वारमेव तत् ।
तस्मात् सत्यपरो नित्यं धर्मगतिस्मृतिः[3]।। `इति ।।

(१३) कर्मवर्गस्त्रयोदशः

`कर्मवशा हि देहिनः` इति दार्शनिकानां मतम्। तदेव विव्रियते विस्तरशो ग्रन्थकारेण । इह लोके कृतं यत् किमपि शुभाशुभं कर्म प्राणिनं परलोके गच्छन्तमनुगच्छति। तथा च प्राणी सुकृतैः देवलोकान्,दुष्कृतैश्च

१- ध० प्र० ने० ६४ क० १२।५०-५१
२- ध० प्र० ने० ६५ क० १२।६२
३- ध० प्र० ने० ६६ क० १२।६८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नरकान् प्रति गच्छति । अशुभकर्मफलं कटुकोदयं दुःखं भवति। सर्वमपि कर्महेतुप्रत्ययसमुत्थं भवति। त्रिविधं कर्म भवति- शुभफलम्, अशुभफलम्, अव्याकृतनवनिर्यातिकं च । त्रिविधस्यापि कस्य कर्मणः फलं तस्यैव भुज्यते, नान्येन ।

येन सुखोदयं दुःखास्वादं दुश्चरितं कृतम् तेनैव कर्मवायुना तथा प्रेरितो लोके चरति। मनसा वञ्चिता विप्रमोहितास्व सत्त्वा दुष्कर्म कृत्वा तमस्तमः परायणा भवन्ति। तमसावृते हि संसारे चरतो बुद्धशासनं दुर्लभम्। अथ च योऽभ्यो धर्मो न रोचते से दुःखाद् दुःखतरं यान्ति । तथा च --

"अनादिमति संसारे कर्मजालपवृताः प्रजाः ।
आयन्ते म्रियन्ते चैव स्वकर्मफलहेतुना ।।"[1] इति ।।

प्राणिभिर्यानि कान्यपि संसारे कर्माणि क्रियन्ते, तानि वर्जयित्वा बुद्धैस्तथागतोपदिष्टो मार्ग अनुसरणीयः । यतो हि नाधर्मस्य कर्मणः फलं साधु । अथ च शुभाशुभयोर्विपरीतमपि फलं न भवति। अत्रोदाहरणवत् हेतुसादृश्यं कर्मसु अवगन्तव्यम् । नाहेतुकं फलं दृष्टम्, विशेषतो नरकनेतृणां कर्मणाम् । यथा प्रभा दीपाधीना तथैव फलमपि कर्माधीनम् भवति। यतो हि सर्वोऽपि संस्कृतो धर्मोऽन्योन्यफलहेतुकः।

मार्गामार्गविमुग्धा ये, तेषां बुद्धस्य शासने, तमसः सूर्य इव, गतिर्नास्ति, यतो हि सर्वमपि सुखं कर्मायत्तम्, शान्तं मनः सुखायत्तम् । अतः सर्वेऽपि धर्मा मनोऽवबुद्धयाः । एतस्य वर्गस्य संक्षेपेणायं निष्कर्षः प्रतिभाति --

"अनित्याः सर्वसंस्कारा अबुद्धबुद्धसन्निभाः ।
तस्मात् सुचरितं कर्म इह लोके परत्र च"[2] ।। इति ।।

१- सु० पु० ने० ६७ अ०, १३।१८
२- सु० पु० ने० ६७ अ०, १३।३४।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१४) संयोजनवर्गश्चतुर्दश:

पालित्रिपिटके सुत्तपिटकानुसारम् दश संयोजनानि परिगणितानि। तानि यथा-- कामरागसंयोजनम्, रूपरागसंयोजनम्, अरूपरागसंयोजनम्, प्रतिघसंयोजनम्, मानसंयोजनम्, दृष्टिसंयोजनम्, शीलव्रतपरामर्शसंयोजनम्, विचिकित्सासंयोजनम्, औद्धत्यसंयोजनम्, अविद्यासंयोजनं चेति । अभिधम्मपिटकानुसारं च - कामरागसंयोजनम्, भवरागसंयोजनम्, प्रतिघसंयोजनम्, मानसंयोजनम्, दृष्टिसंयोजनम्, शीलव्रतपरामर्शसंयोजनम्, विचिकित्सासंयोजनम्, ईर्ष्यासंयोजनम्, मात्सर्यसंयोजनम्, अविद्यासंयोजनं चेति दशसंयोजनानि, परिगणितानि। इमानि दशापि संयोजनानि ऊर्ध्वभागीयअवरभागीयभेदेन द्विधा विभक्तानि । ऊर्ध्वभागीयानि संयोजनानि बाह्यानि संयोजनानि, अवरभागीयानि च आध्यात्मिकानीत्युच्यन्ते ।

वस्तुतस्तु संयोजनानीमानि संख्यया दश गणितान्यपि स्वरूपत: सप्तैव भवन्ति। तथा हि -- लोभ: ,द्वेष:, मानम्, दृष्टि:, विचिकित्सा, औद्धत्यम्, मोहश्चेति । एषामेव सप्तानामत्र ग्रन्थेऽपि प्रायशो वर्णनं कृतम् । तथा चोक्तम् --

> 'सत्यमेव प्रपन्ना ये स्मृत्या हित्वा मनोमलान् ।
> भवाभिलाषाद् विरता मुक्ता नि:संशयं हि ते ।।
> नित्यं दु:खदुलैर्बद्धा विप्रलब्धा सुयोजनै: ।
> नरा निधनतां यान्ति प्राणिनो मोहवाञ्छिता:।।
> बुद्धिरयत्नपरा लक्ष्यं शीलदुर्यं पापमित्रता ।
> नैतानि नाकबोधानि, रूप्यो रज्येन्न पण्डित:।।[1] इति ।।

१- पु० पु० भौ० भ० भा०१४।१६,१७,१८ ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्रोधेर्ष्यास्त्यानमृद्धेदो धर्मनोऽर्द्धं भवति सद्धर्मे, तेन च न मोक्षो नापि स्वर्गः प्राप्यते। मद्यपानम्, मिथ्यादृष्टिः, लोभः, व्यापादश्च पतनस्य कारणानि सन्ति। कुदृष्टेः कुफलम् भवति, अतोऽदर्शनमेव श्रेयः। ये नरा अहेतुं हेतुवत् पश्यन्ति, अनित्यं च नित्यवत् पश्यन्ति, ते मिथ्यावादेन वञ्चिता नरकमेव गच्छन्ति। एते च मिथ्यादर्शनतत्पराः प्रज्ञाभिमानिनो जना अपरानपि मोहयन्ति। मोहान्धकारेणावृता इमे भवार्णवे भूयो भूयो निमज्जन्ति। अतः --

'क्लेशनागाद् विमोक्षो यो भस्य ज्ञानपुरःसरः।
प्राप्यते वीतरागैस्तैः पुरुषास्तित्त्वदर्शिभिः[1]।।

औद्धत्यवार्त्तसर्गः, कौशीद्यम्, लोभः, आलस्य च वर्ज्यं नरकस्य हेतवः सन्ति। मद्यपानम्, हिंसा परदाराभिदर्शनम्, लोभः हिंसा वापि नरककारणान्येव। मिथ्यामानम्, अतिमानञ्च अविद्यायाः हेतुः। अतः --

'परिवर्ज्या सदा हृद्येते दुःखवृक्षस्य हेतवः[2]'।

ज्ञानेन मुक्तिर्भवति, न तु क्लेशैः। ज्ञानाग्निना हि क्लेशकाष्ठान्यशेषतो दह्यन्ते। अत एव सद्धर्मसेनापतिना रागसेना (सर्वाण्यपि संयोजनानि) विगर्हितेति। अतएवोपसंहरति --

'तस्माज्ज्ञानाग्निना नित्यं निर्दहेत् क्लेशपर्वतम्[3]।
क्लेशपर्वतदग्धस्य सुखं पदमवस्थितम्[4] ।।' इति ।।

१- बु० पु० नै० ६६ का० १४।२७

२- बु० पु० नै० ६६ का०, १४।३५

३- क्लेशपर्वतम् = संयोजनसमूहम् इत्यर्थः।

४- बु० पु० नै० ७० का० १४।५०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१५) पापवर्गः पञ्चदशः

सर्वाण्यशुभानि च कर्माणि अकुशलानि च यानि शास्त्रे परिगणितानि, तान्यस्मिन् प्रकरणे पापं संज्ञयाऽभिधीयन्ते । तेषामेव परिहारमुपदिशति ग्रन्थकारः । स ह्याह - क्रियमाणस्य पापस्य कटुकं फलं विज्ञेयम् । तस्मादात्मने सुखेप्सुभिः पापं न सेव्यम् ।

पापस्याल्पताऽपि नरकगामिका भवतीति अल्पमपि पापं न करणीयम् । अल्पो वह्निरत्र दृष्टान्तः । पापाचारो पुरुषो न क्वचित् सुखमेधते ।

पापस्य वेदना कष्टप्रदा भवति । शस्त्राग्निप्रपातेभ्यो यादृशं दुःखं भवति, ततोऽप्यधिकं पापाचरणेन भवतीति दुःखदान्येव पापानि नाचरणीयानि । अथ च --

'विनिवर्तितपापस्य नित्यं च शुभसेविनः ।
दीक्षितः शान्तचक्रस्य निर्वाणं नातिदूरतः'[१] । इति ।।

परन्तु --

'पापं पापानुगं दृष्टं शुभस्य च शुभं तथा ।
पापाचारः शुभद्वेषी नरकेषूपपद्यते'[२] ।। इति ।।

तस्मात् पापं विवर्जयेत् धीमान् । यतो हि शुभकर्मा एव सुखमाप्नोति । शुभाशुभकर्मणोः परिणामभेदो दृश्यते । पापस्य परिणामः सुदारुणो दृष्टः, नासौ कल्याणमर्हति । अनन्ता रजनी तेषाम्, येषां पापे स्थितं मनोऽस्ति । परं शुभस्य वासना रम्या भवति । प्रभातं रजनी तेषां

१- बृ० पु० ने० ७१८०।१५।१३,१४

२- बृ० पु० ने० ७१८०।१५।१७,१८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

येषां धर्मे स्थिता मतिः। ते न पापात्मानो भूत्वा ते नित्यं स्वर्गभोगिनो भवन्ति। अल्पभारा यथा नौका प्लवते, न निमज्जति। परन्तु यस्य पापरता बुद्धिर्नित्यं विषयलम्पटा भवति, विषयारामचपला रागानुचारिणी च भवति, स नरो दुःखभागी एव भवति। मानवजीवनं प्राप्ता वयं सर्वे क्षीणपापा अल्पपापा वा, येन पुनरिह लोके समायाताः। यतो हि सुकृतस्य फलं सुखमेव भवति, अनेकगुणमण्डितम्। दुष्कृतस्य फलं तु विसंवादकं दुःखमेव भवति। ते वयं सुख-दुःखाभ्यां भवसङ्कटे प्रमापः। अस्माभिर्व्यक्तमिदं सुखदुःखैः दोलादोलैः जरीभूतम्। सुखात् सुखपरिभ्रान्ता प्रमचारिणो मूढाः पद्मकोटिशतानि दुःखानि भुञ्जन्ति, न च खिद्यन्ति। न चोद्विजन्ति।

ज्ञानी च अनागताद् दुःखान्न बिभेति। अपापभीरुता तस्मात् कर्तव्या सुखमिच्छता। तथा -- पौष्करश्लोकाः -

"हिंसा मिथ्यावचोऽब्रह्मचर्यं महासुखोदयम् ।
आशुविषयमनप्राप्यमहित्यं पापमित्रता ।।
विषाग्निसदृशा ह्येते तेभ्यो रक्षेत प्रयत्नतः।
दुःखं हि पापधर्माऽयं सुखं धर्मसमन्ततः ।।
कारणं सुखदुःखानां विदुस्तत्त्वविदो जनाः ।
सत्यं दानं तथा शान्तिः सदा चापापमित्रता ।
मैत्री सदाभिभूतेषु प्रधानं त्रिदिवस्य हि[1] ।। इति ।।

१- प० पु० नै० ६४ अ०, श्लो० १५।७२, ७३,७४ ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१६) नरकवर्गः षोडशः

एतद्ग्रन्थानुसारं शास्त्रेऽष्टौ नरकाः प्रामुख्येणोक्ताः । ते यथा--

सञ्जीवं कालसूत्रं च सङ्घातं द्वौ च रौरवौ ।
तथाऽपरं महावीचितपनं च प्रतापनम् ॥

इत्येते नरका अष्टावाख्याता दुरतिक्रमाः[१] ॥ इति ॥

तेषां स्वरूपमाह--

रौद्रकर्माभिसंकीर्णाः प्रत्येकं सोत्सदाः स्मृताः ।
चतुःस्कन्धाश्चतुर्द्वारा विभक्ता भागशो मिताः ।
अयः प्राकारपर्यन्ता अयसा प्रतिदुःखिताः[२] ॥ इति ॥

प्रसङ्गतो नरकाणां भयानकत्वं विस्तारयति --

तप्तायोमयी भूमिर्ज्वलिता तेजसाङ्गता ।
अनेकयोजनशतं वहति स्वार्चिषा भृशम् ॥
कन्दर्पदमना घोरा अर्चिष्मन्तो दुरासदाः ।
रोमहर्षणरूपास्तेऽप्यासुदुःखा भयानकाः ॥

एते पतन्ति नरके ऊर्ध्वपादा अवाङ्मुखाः ।
ऋषीणामतिवक्तारः संयतानां तपस्विनाम् ॥

ते पुनस्तत्र पच्यन्ते उप्ताम्भसि कृता इव ।
क्रन्दमाना दिवारात्रौ ,नग्ना वातेरिता इव[३] ॥ इति ॥

१- बु० पु० ने०७४क० १६।२,३

२- बु० पु० ने०७४क० १६।३,४

३- बु० पु० ने० ७४क०, ने०७५ क०, १६।५,६,७,८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवमसत्कारिणः पापिनो नरकेषु पतिता भृशं तप्यन्ते। नारकैः पुरुषैर्दूतैश्च सर्वां दिशो धावन्ति भीताः सन्तः। यैः परवित्तानि हृतानि, परयोषितः संसेविताः, ते तस्य कर्मविपाकस्य वशं गत्वा नरकं महारौरवं यान्ति। येषां च सांपेशिकं वित्तं तृष्णया परिवञ्चितमस्ति, तेषां मृत्युकाले समुत्पन्ने न दारा न सुता न नार्यः न मित्राणि नरकात् त्रातुं शक्नुवन्ति।

जातिप्राणिनां समागमः पक्षिणां नीडवासवत् भवति। अत्र स्वस्मै कुटुम्बाय च कृतं पापं नरके पातयति। यतो हि पापानुगं फलं प्रोक्तम्। अतो यदि दुःखं न वाञ्छ्यते तर्हि पापं न सेव्यम्। नास्ति दुःखादृते दुःखं यत् पापमनुसेव्यते। यतो मोहवशानुगा नराः निरय एव गमिष्यन्त्यतः स्वपापानि विवर्जनीयानि, तेन दुःखं न प्राप्यते। धर्माचरणे सावहितैर्भवितव्यं शाश्वतशान्त्यभिलाषुकैः। अन्यथा मृत्युपाशेन बद्धस्य शरणं नैव दृश्यते। अतः समीक्ष्य धर्मजं सुखं नित्यं श्रेयो हेतुः पुनः पुनः।

परेषां सम्पदं दृष्ट्वा 'मम स्यात्' इति यश्चिन्तयेत् तस्याभिध्यासमुत्थस्य विषस्य नरकमेव फलं प्राप्यते। अधर्मो धर्मरूपेण यदि कथ्यते तर्हि तस्यापि फलं नरक एव। धर्मं वर्जयित्वा साधूंश्च विनिन्द्य यदुपार्जितम्, तस्यापि विपाको नरकपात एव।

"आर्यापवादका ये च ये च कर्मफलद्विषः।
ते मृत्वा नरकं यान्ति ये च मिथ्याविनीतकाः[१]॥"

तस्मात् साधुमतिः पुमान् —

१- ,, पृ० पृ० ने०८१८०१६।१३१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नावद्येषु च कार्येषु मतिं कुर्यात् कथञ्चन।
कीनाऽन्यवद्यकार्याणि नरके पातयन्ति च[1]॥

अन्ते च सर्वसाधारणहितकरीं शिक्षामुपसंहरति --

कर्माणि कुर्यात् कुशलानि नित्यम्,
परार्थवद्धेन मनोरथेन।
हित: सदैव नरकस्य रोधो,
सत्योऽपवर्गो दशमं स्वर्ग:[2]॥ इति॥

(१७) प्रेतवर्ग: सप्तदश:

प्रेत:+प्रेतयोनि: = प्रेतलोक इत्यर्थ:। यमलोक इति यावत्। इह लोकेऽशुभानि कर्माणि कृत्वा मनुष्य: प्रेतलोकमेव गच्छति, न तु स्वर्गमिति भाव:। एतदेव विवृणोति--

अत्र यत् कृतं, दग्धा: प्रेतार्थे व्यवस्थिता:।
क्षुत्पिपासामये नेह वह्निना परिदीपिता:[3]॥ इति॥

मार्गामार्गविहीन: पुरुषो दु:खित एवेह जीवति। स हि क्लेशान्धकारवदन:, निराश:, त्यक्तजीविक: त्यक्तनायुबालवृद्धश्च सन्निह दु:खी भूत्वैव जीवति। मनुष्ययोनावुत्पद्यापि तेन कल्याणाचरितो धर्म:। सम्यग्दृष्टि-पथेन स स्वर्गसोपानमाश्रितो भवितुं शक्नोति। अनेनैव पथा अस्य सर्वे ते सहाया: गता:, येषामयं एतेन बहुधा कामाचरितम्, परन्तु अयं यमदूतैस्ताडितो बन्धनैर्बद्धोऽत्रैव स्थितोऽस्ति। पाशरज्ज्वा चाकृष्यमाण: स्वकृतं भुनक्ति।

१- बु० पु० ने० ८१८० १६।१३४
२- बु० पु० ने० ८१८० १६।१३५
३- बु० पु० ने० ८१८० १७।५।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रेतलोकस्यानलो महान् क्षुत्पिपासामयो विद्यते । न क्षणो नापि लवो न मुहूर्तोऽस्ति यदा मृत्युः सौख्यमयः स्यात्। अत्र प्रेतलोके नास्तिदेशु तोयं दृश्यते, तडागाः,सरितश्च शुष्काः दृश्यन्ते ,दुःखिनो जनान् शैलवनकाननानि शुष्कफलानि दृश्यन्ते । सलिलार्थं यत्र तत्र परिधावन्ति। कष्टं व्यसनमाश्रिताः अभिद्रुताः वा गुरा = बाल वव-चिदपि सौख्यप्रदं शरणं नाधिगच्छन्ति। यैः दुश्चरितं कृतं पुरम् ,तस्य प्रतिबिम्बमिदमापतितम्। कर्मबागुरया बद्धाः कर्मसूत्रेण परिचितास्ते चिरं प्रेतलोके एव वसन्ति। क्षो हि कर्मदायादृते न मुचितः । अतोऽशुभानि कर्माणि न कुर्यात् कदाचिदपि । तथाचोक्तम् --

"न भूयः पापकं कर्म करणीयं कथञ्चन ।
उष्णाम्युष्णविपाकानि महापीडाकराणि च ।
कुकर्माण्यशुभानीह तस्मात्तानि विवर्जयेत् ।।इति ।।

(१८) तिर्यग्वर्गोऽष्टादशः

योनयः चतस्रः -- देवयोनिः, मनुष्ययोनिः,प्रेतयोनिः, तिर्यग्योनिरिति। तेन शुभकर्मकारकाः पुरुषा देवयोनावुत्पद्यन्ते, शुभाशुभमिश्रकर्मकारकाश्च मनुष्ययोनावुत्पद्यन्ते। अशुभकर्मकारकाश्च प्रेतयोनौ तिर्यग्योनौ चोत्पद्यन्ते इति शास्त्रकाराणां मतम् ।सन्ति कानिचित् कर्माणि येषां फलं तिर्यग्योनिषूत्पादोऽवश्यम्भावी ।

ग्रन्थकारमतेन पञ्चविधकारणात् तिर्यग्योनिषूत्पादः। तदेव कथयति--

---

१- पु० पृ० नं०८३८० ६७।३५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भरणं भवत्यन्यौन्यभक्षकभावरौचनम् ।
तिर्यग्योनिं समासाद्य तस्माद् ग्रोहं विवर्जयेत्[1] ।। इति ।।

अथ च मोहोपहतचित्ताः शीलदानविवर्जितास्तृष्णा विद्धिता बलात्तिर्यग्योनावुत्पद्यन्ते । तत्रोत्पन्नाः भूत्वा धर्माधर्मतिरस्कृताः कार्याकार्यविधिश्च भक्ष्याभक्ष्यं न जानन्ति ।

क्रोधेर्ष्याप्रतिहतास्ता अपि पञ्चेन्द्रियवशामूढाः नराः तृष्णा-पाशवशानुगा भूत्वा तिर्यग्योनावुत्पद्यन्ते ।

मात्सर्योपहतो दुष्कृतं न कुर्यात् ।अन्यथा तद्वशात् प्रेतयोनौ तिर्यग्योनौ वोत्पादोऽवश्यं भवति। इह लोके आगत्य तेषामेव सकलं जन्म बुद्धिश्च तेषामेवव न्निवता, येषां धर्मे सदा मतिः। त एव धर्म-चारिणः सद्भिः पूज्या भवन्ति। एवं तिर्यग्वर्गमुपसंहरति --

एवं क्रियोणा तर्कसंसारं
कार्द् प्रभस्यैव दुरावगाढम् ।
करोति फलस्य च शुद्धसत्त्वो-
ऽभ्यानन्नं ज्ञानरथारूढः[2] ।।इति ।।

(१६) द्युवर्ग एकोनविंशः

अगति प्रायशो क्षेत्रातुकं तद्योगमयं दुःखं भवति। अर्थात् अशुभ-कर्मकारिणो,अनास्तत्फलभुतात् विचामावात्, अन्यथा वा कारणात् बुभुक्षिताः सन्तो दुःखिता भवन्ति। एषां हि क्षुधादोषो क्षुधान्

१- द्र० पृ० नं० ८३४०९-।१

२- द्र० पृ० नं० ८३ ७०९-।६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कल्पानल इव लोकान् दहति । अथाप्येवं वक्तव्यम् -- नानलस्य तद्वीर्यम् यादृशं तृष्णाया इति । उक्तं हि --

मोहयेद् विविधाश्चिन्ता लोके मनुजपुङ्गवाः ।
ताःसर्वा भोजनार्थाय भवन्ति क्षिमवार्णवे[1] ।। इति ।।

अर्थिभिः कृष्यमाणस्य दीर्घगमस्य दुर्गतस्य दुःखं वर्णयितुमशक्यम् । अविद्धैन्धनमग्नस्य, उष्णेन दह्यमानस्य च गर्भस्थस्य दुःखमपि वक्तुमशक्यम् । यस्य अप्रियैः सह संसर्गः, तस्य विपदा नित्यम् उपस्थिता भवन्ति, तेषु प्रणष्टेषु जातं दुःखं अवर्णनीयमस्ति। पापमित्रजमपि दुःखं वर्णयितुमशक्यम् । एवमेव पुत्रदाराणां व्यसने जातं दुःखमसह्यम्। एतेभ्यः सर्वेभ्योऽपि अधिकं याच्ञाजातं दुःखं कष्टतममस्ति । मृत्युना ह्रियमाणस्य जन्तुनो लोकात्मनो रसाच्चिवृत्तौ जातं दुःखमपि न वर्णयितुं शक्यते । एतानि सर्वाण्यपि दुःखानि अशुभजानि। अशुभं च दानेन शीलेन वा नाशयितुं शक्यते। तदेव कथयति ग्रन्थकारः --

'यत् कुर्वन्त्यशुभं बाला येन गच्छन्ति दुर्गतिम् ।
तदाहरति दानेन कथयन्ति मनीषिणः ।।

अप्रतिदुष्कृतकर्माणि वर्जनीयानि सर्वदा ।
सुकृतेषु मनः कार्यं दानशीलविभूषितम्[2] ।। इति ।।

१- द्र० पृ० नं० ८३ब० १६।५

२- द्र० पृ० नं० ८४ब० १६।१८,१९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२०) कौशीदुष्कर्गी विंशः

कुशीदः =ऋणं दत्वा तद्वृद्धया जीवनम् (सूदखोरी इति हिन्दीभाषायाम्)। कुशीदस्य भावः कौशीद्यम् । आलस्यमित्यप्यर्थः। कौशीद्येनापि । ज्ञाने बाधा भवति। तथाचोक्तं ग्रन्थकारेण --

"कौशीद्यमतिमाया च दम्भः पारुष्यमेव च ।
निपातभूमयो दृष्टा ज्ञानस्य च विवर्जनम्[1]।। इति ।।

प्रसङ्गोपात्ता निपात(अनर्थ) भूमीर्दर्शयति- असाधुभिः संश्लेषः, साधुभिर्वियोगः, मिथ्यादृष्टिः, अदेशकालसंरम्भः वाच्यावाच्याज्ञानम्, येन तेन च सम्प्रीतिः, यत्र तत्र च भोजनम् इति । एते दोषा आत्मनो लाघवं दर्शयन्ति। अथ च --

अकर्मफलतत्त्वज्ञो धर्माधर्मबहिष्कृतः ।
पुरुषः साधुनिर्मुक्तः प्रयातनगमनाशयः।।

कौशीद्यमति निद्रा च रसना गृह्यते तथा ।
पुंश्चैषयोनयः प्रोक्ताः पारुष्यवचनं तथा[2]।।इति ।।

यः पापसेवी प्रचण्डश्च कौशीद्यमपि सेवते स क्रूरो धर्मविद्वेषको जन्तुरत्यथानुधावति। कौशीद्यं सर्वधर्माणाम् अजरामरकं स्मृतम्। एतेन दोषेण नरो दुःखभाग्भवति ।

१- पु० कु० नं० ८४। ख, २०।१

२- पु० कु० नं० ८४ क२०।६,७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आकिञ्चन्यम्, आलस्यम्, पापभिन्नता चैतानि दुःखस्य हन्त मूलानि। पण्डितस्त्वेभ्यो दोषेभ्य आत्मानं सततं रक्षेत्। कौसीद्योपहता नराः शोभमाना अपि समाजे सम्मानं न लभन्ते। ये कौसीद्यपङ्कमग्ना-स्ते दुःखसागरे मग्नाः भवन्ति। मानवानां निर्धनत्वे कौसीद्यमेव कारणम्। अतः सुखार्थिना कौसीद्ये न मतिः कार्या। एवं विधायां दुःखपरम्परायां सत्त्वः कुकर्मजालावृतायां न मतिं कुर्यात्। अत च -

त्रिदोषानल सम्प्रदीप्ते लोके कृपाबलेन परां शान्तिं कुर्यादिति कौसीद्यवर्गसंदेशः।

(२१) करुणावर्ग एकविंशः

दया, कृपा, करुणा इत्यनर्थान्तरं लोकप्रसिद्धम्। सर्वेषु भूतेषु करुणा मातेव हितकारिणी भवति। पुरुषा यां समाश्रित्यात्यन्तं सुखं प्राप्नुवन्ति। देवा अपि एतादृशं दयावन्तं सदाचारं सर्वभूतहिते रतं जनं प्रणमन्ति। अतः सुखार्थिना करुणाभावना सेवितव्या। एतदेव प्रशंसति ग्रन्थकारः -

'मृदाशया हि ये मर्त्याः साधुवत् काञ्चनोपमाः।
कारुण्यसदार्थं येषां सदा मनसि वर्तते॥

ते च सत्त्वाः सदोद्युक्ता नित्यं धर्मपरायणाः।
येषां कारुण्यदीपेन हृदयं सम्प्रकाशितम्[1]॥ इति॥

लोके हि कारुण्यमविनाशि धनं प्रोक्तं महर्षिभिः। कारुण्यं सर्वदोष-निर्धाति। गुणानां च सर्वेषां भूषणम्। धैर्यपरायणो जनः कारुण्य-नावमारुह्य त्रिदोषोर्मिमहावेगं भवार्णवं लङ्घते। अतो दयारत्नं सदा

१- धु० पु० नं० ८६ क० २११६,१०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सेव्यम् । सुखस्य मूलं कृपैव परिकीर्तिता । हृदि यस्य कृपा नास्ति स दुःखी परिकीर्त्यते । संक्षेपेण —

"अहिंसकाः सदा धन्याः । सद्दृष्टिः शुभा । एष एव पन्था ऋजुः – सदा सत्याचरणम्, पापानां च वर्जनम् । तथा चोक्तम् —

"कर्तव्यः पुरुषैस्तस्मात् कृपासंवेगमानसैः ।
दानशीलक्षमामैत्री ज्ञानाभ्यासश्च निर्मलः ।।[१] इति ।।

(२२) दानवर्गो द्वाविंशः

निर्वाणप्राप्त्यर्थं षट्पारमिताभावनाऽवश्यकरणीया उक्ता संगतसाधनापद्धतौ। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता चेति नामभिरुक्ताः षट् पारमिताः। तासां षण्णां पारमितानां साधनातः पूर्वं करुणाभ्यास आवश्यकः। यतो हि करुणाभ्यास एव महायानसाधनापद्धतेर्मूलम्। करुणाभ्यासं सम्पूर्य प्रथमा दानपारमिता भावयितव्या, एतेन करुणाभ्यासः पूर्णो भवति, चित्तं च निर्मलं भवति। एवं एकैकपारमितापूरणानन्तरं क्रमशोऽन्या अपि पारमिता भावनीयाः ।

अतः एतास्मिन् ग्रन्थेऽपि करुणावर्ग-मिषेण करुणा-माहात्म्यप्रदर्शनानन्तरं दानवर्गं प्रारभ्य दानपारमितायाः माहात्म्यं वर्णितमस्ति। तथाचोक्तं शुद्धदानस्य माहात्म्यम् —

१- बु० पु० नै० ८७ क० २१।२६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"द्वादशगुणसंयुक्तैर्मलैर्दशभिर्विना ।
दानं भवति शुद्धं तद् विपरीतं सकल्मषम्।।"[1]

इह लोके हि धनबलमुत्तमं परिगणितम्। तेन धनेन यदि दानं न क्रियते तर्हि स धनवानपि पुरुषोऽधम एवोक्तः। दानं विना केवलाहारकांक्षिणः पुत्रदारवशानुगाश्च पुरुषाः लोभमात्सर्यमलिना भवचक्रे एव भ्राम्यन्ति । अतो लोभग्रन्थिविमोक्षाय याचकानुग्रहाय च दानमालम्बनीयम्, येन तमोनिचयनाशो भवेत् । शीलेन परिभाविते दानाम्भसि नरः स्नात्वा दुःखस्य ज्ञानविस्तीर्णविमलं पारं यातुं समर्थः ।

आत्मनो हितमिच्छता पुरुषेण स्वस्मै त्रयो दीपा अवश्यं प्रज्वालनीयाः -- दानम्, शीलम्, ज्ञानञ्चेति ।एतत्त्रयं भवक्लेशनाशकं भेषजम् ।

"न दानज्ञानशीलेषु येषां सन्निहिता मतिः ।
ते नित्य दुःखिताः सत्त्वाः सुखं तेषां न विद्यते।।"[2]

यो दानेनापरेभ्यः सुखं ददाति, तस्य स्वस्यापि सुखं जायते। दानाद्धि उभयत्र सुखं भवतीति दानं प्रशस्यते। अविसंवादकमेतत् स्थानमित्यविसंवादकत्वान्नित्यं दानपरेण पुरुषेण भवितव्यम् ।

दानी भवार्णवं तरति। दानं सुखानुगन्ता मार्गः। यतो हि दानेन शीले ज्ञाने च मतिर्भवति। अतः शीलरक्षार्थं ज्ञानप्राप्त्यै,तृष्णानाशाय च साधकेन दाने रतिः कार्या । तथाचोक्तम् --

---

१- बु० बु० ने० ८७क २२।१

२- बु० बु० ने० ८८ क २२।१२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीलवानपि कालज्ञोऽज्ञानाद्वै परिमुच्यते ।
दुःखनैर्याणिको मार्गः स्मृतोऽयं मुनिपुंगवैः[१]।। इति ।।

अथ चायं मनुष्यलोके एव कर्मभूमिः न देवा दानवस्तथः श्रुताः। फलभूमिस्तु सुरालयः। दानमाहात्म्येनैव सुरालयः प्राप्तुं शक्यते । इह लोके सुवर्णकंकणयुक्तः पुरुषः यदि ध्यानाध्ययननिर्मुक्तो दानशीलविवर्जितोऽस्ति, स जीवन्नपि मृतवदेव । यस्य दानप्रदीपेन ज्ञानप्रदीपेन च हृदयं नावभासितं सोऽज्ञानी मनुष्यकर्मणा छन्नोऽपि तिर्यग्भूत एवात्र चरति। किं बहुना, दानहीनो न मर्त्यः अपि त्वयं प्रेतविग्रहवानेव मन्तव्यः। दानेन विना ज्ञानशीलविवर्जितो नरः जीवमानोऽपि मृत एवाभिधीयते। एवं दानशीलज्ञानयुतो गुणवानेवात्र लोके मनीष्यते । एतदेवाध्यायोपसंहरति --

'एतां भूमिमवस्थाप्य, सत्त्वो दानरतो भवेत् ।
दानशीलरता नित्यं मुच्यन्ते भवसंकटात्[२]'।। इति ।।

(२३) शीलवर्गस्त्रयोविंशः

शीलपारमितां पञ्चाशीतिश्लोकैः ।तत्रायमादिमः श्लोकः--

'ज्ञानानामुत्तमं शीलं सूर्यो ज्योतिष्मतामिव।
विहाय गच्छसि धनम्, शीलं स्थितमिवागतः[३]।। इति ।।

१- कु० पु०नं० ८६ अ०२२।२५
२- कु० पु० नं०६० अ०२२।५८
३- कु० पु० नं० ६०अ०२३।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि चेतनामात्रं दानं शीलं च परिरक्षितं स्यात् तर्हि तेन परिरक्षितेन शीलेनैव तथा सुखं प्राप्तुं शक्यते यथा मातापित्रादिभिरपि न दातुं पार्यते । शीलवानेव निर्वाणसुखं प्राप्नोति। शीलेन परिरक्षितो जनो मृत्युकाल उपस्थितेऽपि न बिभेति, यतो हि शीलं सर्वसौख्यप्रवर्तकमाधन्तकल्याणं चास्ति ।शीलवस्त्रेण ये छन्नास्ते छन्नाः पुरुषा मताः।

शीलं स्वर्गस्य सोपानमस्ति। शीलं निर्वाणसुखाधिकमिति सुगतेन देशितम्। अतः शीलवानसंख्यानि सौख्यान्युपभुनक्ति । अतः सर्वसौख्यदायकं शीलं सतां पुरुषेणावश्यमेव भावयितव्यम् । एवं दानशीलयुता दान्ताः सर्वभूतहितेरता मैत्रीभावनया युक्ता देवसंगतिं यान्ति । शीलवारिकमाकढाः पुरुषास्तत्त्वचिन्तका अन्ते देवभवनं त्ववश्यं प्रयान्ति , यतो हि ऐहलौकिकं पारलौकिकं च सुखं शीलाचाराधीनमेव । अत एवोक्तम् --

"स्वगृहं हि यथा मत्स्याः प्रविशन्ति गतव्यथाः ।
तथा शीलसमाचाराः प्रयान्ति त्रिदिवं गताः[१] ।।इति ।।

शीलं संसारोत्तरणाय प्लवभूतः। शीलाचरणस्य परिणामो ~~[illegible]~~ निर्वाणसुखम्। परन्तु यः कश्चित् स्वर्गाकांक्षयैव शीलमाचरति, तर्हि तस्य तृष्णाक्षयो न भवति, तेन निर्वाणं ततो दूरमेव स्यात् । अतो भौतिकसुखं प्रति निरपेक्षेण निर्वाणाकांक्षयैव शीलमाचरणीयम्।

तच्च शीलं त्रिविधम्-- हीनम्, मध्यं,विशिष्टं च । तस्य फलमपि त्रिविधम्-- हीनम्, मध्यम्, उत्तमं च । अप्रमादोपबृंहितं शीलं नित्यं

१- खु० खु० नि० ६३ प० २३।५१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखदमितिशीलस्य धर्मता। शीलप्रभा सूर्यचन्द्रप्रभामप्यतिरिच्यते। यो नरोत्तमः शीलं रक्षति स सुगतेन दर्शितं फलं प्राप्नोत्येव । ये केवलं कष्टतपः कारिणः,परं शीलाचारं विनैव सम्यग्दर्शनाभिलाषुकाः तेषां श्रमो व्यर्थ एव। शीलेन रक्षितः पुरुषो देवगन्धर्वं प्राप्नोत्येव । अतो नरैः शीलयं सदा वर्ज्यम् । यतो हि अनुत्तरः शीलवतां सुगन्धः ।

न केतकी चम्पकपुष्पगन्धाः,
न मालती नागरकं च गन्धः ।
प्रयान्ति गन्धा हि यथा सुरेण,
अनुत्तरः शीलवतां सुगन्धः[१] ।।इति ।।

(२४) क्षान्तिवर्गश्चतुर्विंशः

क्षान्तिः, क्षमा तितिक्षा चेति अनर्थान्तरम् । तितिक्षाऽपि निर्वाणगामिनोऽत्यावश्यकी साधना । तदेव विवृणोति --

"क्षमावान् पुरुषः सर्वप्रियो भवति देहिनाम् ।
पूज्यते देवदैत्यैर्नित्यं तस्मात् क्षान्तिः परं तपः[२]।।

क्षमा हि परमं तप इति भावः। क्षान्त्या यथा भूषितो भवति पुमान्, तथा नेतरैर्धनैरिति क्षान्तिधनं सर्वधनप्रधानम् ।

१- द्रु० पु० नं० ६४ क० २३।८२
२- द्रु० पु० नं० ८४ क० २४।२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्रोधदोषैर्विवर्जितः क्षमायुक्तो पुरुष इह लोके परत्र च सर्वत्र पूज्यते । सद्भिरपि सततं क्षमावानेव पूज्यते । क्रोधविषस्य क्षमैव परमं भेषजम् । अन्यथा (क्षान्त्या न नाशितः) क्रोधोऽनर्थायैव जायते। क्षमावन्त एव लोके वस्तुतो धनवन्तः । सद्धर्मपाठनष्टानां शान्तिरेव परमा देशिकाऽस्ति । अपायकाऽपथप्रदात्री क्षमैव। एषा सदा नृणां सुखावहा, दुःखस्य च विघातिकाऽस्ति। इयं मोक्षसंदेशिका पुंसाम्, संसारमथनाशिकाचास्ति। एतस्याः क्षमाया माहात्म्यमेव वर्णितं ग्रन्थकारेण --

"क्षमा गुणार्थैः सदा पूर्णा शिवा भवति देहिनाम् ।
सर्वलोकस्य मातेव सन्मार्गभूतदीपिका[1] ।। इति ।।

(२५) वीर्यवर्गः पञ्चविंशः

वीर्यम् = उत्साहः। चतुर्थीं वार्यपारमितां विवरीतुमिच्छति ग्रन्थकारः --

देशकालोपपन्नस्य क्रियाभिः सहितस्य च ।
न्यायेनारभमाणस्य वीर्यस्य सफलं फलम्[2] ।।इति ।।

अर्थात् न्यायदेशक्रियाहीनाः धर्मेण विवर्जिताः वीर्येण परिवर्जिताः पुरुषस्य कार्यनिकराः सीदन्ति। आरब्धवीर्याश्च निर्वाणरूपं भवजाल-मोक्षमधिगच्छन्ति। वीर्यवान् पुरुषो यानि कार्याण्यारभते,तानि समृद्धानि भवन्ति, पूर्णानि च । लोकसम्पदः,लोकोत्तरश्चार्थाः वीर्येणैव साधयितुं शक्यते। परन्तु -

---

१- पु० पु० नं० ६५ का०२४।१४

२- पु० पु० नं० ६५ का०२५।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"मन्दवीर्यं स्थिरोत्साहं सद्धर्मेण विवर्जितम् ।
नरं प्रविशते लोके शशाङ्कमिव कल्मषम्[1] ॥ इति ॥"

स एव नरो यदि वीर्यवानो महोत्साहश्च भूत्वा आर्याष्टाङ्ग-मार्गेण ज्ञानं परिपालयति, सोऽन्ते परमां गतिं प्राप्नोति। अत उत्तम-स्थानप्राप्त्यर्थं वीर्यारम्भे मतिः कार्या साधकेन। अत एवोक्तम् --

"वीर्यार्थी यः स्मृतिमांश्च नरो ज्ञानपरायणः।
प्रयात्युच्चतमं स्थानं जरामरणवर्जितम्[2]" ॥ इति ॥

(२६) ध्यानवर्गः षड्विंशः

अथ ध्यानपारमिता पञ्चमी । तां विवृणोति- एकाग्रता। तथा च-

"असंसक्तमतिर्नित्यं नित्यं ध्यानविहारिणः ।
विशुद्धमनसो नित्यमेकाग्राभिरतस्य च[3] ॥" इति ॥

अर्थात् यस्य चित्तमत्यन्तमेकाग्रमस्ति, दोषास्तस्य कथमपि बाधका न भवितुमर्हन्ति। स दोषभयान्मुक्तो भवति। यस्य चित्तमेकाग्रं भूत्वा विवेकमनुसरति, विवेकेन च स सर्वतर्कविनिर्मुक्तो भूत्वा स्वस्थो (निर्मलेन्द्रियो) भवति ।

१- पु० पु० नं०६५ का २५।६

२- पु० पु० नं०६५ का २५।१०

३- पु० पु० नं०६५ का २६।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ध्यानजं समाधिजं च चित्तम् एकाग्रता सुखं लभते। एकान्तमना: संदिग्धेन्द्रियश्च पुरुषो दोषनिचयविनिर्मुक्तो भवति। सुधी हि ज्ञानाम्भसा तृष्णाग्निना तिवृद्धं दोषजालं हन्ति। हत्वा च स विशुद्धस्तृष्णाविमुक्तो भवति।

ध्यानं निर्वाणपुरगामी श्रेष्ठो मार्गः। अतो योगी मनो निगृह्यैव ध्यानजं सुखं लब्धुं शक्नोति। तदेव कथयति --

[1]निर्विण्णस्य च तुष्टस्य निरामस्य नियामतः।
यत् सुखं ध्यानजं होति कुतस्तस्योपमास्मृता ॥

एतत् सारं सुधीराणां योगिनां पारगामिनाम्।
यदेवेदं मनः भुत्वा प्रयान्ति पदमच्युतम्[1]॥ इति ॥

(२७) प्रज्ञावर्गः सप्तविंशः

प्रज्ञा = ज्ञानम्। सेयं वीर्येण बौद्धराद्धान्ते मातेव हितकारिणी मता। तथा चोक्तम्--

'धर्मानुसारिणी प्रज्ञा वीर्येण परिवृंहिता।
समाधिबलसंयुक्ता मातेव हितकारिणी'[2]॥ इति ॥

सा हि सर्वान् नरान् पतिपन्नकात् त्रायते। मृत्युकाले च सम्प्राप्ते न माता न पिता न बान्धवास्तमनुगन्तुं शक्नुवन्ति, परं सा तमनुगच्छत्येव। ज्ञानी शीलचन्दनशोभनं प्रज्ञाशिखरमारुह्य सर्वं भवदोषं द्रष्टुं शक्नोति।

१- सौ० न० ने० ६६ का २५।१२,१३

२- सौ० न० ने० ६६ का २७।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाधिना प्रज्ञां लब्ध्वा भवसागरं तरति ज्ञानी । ज्ञानं च (प्रज्ञा च) दानशीलतपोध्यानः श्रेष्ठमुच्यते। महायाने प्रसिद्धेषु अष्टसु मार्गेषु प्रज्ञा(सम्यग्ज्ञानम्) मोक्षप्रदा अष्टमो मार्गः श्रेष्ठ उक्तः । सत्यचतुष्टये दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपच्चेति द्वे सत्ये उत्तरे स्तः। सर्वापि जन्मपद्धतिः सर्वोऽपि दोषनिवहश्च ज्ञानशस्त्रेण छेत्तुं शक्यः। नास्ति लोके ज्ञानात् परः सहायवान् बन्धुभूतः। अतो ज्ञानशीलयुताः वीतरागाः गतस्पृहा बुद्धास्तत्त्वमार्गनिदर्शकाः सदैव सेव्याः । सर्वं वर्गत्वमुपसंहरति –

*प्रज्ञावज्रेण तीक्ष्णेन महादयबलेन च ।
महायोगरथारूढः क्लेशादीन् प्रविदारयेत्[1]। इति ।।

(२८) निर्वाणवर्गोऽष्टाविंशः

अस्मिन् वर्गे क्लेशक्षय एव निर्वाणमार्गं इति बह्वीभिर्वाचोयुक्तिभिः साधयति । कथयति च --

*क्लेशक्षयात् परं सौख्यं कथयन्ति मनीषिणः ।
एष निर्वाणगामिमार्गः कथितस्तत्त्वदर्शिभिः[2]।। इति ।।

तं मार्गं तथागताः शाश्वतं पदं कथयन्ति, यत्र हि दुःखसम्भवं जन्म च मृत्युश्च न विद्यते। विषयेष्वप्रमत्तः साधकः निर्वाणं नातिचिरमेव प्राप्नोति। सदैव शुभकार्येषु लीनस्य करुणाभ्यासरतस्य संसारभयाच्च भीतस्य निर्वाणं नातिदूरमस्ति। यो हि नैरात्म्यस्य क्लेशक्षयस्य च विधिं जानाति, यश्च कौशीद्यान्मुक्तः स एव निर्वाणप्राप्त्यधिकारी ।

१- उ० पु० नं० ६७ अ० २७।११
२- उ० पु० नं० ६७ अ० २८।१

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आर्यसत्यचतुष्टयस्य विधिज्ञः, रागद्वेषमोहापहारकश्चेन्द्रियनिग्रही जनोऽवश्यं निर्वाणमधिगच्छति । सुखदुःखमयैर्बन्धनैर्यो न बद्धो भवति, स दोषभयनिर्मुक्तो भूत्वा निर्वाणगामी भवति ।
अन्ते चाप्युपसंहारश्लोकः -

'पुरुषोऽपायभीरुश्च प्रमादवर्जकः ।
शुभकारी शुभान्वेषी निर्वाणमधिगच्छति[1] ॥ इति ॥

(२९) <u>मार्गवर्ग एकोनविंशः</u>

'सत्यानि चत्वारि शिवानि तानि,
शुभाविताऽन्येव समीक्ष्य विद्वान् ।
सुचिन्तको व्याधिजराभयेभ्यः,
प्रमुच्यते पारमुपैति शान्तः[2] ॥'

इति श्लोकेनार्यचतुष्टयमार्गोपासक एव भवपारं गच्छतीति सिद्धान्तयति ग्रन्थकारः ।

यस्तु कामेषु आसक्तो भवभोगबद्धो भाति विहरति स कामबन्धनैर्बद्धो व्याधिजराभयेभ्यो न मुक्तो भवति। भवे एव सुखदृष्टा नरस्तृष्णाविषोणेह दग्धो नरके कष्टामवस्थां प्राप्नोति। आत्यन्तिकं सुखं (निर्वाणं) हित्वा बाला काममोगेष्वेव रमन्ते ।एते न जानन्ति—मृत्युर्नातिचिरमेवैतान् ग्रहीष्यतीति । तत्त्वमार्गप्रदर्शकैर्बुद्धैश्चाप्यात्मा अनित्यः शून्यो दुःखात्मक एव कथितः। एतां धर्मतां तत्त्वविदेव पश्यति ।

१- बु० पु० ने० ६७ क० २९।६
२- बु० पु० ने० ६७ क० २९।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एतदार्यमार्गचतुष्टयम् अन्योऽन्यफलसम्भूतमस्ति। यो हीदमार्यचतुष्टयं न जानाति स विषयेषु संपृष्टो आत्येव चक्रवद् भ्रमति। अयं सत्यचतुष्टमार्गो निर्वाणस्य प्रापयिता, अत एव शिवः पन्थाः। अनेनैव मार्गेण प्राचीना मनीषिण उदयं याताः। तस्यैव जीवनं श्रेष्ठं यस्य बुद्धोपदिष्टे मार्गे मनस्तिष्ठति। बुद्धोपदिष्टं मार्गं विहाय यातुः पुरुषस्य जीवनं पशुजीवनमेव। धर्मचारिण एव जीवनं श्रेष्ठम्। एवमेव संघं कल्याणमित्रं मन्यमानस्यैव जीवनं सुखजीवनम्। अर्थात् त्रिशरणगन्ता एव, सत्यमार्गानुयायी चैव प्रशस्तं जीवनं जीवति। अत एवोक्तम्—

'निर्वाणगमने यस्य नित्यं बुद्धिरवस्थिता।
स दोषेभ्यो विनिर्मुक्तो देवलोके महीयते॥
सुखादीनीह सत्यानि यदा ज्ञानेन विन्दति।
तदा क्षेमं शिवं स्थानं प्राप्नोति पुरुषोत्तमः॥[१]' इति॥

(३०) भिक्षुवर्गः त्रिंशः

साधकः आर्यसत्यचतुष्टयस्थः

षण्णां पारमितानां भावयिता त्रिशरणगन्ता एव भिक्षुर्लोके महीयते इति ग्रन्थकृन्मतम्। यो हि अदत्तादानविरतो जितेन्द्रियश्चास्ति, यस्येन्द्रियाणि शान्तानि स क्षीणभवसंभ्रमो भिक्षुरित्यभिधीयते।

यो हि समलोष्टकाञ्चनो वीतशोकः सततं समाधिनिष्ठः स 'मुक्तः' इति कथ्यते। यस्य च अर्थानर्थौ समौ, लाभालाभावपि तथैव, सुखदुःखे अपि समे, स 'भिक्षुः' इति प्रोच्यते। उदयव्ययतत्त्वज्ञः, सम्यग्दृष्टिः, अलोलुपो भिक्षुः संसारान्मुच्यते।

१- धु० पु० नं० ६८ का २६।२१, २२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रसङ्गोपात्तास्तथागतोपदिष्टाः भिक्षुधर्माः प्रोच्यन्ते -- विषयेषु तृष्णानद्या च न वाह्यते, यश्च स्वकर्मफलतत्त्वज्ञोऽस्ति, बुद्धया च गतस्पृहोऽस्ति, प्रत्युत्पन्नक्रियायोगी च, सततं निर्वाणमतिश्च, शुक्लधर्मसमावृतो भिक्षुः सुखदुःखयोः तत्त्ववित् उच्चाध्वयायी भवति। सर्वेन्द्रियविघाती यः सर्वभूतहितेरतः शान्तः दान्तेन्द्रियः, स्वस्थः प्रज्ञाधारः, अरण्यवासी, भूमिवासी, क्षयव्ययसुरतः, तत्त्वदृष्टिः साधक एव भिक्षुरुच्यते। दयासम्पन्नो भिक्षुर्निर्वाणमार्गे स्थितो भवति। हेतुप्रत्ययतत्त्वज्ञः सूक्ष्मार्थे कृतनिश्चयः संसारं दीप्तं दृष्टा-योगी सतां सम्मतो भवति।

भिक्षुणा के के धर्मा न सेव्याः? इति कथ्यते-- भिक्षुणा दर्शनारामेषु रतिर्न कार्या, न च नृत्यगीतेषु। नोच्चवस्त्राभिलाषुको भवेत् सः, अतिकार्यारम्भको न भवेत् भिक्षुः। पापकर्मभिरलिप्तः सर्वाश्रयविवर्जितश्च भिक्षुर्भवेत्। क्रीडाद्यभिरतो भिक्षुर्न हि कल्याणमर्हति। नाध्यापने रतिर्नैव, यश्च विहाराभिरताः, स्त्रीमद्यलोलुपमतिश्च भिक्षुर्नोच्यते। यः केवलं पिण्डभोजी, न च ध्यानरतो भवेत्, यश्च नार्यदर्शनतत्त्वदर्शी न स भिक्षुः, गृहीव सः। यो हि उपायनान्युपादाय राजद्वाराश्रितो भूत्वा गृहिभिः सख्यो भवति, स न भिक्षुः।

भिक्षोर्गुणानां माहात्म्यं प्रोच्यते -- यो भिक्षुर्दर्शनतत्त्ववित् दोषान् प्रहाय रूपादिस्कन्धतत्त्वज्ञो भूत्वा सततं मोक्षाय यतते, यश्च धर्मविबोधाभिरतो ध्यानारामविहारवान्, मैत्र्यारामः सततं धर्मगोचरे उद्युक्तो भवति, तादृशो भिक्षुर्हि प्रशस्यते। सर्वभूत रतो दृढः शान्तः सर्वसङ्गविवर्जितः नभवन्निर्मलः सर्वबन्धननिर्मुक्तश्च सन्तुष्टो भिक्षुः सर्वत्र प्रशस्तो भवति। वनारण्यविहारेषु श्मशाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तृणसंस्तरे च यस्य समानं चित्तम्, हतकिल्विषान्तरः, जितेन्द्रियः पुनर्भवविघाती शान्तमना भिक्षुरिति प्रकथ्यते । तथा चोक्तम् —

'न परार्थं न लाभार्थं यशोऽर्थं कुरुते न तु ।
संघकार्ये मतिर्यस्य स मुक्तः सर्वबन्धनैः ।।
न स्वर्गार्थं मतिर्यस्य लाभार्थं यशसे न वा ।
निर्वाणार्थं क्रिया सर्वा, स भिक्षुः व्रती[1] उच्यते।।
पापेभ्यो नित्यविरतः सत्कृत्येषु रतः सदा ।
न पापमित्रसंसर्गी भिक्षुः स्याद् बुद्धशासने[2]।। 'इति ।।

संक्षेपेण धर्मविनयाद् रिक्तो भिक्षुर्दुःखमागेव स्यादिति । यतो हि धर्मं उच्चतमः पुण्यतमश्चमार्गः ।

इदानीं जीवन्मुक्तेन भिक्षुणा संसारे कथं व्यवहरणीयमिति प्रसङ्गोपात्तां भवचारिकां कथयति—

बहुबद्धपदैर्युक्ता विज्ञेया भवचारिका ।
नाशिका ब्रह्मचर्यस्य निर्वाणगतिदुःखिका ।।

सेव्यते या जनैर्नित्यं प्राकृतैः शीलवर्जितैः ।
अतः परिवर्ज्या सा ध्यायिभिस्तत्त्वदर्शिभिः।।

दौर्बल्यमूलमेका सा मनस्कारप्रणाशिका।
नाम्ना संसर्गिकासेवा संसारबन्धमातृका।। इति ।।

बुद्धशासनं विहायान्यधर्मावलम्बनं पापकरमिति तद् निषेधति —

१- व्रती इति व्रतं आपन्न इत्यर्थः ।

२- बु० पु० ने० १०३८० ३०।८८,८९,९० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

'स्वधर्मं यः परित्यज्य परधर्मेषु रज्यते ।
धर्मद्वयपरिभ्रष्टो विनिपाताय कल्पते ।।

अथ च--

वैद्यकर्माणि कुर्वंश्च श्रुतिसंग्रथनं तथा ।
संकीर्णां दिनचर्यां च कुर्वन् भिक्षुः प्रणश्यति।।

अन्ते च ग्रन्थकारो भिक्षुणा राजसेवा कदापि न करणीयेति उद्बोधयति-

'निर्वाणस्य निरामस्य निःस्पृहस्य च देहिनः ।
संसारभयभीतस्य राजसेवा नशोभते।। इति ।।

उपसंहारश्लोकः -

'वीर्यवान् सत्यवाक् भिक्षुर्नित्यं दोषविवर्जितः ।
उद्यानमिव क्रीडया निर्वाणमधिगच्छति ।।

(३१) पुण्यवर्ग एकत्रिंशः

इदानीं पुण्यवर्गमारभमाणो ग्रन्थकारः पुण्यं इदानीं [illegible] प्रशंसति --

'पुण्यं निधानमदायुर्यं पुण्यं रत्नमुत्तमम् ।
प्रदोषसदृशं पुण्यं मातृवत् पितृवत् सदा।। 'इति ।।

पुण्यं हि शुभकर्मणां शुभं फलं कथ्यते। पुण्यं कृत्वैव मानवा देवा भूत्वा देवलोकेषु सुखेन मोदन्ते ।इहापि च ते यावज्जीवं सुखेनैव विहरन्ति तस्यैव प्रभावेण ।

१- पु० कृ० नं० १०७ श्ल० ३०।२७६
२- पु० कृ० नं० १०८ श्ल० ३१।२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुण्येन लोकद्वयहितकारी भवति जनः। पुण्यं हि छायावदनुगामिकं पुरुषस्य। ये तु नित्यं कुगतिगन्तारो दुर्दान्ताः सन्ति,कुतस्तेषां सुखं दृष्टम्। यस्य चात्मा प्रियः,यश्च सौख्यमिवाञ्छति, स वेदलोकोपपत्तये पुण्यं करोतु। पुण्यैर्विना न हि भवन्ति समीहितार्थाः।

यथा यादृशं शुभं कर्म क्रियते तथा तादृशमेव तस्य पुण्यं लभ्यते। अतः पुण्यलाभाय धर्माचरणमस्यावश्यकम्। तदर्थं च शास्तुः सुभाषितेषु सततं मनोदेयम्। तदुपादिष्टश्च मार्गोऽनुसरणीयः। तेनैव पुण्यफलावाप्तिः सुकरा।

अथ प्रसङ्गेन साधारणद्रव्याद् धर्मद्रव्यस्य वैलक्षण्यं बोधयति ग्रन्थकृत् --

"द्रव्यं विनश्यति नृणां धर्मद्रव्यं न जातु वै।
द्रव्यं साधारणं दृष्टं धर्मं स्वोऽनुगच्छति॥
हीयते द्रविणं नृणां राजचौरादिवह्निभिः।
धर्मं वित्तं न तच्छक्यमपहर्तुं कथञ्चन॥[1] इति।

तस्माद् बुद्धिमता धर्मपरेण भवितव्यम्। यो हि धर्मचारी धर्ममेव सततं निषेवते, स सुखपरम्परामेव प्राप्नोति, न दुःखम्। अधर्मचारी च दुःखपरम्पराधीनः पुनः पुनः नरकेष्वेव गच्छति।

एतस्य पुण्यस्यात्यन्तिकं फलं निर्वाणम्। यस्य शीले रतं मनस्तस्य विपुलः पुण्यप्रभावः। धर्मविगर्हणान्मरणमेव श्रेयः। इन्द्रियाणां वशे योऽस्ति स मारं नाभिवर्तयितुं शक्नोति। यतो हि स सर्वबन्धनैर्बद्धोऽस्ति। इन्द्रियनिग्रहकारकाणां च ज्ञानां धर्मे रतिरुत्पद्यते। तथा च

१- कु० कृ० नं० १०६ अ० ३३।२०,२१

२- कु० कृ० नं० १११ अ०,३३।५४

बुद्धादीनां पूजायां मनो देयम्। निरन्तपूजया बुद्धैर्मल्यं भवति। तेन च निर्वाणप्राप्तिरिति इदं धर्मसोपानम्, पुण्यप्राप्तिसोपानं च। धर्माणां तत्त्वदर्शकस्तथागतो ऽग्र्यः सर्वलोकेषु। अतः तदुपदिष्टमार्गः स्वानुसरणीयः। तत्र वृद्धमन्त्र्यान्येभ्यो धर्मदानं देयम्। आ समग्रं जन्म च पुण्यानि करणीयानि। यतो हि शुभं चैव प्रणश्यति। तदेवोपसंहरति --

संसर्गो धर्मशीलानां ज्ञानारम्भः प्रयत्नतः।
नश्यति भवजं दुःखमर्कपादैर्यथा तमः[1]।। इति।।

(३२) देववर्गो द्वात्रिंशः

शुभानि कर्माणि कृत्वा नर इह लोके भौतिकानि सुखान्युपभुज्य मृत्योरनन्तरं देवलोके देवयोनावुत्पद्यते इति बुद्धः शास्त्रकाराः। कानि तानि शुभानि कर्माणि? इत्यत्र ग्रन्थकार आह --

पन्थानो मुनिना शास्त्रे उक्ता ये तत्त्वदर्शिना।
तैस्तु सम्प्राप्यमाणास्ते हि पुरुषा देवसम्मताः[2]।। इति।।

को हि सुरलोको मार्गः? इत्याशङ्कायामाह--

सत्यं हि दानं च तथैव मैत्री,
सत्त्वेषु दया प्रियवादिता च।
सम्यक्त्वदृष्टिर्विमलं मनश्च,
पन्थानमाहुस्त्रिदिवस्य बुद्धाः[3]।। इति।।

१- पु० पृ० नं० १११ क०३२।६४

२- पु० पृ० नं० १११ क०३२।१

३- पु० पृ० नं० १११क ३२।२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं हि सिद्धम् -- आचारवान् शुद्धचित्त एव देवानामन्तिकं गच्छति। ध्यानशीलसमाधिभ्यां यस्य चित्तं निर्मलं जातम् स हि मतिमान् अन्ते देवलोकमुपभुनक्ति। यस्य बुद्धिर्न क्वचिद् रागिणी, स क्लेशारिविशुद्धात्मा देवसायुज्यं प्राप्नोति। पापमित्रविनिर्मुक्तः तृष्णापाशविवर्जितः स्त्रीमयैः पाशैरेव न बद्धो जनो देवेषूपपद्यते।

सर्वं सुखं धर्माधीनम्। निर्वाणमपि धर्माधीनम्। सुप्तेषु जनेषु धार्मिक एव जागर्ति। यतो हि धर्मो नराणां परमा गतिः। येषां वाक् संयता, अर्थात् वागिन्द्रियनिग्रहेण ये शान्ता ते स्वशरीरेण जातया प्रभया दीप्यमानाः इह लोके स्वर्गे च रमन्ते। शुभचारी, सदाचारी, सर्वभूतदयारतः, मैत्र्यादिभिर्युक्तश्च नरो देवानां समतां करोति। अहिंसादानपरमा सद्धर्मपरायणाश्च नराः सत्यक्षान्तिदमैर्युक्ताः सन्तः देवसाधर्म्यं भजन्ते।

येन देहिना यावत् पुण्यं क्रियते तस्य तावदेव सौख्यं देवलोकेषु पच्यते। अत एव शुभकारिणं जनमुद्बोधयति ग्रन्थकृत् श्लोकाष्टकेन 'रमस्व सह दैवतैः' इति।

देवा यदेतैर्विविधैः सौख्ये रमन्ते, न तत्र वयं हेतवोऽपि तु तैः पुराकृतं शुभकर्मैव। शुभेन कर्मणैव प्राणी नित्यं देवेषु जायते। यतो हि येन येन विपाकेन यत्र यत्र प्राणी उत्पद्यते स स्वस्य प्रारब्धस्य शुभाशुभमेव लभते। जन्तुः शुभेन कर्मणा नित्यं देवलोकेषूपपद्यते। अशुभेन कर्मणा च स पुरुषाधमो नरके पततीति सुनिश्चितम्।

त्रिविधं सुकृतं कृत्वा, मात्सर्यं विनिन्द्य च प्राणिनां गणमनुकम्पया रक्षयित्वा, अदत्तं च धनं दत्त्वा, परदारांश्च मातृवत् दृष्ट्वा, पैशुन्यं हित्वा पापकर्मभिरलिप्तो जनो देवानामन्तिकं व्रजेत्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दैवैरप्युपभुज्यमानमपि सुखं क्षीणमध्योर्ध्वं दृश्यते, तथा च येन येन यथा चीर्णं तस्य तस्य तथा फलम्। ये हेतुफलादृश्येन सुख-मिच्छन्ति, ते हेतुफलतत्त्वज्ञाः सुखभाजो भवन्ति। यतो हि विना बीजं फलं नास्ति, विना दीपं कुतः प्रभा।

इत्येवं अशुभकर्माणि विस्तरेण सन्दूष्य, शुभकर्मणां च माहात्म्यमभिधाय तत्फलभूतो देवानां लोकः प्रकटितो ग्रन्थकारेण। तस्य वर्गस्योपसंहारश्लोकः --

'इत्येतानि महार्थानि नित्यं दुःकराणि च।
कुर्वन्ति विधिवत् सर्वं ते जनाः स्वर्गगामिनः॥[1] इति॥

(३३) सुखवर्गस्त्रयस्त्रिंशः

'पापस्याकरणं सुखम्' इति बुद्धानां वचनम्, यतो हि प्रज्वलनाग्नि पञ्चकस्य दूरादस्पर्शनमेव वरम्। तदेव सुखं यदात्यन्तिकम्, तद् विवृणोति ग्रन्थकारः।

अनुत्तरेषु सौख्येषु ध्यानोपायेषु ये रताः।
तेषां सुखं यथावत् स्यात् निर्वाणपुरगामिनाम्॥[2] इति॥

अतोऽन्यत् सर्वं लौकिकं सुखं धूममिश्रं काष्ठमिव, विष्ठामिश्रितमोदकमिति वा जानीयात्। वास्तविकं सुखं तु वितृष्णानामेकान्तसुखचारिणां निर्मोहिणामरागिणां चैव भवति। तदात्यन्तिकसुखं श्रेयो यत्र मृत्युर्न विद्यते। यत्तु कामजन्यं कामजनकं वा सुखं न तत् सतां सम्मतम्।

१- द्र० पृ० नं० ११७ क० ३२।१२२
२- द्र० पृ० नं० ११७ क० ३३।१

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्र तृष्णाविनिर्मुक्तिः, तत्र सुखं तथैव मङ्गलप्रदम्, यथा पयोभिर्मोदनं भवति। तत्र दुःखमार्गणा तथैव, यथा पद्मवने गृध्राणां कुणपान्वेषणम्। वितृष्णान्मुनेर्दुःखं दूरे तथैव तिष्ठति, यथा सूर्यतः शैत्यम्।

अत एव ग्रन्थकारो देवान् भर्त्सयति--

"नाशं यूयं रागगणान् छेत्तुं भोः सुरोत्तमाः । [1]
यदेतद् भवतां सौख्यमेतन्न खलु शाश्वतम्।। इति ।।

भिक्षूणां वने एकान्तवास एव सुखावहः। विपरीतं रागचारिणां चित्तं वने न रमते। अतो यैर्मनसा नित्यं ध्याननियोगः कृतस्तेषां कृत एव वनं रम्यम् - न तु रागवेषिणां कृते। कथयति --

"वनेषु भावितं चित्तं नगरेषु न लिप्यते।
तस्माद् वनं सदा सेव्यं नगरं नैव सेव्यते।।" [2]

अथ च- तत्त्वविदो धीराः ये अतः वास्तविकीं स्थितिं अनित्यदुःखशून्यतारूपां पश्यन्ति, तेषां दुःखं न विद्यते। ये न खिद्यन्ति दुःखेषु सुखे येषां न सङ्गतिः, दुःखसुखविमुक्तास्ते निर्वाणसुखगामिनो भवन्ति।

रजोमयं सौख्यं तु दुःखायैव कल्पते। यतो हि यत् सुखमन्ते दुःखजनकं कथं तत् सुखमिष्यते। यच्चैतत् लोके भौतिकं सुखमुपभुज्यते तदपि कालेन नश्यति। अतो यदिदं मनोवाक्कायजं सुखं दृश्यते अथ तद् अनित्यम्, तस्य विनाशोऽचिरेण भविष्यति। अतो लौकिकं सुखं दुःखमेव। एतादृग्भिः सुखैर्लोको न तृप्यते, यथा काष्ठेनानलः।

१- बु० पू० नं० १८ अ० ३३।१७

२- बु० पू० नं० १८ अ० ३३।२५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानेनैव हि इन्द्रियाणि स्वगोचरे निवर्तन्ते। अन्यथा बाला दुःखे सुखाभिलाषाः परिश्रान्ता गतिचक्रे एव भ्रमन्ति। वर्गमुपसंहरति --

'यदत्यन्तसुखं दृष्टं तत्सुखं सत्यमुच्यते।
यत्र दुःखविपाकं स्यात् तत्सुखं दुःखमेव तत्।।

अन्यायतस्य दुःखस्य प्रतिघातं चरेद्बुधः।[१]
पापस्य हेतुकं दुःखं पापस्याकरणं सुखम्।।' इति।।

(३४) मित्रवर्गश्चतुस्त्रिंशः

वर्गेऽस्मिन् मित्रशब्दः परिभाष्यते --

'तन्मित्रं मित्रमित्याहुः यन्मित्रं साम्परायिकम्।
यो निवर्तयति पापादशुभाच्चापि रक्षति।।[२] इति।।

अपूतिपूतिसंसर्गात् पूतिरेव (अपवित्र एव) जायते। न पूतिः पूतसंसर्गेण अपूतिर्भवितुमर्हति।। अशुभं न कदापि दुःखमुत्पादयति। अतो मानवस्यैतत् सारभूतं कर्तव्यमस्ति।

'एतत् सारं सदा कार्यं यदसाधुविवर्जनम्।
साधुमित्रैः सदा वासो दुष्टानां च विवर्जनम्।।'[३]

कल्याणमित्रैः सहैव सदा वासो विधेय इति भावः। मानिनम्, बलम्, [illegible], बन्धकं च पुरुषं सम्यग्दृष्टिर्न कदापि मित्रं कुर्यात्।

१- बु० पु० ने० १२० का० ३३।९८,९९

२- बु० पु० ने० १२० का० ३४।१

३- बु० पु० ने० १२१ का० ३४।८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अपितु जाति अभिरूपं कोमलस्वभावं धर्मिष्ठं निर्दोषं च पुरुषं मित्रं मन्येत । उद्वृत्तो हि पुरुषः प्रमादाकुलितेन्द्रियो भूत्वा अस्मिन् लोके लघुतां याति, प्रेत्य च पापेषु पच्यते । एतत् कुलं, ये च विभवाः, यच्चान्यत् सुखमत्र दृश्यते, सर्वाण्येतान्यनित्यानि सन्ति। तस्मात् तेषु न विश्वसेत् ।

न ज्ञानशीलनिर्मुक्ताः जना पण्डिता अपि कुशलं प्राप्नुवन्ति। ज्ञानवन्तः शीलवन्त एव अग्रिमजन्मनि महति कुले उत्पद्यन्ते। दान-शीलपाण्डित्यैर्युक्ताः सत्यैश्वर्यपराक्रमिण एव पुरुषाः कुलीना भवन्ति। कुलीनान्येव मित्राणि कुर्यादिति वर्गं संदिशति ,उपसंहारश्लोकेन --

"ऐश्वर्यज्ञानहीनस्य न कुलं च नापि सद्गतिः[1] ।
तस्मात् कुलं ज्ञानमयम्, ज्ञानहीनं न तत् कुलम् ।।इति ।।

(३५) राजाववादवर्गः पञ्चत्रिंशः

अववादः = अनुशासनम्, राज्ञोऽववादः राजाववाद इति पदार्थः । अस्मिन् कुशलस्य राज्ञो गुणान् बोधयति। धार्मिको राजा प्रजायै श्रेयस्करो भवति ।

कश्च धार्मिकः ? इत्युच्यते --

"ध्रुवं परजनोत्पश्यी,धर्मचारी जितेन्द्रियः ।[2]
स राजा धार्मिको धीमान् स्वर्गलोकोपपत्तये।

१- बु० पु० ने० १२१ का० ३४।२१

२- बु० पु० ने० १२१ का० ३५।१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गुणैः राजैव देवानामभिप्रियो भवति। संक्षेपेण एभिर्गुणैः राजा पूजितो भवति- क्षमा, प्रियवचनम्, क्रोधहर्षादिनिग्रहीत:। एतादृश एव राजा महीं पालयितुं शक्नोति, देवलोकाय च कल्पते। यो न स्त्रीणां वशगः,साधूनां च वशी भूत्वा प्रजाः पालयति सोऽमृतः,तत्त्वदर्शी च राजा नाकमेवाधिरोहति । यो हि निन्दामलविनिर्मुक्तः षड्गुणदोषेण च विवर्जितोऽस्ति स ज्ञानी राजैव देवलोकेषु पूज्यते ।सन्मन्त्रिभिः सन्मित्रैश्च परिवारित एव देवानामभिप्रियो भवति । अथ च यःसुनिश्चितं चिन्तयति, यश्च धर्मेषु वर्तते, स तेन दृष्टेन धर्मार्थेन त्रिविष्टपे मोदते। धर्मेण प्रजापालक एव राजा स्वर्गसुखं लब्धुं शक्नोति ।किमधिकम्,सत्कर्मनिरतस्य भृत्योऽपि लोके महायशा आकाशे शरच्चन्द्र इव ।

वर्गमुपसंहरति ग्रन्थकारः -

'हेतुलक्षणविधिज्ञा ये अविरुद्धाः परस्परम्[1] ।
सम्यक्वाक्यार्थकारिणो देवानां वशमागताः।।इति ।।

(३६) स्तुतिवर्गः षट्त्रिंशः

अस्मिन् वर्गे सर्वैरपि षोडशश्लोकैः मङ्गलमयी गुरुस्तुतिः कृता ग्रन्थकर्त्रा एषा स्तुतिः सर्वेषां मातेव हितकारिणीति तां सर्वां वयमत्राक्षरशः उद्धरामः --

'नमस्त्वाग्रवेदाय सर्वतत्त्वेषु बान्धवे ।
सन्मार्गसार्थवाहाय भवबन्धनभेदिने ।।

१- द्र० पृ० नं० १२३ क० ३५।३८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नानादृष्टिविभेदाय सर्वसंशयमोचिने ।
सम्यग्दृष्टिनिवेशाय नमः सज्ज्ञानचक्षुषे ।।

सर्वसङ्कटभेदाय त्रिदोषमलशोधिने ।
नमो नक्षत्रभूताय सर्वलोकफलार्हते ।।

सर्वप्रकारकाग्राय सर्वव्याख्यानवेदिने ।
सर्वरत्नोच्चार्याय नमोऽस्त्वनात्म्यदर्शिने ।।

इयं सा लोकनाथस्य विप्रयुक्तस्य तायिनः ।
प्रतिमा दृश्यते शान्ता मोहास्योद्योतकारिका ।।४

य इमामर्चति नित्यं पुरुषः शान्तमानसः ।
स मुच्यते भवभयान्निर्वृतिं चाधिगच्छति ।।

एतच्छान्तपदं रम्यमेतन्नैष्ठिकमुच्यते ।
यदयं भाषते धर्मं निर्वाणपुरदेशिकः[१] ।।

यस्य वाक्यं समालम्ब्य पुरुषाधीनविक्रमम् ।
आकर्षति पदं नित्यं यदत्यन्तसुखावहम् ।।

एतत् पूर्वं समारुह्य पुरुषास्तत्त्वचिन्तकाः ।
त्रिलोकोधार्णवं घोरं तरन्ति भवसागरम् ।।

अयं स चक्षुर्लोकस्य समन्ताद् विचक्षणः ।
अयं ज्योतिः परं ज्योतिर्ज्योतिः काष्ठसम्भवम् ।।

१- बु० पू० ने० १२४ ब० ३६।१ - ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कल्पान्तं चेतसि यो हि नृणां रागादिमिर्मलैः ।
ज्ञानतोयेन महता शोधयत्येव वाल्ह्नुवः।।

यन्न दृष्टं पदं सर्वैस्तीर्थिकैर्ज्ञानिपाणिभिः ।
तत्पदं विमलैर्बोधैस्त्वया नृणां प्रदर्शितम् ।।

प्रमादपरमो नाथो जनो भवारिनाशकः ।
तीर्णः पारंगतो नाथस्तारयत्यघनाशनात् ।।

हितार्थं सर्वजातस्त्वमेवैको व्यवस्थितः ।
अहितानां हितार्थेव त्वमेव पुरुषोत्तमः।।

अनादिमति संसारे नृणां क्लेशापहारकैः ।
त्वया विशोधिता बाधैस्तमः सूर्योदये यथा।।

अपायः सर्वधर्माणां ज्ञानालोककरो महान्[१] ।
त्वमेवैको जगन्नाथ ! लोकोत्तर गुणार्णवः।।इति ।।

१- बु० पु० नं० १२४ ख०,क ३४। ८- १६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मसमुच्चयः

(षट्त्रिंशद्वर्गात्मकः)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

:: ॐ नमो बुद्धाय ::

(१) चित्तवर्गः प्रथमः

मङ्गलाचरणम् -

नं० १ प्रक्षीणसर्वाश्रव[1]निर्मलश्रीर्यः क्लेशजाले[2]निमग्नलोकम् ।
कृपागुणेनोद्धरत्समेन प्रणम्य तस्मै[3] त्रिभवोत्तमाय ॥१॥

ग्रन्थप्रयोजनम् -

सद्धर्मस्मृत्युपस्थानं सूत्रं वैपुल्यसागरात् ।
गाथाः[4] समुद्धरिष्यामि लोकलोचनतत्पराः ॥२॥

षट् मोदास्यायतनानि -

अप्रमादस्तथा मैत्री वीर्यारम्भस्तथा धृतिः ।
ज्ञानाभ्यासः सतां सेवा मोदास्यायतनानि षट् ॥३॥

नव शान्तिसम्प्राप्तिहेतवः -

दानशीलदमः क्षान्तिर्मैत्री भूतेष्वहिंसता ।
करुणा मुदितोपेक्षा शान्तिसम्प्राप्तिहेतवः ॥४॥

नरकस्याग्रहेतवः षट् -

चापल्यं पापसंश्लेषः[5] क्रूरता वितथं वचः ।
मिथ्यादृष्टिः प्रमादश्च नरकस्याग्रहेतवः ॥५॥

१- ०सर्वाश्रव० - क, ख   २- ०जाले० - क, ख
३- तस्य - ख   ५- पापसंश्लेषः - ख,
४- गाथां - ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रेतेषु जाट् उद्भव कारणानि -

मात्सर्यमीर्ष्यां कृत्वा क्षता हि प्रमादसेवा विरतिः शुभाच्च ।
तत्त्वेष्वभिद्रोहरतं मनश्च प्रेतेषु पन्थानमिहोद्भवाय्याः ॥७॥

तिर्यग् योनौ उद्भवसाधनानि -

अज्ञानसेवा जडता[2] च[3] बुद्धेः सद्धर्मनाशः त्रियमैथुनत्वम् ।
आहारशक्तिः प्रबला च निद्रा तिर्यग्गतौ च प्रवदन्ति हेतुम् ॥७॥

अशुभकर्मपरम्परयाऽसद्गतिः -

अशुभं त्रिविधं कृत्वा कायवाङ्मनसां महत् ।
उत्तरोत्तरसम्बद्ध कर्मणा सम्प्रदृश्यते ॥ ८॥

साधुजनकर्मफलम् -

बालानामपि सम्बद्धमुत्तरोत्तरमेव तत् ।
(नं० २ख) शुभञ्च त्रिविधं कृत्वा साधवो यान्ति निर्वृतिम् ॥९॥

प्रमादवर्जनपूर्विकायाः श्रेयसे बुद्धेरनुत्तम सुखसाधनत्वम् -

तस्मात् कर्मफलं मत्वा प्रमादस्य च वर्जनम् ।
श्रेयसे क्रियते[5] बुद्धिरेतत् सुखमनुत्तमम् ॥ १०॥

शीलप्रशंसा -

दानशीलवतो नित्यं सर्वसत्त्वानुकम्पिनः ।
सिद्ध्यन्ति सर्वकृत्यास्तस्माच्छीलपरो भवेत् ॥११॥

१- पापसंक्लेशः - ख । २-२ जड - क, ख ।
३- प्रबलं - ख। ४- सम्बन्धं - ख ।
५- श्रीयते - ख ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परोपकाररतस्य मैत्र्यादियुक्तस्य कार्यसिद्धिः -

मैत्रीकरुणायुक्तस्य गताशंसस्य देहिनः ।
परानुग्रहयुक्तस्य कार्य[1]सिद्धिर्ध्रुवं स्थिता ।। १२।।

रागद्वेषविमुक्तस्य प्रमादरहितस्य सन्तुष्टस्य सर्वप्राणिनामनुकम्पिनः कार्यसिद्धिः -

सन्तुष्टस्याप्रमत्तस्य सर्वसत्त्वहितैषिणः ।
रागद्वेषविमुक्तस्य कार्यसिद्धिर्ध्रुवं स्थिता ।।१३।।

समचित्तस्य कार्यसिद्धिः -

मित्रामित्रप्रहीणस्य समचित्तस्य देहिनः ।
अपायगतिभिन्नस्य कार्यसिद्धिर्ध्रुवं स्थिता।।१४।।

धर्मदानरतस्य धीरस्य मात्सर्येर्ष्याप्रमुक्तस्य कार्यसिद्धिर्भवति -

एवं च तस्य धीरस्य [2]धर्मदानरतस्य च ।
मात्सर्येर्ष्याप्रमुक्तस्य कार्यसिद्धिर्ध्रुवं स्थिता।।१५।।

कार्याकार्यविधिज्ञस्य शान्तस्य गुरुपूजारतस्य च कार्यसिद्धिर्भवति -

संवरस्थस्य शान्तस्य गुरुपूजारतस्य च ।
कार्याकार्यविधिज्ञस्य कार्यसिद्धिर्ध्रुवं स्थिता।।१६।।

ध्यानाध्ययनतत्परस्य अशठस्यातिदक्षस्य नित्यं प्रियवाक्यप्रयोगकुशलस्य कार्यसिद्धिर्भवति -

अशठस्यातिदक्षस्य प्रियवाक्यस्य नित्यशः ।
ध्यानाध्ययनशक्तस्य कार्यसिद्धिर्ध्रुवं स्थिता।।१७।।

१- कार्य्यं - क । २- धर्म्म - क ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देशकालविधिज्ञस्य साध्यासाध्यज्ञानशीलस्य शक्योपाय-
विधानतत्परस्य कार्यसिद्धिर्भवति -

(नै०२८) देशकालविधिज्ञस्य साध्यासाध्यं विजानतः ।
शक्योपायविधिज्ञस्य कार्यसिद्धिर्ध्रुवं स्थिता ॥१८॥

क्रोधादिविजयसाधनामुखेन धर्मतत्त्वस्य प्रतिपादनम् -

अक्रोधेन हतः क्रोधः क्षमया क्रूरता जिता ।
धर्मेण निर्जितोऽधर्मः प्रज्ञया विजितं तमः ॥१९॥

सत्यादेः प्रशंसा -

मृषावाक्यं सत्यहतं पैशुन्यं च समाधिना ।
पारुष्यं मार्दवाक्तं अबद्धं बन्धुना जितम् (१)॥२०॥

प्राणातिपातो मैत्र्या[1] च स्तेयं दानैः सदाजितम् ।
अयोनिशोमनस्कारो[2] योनिशेन (१) सदा जितः ॥२१॥

अविद्या विद्यया जिता दिवसेन तथा क्षपा ।
शुक्लपक्षेण च कृष्णपक्षः सर्वशो जितः ॥ २२॥

मिथ्याकामेष्वविजितो बुद्ध्या तत्त्वविचारया ।
आर्याष्टाङ्गेन मार्गेण योनिशेन सदा जितः ॥२३॥

वैशारद्यैश्चतुर्भिश्च कदर्यं[3] जितमेव तत् ।
विस्मृतिश्च हता स्मृत्या त्राणेनात्मानमेव च ॥२४॥

१- मैत्र्यारते - क   २- शौमनस्कारो - ख
३- कातर्यं - क

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उदाहरणपूर्विका अर्हता: कतिपयै: पद्यै: प्रशंसा -

अरण्यवासनियतैर्जिता रागवशा[1] नराः ।
मेरुणा पर्वता जिता वटेन वनमालिका ॥२५॥

समुद्रेण जिता सर्वे तीर्था जलसंभवा: ।
आदित्यतेजसा विजिता[3] सर्वे[2] च[2] ग्रहतारकाः ॥२६॥
(नै० ३७) नित्या जिता अनित्येन दारिद्र्यं दानसम्पदा ।
शाठ्यं च मार्दवैर्जितं सत्येनानृतिको जनः ॥२७॥

मृतेन निर्जितो मृतो वह्निना तरुसम्पदः[4] ।
पिपासा विजिता तोयैर्जिघित्सा भोजनैस्तथा ॥२८॥

सिंहेन विजिता: सर्वे मृगा: सत्त्वाधिकाश्च ये ।
सन्तापेन महेच्छा च जिता नित्यं प्रकीर्त्यते ॥२९॥

दया प्रशस्यते[5] नित्यमदया नैव शस्यते[6] ।
वीर्येण निर्जितं सर्वं कौशीर्यं मोहवर्धनम् ॥३०॥

ज्ञानाधिकै: सदा दान्तै: गुरुभिस्तत्त्वदर्शिभि:[7] ।
विजिता: क्रूरकर्माणो मिथ्यावादाधिका नरा: ॥३१॥

बुद्धेन निर्जिता: सर्वे तीर्थ्या: कुटिलवादिन: ।
असुरा विजिता देवैर्धर्मतीर्थं व्यवस्थिता ॥ ३२॥

इति जितवर्ग: प्रथम:

४

१- सर्वा - क, ख २-२ सर्वाश्च - क, किञ्चिदपि नास्ति -ख

३- नित्याजितास्तथा नित्या -क

४- तोयैर्जिघत्सा - क ५- वीर्येण - क,

६- कौशिद्य - क ७- वादिभि: - क,ख

कौशिद्य - ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

(२) धर्मोपदेशवर्गो द्वितीयः

गुरुः कीदृग्भवेत् -

यो हि देशयते धर्मं[१] वीर्यं निर्वाणगामिनम् ।
स सर्वबन्धनच्छेत्ता[२] गुरुर्भवति देहिनाम् ।। १।।

सन्मार्गदेशको गुरुः -

छित्त्वा मोहमयं[३] पाशं[४] यो हि देशयते शिवम् ।
सन्मार्गदेशकः प्रोक्तो दुर्मार्गविनिवारकः ।। २।।

सद्धर्मप्रवरप्रशंसा -

(नै ३ ब) येन धर्मेण[५] मनुजास्तरन्ति भवसागरम् ।
सद्धर्मप्रवरः प्रोक्तो न धर्मो लौकिको हि सः ।।३।।

सफलजन्मसूचकं वाक्यम् -

स्रोतांसीमानि चत्वारि विद्यन्ते यस्य देहिनः ।
तस्येदं सफलं जन्म कथितं मार्गदेशकैः ।। ४ ।।

अनुतापकारणप्रदर्शनम् -

एकेन्द्रियतां प्राप्य लब्ध्वा[६] बुद्धस्य शासनम् ।
यो न धर्मरतो मर्त्यः स पश्चादनुतप्यते ।। ५ ।।

१- धर्म्मं - क   २- सर्वबन्धनछेता - ख
३- छित्वा मोहमयं - क   ४- पाशः - क
५- धर्म्मेण - क   ६- लब्धा - क

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्तवत्त्वप्राप्तिः -

व्यासक्तमनसां नित्यं नित्यं कामनिवेशिनाम्[1] ।
पुत्रदारप्रसक्तानामन्तकोऽभ्येति[2] देहिनाम् ।। ६।।

बद्धचित्तस्य निर्मलीकरणम् -

संकल्पदोषजननं तैस्तैर्दोषैः[3] समाकुलम् ।
चित्तं नयत्युपायेन विमलं हि देहिनः ।।७।।

चित्तस्य वशगमननिषेधः -

दुर्दमस्यातिचञ्चलस्य सिद्धिप्रेप्सोर्विशेषतः[4] ।
न चित्तस्य वशं गच्छेत् शत्रुभूतं हि तन्नृणाम् ।।८।।

चित्तवशप्राप्तिसाधनानि -

श्रुतेन[5] सुदिष्टेन भावितेनाप्यनेकशः[6] ।
धर्मेण शाम्यते चित्तं वाजिनेव यथा हयः ।।९।।

सद्धर्मश्रवणफलम् -

सद्धर्मश्रवणं कृत्वा[7] पापाद् विरमते पुमान् ।
श्रेयसे प्रतिपत्तिं च नित्यमेवोपपद्यते ।। १० ।।

(नै० ४ अ) सद्धर्मश्रवणं कृत्वा[8] मनः प्रह्लादमृच्छति[9] ।
कुशलं चास्य सुमहत् सन्धाने[10] सम्प्रतीदाते[11] ।।११।।

१- कामनिवेशिता - क

२- पुत्रदारप्रसक्तानामंतकोन्येति - क

३- तैस्तैर्दोषैः - क

४- सिद्धिप्रेप्सो विशेषतः - क

५- श्रुतेन - क

६- भावितेनाप्यनेकशः - क

७- श्रुत्वा - क

८- श्रुत्वा - क

९- प्रह्लादमर्हति - क

१०- समहत्सन्धाने - क

११- संप्रतिदाते - क

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सद्धर्मस्य निर्वाणप्राप्तिसाधनत्वम् -

श्रुत्वा भवति धर्मात्मा[1] श्रुत्वा पापं न कुर्वते ।
श्रुत्वा कर्मफलं ज्ञात्वा निर्वाणमधिगच्छति ।।१२।।

श्रवणफलम् -

श्रुत्वा वेदयते धर्मं श्रुत्वा बुद्धः प्रसीदति ।
श्रुत्वा धर्मं विमोक्षाय यतते पण्डितो नरः ।।१३।।

धर्मलक्षणतत्त्वज्ञः श्रुत्वा भवति मानवः ।
तस्माच्छ्रुत्वा प्रयत्नेन बुद्धिः कार्या[2] प्रयत्नतः ।।१४।।

श्रुत्वा संसारविमुखां कथां[3] सुगतदेशिताम् ।
प्रहाय तृष्णां विविधा प्रयाति पदमव्ययम् ।।१५।।

चतुर्विधां प्रत्ययिता[4] धर्माणां बोद्धव्ययो[5] ।।
श्रुत्वा तां[6] ज्ञायते सर्वां[7] पुमान् श्रद्धाविभावितः ।।१६।।

धर्मपरायणस्य प्रशस्तिः -

स्कन्धायतनधातूनां यदेतल्लक्षणद्वयम् ।
श्रुत्वा तज्ज्ञायते सर्वं तस्मात् धर्मपरो भवेत् ।।१७।।

श्रुतस्योत्तमत्वम् -

प्रबला ये त्रयो दोषाः[8] सर्वसंसारबन्धनाः ।
ते प्रणश्यन्त्यशेषेण सद्धर्मश्रवणेन वै ।। १८।।

१- कर्म्मफलज्ञः त्वां + - क, सत्वा - ख

२- कर्म्या - क　　३- विविधो - क

४- प्रत्ययितो - क　　५- धर्माणाम्बोद्धव्ययं - क

६- तं - क　　७- सर्वं - क

८- प्रणश्यन्त्यशेषेण - क

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(ने०४ब) प्रवृत्तिलक्षणं कृत्स्नं निवृत्तिं चाप्यशेषत: ।
श्रुतिपारंतत् प्रजानाति तस्माच्छ्रुतमनुत्तमम् ।।१९।।

मृत्युकालेऽप्यनन्तस्य वेदनार्तस्य[1] देहिन: ।
न व्यथा श्रुतवानस्य स्वल्पापि हृदि जायते।।२०।।

सम्यग्ज्ञानफलम् -

सम्यग्ज्ञानेन ये दग्धा: क्लेशवृक्षा: समन्तत: ।
न तेषामुद्भवो भूय: क्वाचिदुपलभ्यते ।। २१।।

कतिपयै: पद्यै: सद्धर्मश्रवणफलम् -

अप्रमादविदग्धं हि श्रुतं सर्वं सुखोदयम् ।
श्रेयसश्च[2] श्रुतं मूलं तस्माच्छ्रुतपरो भवेत् ।।२२।।

सद्धर्मश्रवणं श्रुत्वा बुद्धान्वोपास्य पण्डित: ।
प्रयात्यनुत्तमं स्थानं जरामरणवर्जितम् ।। २३।।

धर्मेण वर्तते श्रुत्वा दु:खान्मुच्येत[3] वै तथा ।
श्रुत्वा भवति मैत्र्यात्मा तस्माच्छ्रेय: परं श्रुतम्।।२४।।

कायवाङ्मनसां शुद्धि: श्रुत्वा भवति देहिनाम् ।
तस्मात् सद्बुद्धिकामो[4] यत्नेन श्रोतव्यमादरात्।।२५।।

श्रुत्वा भावं समाश्रित्य दृढवीर्यपराक्रमम्[5] ।
(ने०५अ) तरन्ति पुरुषास्तूर्णं क्षिप्रं विपुलं महत्।।२६।।

१- वेदनातस्य - क, ख   २- श्रेयसाश्च - क
३- दु:खाद्विमुच्यते- क, ख   ४- तस्मात्स्वबुद्धिकामो - क
५- पराक्रमा: - ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्रुत्वा यः पुरुषः सर्व[1]धर्मानभिजायते ।
अश्रुतार्थधनैर्युक्तं दरिद्रं प्राहु[2]स्त बुधाः ॥२७॥

धर्मनाशफलम् -

सद्धर्मधननष्टस्य गुरुणा[3] वर्जितस्य च ।
विफलं जीवितं दृष्टं पापैरुपहतस्य च ॥२८॥

प्रमादादीनामनिष्टफलसाधनत्वम् -

प्रमादिनः[5] कुसीदस्य[4] पापमित्रस्य देहिनः ।
जीवितं निष्फलं दृष्टं जीवमुक्तं यथोसरे[6] ॥२९॥

शास्त्रमेव दृष्टिः -

श्रुतिदृष्टिविनिर्मुक्तमर्थमाहुर्विचक्षणाः ।
न चक्षुर्भ्यां विनिर्मुक्तमर्थमित्यभिधीयते ॥३०॥

अधर्मानुष्ठानं व्याधिसेवनमेव -

यो हि धर्मं परित्यज्य अधर्ममनुतिष्ठति ।
स भैषज्यं परित्यज्य व्याधिमेवोपसेवते ॥३१॥

धर्मसेवनाग्रहः -

सेवतां सेवतां पुंसां धर्मो भवत्यनेकशः ।
वर्षाणां समवायेन यथोद्यानं[7] प्रवर्तते[8] ॥३२॥

बोधिचित्तसमुत्थानस्य बोधिप्राप्तेः च उत्तमत्वम्-

इह प्रशासने भूमिर्न[9] संसारेऽन्यथा भवेत् ।
बोधिचित्तसमुत्थानं बोधिप्राप्तिस्तथोत्तमा ॥३३॥

१-	सर्वां -	क	२-	प्राहुस्तं -	क
३-३	गुरुभवर्जितस्य-	क,ख	४-	कुशीदस्य-	क
५-	जीविते -	क	६-	जीवमुष्ट्यथोत्तरे-	क
७-	यथोद्यानां-	ख	८-	प्रवर्तते -	क, ख
९-	भूमिर्ना-	क, ख			

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मचारित्वादिभिः शुभप्राप्तिः -

धर्मचारी प्रशान्तात्मा[1] कायोत्सर्गी समाहितः ।
अवश्यं शुभभागी स्यात्[2] स प्रमादेन वञ्चितः ॥३४॥

ज्ञानसेवनाग्रहः -

(नै० ५ब) तस्माज्ज्ञानगुणान्मत्वा ज्ञानं सेवेत पण्डितः ।
नह्यज्ञानेन संयुक्तं पुमान् कश्चित् प्रतिभवेत् ॥३५॥

धर्मानुसारिणी श्रद्धा -

धर्मानुसारिणी श्रद्धा[3] यथा याति सुखावहा ।
याति दुर्गतिसन्त्यक्ता व्यसनेषु महद् बलम् ॥३६॥

प्रदीपकल्पा तमसि व्याधितानामिवौषधम् ।
अर्थानां वसुभूता सा दरिद्राणां महद्बलम् ॥३७॥

प्रमादविघातिका श्रद्धा -

भवार्थं क्रियमाणानां पूर्वभूता सुखावहा ।
प्रमादमदमत्तानां सा प्रमादविघातिका ॥३८॥

शान्तपदप्राप्तेः फलम् -

स[4] हि यत्तत्पदं शान्तं[5] निर्वाणमुनिभिर्वृतम्[6] ।
तत् प्राप्नोत्यखेदेन सम्यग्ज्ञानपुरःसरम् ॥ ३९ ॥

इति धर्मोपदेशवर्गः द्वितीयः

:o:

१- कामोत्थायि- क,ख २- शुभभागिस्यान्त - क,ख
३- यातिदुर्गतिसंतता- क,ख ४- सो - क,ख
५- शांतयो- क,ख ६- वाणमुनिभिर्वृतं- क,ख
७- पुरः सरा- क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३) कायजुगुप्सावर्गस्तृतीयः

कायस्य स्वरूपनिरूपणम् -

सत्कारैर्भूषणैर्मानैरपि[१] स्नानासनादिभिः ।
न स्वीकर्तुमयं कायः कदाचित् केनचित् कृतः ॥१॥

कृतघ्नस्याविदग्धस्य[२] नित्यं रन्ध्रप्रहारिणः ।
कः कायस्य रिपोरर्थे पापं कुर्याद् विचक्षणः ॥२॥

रोगाणां[३] तमनशानां बहूनां[४] भाजनं[५] तथा ।
अशुच्युत्सङ्गस्य निकरं कायमित्यभिधीयते[६] ॥ ३ ॥

मरणस्वरूपनिरूपणम् -

उपस्थितमविज्ञेयं मरणं तत्त्वचिन्तकैः ।
(नै० ६७) जीवितं च क्षणादूर्ध्वं न गच्छति निरूप्यते ॥४॥

कायस्य हेयत्वप्रतिपादनम् -

आयुष्कर्मार्थनिर्माणमेतं[७] कायं त्यजत्ययम् ।
अपि विद्वांस्तथा शेते काष्ठलोष्ठसमो भुवि ॥५॥

क्षणे क्षणेऽपि कायोऽयं जीयते न निवर्तते ।
तथा यौवनमदैर्बाला मुह्यन्ते मुग्धचेतसः[८] ॥ ६॥

---

१ - भैरपि- क,ख   २- विदाधस्य - क,ख
३- रोगानि- क,ख   ४- बहूना - ख
५- भाजनं - ख   ६- कायमित्यभिधीयते- क
७- आयुष्कर्मार्थनिर्माणमेते- क,ख   ८- .... क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धनधान्यमदैर्मत्ता कुर्वन्त्यहितमात्मनः ।
तन्नाशमुपयात्येवं स च पापेन दह्यते ॥७॥

धार्मिकमनुष्यनिन्दा -

न मनुष्या मनुष्यास्ते येभ्यो धर्मो न रोचते ।
न मार्गं च स्थितास्तत्वे[1] निर्वाणपुरगामिके ॥८॥

मानुष्यप्रशंसा -

कथं प्राप्य हि मानुष्यं श्रेयसामालयं महत् ।
न ज्ञानप्लवमारुह्य तरन्ति भवसागरात् ॥९॥

जीवनस्य क्षणिकता -

विद्युदालातसदृशं गन्धर्वनगरोपमम् ।
सदा[2]तद् याति रभसं जीवितं सर्वदेहिनाम् ॥१०॥

शरीरस्य नश्वरता-

शरीरे न मदं कुर्यात् क्षणिके भङ्गुरे सदा ।
इत्वरे चपलेऽसारे जरामरणभीरुके ॥ ११ ॥

शरीरविषये ज्ञातुः दृष्टिः :

व्याधीनामन्तगतं ह्येतत् शोकानामालयो महान् ।
शुभाशुभानां क्षेत्रं च शरीरमवधीयते ॥ १२ ॥

सफलजीवनस्य रहस्यम् -

ज्ञानशीलदयादानैर्यस्य गात्रं विभूषितम् ।
तस्य सत्स्वैकसारस्य शरीरं सफलं मतम् ॥१३॥

१- मार्गेनास्थितास्तत्वे - क, मार्गेणास्थिता- ख

२- सदातं - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रूपधातुज्ञानात् मोक्षः -

(नै० ६अ) धातूनामारकमत् सर्वमिदं मुक्तं कलेवरम् ।
शरीरधातु विषयात् साक्षाद् भवति नेतरात्।।१४।।

शरीरधातुं यो मुक्त्वा धातुष्वन्येषु[1] रज्यते ।
स धातुकृत्यविज्ञातो[2] दुःखैव प्रमुच्यते ।।१५।।

हिरण्यधातुर्न यथा दुःखशान्त्यैः[3] हि वर्तते ।
शरीरधातुतत्त्वज्ञो यथा दुःखात् प्रमुच्यते ।।१६।।

दुःखाद्[5] दुःखोदयस्तेन[4] दुःखं न[6] परिरक्ष्यते ।
प्रक्षीणो राजचौरादिभयैः सर्वैरुपद्रुतम् ।।१७।।

तस्मादनर्थकं नित्यं दूरतस्तं विवर्जयेत् ।
वर्जनात् सुखितो दुष्टसंग्राहाद् दुःखितः पुमान्।।१८।।

शरीरधातुतत्त्वज्ञो धातुलक्षणतत्त्ववित् ।
ध्यानाध्ययनसंसक्तो दहति क्लेशपर्वतान्।।१९।।

तस्माच्छरीरजान् धातून् पण्डितः प्रत्यवेक्षते[7] ।
तेषां स्वलक्षणं ज्ञात्वा मोक्षो भवति देहिनाम्।।२०।।

इति कायजुगुप्सावर्गस्तृतीय

:o:

१- धातुष्वपेषु - क,ख २- धातुकृत्यशिष्ठातो - क,ख
३- दुःखशांताय - क,ख ४- दुःखोदुःखोद्य - क,ख
५- प्रक्षीणं - क,ख ६- सर्वां - क,ख
७- प्रत्यवेक्ष्यते - क,ख ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(४) परिवर्तवर्गश्चतुर्थः

कस्य कालः परिवर्तते ?

कामैरेवावितृष्णस्य[1] तृष्णया तृषितस्य[2] च ।
चञ्चलेन्द्रियविद्धस्य कालोऽयं परिवर्तते ॥१॥

अनित्यध्येयता[3] यस्य सुखसक्तस्य[4] देहिनः ।
(नै० ७ ख) स्वर्गादर्शनेन मत्तस्य कालोऽयं परिवर्तते ॥ २ ॥

जातिमरणवश्यस्य मोहितस्य[5] च तृष्णया ।
बालस्य तु जनस्यास्य कालोऽयं परिवर्तते ॥३॥

गतिचारकबद्धस्य नोद्वेगवशगस्य च ।
प्रमादविषमूढस्य कालोऽयं परिवर्तते॥ ४॥

अविद्यत्यादि प्रसक्तस्य[6] गार्हस्थ्यभारतस्य च ।
लाभैरतृप्तमनसः कालोऽयं परिवर्तते ॥५॥

पञ्चबन्धनबद्धस्य षड्भिर्व्यामोहितस्य च ।
त्रैलोक्य विधिमूढस्य कालोऽयं परिवर्तते ॥६॥

विनिपातानभिज्ञस्य वितर्कोपहतस्य च ।
जनस्य सक्तमनसः कालोऽयं परिवर्तते ॥ ७॥

१- वितृतस्यण्णाया - क   २- तृषी - क
३- अनित्यताधेय - क,ख   ४- सुखसक्तस्य- ख
५- मोहितस्य - क,ख   ६- प्रसक्तस्य - ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्कालरमणीयेषु परिणामाहितेषु च ।
कार्येषु शक्तमनसः[1] कालोऽयं परिवर्तते ॥८॥

पूर्वदुःखानभिज्ञस्य दिव्यसौख्यरतस्य च ।
विपद्योगानभिज्ञस्य कालोऽयं परिवर्तते ॥९॥

कर्मजालेन[2] बद्धस्य[3] मनस्येव विचेष्टितः ।
सत्पथात् परिभ्रष्टस्य कालोऽयं परिवर्तते ॥१०॥

भवदोषानभिज्ञस्य[4] तृष्णया[5] मूढचेतसः ।
मोहान्धकारमग्नस्य कालोऽयं परिवर्तते ॥११॥

(नै०७ ब) कामक्रोधाबद्धस्य निःसहायस्य देहिनः ।
देवागमविमूढस्य कालोऽयं परिवर्तते ॥ १२॥

इन्द्रियाद् व्यपकृष्टस्य[6] सत्पथप्रापितस्य च।
श्रेयातुरसक्तस्य कालोऽयं परिवर्तते ॥ १३ ॥

संवरासंवरज्ञस्य व्यापादबहुलस्य च ।
नष्टसम्बुद्धमार्गस्य कालोऽयं परिवर्तते॥ १४ ॥

हिताहितबहिर्गस्य[7] कार्याकार्यं अज्ञस्य च ।
क्रीडाबालसदृशस्य कालोऽयं परिवर्तते ॥१५॥

नदी प्रवहणाभेषु[8] वनोपवनभूमिषु ।
क्रीडनातत्परस्यास्य कालोऽयं परिवर्तते॥१६॥

१- शक्त - ख २- कर्मजाल- क,ख
३- विदस्य - क,ख ४- भवदोषानभिज्ञस्य- क,ख
५- तृष्णाविमद - क,ख ६- इन्द्रियाव्यपकृष्टस्य- ख
७- बहिर्गस्य - क,ख ८- प्रभवणाभेषु- क,
श्रवणाभेषु - ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विमानगिरिपृष्ठेषु धर्माकरवनेषु च ।
रमतः कामभोगेषु कालोऽयं परिवर्तते ॥१७॥

कर्मधर्मविपाकेषु निरास्थस्य देहिनः ।
केवलाहारभक्ष्य[1] कालोऽयं परिवर्तते ॥१८॥

<u>शरीरस्थितस्याऽपि शरीरानभिज्ञता -</u>

कर्मणायुः[2] परिश्रान्तं दैवानुवर्तिदं सदा ।
भ्रमन्ति[3] चक्रवन्नित्यं न च विन्दन्ति बालिशाः ॥१९॥

<u>जगतः दोषानभिज्ञता -</u>

विनिपातोच्छ्रयमयं यो नामारोहते[4] जगत् ।
न च दोषावधेयत्वं[5] प्रकुर्वन्ति विमोहिताः ॥२०॥

<u>धीरस्य कामपरिवर्जनं सौख्यहेतुः -</u>

(नै० ८ ख) एतत्तु[6] परमं सौख्यं यत् कामपरिवर्जनम् ।
वीतकाङ्क्षस्य धीरस्य गतशोकस्य तापिनः ॥२१॥

<u>मुनीनां परमपदप्राप्तिः श्रेयसे दुःखनिवर्तनाय च -</u>

तदादिमध्यनिधने कल्याणं शोमुत्तमम् ।
यद् प्राप्य मुनयः शान्ताश्चरन्ति विगतज्वराः ॥२२॥

<u>दुःखं हेतवः कामाः -</u>

उत्कामनं भवेत् सौख्यं विनिपातगतं तु तत् ।
न हि कामविशेषं च किंचिद् दुःख विपाकजम् ॥२३॥

१- केवलाहारभक्ष्य - ख   २- कर्म्मवायु - क,ख
३- भ्रमते - क,ख   ४- नामारोहते- क,ख
५- दोषवधेयत्वं - क,ख   ६- एव क,ख, पुस्तकयोर्नास्ति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्मात् कामेषु मतिमान् न लुभ्येत्[1] कथञ्चन ।
ते हि संसारदुःखानां हेतुभूताः सुदारुणाः ॥२४॥

वनोपवनशैलेषु पद्माकरवनेषु च ।
विभ्रान्तास्तृष्णया बालाः पतन्ति सह दैवतैः ॥२५॥

शुभकर्मणि आसक्तेः उपदेशः

काञ्चनेषु च[2] शैलेषु वैदूर्यशिखरेषु च ।
जायते हि शुभं कर्म[4] यतस्व[5] सह दैवतैः ॥२६॥

कल्पवृक्षेषु रम्येषु नदीप्रस्रवणेषु च ।
चरतस्तैः शुभं क्षीणं यतस्व सह दैवतैः ॥२७॥

भूमिभागेषु रम्येषु रत्नाकरवनेषु च ।
न शुभं ते सदा क्षीणं यतस्व सह दैवतैः ॥ २८॥

पञ्चात्मकेन वीर्येण मनः प्रह्लादकारिणा ।
क्षतस्य गतकाङ्क्षस्य यतस्व सह दैवतैः ॥ २९॥

देवानां हितानभिज्ञता -

कामसंसक्तमनसैर्नित्यं[6] विषयतत्परैः ।
(नं० ८ ब) न ज्ञायते हितं दैवैर्यदमंत्राहितं भवेत् ॥ ३०॥

१- लुभ्येते - क,ख २- - - - - - - क, ख
३- क्रियन्ते - क,ख ४- यतस्व - क, ख
५- कर्म्मसदैवतैः - क,ख ६- कामसंसक्त - क, ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देवनिन्दा -

अल्पशिष्टमिदं पुण्यं व्ययनं समुपस्थितम् ।
गन्तव्यमन्यत्र सुरैः सुकर्मकर्मोविभिः ॥३१॥

ये नित्यं शुभसंसर्गा[1] कुर्वन्ति वा[2] शुभं सदा ।
तेषां विपद्गतौ हेतुर्मूर्खाणां[3] हि विद्यते ॥३२॥

के मृत्युं प्रतीक्षन्ते -

मुक्त्वा मृत्युं प्रतीक्षन्ते[4] ते जनाः काममोहिताः ।
शुभशीलतपाऽज्ञान सर्वदा न परायणाः ॥३३॥

मुक्त्वा मृत्युं प्रतीक्षन्ते[5] ते जनाः काममोहिताः ।
ये न कर्म विपाक च ज्ञानं दोषवधे रताः ॥३४॥

मुक्त्वा मृत्युं प्रतीक्षन्ते ते जनाः काममोहिताः ।
प्रज्ञापयन्ति[6] नसमाः[7] तृष्णाग्निपरिवारिताः ॥३५॥

मुक्त्वा मृत्युं प्रतीक्षन्ते ते जनाः काममोहिताः ।
विप्रयोगकृतं दुःखं ये न पश्यन्ति दारुणम् ॥३६॥

मुक्त्वा मृत्युं प्रतीक्षन्ते[8] ते जनाः काममोहिताः ।
स्त्रीजनासक्त[9]हृदया न विन्दन्ति पुनर्भवम् ॥३७॥

१- शुभसंसक्त्यः - क,ख २- वा - क,ख
३- हेतुर्मूर्खानां - क,ख ४- के प्रतिक्षन्ते- क,ख
५- प्रतिक्षन्ते - क,ख ६- प्रज्ञांयति - क,ख
७- न समानाः - क,ख ८- प्रतिक्षन्ते - क,ख
९- शक्त - ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पण्डितलक्षणम् -

एकान्तमनसा[1] नित्यं शुभं कार्यं प्रयत्नतः ।
अशुभं च सदावर्ज्यमेतत् पण्डितलक्षणम् ।।४५।।

विनिपातलक्षणानि -

दायं[2] यातं[3] च यत् शीलं स्पृष्ट्वा यः समुपागतः ।
प्रमादवञ्चितोऽवश्यं विनिपातो भविष्यति ।। ४६।।

विषयाभिलाषिणः जनस्यैव परिवर्तो जायते न तु विषयाणाम् -

गता गच्छन्ति यास्यन्ति देवेशाश्चैव सर्वतः ।
तिष्ठन्ति शिखरे रम्ये[4] नानारत्नविभूषिते ।।४७।।

वैदूर्यशिखरा[5] रम्यास्तथान्ये वनमालिनः[6] ।
(नै० ६ब) विषयास्तादृशा[7] एव जनस्तु परिवर्तते ।।४८।।

वनोपवनरम्याणि भूमिभागानि सर्वशः[8] ।
तिष्ठन्त्यविकलान्येव जनस्तु परिवर्तते ।।४९।।

वैदूर्यमयनालानि काञ्चनानि विशेषतः ।
पद्माकराणि तान्येव जनस्तु परिवर्तते ।। ५०।।

सरांसि सरितो रम्याः पद्मिषण्डैर्निरन्तरम्[9] ।
तथैवाविकला[10] ह्येते जनस्तु परिवर्तते ।।५१।।

१- एकान्तमेकमनसो - क,ख   २- दीर्णं - क,ख
३- तत् - क,ख   ४- शिखरैम्ये - क
५- शिखरो - क,ख   ६- वनमालयः - क,ख
७- शिवयस्तादृशान्- क,ख   ९- पद्मिसर्गैर्नित्यशरताः क,ख
१०- तथैव - क,ख   ८- सर्वतः - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भुक्त्वा मृत्युं प्रतीदान्ते[1] ते जनाः काममोहिताः ।
विपश्चिद्व्याधिशोकेभ्यो नोद्विजन्ति कथञ्चन ॥ ३८॥

भुक्त्वा मृत्युं प्रतीदान्ते[2] ते जनाः काममोहिताः ।
(नै० ६७) ये पापमित्रसंसर्गं प्रकुर्वन्ति महाधमाम् ॥ ३९ ॥

भुक्त्वा मृत्युं प्रतीदान्ते ते जनाः काममोहिताः ।
मायिवतचेतसो[3] येन न च तत्त्वं विदन्ति[4] ते ॥ ४०॥

भुक्त्वा मृत्युं प्रतीदान्ते[5] ते जनाः काममोहिताः ।
येन सर्वास्ववस्थासु संसारभयभीरवः ॥ ४१ ॥

भुक्त्वा मृत्युं प्रतीदान्ते[6] ते जनाः काममोहिताः ।
कार्याकार्येषु ये नित्यं न शुभाशित[7]चेतसः ॥४२॥

भुक्त्वा मृत्युं प्रतीदान्ते[8] ते जनाः काममोहिताः ।
ये न तत्त्वधियो नित्यं सर्वभूतहिते रताः ॥४३॥

भुक्त्वा मृत्युं प्रतीदान्ते[9] ते जनाः काममोहिताः ।
ये शरीर[10]सुखार्थेन धर्मं हिंसन्ति[11] मोहिताः ॥४४॥

१- प्रतिदान्ते - क,ख २- प्रतिदान्ते - क,ख
३- चेतांसो - क,ख ४- प्रवेदाये - क,ख
५- प्रतिदान्ते - क,ख ६- प्रतिदान्ते- क,ख
७- शुभाशित - ख ८- प्रतिदान्ते- क,ख
९- प्रतिदान्ते - क,ख १०- शरिर - ख
११- हिसन्ति - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पण्डितलक्षणम् -

एकान्तमनसा[1] नित्यं शुभं कार्यं प्रयत्नतः ।
अशुभं च सदावर्ज्यमेतत् पण्डितलक्षणम् ।।४५।।

विनिपातसाधनानि -

दायं[2] यातं[3] च यत् शीलं स्पृष्ट्वा यः समुपागतः ।
प्रमादवन्वितोऽवश्यं विनिपातो भविष्यति ।। ४६।।

विषयाभिलाषिणः मनस्यैव परिवर्तो जायते न तु विषयाणाम् -

गता गच्छन्ति दास्यन्ति देवेशास्तैव सर्वतः ।
तिष्ठन्ति शिखरे रम्ये[4] नानारत्नविभूषिते ।।४७।।

वैदूर्यशिखरा[5] रम्यास्तथान्ये वनमालिनः[6] ।
(नै० ६ब) विषयास्तादृशा[7] एव मनस्तु परिवर्तते ।।४८।।

वनोपवनरम्याणि भूमिभागानि सर्वशः[8] ।
तिष्ठन्त्यविकलान्येव मनस्तु परिवर्तते ।।४९।।

वैदूर्यमयनालानि काञ्चनानि विशेषतः ।
पद्माकराणि तान्येव मनस्तु परिवर्तते ।। ५०।।

सरांसि सरितो रम्याः पक्षिसङ्घैर्निरन्तरम्[9] ।
तथैवाविकला[10] ह्येते मनस्तु परिवर्तते ।।५१।।

१-	एकान्तमेवमनसो	-	क,ख	२-	दाणं	-	क,ख
३-	तत्	-	क,ख	४-	शिखरेम्ये	-	क
५-	शिखरो	-	क,ख	६-	वनमालयः	-	क,ख
७-	शिवयस्तादृशान्	-	क,ख	९-	पक्षिसंघैनित्यशरताः		क,ख
१०-	तथैव	-	क,ख	८-	सर्वतः	-	क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विमानानि रथाश्चैव हर्म्याणि[1] च तथैव च ।
तिष्ठन्त्यविकला ह्येते जनस्तु परिवर्तते ॥५२॥

परिवर्तनलोकस्य विनाशे वञ्चितस्य च ।
तथापि नाप्तलोकस्य नोद्वेगो हृदि जायते ॥५३॥

अभ्यासेन वशीभूतं[2] चित्तं संसारचारिणाम् ।
येन मन्ये महद्दुःखं हृदये नैव वर्तते ॥५४॥

शौल्किकेन[3] यथा बद्धाः पशवो गृहकन्दरे ।
एकैकशो विनश्यन्ति[4] शेषाणां नास्ति सम्भ्रमः[5] ॥५५॥

सुखाय[6] कामिनामेव स्वयं[6] भूमिवासिता ।
च्युता एवोपपन्ना इव तथामी वासिताः सुराः ॥५६॥

विषयोन्मुखाः मरणमपि न पश्यन्ति -

प्रमादाय हताः मत्वा मृत्युमुपनिकटं पशौ[8] ।
(नै० १०३) नावबुध्यन्ति मरणं पशुवद् वीतसम्भ्रमाः ॥५७॥

कालवशङ्गतानां पश्चात्तापेन दाहः -

ते पश्चाद् दीर्घमनसः कालस्य वशमागताः ।
पश्चात्तापमयो वह्निर्दह्यते निष्प्रतिक्रियः ॥५८॥

मरणस्य कालवशगत्वम् -

दारुणं निष्प्रतीकारमवश्यं सर्वदेहिनाम् ।
मरणं कालवशगं तद् विदित्वाऽऽगमं चरेत्[9] ॥५९॥

१- हर्म्याणिनि - क,ख
२- सरि - ख
३- सूलिकेन - ख
४- विनश्यते - क,ख
५- संभ्रमाः - क
६- कामिनोसुखमेवार्थमय - क
७- तथापि - क,ख
८- पश्यता - क,ख
९- विदित्वायमवरेत् - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विप्रयोगान्ताः सर्वे संयोगाः -

समागमाः प्रियालोके वियोगाश्चाप्रियाः सदा ।
संयोगो विप्रयोगान्तो धर्मेयं सनातना ।। ६० ।।

मरणं संचिन्त्य कर्तव्यं निर्धारयेत् -

क्षणे लवे मुहूर्ते च दिवारात्रौ तथाऽध्वनि[1] ।
मरणं चिन्तयेद् धीरस्तस्य नास्ति प्रतिक्रिया ।। ६१ ।।

गतकल्मषा एव शान्तिमधिगच्छन्ति -

स्मृतिमग्र्यां प्रशंसन्ति[2] येषां मरणसंभवा ।
श्रेयसैकपरां[3] शान्तिं प्रयान्ति गतकल्मषाः ।। ६२ ।।

मनसः स्वभावतः शान्तत्वम् -

मृत्योरर्थमनुस्मृत्य दीर्घोऽयं कस्य सम्मतः[4] ।
निर्दोषं हि मनः सर्वं शान्तं भवति नित्यशः[5] ।। ६३ ।।
अप्रमादपरं श्रेष्ठमिदमुक्तं तथा गतैः ।

यन्मृत्योः स्मरणं नित्यशुभानां[6] च वर्जनम् ।। ६४ ।।

। इति परिवर्तवर्गश्चतुर्थः ।

१-	ध्वनौ	- क	२-	प्रशंसन्ति -	ख
३-	श्मासैव्य	- क,ख	४-	सम्मनः -	क
५-	नित्यशः	- ख		लक्षणम् -	ख
६-	नित्यमशुभानां	- ख			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(५) अनित्यतावर्गः पञ्चमः

सुखस्य क्षयान्तत्वमेव -

क्षयान्तं हि सुखं सर्वं[2] न सुखमात्मनं[1] विद्यते ध्रुवम् ।
संक्षेपेण सुखं तस्मात् यदिच्छेत्[3] सुखमात्मनः ॥१॥

मृत्युः सर्वानपि आकर्षति इति कतिपयैः पद्यैः विश्लेषणम् -

(नै० १० ब) गच्छतां तिष्ठतां चैव स्वपतां क्रीडतामपि ।
अविसह्यो[4] महावेगोऽपि मृत्युर्नश्यति दारुणः ॥२॥

न तत् स्थानमिहामुत्र यत्रासौ प्रतिपद्यते ।
तथापि[5] नाम संमूढा अनयित्वा वशं गतः ॥३॥

- - - - -[7] न स्थविरमेव वा ।
गुरुस्थमगुरुस्थं वा यदासौ नापकर्षति ॥४॥

सुखितं दुःखितं वापि गुणवन्तं तथैव च ।
कुलस्थमकुलस्थं वा यदासौ नापकर्षति ॥५॥

दुःशीलं शीलवन्तं[8] च दानिनं[9] च तपोधनम्[9] ।
राजानं चौरं वापि यदासौ नापकर्षति ॥६॥

देवं वाथ नारकं वापि तिर्यञ्चं[10] प्रेतकं तथा ।
प्रमत्तमप्रमत्तं वा यदासौ नापकर्षति ॥७॥

१- 'ख' पुस्तके नास्ति । २- तस्माय - क,ख
३- यिच्छेत् - क,ख ४- अविषाह्यो- ख
५- तथापि - क,ख ६- अनायित्वा - क,ख
७- क,ख पुस्तकयोः नास्ति ८- शीलवान - क,ख
९- क,ख पुस्तकयोः नास्ति १०- तीर्यंक - क,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामधातुरुपपन्नम् वा[1] रूपधातौ स्थितश्च यः ।
आरूप्य धातूपपन्नं वा यदासौ नातिवर्तति ॥८॥

कर्मपाशो जरादण्डो व्याधिदण्डो महाबलम् ।
रुद्रोपमो मृत्युरयं हत्वानादाय गच्छति ॥ ९ ॥

एवं विधे प्रतिभये[2] मृत्यौ परमदारुणे ।
- - - - - सुराः[3] कामविमोहिताः ॥१०॥

यद् दुःखं च्यवमानस्य देवलोकात्[4] सुरस्य वा।
(नै० १२ख) नरके यद्भयं[5] दुःखं विप्रयोगपुरःसरम् ॥११॥

सर्वसुखं विषदुःखमिति मति सन्त्यजेत् -

विषमिश्रित संयुक्तं यथान्नं वापि शोभनम्[6] ।
तथा देवगतं सौख्यं पतनान्तं विवर्जयेत् ॥१२॥

क्षीणपुण्यस्य दीनस्य स्वदारैर्वर्जितस्य च ।
यद् दुःखं च्यवमानस्य तस्योपम्यं न विद्यते ॥१३॥

सुकृतक्षीणमन्दस्य क्लिष्टस्येव[8] गतत्विषः ।
शाम्यति देवस्याथ यद् दुःखं महद्दुःखं प्रजायते॥१४॥

देवस्याभिच्यवनम् -

तृष्णाविषयवृद्धस्य[9] शोकोपहतचेतसः ।
मन्दवाग्देह चेष्टस्य देवस्य च्यवनाद्भयम्॥१५॥

१-	दा	- क,ख	२-	प्रतिभये	- क,ख
३-	क,ख पुस्तकयोः नास्ति		४-	देवलोत्	- क,ख
५-	यद्भवे	- क,ख	६-	क,ख पुस्तकयोः नास्ति	
७-	क,ख पुस्तकयोः नास्ति		८-	क्लिष्टस्येव	- क
९-	वर्द्धस्य	- क,ख		दुर्गीपस्थेव	- ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दुःखस्य विषयतरत्वम् -

यथा यथा सुखास्वादाः[1] कामा परमवल्लभाः ।
तथा तथा भवत्येव[2] तेषां दुःखं महत्तरम्[4] ।।१६।।

मुक्तिः च्युतिर्भ्रष्टे दुःखाय -

पतमानस्य यद् दुःखं[3] देवलोकात् प्रजायते ।
तस्यान्तरेण नरकः[5] कलां नार्हति[6] षोडशीम् ।।१७।।

च्यवनान्तं[7] देवलोकं मरणान्तं तदा[8] भुवि ।
दृष्ट्वा दुःखं - - - - - - ।। १८।।[9]

सौख्यस्य पतनान्तत्वम् -

पतनान्तं सदा[10] सौख्यं नास्ति लोकस्य नित्यता ।
तद् बुद्ध्वा कारणं सर्वं श्रेयसे क्रियतां मनः ।।१९।।

सर्वस्य दुःखान्तत्वम् -

(नै० ११ ब) सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता[11] मरणान्तं[12] हि जीवितम्[13] ।।२०।।

१- सुखास्वादो - क,ख
२- क,ख पुस्तकयोः नास्ति
३- विध्यागात् - क,ख
४- महत्तरं - क,
५- नारक - क,ख
६- नार्घति - ख
७- च्यवमानान्तं - क,ख
८- तथा - क,ख
९- पाठोऽयं भ्रष्टः उभयत्रापि
१०- सुदा - - ख
११- पाठोऽयं भ्रष्टः उभयत्रापि
१२- ख पुस्तके नास्ति
१३- म०भा० स्त्रीपर्व-११।२।३
,, अश्वमेधिपर्व-१४।४४।१८
,, शान्तिपर्व - १२।२७।२९

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जन्म मरणानन्तरम् -

बालस्य मरणं नित्यं न तस्यास्तीति नित्यता ।
न मृतारा पितानैव विष्णु बालुषु दृश्यते ।। २१।।

गर्भमेके विनश्यन्ति तथैके सूतिकागृहे[2] ।
परिसर्पणकाले[1] चैके तथैव - - - - ।।२२

भास्करोदयोदाहरणेन मरणसमर्थनम् -

उदयास्तं[3] च सु गमनं भास्करस्य प्रदृश्यते ।
तथा बालस्य सर्वस्य स्थितं मरणमग्रतः ।।२३।।

सुखस्य छायान्तत्वप्रदर्शनम् -

छायान्तं हि सुखं सर्वं यो न विन्दति मोहधीः[4][5] ।
स पश्चान्मरणे प्राप्ते - - - - - - - ।।२४।।

कुशलं कार्यं - - - - -[6] प्रियः सदा ।
सुखं हि धर्माचरणं कथयन्ति मनीषिणः ।।२५।।

अध्रुवपदार्थस्य दुःखावहत्वम् -

अनित्यमध्रुवं सर्वं परिणामे कटुः सदा ।
संसारः कथितो बुद्धे हेतु[7] तत्त्व विचारणे[8] ।।२६।।

च्यवनात् देवस्य दुःखावहत्वम् -

देवाः सुखप्रमत्ता ये तेषां सुखमशाश्वतम् ।
च्यवनानस्य च यद् दुःखं देवलोकात् सुरस्य हि।।२७।।

१- परिसर्पणकालेके- क २- क,ख पुस्तकयोः नास्ति
३- यास्तं - क,ख ४- मोहधि: - क
५- क,ख पुस्तकयोः नास्ति ६- पाठोऽयं भ्रष्टः उभयत्रापि
७- बुद्धेहेतु - क,ख ८- विन्दौ च पुर क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वं सुखं पतनान्तम् -

तस्योपमानं नैवास्ति नरकान्नरकं हि तत् ।
विद्यते नावबुध्यन्ते पतनान्तं सदा सुखम् ।।२८।।

सुखमोहवशाद् जरामरणत्व दृष्टि: -

(ने० १२ ब) अजरामरवल्लोकं पश्यन्ति सुखमोहिता: ।
च्युत्युपपत्तिमल्लोक: संख्या तस्य न विद्यते।।२९।।

तृष्णावशात् पतनान्तमपि सुखं नावगच्छति -

न वेदिवन्ति पुरुषास्तृष्णया[1] परिवञ्चिता ।
सर्वे क्षयान्ता निचया पतनान्ता समुच्छ्रया:[2]।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्।।३०।।

सर्वक्षयान्तं सुनिश्चितम् -

अभियाति सदा जन्म त्वरितं याति यौवनम् ।
संयोगो विप्रयोगश्च सहज: पारदृश्यते ।
विमूढा[3] नानुपश्यन्ति[3] विषयै: परिवञ्चिता:।।३१।।

तृष्णाविवशा देवा सुखाद्विमुच्यन्ते -

च्यवन्ति देवा[4] विवशास्तृष्णया परिमोहिता:।
सा भूमिस्तानि पद्मानि वनानि विविधानि च।।३२।।

बहिरेव मनोहरा: सर्वे पदार्था: -

शिखराग्राणि रम्याणि रत्नवन्ति महान्ति च।
सरांसि[5] नद्यो विविधा रत्नपाषाणभूषिता:[6]।।३३।।

१- पुरुषास्तृष्णया - क   २- ५०- शिरावृतोऽयं श्लोक:
३- असंगृहीतयाया- क,ख   अभिमन्नेववर्गे क,ख,पुस्तकयो:
४- देवा - क,ख   ५- [redacted] सरांसि - क,ख
६- रत्नपाषाण० - क,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वृक्षा विचित्रकुसुमाः पंक्तिभिर्विविधैः स्थिताः ।
हर्म्याग्राणि च रम्याणि रत्नवन्ति महान्ति च ॥३४॥

कल्पवृक्षा[1] हेममया केचिद् वैदूर्य[2]निर्मिताः ।
राजतास्तपनीयाश्च[3] विचित्रा वररोहिणः ॥३५॥

(नै० १२७) भ्रमरैरुपगीताश्च विभान्ति कमलाकराः ।
विभूषणानि रम्याणि देवार्हाणि च सर्वतः ॥३६॥

सर्वं सुखं गन्धर्वोपमं मायाबुद्बुदकेनोपमम् च-

सर्वमेतत् सदैवास्ति जनस्तु परिवर्तते ।
मायाबुद्बुदकेनाभं गन्धर्वनगरोपमम् ॥३७॥

सर्वस्य भोग्यस्य क्षणिकत्वम् -

सुखं[4] सर्वस्य देवस्य तृष्णाया वञ्चितस्य हि ।
स विनाश्य जनं सर्वं भ्रामयित्वा[5] भवार्णवे ॥३८॥

तृष्णैव दुःखमूलभूता -

तृष्णाविषाग्निसंदृष्टा लोकानामत्र[6] तिष्ठति ।
अवितृप्ता कामभोगैरवितृप्ता[7] सुखोद्भवा[8] ॥३९॥

कालानलेन निर्दग्धा क्व ते देवगणाः गता ।
सर्वथाभिगता येयं तृष्णा लोकवितन्विनी[9] ॥४०॥

यया विमोहिता देवाः कालस्य वशमागताः ।
देवासुराः नरा[10] यक्षा नरके यान्ति संगमाः[10] ॥४१॥

१-	कल्पवृक्षो -	क	२-	वैदूर्यं -	क,ख
३-	च राजतस्तपनीयाश्च-	क,ख	४-	सो -	क,ख
५-	भ्रामयीत्वा-	क	६-	लोकनामाय-	क,ख
७-	तिप्ता -	क	८-	सुखोद्भवा -	क,ख
९-	वितन्विना -	क,ख	१०-	नारकैयान्तु-	क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कालपाशयोजितं त्रैलोक्यमिदम् -

गच्छन्ति विवशाः सर्वे[1] कालपाशं दुरासदम् ।
त्रैलोक्यमिदं सर्वं[2] कालपाशेन योजितम् ।। ४२।।

तृष्णाविमोहिताः लोकास्तन्न पश्यन्ति -

न च[3] पश्यन्ति विवशास्तृष्णामोहेन मोहिताः ।
अनेन हि यथा देवाः शतशोऽथ सहस्रशः ।।४३।।

गताः कालाग्निनिर्दग्धा विषयैर्धन[4] संभवे ।
(नै० १३७) परस्य दृश्यते मरणमात्मनो नैव दृश्यते ।।४४।।

पश्चात्ते[5] व्यसने प्राप्ते विन्दन्ते दुःखमात्मनः ।
प्रमादकलुषं चेतो विषयाभिरतं सदा ।। ४५।।

न विन्दन्ति[6] ध्रुवं मृत्युं देहिनां समवस्थितम् ।
सुखोद्यमनाशस्य प्रमादाभिरतस्य च ।। ४६ ।।

मृत्युसैन्यमुपेतेदं[7] प्रमाथि विषसन्निभम् ।
न मन्त्रौषधकर्माणि न देवा[8] नासुरास्तथा।।४७।।

कालपाशबद्धस्य न कोऽपि त्राता-

कालपाशेन बद्धस्य त्रातारो न[9] भवन्ति ते ।
रवसा[10] गुण्ठितं वक्त्रं[11] चात्मनो नैव विन्दति।।४८।।

१-	सर्वे -	ख	२-	योजितं -	क,ख
३-	आनेन -	क	४-	विषयैस्व -	क,ख
५-	पश्चात्तन्ते-	क,ख	६-	विन्दते -	क,ख
७-	सैन्यमुपेतोदं-	क,ख	८-	देवो -	क,ख
९-	हि -	क,ख	१०-	रवसो -	क,ख
११-	वक्त्रं -	क,ख			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तृष्णायाः हेयत्वे हेतुप्रदर्शनम् -

प्राप्तोऽस्त्यवनभूतोऽयं मृत्युः पश्चाद् भविष्यति।
लोलुपस्य सदा यत्नैरवितृप्तस्य[1] तृष्णया ।। ४९।।

सहसाभ्येति[2] मरणं यन्नदृष्टं सुखार्थिना ।
अयं तवाग्रहो दुःखो मृत्युना प्रेषितोपहान्।।५०।।

अस्मादनन्तरं मृत्युर्भविष्यति सुखारणः ।
महागिरिवरादस्माद्[3] वनोपवन मुषितात्[4]।। ५१ ।।

बद्धानरा[5] विषयवशाः[5] स्वकर्मफलभोगिनः ।
क्रीडाविहारिणस्तावत्[6] क्वचित्[7] तृष्णासुखं न हि।।५२।।

(नै०१३ ब) तष्यैया तृष्णया मूढाः पतन्ति विवशा भुवि ।
धूमस्यानन्तरं वह्निर्यथा भवति नित्यशः ।।५३।।

तथा च्यवनलिङ्गस्य पृष्ठतश्च्यवनं[8] स्थितम् ।
जात्वा जात्वा ध्रुवं मृत्युरवारोग्ये सति स्वकस्थिता।।५४।।

सम्पदो व्यसनप्राप्त्यै यौवने सहसा जरा ।
सर्वैः प्रियैर्वियोगैश्च[9] न संयोगो भुवि स्थितः[10]।। ५५।।

१- यत्नैरवितृप्तस्य- क,ख २- सहसाभ्येति - क,ख
३- सत्यागिरिवरादस्माद्-क,ख ४- मुषितान् - क,ख
५- बद्धानविषयैर्वशं - क,ख ६- क्रीडाविहारिणो- क,ख
७- नचि - क,ख ८- पृष्ठतस्त्वनं - क,ख
९- प्रियैर्वियोगैश्च- क,ख १०- ध्रुवं - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मतायाः महत्त्वख्यापनम् -

धर्मतेयं सदालोके सम्यग्बुद्धेन देशिता ।
उभयस्य क्षायो[1] नाशो जन्मयोः परिवर्त्तते ॥५६॥

जातौ सत्यां यथा मृत्युरवश्यं स्थित एव हि ।
जायते सुकृतं कर्म आयूंषि[2] क्षणिकानि हि ॥५७॥

धर्मविनयस्य महत्त्वम् -

संवरं[3] धर्मविनये प्रवर्त्यं पुरुषोत्तमाः ।
अभ्येति[4] यौवनं सर्वं जीवितं चानुगच्छति ॥५८॥

नश्यन्ति सर्वदा सर्वा मा प्रमादे मनः कृथाः ।
न नित्यं लभ्यते स्वर्गो न नित्यं क्षणसम्पदा ॥५९॥

यद् यावन्नाभिपतनं स्तावत्[5] क्षिप्रं[6] प्रयुज्यताम्[7] ।
- - - - - - - - - - - - - - - - - - ॥६०॥

नानारत्नविभूषितस्य लतागह्वर संछन्नत्वम् -

अयं सो हि[8] द्रुमवनो नानारत्नविभूषितः ।
(नै० १४७) लतागह्वरसंछन्नः पद्माकरविभूषितः ॥६१॥

जाम्बूनदमयैः शुभैः प्रासादै रत्नचित्रितैः ।
नानाविधैः प्रवर्णलताभिरुपशोभितः ॥६२॥

१- क्षयो - क,ख   २- आयूंषि - क,ख

३- सत्वरा- क,ख   ४- अभियाति- क,ख

५- पतनान्तास्तावत्- क,ख   ६- श्रेयं युज्यतां- क,ख

७- श्लोकार्धमिदमुभयत्रापि भ्रष्टम्   ८- हि - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्मैः प्रेरिता जनस्यास्य भित्त्वा गगनमुच्छ्रितः ।
कल्पाग्निविरतो मेरुः सर्वथा न भविष्यति।।६३।।

<u>प्रमादमदमोहिताः सुराऽपि नाशमधिगच्छन्ति</u> -

किं पुनर्ये सुरास्तत्र फेनबुद्बुदसन्निभाः ।
उत्पद्यन्ते विनश्यन्ति प्रमादमदमोहिताः।।६४।।

<u>पतनान्ता विभूतयः</u> -

सुखदुःखमनन्तं च स्वेच्छाकामफलोद्भवम् ।
देवलोकाद् यथा देवाः पतन्ति नरके पुनः।।६५।।

शरीरमानसैर्दुःखैर्विद्यमानेषु[1] सर्वतः ।
न तच्छक्यं प्रवक्तुं[2] स्यात् तद् दुःखं परमं महत्।।६६।।

<u>वियोगस्य वियोगान्तत्वम्</u> -

वियोगदुःखं दुःखानामग्रतः[3] परिपठ्यते[4] ।
तच्चदेवगतौ नित्यमग्रतः सम्प्रवर्तते ।।६७।।

सर्वैर्द्रव्यैर्धनाद्यैश्च विप्रयोगो भविष्यति।
न च देवाः प्रपश्यन्ते[5] मरणान्तं हि जीवितम्।।६८।।

च्युतिकाले तु सम्प्राप्ते विह्वलेन्द्रियचेतसा ।
जानीध्वं तत्परं दुःखं यदवश्यं भविष्यति ।।६९।।

१- जीयमानेषु - क,   २- प्रवक्ष्यान्त - क,ख
    जीयमानेषु - ख   ३- दुःखानामग्रेषु - क,ख
४- परिपद्यते - क,ख   ५- प्रपश्यच्चं - क,ख
६- जानध्वं - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वस्य भोगस्य क्षणिकत्वम् -

(नै० १४ ब) अकालं[::] चक्रप्रतिमं गन्धर्वनगरोपमम् ।
क्षिप्रवे संभवं सर्वं फेनबुद्बुदसन्निभम्।। ७०।।

यः फेनराशौ संमूढः कुर्याच्छादनसंस्तरम् ।
स मूढः संसृते कुर्यादभिस्वादं[1] प्रमात्मकम्[2]।।७१।।

मृत्युकाले न कोऽपि त्राता -

न देवा न नरा यक्षा नासुरा गरुडास्तथा ।
[3]त्रायन्ते मृत्युसमये कर्मणा परितप्यताम्[4] ।।७२।।

यावन्नायाति समये[5] मृत्युराजः सुदारुणः ।
तावत् सुकृतं कार्यं मा पश्चात् परितप्यथ ।।७३।।

यद्भूतकालजं सौख्यं प्राकृतं विषयोद्भवम्[6][7] ।
मृत्युकाले समुत्पन्ने तिष्ठन्ति न बुधर्षभाः ।।७४।।

किं करिष्यन्ति सौख्यानि किं स्त्रियः किञ्च बान्धवाः ।
मृत्युना ध्रियमाणस्य देवलोकात् समन्ततः ।। ७५।।

स्थिरास्ता[8] भूमयः सर्वा वनोपवनभूषिताः ।
मृत्युरज्ज्वा विबद्धश्च त्वन्तु काले न नीयसे ।।७६।।

::	अकाल०	क	४- परियोद्भूतं-		क,ख
१-	कुर्यादभिस्व -	क,	५- समयो	-	क,ख
	कुर्यादभिस्व -	ख	६- तिष्ठन्ते	-	क,ख
२-	प्रमात्मकं -	क,ख	७- विबुधोत्तमाः	-	क,ख
३-	त्रायंति -	क,ख	८- स्थिरास्ता	-	क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वस्य कालवशात् संयोगोऽन्ते च विनाशः -

आकाशे जलदा यद्वद् वायुना समुदीरिताः।
संश्लिष्टाश्च वियुज्यन्ते[1] संसारे प्राणिनस्तथा।।७७।।

(ने० १५७) ऋतौ ऋतौ यथा पुष्पमागतं दृश्यते नरैः।
व्यतीते तु ऋतौ सर्वे प्रतियान्ति[2] यथागताः।।७८।।

यथा काले समुत्पन्ने मोदन्ते[3] सुकृतैः सुराः।
व्यतीते तु शुभे काले प्रतियान्ति यथागताः।।७९।।

ऋतौ ऋतौ यथा वृक्षो वर्णं धारयत्यनेकशः।
व्यतीते तु शुभे काले शीर्यते तत् समन्ततः।।८०।।

यथा वर्णविमा देतन्न सौख्यममत्यम्भवः[4]।
शीर्यते सततं सौख्यं नासौख्यं विद्यते ध्रुवम्।।८१।।

प्रावृट्काले यथा वर्णमाकाशेन निवर्तते।
तथा सौख्यमिदं सर्वं गच्छति[5] न निवर्तते।।८२।।

बर्हिणां च यथा नादो वायुनासमुदीरितः।
नश्यति[6] तत्प्रणाशाय तथा सौख्यमिदं स्मृतम्।।८३।।

यथा हि ज्वलने दीप्ते ध्रुवं काष्ठं[7] प्रदह्यते।
तथा वह्न्युपमः[8] कालः काष्ठकल्परता स्मृतः।।८४।।

१-	वियुज्यते -	ख	२-	प्रतियाति-	क,ख
३-	मुदन्ति -	क,ख	४-	सौख्यंममयं भवः -	क,ख
५-	गच्छते -	क,ख	६-	नपश्यते -	क,ख
७-	काष्ठ -	क,ख	८-	बह्न्युपमः -	क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आगताश्च गताश्चैके शतशोऽथ सहस्रशः ।
संवेगं न भवत्येषां तृष्णया मोहितास्तथा ।।८५।।

यथा यथा महासौख्यं स्वयं भोगो यथा यथा ।
तथा तथा महद्दुःखं पतनान्तोद्भवं ध्रुवम् ।।८६।।

जात्यादीनां दुःखत्वमेव -

(ने० १५ ब) जातिर्दुःखा जरा दुःखा मरणं दुःखमेव च ।
प्रियैश्च सह विश्लेषो दुःखस्यैषा परम्परा ।।८७।।

उत्पत्तिर्विनाशान्ता -

स्वकस्य पतनं दृष्ट्वा कथं नोद्विजते जनः ।
ममापि पतनं ह्येतत् सर्वथापि[1] भविष्यति ।।८८।।

यः पश्यति भयं दूरात् प्रतिपत्तौ च वर्तते ।
सम्प्राप्ते[2] मृत्युसमये न बिभेति गतव्यथः ।।८९।।

विमुच्यमानो[3] दीनैश्च[3] मृत्युः स्वजनबान्धवैः ।
यद्दुःखं मृत्युसमये तन्न शक्यं प्रभाषितुम् ।।९०।।

सर्वस्य मरणान्तत्वम् -

पतनान्तं[4] हि मरणं पतमानं[5] यथा गिरिः ।
निष्प्रत्यनीकं[6] बलवत् पुरुषानपकर्षति ।
संश्लिष्यते महावेगं सम्प्रहारि च सर्वदा ।।९१।।

१- सर्वथार्यभविष्यति- क,ख २- प्राप्ते - क,ख
३- विमुच्यमानदीनैश्च- क,ख ४- मापतंतं - क,ख
५- पन्नमानं - क,ख ६- निष्प्रत्यनिकं- क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तं ज्ञात्वा मा प्रमादेषु स्तुवध्वं[1] देवसत्तमाः ।
संश्लेषयति विश्लेषं यौवने च सदा जरा ।।६२।।

जीविते च सदा मृत्युः पदमेतत् सदा स्थितम् ।
अनित्येनाग्निनावश्यं[2] दग्धव्यो यत्र गोचरः[3] ।। ६३ ।।

कल्पान्ते किं पुनर्देवा ये फेनकदलीसमाः ।
न तदस्ति भवेत् किञ्चिद् यद् ज्ञानं संस्कृतं चलम् ।।६४।।

यन्नित्यं सुखं वा स्यादेत तत्स्थानं न विद्यते ।
(नै०१६ ब) उपस्थितमिव ज्ञेयं मरणं सर्वजन्तुभिः ।। ६५ ।।

<u>सर्वस्यापि क्षणिकत्वम् -</u>

यस्मात् तस्य प्रतीकारः सर्वोपायैर्न शक्यते ।
कर्म क्षणिकमेतेषां वयोऽपि क्षणिकं तथा ।।६६।।

क्षीयते च तथारोग्यं न च बुध्यन्त्यमेधसः ।
यदा तत् सर्वमेतेषामनेकं शुभलक्षणम् ।।६७।।

अन्यतः कालचक्रेण पारपाट्या विनाशितम् ।
तथैवैतत् पुरा नष्टमनेकशतलक्षणम् ।। ६८ ।।

१- वध्वं - क, ख
२- अनित्यनाग्नि० - क,ख
३- गोक्षमः - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मृत्योरवश्यम्भावित्वम् -

तथैतदपि जन्मिनां मृत्युराजो[1] हरिष्यति ।
प्रमादमनसां ह्येषां[2] नित्यं सुखविहारिणाम् ॥९९॥

निधनाय कालपाशोऽयमभ्येति सुखनाशकः[3] ।
सुखारोग्यबलप्राणप्रियविश्लेषकारकः[4] ॥ १०० ॥

बलवन्मृत्युराजोऽसौ[5] समीपमुपसर्पति ।
यः समीपगतो ह्येषां प्रमत्तानामनेकशः ॥१०१॥

सुखस्य नाशः निश्चितः -

जीवितं सह सौख्येन त्वरितं नाशयिष्यति ।
दीर्घकालमिदं ध्वस्तं प्रमादापहृताः सुराः ॥१०२॥

नावबुद्ध्यन्ति मोहान्धाः सौख्येन प्रतिबोधिताः[6] ।
यदा ज्ञानप्रभाह्रियते विह्वलेन्द्रियचेतसः ॥ १०३॥

कालायत्तत्वात्सुखस्य क्षणिकत्वम् -

(नै० १६ ब) यमलोकं पतिष्यन्ति तदा ज्ञास्यन्ति तत्कालम् ।
जीयते यत् कालोऽयं[7] क्षणिकं च यथासुखम् ॥१०४॥

१- सुखमृत्युराजो - क,ख   २- येषां - क,ख
३- सुखनाशकः - क,ख   ४- प्राणप्रिया- क,ख
५- राजानो - क,ख   ६- परिबुध्यता- क,ख
७- जीयतेयतकालोयं- क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुखविहारिणोऽसन्तुष्टा एव तिष्ठन्ति -

तथापि एकमनसो नावबुद्ध्यन्त्यचलाः[1] ।
रम्याद्रम्यतरं यान्ति नित्यं सुखविहारिणः ॥१०५॥

प्रयास्यन्ति[2] यथा ह्युते[3] मृत्युराजो हरिष्यति।
जरा व्याधिविपन्नानां यो न मूढो निषीदति[4] ॥१०६॥

स पश्चात् मृत्युभयतो तप्यते हीनचेतसा[5] ।
सुखं देवेषु सम्प्राप्य तदेतद् गुणसम्पदम्[7] ॥१०७॥

सुखस्य विनाशित्वं मरणस्य निश्चितत्वम् -

कृतसुखं विनाशान्तं क्षणिकं[8] जीवितं चलम् ।
यथा हि तद् विनाशान्तं तथैषामपि[9] जीवितम् ॥१०८॥

अचिरेणापि कालेन भविष्यति[10] न संशयः[11] ।
यावन्नायाति मरणं यावद् बुद्धिरनाविला[12] ॥१०९॥

मनोबलेन धर्मरतिः कार्या -

तावद्[13] धर्मरतं कार्यं मनोबलेन धीमता ।
सर्वजीवितनाशाय सर्वदुःखक्षयाय च ॥११०॥

१- नावबुद्धेश्चलाः - क,ख २- प्रयास्यन्ति - क,ख
३- विपन्नां - क,ख ४- विषीदति - क,ख
५- ख पुस्तके नास्ति ६- क,ख पुस्तकयोः नास्ति
७- मनोगुणसंपत्तं - क,ख ८- क्षणिकं - ख
९- तथैवामपि - क,ख १०- भविष्यंति - क,ख
११- संशय - क १२- बुद्धिरनाविला - क,ख
१३- तथिद् - क

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रियस्य वियोगः निश्चितः -

सर्वैः प्रियैर्वियोगाय मृत्युरभ्येति[1] च ।
तस्मिन्नाप्ते महाध्याने मृत्युः परमदारुणो ॥१११॥

धर्मस्य मुख्यत्वाद्धर्मरतैर्भवितव्यम् -

नान्य[2] मृतेर्धर्मात् तस्माद्धर्मरतो भवेत् ।
उपपन्नस्य देवस्य या[3] प्रीतिरुपपद्यते ॥११२॥

मृत्युकाले न कोऽपि दुःखात्त्राता -

नातौ[4] च्यवनदुःखस्य कलामर्हति षोडशीम्[5] ।
(नै० १७३) मृत्युकाले समुत्पन्ने न कश्चित् कस्यचित् तथा ॥११३॥

सर्वस्य नाशान्तत्वम् -

न च गच्छन्तिमप्येकं पदमेकं हि गच्छति ।
यदा जातं तदारभ्य[6] नरो मृत्युपरायणः ॥११४॥

नानामोहपरीतस्तु भयमेतन्न विद्यते[7] ।
यदा ते च्यवनं प्राप्ते भवभोगकरं परम् ॥ ११५ ॥

तदा विन्दन्ति मूढात्मा यद्भयं मृत्युजं महत् ।
विषयोरगसन्दष्टा तृष्णा विषविमोहिता ॥११६॥

न विन्दन्ति तदा देवाश्च्यवनान्ते महद्भयम् ।
च्यवन्ति च तथा दुःखमुत्पादयन्ति देहिनाम् ॥११७॥

यथोपपत्तिश्च्यवनं देवानां सम्प्रजायते ।
कर्मवायुसमुद्भ्रान्तं प्रयोगेण[8] च दुःखितम् ॥ ११८॥

१-	स्वाभ्येति -	क,ख	२-	नानत्राण -	क,ख
३-	यो -	क,ख	४-	नतो -	क,ख
५-	कलामर्घति-	क,ख	६-	स्तदारभ्य -	क,ख
७-	विन्दते -	क,ख	८-	प्रयोगेन -	क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुरुषं नयते मृत्युरवशं सुखवञ्चितम्[1] ।
न मातरो न पितरो न मित्राणि न बान्धवाः ॥११९॥

सहायतां व्रजन्तीयं पुरुषं कालचोदितम् ।
असहायो जनस्त्वायं[2] जनः प्रकृतिवञ्चितः ॥ १२० ॥

मन एव पाशबन्धनम् -

केवलं तु मनः पाशैर्बन्धनैर्बध्यते[3] जनः[3] ।
न जनः स्वजनस्येह त्राता भवति[4] कस्यचित् ॥१२१॥

मृत्युकाले स्वजनोऽपि न त्राता भवति -

मृत्युकाले समुत्पन्ने स्वजनोऽपि यथा जनः ।
यस्त्वं पश्यसि देवानां सुखमेतन्महोदयम् ॥१२२॥

(नै० १७ ब) तत् प्रसह्यमहादेवो मृत्युराजो हरिष्यति ।
त्वरितं याति कन्येदं[5] न च विन्दति काञ्चिदः ॥१२३॥

पश्चात्तु व्यसने प्राप्ते प्रविदन्ति[6] दुःखिताः ।
यदि दुःखाद्भयं त्वरितं[7] यदि मृत्युभयं च यः[8] ॥१२४॥

सौख्यं विनाशान्तं चलञ्च -

धर्मे हि क्रियतां बुद्धिरेव सुखमवाप्स्यथ ।
विनाशान्तं सदा सौख्यमनित्यं सर्वतश्चलम् ॥१२५॥

१-	क,ख पुस्तकयोः नास्ति।		२- गस्त्वायं -	क,ख
३-	पाशैर्नोबध्यते जने -	क,ख	४- भविष्यति -	क,ख
५-	यनन्येदं -	क,ख	६- प्रतिविंदंति-	क,ख
७-	त्वरित -	क,ख	८- च: -	क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वदेवकृतं सौख्यं न च विन्दन्ति मोहिताः ।
अभूत्वा च च्यवन्त्येते[1] भूत्वाऽवश्यं[2] हि चञ्चलाः ॥१२६॥

देवत्वं पतनान्तम् -

देवाः पतनभावाय समेतैर्यं व्यवस्थिता ।
प्रमत्ताः कामभोगेषु ये देवाः स्वल्पमानसाः ॥१२७॥

न पश्यन्ति सुरास्तत्र[3] व्यसनान्तं हि जीवितम् ।
यदैव[4] च्यवते देवस्तदैव[5] परणाय सः ॥ १२८ ॥

दिवसं जीवितं किन्तु रात्रिः सुनिश्चितेति श्रेयसे मतिः कर्तव्या -

दिवसान्ते[6] यथा रात्रिरवश्यं प्रतिपद्यते ।
दिवसं जीवितं प्रोक्तं रात्रिः स्यान्मरणात्मकः ॥१२९॥

तस्मात् तदुभयं ज्ञात्वा श्रेयसे क्रियतां मनः ।
तदेतदर्थं नृणां हि स्त्रीरागवशवर्तिनाम्[7] ॥ १३० ॥

तदिदं मृत्युसैन्येन प्रसह्यमवमर्दितम् ।
भावाभावादिभिर्मूढान् वञ्चयित्वा स्त्रियो नरान् ॥१३१॥

मृत्योः दुःखकरत्वप्रतिपादनम् -

(ने० ९८ब) प्रयान्ति मृत्युसमये स्वकर्मफलभोगिनः ।
पद्मोत्पलवनशैलेषु नदीनां निर्झरेषु च ॥१३२॥

१-	भवत्येते -	ख	२-	भूतावश्यं -	क,ख
३-	पश्यन्तीव्र-	क,ख	४-	यदेव -	क,ख
५-	देवतदेवपरणायशः -	क,ख	६-	दिवाशाते-	क,
७-	स्त्रीरागवशा-	क,ख			

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मरणस्य निश्चितत्वाद् धर्मरतिः कर्तव्येति बहुभिः पद्यैः समर्थनम्-

बहुशः क्रीडनं कृत्वा कुपायाऽभिगताः[1] प्रियाः ।
अवश्यम्भावि मरणमवश्यं च वियोगिता ।।१३३।।

तथापि नाम पुरुषा[2] नित्यं रागवशानुगाः ।
सुखितं दुःखितं वापि बालमन्यत्र[3] यौवनम् ।।१३४।।

दुष्कुलीनं[4] कुलीनं वा मृत्युराजोऽवमर्दति ।
सुरूपं वा विरूपं वा बलवन्तं तथाऽबलम् ।।१३५।।

सनाथं नष्टनाथं[5] वा मृत्युराजोऽवमर्दति ।
राजानं वा तथा मृत्युः गृहिणं वा तथा यतिम् ।।१३६।।

क्रूरं वा मृदुकं वापि मृत्युराजोऽवमर्दति ।
निर्धनं वा दरिद्रं[6] वा सगुणं निर्गुणं तथा ।।१३७।।

स्त्रियं वा पुरुषं वापि मृत्युराजोऽवमर्दति ।
प्रवासिनं गृहस्थं वा जले वापि[7] स्थलेस्थितम् ।।१३८।।

स्थितं वा गिरिशृङ्गेषु[8] मृत्युराजोऽवमर्दति ।
जाग्रन्तं[9] तथा सुप्तं मुञ्जानं[10] वा तथा स्थितम् ।।१३९।।

१- कुपायोभिगताः - क०   २- ष्वा -क०, ख०
कूपायोभिगता - ख०   ३- बालमन्यत्र -क०, ख०
४- दुःकुलीनं - ख०   ५- नाथनष्टनाथं -क०, ख०
६- निधमुदरिद्रं - क०   ७- जलेवास्थले पिवा स्थितं-क०, ख०
निधनमदरिद्रं - ख०   ८- शृङ्गेषु - क०, ख०
९- जाग्रमाणं - क०, ख०   १०-मुञ्जमानं - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमाथी सर्वलोकस्य मृत्युराजोऽवमर्दति ।
(नै० ९८ ब) भूमिस्थं[1] वा विमानस्थं[2] विदेशस्थं वा[3] तथागृहे ।।१४०।।

कृपणः कालचक्रोऽयं मृत्युराजोऽवमर्दति ।
भाग्यवन्तं तथा धन्यं निस्त्रिंशं चैव[4]धार्मिकम्[5] ।।१४१।।

रोगिणं स्वस्थदेहं वा मृत्युराजोऽवमर्दति ।
चण्डं सुशीलिनं चापि कदर्यं दानिनं[6] तथा ।। १४२।।

प्रमत्तमप्रमत्तं वा मृत्युराजोऽवमर्दति ।
नारकेयं तथा प्रेतं तिर्यञ्च मनुजं[7] तथा ।।१४३।।

अनिवृत्तबलोत्साहो मृत्युराजोऽवमर्दति[8] ।
कामधातौ च ये देवा रूपधातौ च ये स्थिताः ।।१४४।।

तान् सर्वान् हि प्रतिबलान् मृत्युराजोऽवमर्दति ।
आरूप्येषु[9] च ये देवाः समापत्तिनिवेशकाः[10] ।।१४५।।

तान् सर्वान् हि वै[11] देवान्[11] मृत्युराजोऽवमर्दति ।
यद् जातं संस्कृतं किञ्चिद् तद् विनाशान्तमेव हि ।।१४६।।

१- क,ख पुस्तकयोः नास्ति
२- विमानस्थं वा- क,ख
३- क,ख ,, ,,
४- क,ख पुस्तकयोः नास्ति
५- धार्मिकं तथा - क,ख
६- निर्नं - क,ख
७- मनुजे - क,ख
८- मृत्युरामर्दति- क,ख
९- आरूपेषु - क,ख
१०- सेवकाः - क,ख
११- देवानां - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तन्नास्ति[1] संसृष्टं किञ्चिद्यस्य नाशो न विद्यते ।
मृत्योर्बलमिदं[2] ज्ञात्वा कामदोषं च सर्वतः ॥ १४७॥

तृष्णया बन्धनं चापि विरमध्वं भवार्णवात् ।
तदेतद् व्यसनं मत्वा मृत्योरपि बलावहम् ॥ १४८॥

(नै० ६६ अ) सुदान्तं क्रियतां चित्तं येनेदं भ्राम्यते जगत् ।
वनोपवनशैलेभ्यो विमानेभ्यश्च सर्वतः ॥ १४९॥

सर्वदेवाः पतिष्यन्ति[3] कालाग्निविनिपातिताः ।
प्रमादपतितो मूढभूयो विषय विह्वलताः॥ १५०॥

तृष्णापाशेन सम्बद्धा देवाः यास्यन्ति दुर्गतिम् ।
रमणं जीवितं सौख्यं प्रयाति तनुदेहिनाम् ॥ १५१॥

न च विन्दन्ति विबुधा[4] आत्यन्धा इव सत्पथम् ।
जलबुद्बुदसङ्काशं जीवितं सर्वदेहिनाम् ॥ १५२॥

नदीतरङ्गचपलं यौवनं व्यतिवर्तते ।
अनित्या[5] हि[6] स्फटादोहाप्रदुःखास्तुषिताः सुराः ॥ १५३॥

रागस्य हेयत्व प्रतिपादनम् -

निवार्यत्यवशो[7] दीनो[7] दीपः स्नेहक्षयादिव।
कर्मदायपरिदीप्तो सादकारी महाबलः॥ १५५॥

१- नंनष्टं - क,ख २- मृत्योर्बलमिदं- क,ख
३- पतिष्यंति- क,ख ४- विबुधा - क,ख
५- अनित्यता- क,ख ६- क,ख पुस्तकयोः नास्ति ।
७- निवार्यत्यवशादीनां- क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मचक्रो भवत्येष निनातो[1] स्यान्न बन्धन: ।
विचित्रविषयारम्या अनेकसुखमण्डिता: ।। १५६।।

कालवशात्सर्वस्य पतनं निश्चितम् -

सुखिता: पतन्ति विवशा: कालस्य वशमागता: ।
कालस्य वशमापन्ना यथा रोहन्ति पादपा: ।। १५७ ।।

(नै० १९ ब) ते पुन: कालपाशाद्य भवन्ति विगतात्विष: ।
यथा कालं समावद्य भवन्ति सुखिता: सुरा: ।।१५८।।

पुनस्तमेव[2] संभूत्य पतन्ति विवशा हि ते ।
कर्मकालं समासाद्य[3] लोकोऽयं परिवर्तते ।। १५९।।

कालवशात् सुखाद् दु:खमभ्युपगच्छति -

सुखितो दु:खितो भवति[4] कालस्य वशमागत: ।
यद्वृत्तं[5] प्राक्शुभं कर्म तच्च दुष्टफलोदयम् ।।१६०।।

तदिदं भुज्यते स्वर्गे हीयते च तत: पुन: ।
सहेतुकस्य सर्वस्य प्राणिकस्य विशेषत: ।।१६१।।

अनित्यतापरामर्शो[6] नाशो भवति सर्वत: ।
ये भावा: संस्कृता नित्या: सर्वे ते विप्रलोभिन: ।।१६२।।

विप्रलोभ्य जनं याति धर्मतेयं व्यवस्थिता ।
शीघ्रगोता यथा नद्यस्तथा सौख्यं शरीरिणाम् ।।१६३।।

१-	रम्या	- क,ख	२-	पुनस्तमेवं	- क,ख
३-	समासाद्य	- क	४-	रैवति	- क,ख
५-	सव	- क,ख	६-	अनित्याकारामर्शो	- क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दारिद्र्यं चाधिकं सर्वं न च विन्दन्ति वाञ्छिता: ।
जरा व्याधिश्च मृत्युश्च विपत्ति: कर्मसंक्षये ।। १६४।।

भवन्त्येतानि देवानां नित्यानां कामचारिणाम्[1] ।
नासुखं भवत्येव न सौख्यं त्रिषु धातुषु ।। १६५।।

न च[2] विन्दन्ति विवशा देवा: कामेन मोहिता: ।
वर्षधारा यथाऽऽकाशे दु:खा[3] भवति सर्वत: ।। १६६।।

(नं० २०ख) तथा सौख्यमिदं सर्वं वर्षधाराभिर्यं[4] सदा ।
वायुना पांसवो यान्ति अन्योन्यपरिघट्टिता:[5] ।।१६७।।

भ्राम्यते गमनेऽवशास्तथा[6] स्तेषां शरीरिणाम् ।
सुचिरमपि सौख्यं नित्यता नास्ति देहिनाम् ।।१६८।।

सर्वस्य विनाशित्वम् -

अचिन्त्यार्थं सौख्यमिदं न च विन्दन्ति वाञ्छिता: ।
वातेरितं[7] तु यत्[7] सौख्यं[7] विनाशान्तं भविष्यति ।। १६९।।

सुखस्य दु:खमिश्रितत्वम् -

विनाशं नैव बुध्यन्ति कामिनाश्चक्षुरन्विता: ।
दु:खमिश्रं सुखमिदं प्रच्छन्नमिव[8] विद्यते ।। १७०।।

१- कामानुचारिणां - क,ख २- क,ख पुस्तकयो: नास्ति ।
३- दु:खिता - क,ख ४- यं - क,ख
५- तदन्योन्यपरिघट्टिता: क,ख ६- गमनेऽवशास्तथा - क,ख
७- यद्वातेरितं - क,ख ८- प्रच्छन्नमेव - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पद्मनाशापरिच्छिन्नो विशीर्णो[1] यथा घटः ।
जीवनं विनाशिष्यं[2] मरणान्तं[3] हि तत् तथा ।।१७१।।

तथा सौख्यमिदं सर्वं तस्मात्[4] तत्[4] परिवर्जयेत् ।
आदौ[5] मध्ये[5] तथा चान्ते[6] नरकाय भविष्यति ।।१७२।।

उत्पादस्थितिभङ्गानि सर्वाणि वस्तूनि -

उत्पादस्थितिभङ्गानि सर्वं संस्कृतमुच्यते ।
सर्वं च संस्कृतं सौख्यं ननु भट्टारमेव तत्।। १७३।।

भट्टारश्च विलासश्च[7] सुव्ययशाणिकं[8] तथा[9] ।
सुखं च जीवितं सर्वं तस्मात् तत् परिवर्जयेत्।।१७४।।

आदौ मध्ये तथा चान्ते श्रेयस्येव[10] मनः सदा ।
(नै० २० ब) सुदान्तः[11] स शुद्धचित्तश्च[12] मृत्युकाले न सीदति ।।१७५।।

मरणस्यावश्यम्भावित्वम् -

अवश्यम्भावि मरणं[13] प्रियस्य[13] च वियोगिता ।
न च चिन्तयतः[14] काले[15] विनाये विप्रलोभिनः ।।१७६।।

१-	यशः	क,ख	२- मरणांताय -	क,ख
३-	क,ख पुस्तकयोःनास्ति		४- सर्वस्मात् -	क,ख
५-	मादौ मध्येत् -	क,ख	६- नरकान्न -	क,ख
७-	विलासश्च -	क,ख	८- व्ययशाणिकं-	क,ख
९-	तथासुखं -	क,ख	१०-श्रेयस्चारि -	क,ख
११-	सुखांतो -	क,ख	१२- शुद्धमनो -	क,ख
१३-	प्रियस्चानि -	क,ख	१४- चिन्तयतो -	क,ख
१५-	काले -	क,ख		

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जरा मरणचक्रोऽयमविश्राम्य: सुदारुण: ।
पादपान्[1] देवमान् सत्त्वान् न च बुध्यन्त्यबद्गुणा: ।।१७७।।

सर्वस्य नाशस्य च्यवनं प्रकर्षति -

च्यवमानस्य देवस्य विक्लेन्द्रिय चेतस: ।
यद्दु:खं सुखं तस्य नौपम्यमिह विद्यते।।१७८।।

यथा यथा महत् सौख्यं तृष्णानिहतचेतस: ।
तथा तथा महद्दु:खं च्यवमानस्य दु:सहम्।।१७९।।

कृत्वा हि संस्कृतं कर्म न ज्ञात्वा कर्मण[2]: स्थिति: ।
मृत्युकाले समुत्पन्ने पश्चात्तापेन दह्यते ।। १८०।।

मृत्यो: पूर्वमेव स्वहितपाथेयम् -

यावन्नाप्नोति मरणं यावच्च धनसम्पद: ।
तावत् स्वहितपाथे[3]यमेका मार्ग: सुखावह: ।। १८१।।

च्यवनं देवलोकेषु मरणं नरभूमिषु ।
विदित्वा[4] क: पुमान्[5] वास्थां[5] कुर्यात्सोपद्रवे भवे।।१८२।।

सर्वेषां नाशोऽवश्यम्भावी -

तैलवर्तिप्रणाशे[6]न दीपनाशो यथा ध्रुवम् ।
कर्मक्रिया तथा कस्य विनिपात: सुरालयात् ।
(नै० २१ ब) भिन्नाशो[7] यथाऽवश्यं चित्तनाशो[8] ध्रुवं स्थित: ।।१८३।।

१- पादप - क,ख २- कर्मणां - क,ख
३- मा:थेयं - क,ख ४- विदीत्वा- क
५- पुमान्नास्था: क,ख ६- तैलवर्तिप्रणाशेयं- क,ख
७- भिन्नाशाद् क,ख ८- क चित्तनाशं - ख,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्मनाशाद्यथा[1] सौख्यमवश्यं विनिपद्यते ।
क्षीणपुण्याः निपत्यन्ते देवाः सर्वे[2] सुरालयात्॥९८४॥

अनित्यत्वान्मृत्युरेव सर्वं पिबति -

अनित्यतेयं सर्वेषां सत्त्वानां[3] विनिपातिका ।
मृत्युः पिबति भूतानि जरा पिबति यौवनम् ॥९८५॥

व्याधिः पिबति चारोग्यं न च लोकोऽवबुध्यते ।
उपपन्नाः सुबहुशः प्रतीतास्वाप्यनेकशः ॥ ९८६॥

जायते जीर्यते[4] चायं[4] च्यवते चोपपद्यते ।
न क्षणोऽस्ति मुहूर्तो वा परिवर्तस्तथापि वा[5]॥९८७॥

यत्र मृत्युर्विलम्बेन[6] न च लोकोऽवबुध्यते ।
उपपन्नास्तु बहुशः प्रतीतास्वाप्यनेकशः॥९८८॥

कालवशात्प्राप्तिरिति सर्वस्यानित्यत्वम् -

यत्र मृत्युविलम्बः[7] स्यान्न च लोकोऽवबुध्यते ।
अनित्यं जीवितं सर्वं न विलम्ब च यौवनम्॥९८९॥

सर्वभूतान्यनित्यानि न च लोकोऽवबुध्यते ।
अन्ते क्रमेण नश्यन्ति भावाः क्षणविलम्बिनः॥९९०॥

सम्बद्धाः कर्मसूत्रेण न च लोकोऽवबुध्यते ।
(नै०२१ -ब) देवकोटिसहस्राणि जनोपवनसेविनाम् ॥ ९९१॥

१- कर्मक्षनाशाद्यथा - क,ख   २- सर्वो - क,ख

३- सत्त्वानं - क,ख   ४- जीयतेचायं- क,ख

५- चिराद्वृत्तोऽयं श्लोकः क,खपुस्तकयोः

६- मृत्युविलम्बः स्यान्न-क,ख   ७- ०मृत्युर्विलम्बयान्न-क,ख

८- अन्ते - क,ख

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निमीलितानि[1] कालेन न च लोकोऽवबुध्यते ।
षट्कामावचरा देवाः प्रमत्ताः भोगतृष्णया ।।१६२।।

सर्वस्य विलयोऽवश्यम्भावी -

यास्यन्ति विलयं सर्वे न च लोकोऽवबुध्यते[2] ।
फेन बुद्बुदसङ्काशं स्वप्नद्रव्योपमं सुखम्[3] ।।१६३।।

कायं प्रयाति शीघ्रं च न च लोकोऽवबुध्यते ।
सर्वस्य[4] सर्वथा सर्वो विनाशो नियतो भवे ।।१६४।।

न च बालस्य संसारान्निर्वेदमुपपद्यते ।
न च सर्वः सर्वथा सर्वं सर्वोपायैः प्रयत्नतः ।।१६५।।

मृत्योः सुदारुणत्वम् -

संज्ञाता भवने[5] प्राप्ते मृत्युकाले सुदारुणे ।
व्युच्छेदः सर्वसौख्यानां दुःखानामाकरो महान् ।।१६६।।

मृत्युस्वरूप निरूपणम् -

विश्लेषः सर्वबन्धानां मृत्युरित्यभिधीयते ।
भयोपनेता भूतानां दुःखानामुदधिः समः ।। १६७।।

व्यामोहकर्ता[6] बुद्धीनां मृत्युरित्यभिधीयते ।
सन्धेता जीविताशानामिन्द्रियाणां च नाशकः ।।१६८।।

१- निर्मिलितानि क,ख २- ० बुध्यते - क,ख
३- स्वप्नद्रव्यप्रतिमसुखम्- क,ख ४- सर्वः सर्वस्य सर्वभूर्विनाशि-क,ख
५- भवनं - क,ख ६- बुद्धिना - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अधृष्यः सर्वभूतानां मृत्युरित्यभिधीयते ।
अधृष्यः[1] सर्वभूतानामजेयः सर्वकर्मणाम् ॥ १९९॥

विनाशः सर्वसत्त्वानां मृत्युरित्यभिधीयते ।
अवश्यम्भावि सत्त्वानामन्तकं सर्वदेहिनाम् ॥२००॥

(नै०२२ ख) निकायभागनाशोऽयं मृत्युरित्यभिधीयते ।
सदेवयक्षगन्धर्वं पिशाचोरगराक्षसम् ॥ २०१॥

कालचक्रो विनाशोऽयं[3] मृत्युरित्यभिधीयते[2] ।
अधर्मी प्रमाथी च वह्निवत् सर्वदेहिनाम् ॥२०२॥

क्रूरश्चाविनिवर्त्तश्च मृत्युरित्यभिधीयते[4] ।
स्कन्ध[5]ायतन[6]नाशश्च आत्मप्रत्याय[7] चेतसः ॥ २०३॥

कालधर्मो महावेगो मृत्युरित्यभिधीयते ।
स एव धावते[8] शीघ्रं विनिपातयदेहिनाम् ॥२०४॥

श्रेयसे मतिः करणीया, न तु प्रमादे -

श्रेयसे क्रियते यत्नो[9] मा प्रमादे मनः कृथाः ।
यथा हि शीघ्रगमनं[10] पक्षिणां[11] पवनस्य वा ॥२०५॥

१- अमृष्यः - क,ख   २- मृत्युरित्यभिधियते- क
३- प्रमाथि - ख   ४- मृत्युरित्यभिधियते- ख
५- रूप,वेदना,विज्ञान संज्ञा संस्काराः पंचस्कन्धाः ।
६- पंचेन्द्रियाणि शब्दाद्या विषयाः पंचमानसम् ।
धर्मायतनमेतानि द्वादशायतनानि च ॥(षड्दर्शनसमुच्चय)
७- आयुरुच्छ्राय - क,ख   ८- धावे - क
९- यत्नो - क,ख   १०-क,ख पुस्तकयोः नास्ति।
११- गमनं च - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गतं यौवनं नायाति -

तथा शीघ्रतरं याति जीवितं सर्वदेहिनाम् ।
गतो निवर्तते वायुर्निवर्तन्ते च पक्षिण: ।।२०६।।

जीवितं यन्निरुद्धं तु तस्य नागमनं पुन: ।
द्रुतं धावन्ति कर्माणि द्रुतमभ्येति चान्तक: ।।२०७।।

अवश्यम्भाविविश्लेषणं[१] न च विन्दन्ति देवता ।
अनिवार्यो[२] महावेगश्चतु:सत्यनिर्वहण: ।। २०८।।

अवश्यम्भावि बलवानेष मृत्युरुपैति च ।
भुति[३]प्रमादिनो देवा: सुखेन परिवञ्चिता: ।।२०९।।

सर्वस्य विनाशित्वप्रतिपादनम् -

(नै० २२ ब) न विन्दन्ति महद् दु:खं यदवश्यं भविष्यति ।
संस्कृतस्य हि सर्वस्य समयस्य विशेषत: ।। २१०।।

विनाशो[४] भवति[४] चाशो[५] धर्मोऽयं भवे भवे ।
जरायौवननाशाय प्राणनाशाय चान्तक: ।।२११।।

विपत्तिभूतनाशाय[६] स्थिता[६] वै[७] नाशहेतव: ।
सर्वविधे महाघोरे व्यसने वै[७] महद्भये[८] ।।२१२।।

१- अवश्यंभाविविश्लेषो- क,ख २- अनिवार्यो - कख,
३- अति - ख ४-४- विनाशी भवते - क,ख
५- क,ख पुस्तकयो: नास्ति। ६- विपत्तिभूतिनाशाया- स्थितानि- क,ख
७- क,ख पुस्तकयो: नास्ति।
८- समहद्भये - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादिनो हि यद् देवा:[2] नूनमेते च चेतना:[1] ।
अनागतभयं यो हि पश्यति बुद्धचक्षुषा।। २१३ ।।

स पण्डित इति ज्ञेयो विपरीतस्तु बालिशः ।
विमूढमनसः सर्वे पञ्चिताः स्वेन चेतसा।।२१४।।

स्नेहक्षये दीपनाश इव कर्मक्षये सुखस्य नाशः -

कर्मक्षये[3] तु नश्यन्ति[3] दीपास्नेहवशादिव ।
अनेकविषयाणां च इदं सौख्यमनुत्तमम्।। २१५।।

भुक्त्वा कर्मक्षयो[4][4] भूतविनिपातो भविष्यति।
जलतरङ्गचपलं जीवितं याति देहिनाम्।।२१६।।

अनित्यत्वानवगमादधर्मरतिः -

न च बुद्बुद निःसारमवगच्छति बालिशः।
फेनराशिश्चिरं तिष्ठेद्[5] न उपायैः कतिभिर्नु[5][6] ।।२१७।।

न तु देवाश्चिरं तिष्ठत्यनित्यो[6] भावनिर्मितः[6]।
दृश्यते भूरियं सर्वा मनुजैः कलशादिभिः।। २१८।।

लोभवशादेव मृत्योरुपेक्षा -

(ने० २३७) न च संदृश्यते[7] मृत्युरभिशक्तैरपण्डितैः ।[8]
क्षणे क्षणे विवर्धन्ते लोभाशामोहिते जने ।। २१९।।

१- चेतसः स — २- पश्यते - क,ख
३- कर्मक्षयेषु नश्यन्ति - क,ख — ४- कर्मक्षयोद्भूतो- क,ख
५- तिष्ठत्यविद्यायुतमा हतः क,ख — ६- तिष्ठेत्यनित्योभावनिर्मितः क,ख
७- संदृश्यते - क — ८- लोभाशामोहिते- क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यौवनस्य नाशो निश्चितः -

न च विन्दन्ति संसारा धावमानाः क्षणे क्षणे ।
जरादण्डोऽप्यभ्येति यौवनान्तकरो नृणाम्।। २२०।।

व्याधेरारोग्यदायकत्वम् -

आरोग्यस्य[1] विनाशाय व्याधिदण्डोऽप्युपागतः ।
दण्डद्वयमिदं घोरं ह्युग्रं सुखनाशकम् ।। २२१।।

अभ्येति न च मूढोऽयं लोकं पश्यति चाक्षिः ।
परस्परं प्रलोभाच्च स्वजनं स्नेहवंचकम्[2]।।२२२।।

मोहवशाः मृत्युं वियोगं च जानन्नपि नावगच्छति -

गच्छत्यन्योन्यसंश्लिष्टो[3] मोहवशे जने जनः ।
पुत्रपौत्रप्रपौत्राणां[4] वशगाश्चापि ये नराः ।।२२३।।

कर्मकन्धस्य दुःखावहत्वप्रतिपादनम् -

सर्वैतेन भविष्यन्ति त्वं तु संगेन बाध्यसे[5] ।
जीवितान्तकः शत्रुर्विशङ्को[6] महाबलः ।।२२४।।

सोऽविलम्बी[7] महावेगो मृत्युरेषोऽभ्युपैति च ।
बलाबलविधिज्ञैश्च[8]: कर्मकन्धैर्निदर्शितः[9] ।।२२५।।

१- शक्यनाशाय - क,ख २- स्नेहवासं - क,ख
३- संश्लिष्टो - क,ख ४- पुत्रपौत्रप्रपौत्रं- क,ख
५- बाध्यते - क,ख ६- विशङ्का - क,ख
७- सोविलम्ब - ख ८- बलाबलविधिज्ञेय: क,ख
९- कर्मकन्धैर्निदर्शितः - क,ख

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देवादीनां सर्वेषां दायो भवति -

देवनागा:[1] सगन्धर्वा[1] पिशाचोरगराक्षसा: ।
न शक्ताश्च्यवने स्थातुं[2] बलं तस्य तथागतम्॥२२६॥

तत्त्वदर्शका: पापदुर्गतिं नाधिगच्छन्ति -

यथा यथाविधिर्ज्ञेय: कर्मणा[3] तत्त्वदर्शक: ।
(ने० २३ ब) अलिप्त: पापकर्मैर्न च गच्छति दुर्गतिम्॥२२७॥

:०० इति अनित्यतावर्ग: पञ्चम: ००:

१- देवनागगन्धर्वा: - क,ख
२- स्थातुं - क,ख
३- कर्मणो - क,ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(६) अप्रमादवर्गः षष्ठः

प्रमादरतस्य मोक्षो न भवति -

यः प्रमादरतो जन्तुर्नासौ मोक्षाय कल्पते ।
प्रमादविषमूढस्य निर्वाणं दूरमेव तत् ॥१॥

प्रमादस्य उ[illegible]त्वम् -

न प्रमादेषु कुर्वीत[1] प्रमादः शत्रुरुत्तमः ।
प्रमादपरमा देवाः पतन्ति नरके पुनः ॥२॥

प्रमादस्य गाढविषत्वम् -

स्वभावतामिमां ज्ञात्वा धर्माणामुदयव्ययम्[2] ।
न प्रमादे मनः कार्यं प्रमादविषमुत्तमम् ॥३॥

अप्रमादस्यामृतपदत्वम् प्रमादस्य मृत्युपदत्वम् -

अप्रमादोऽमृतपदं प्रमादो[3] मृत्युनः पदम् ।
अप्रमत्ता न म्रियन्ते[4] प्रमत्तास्तु[5] सदामृता[6] ॥४॥

प्रमादोन्मादिताः दुःखं प्राप्नुवन्ति -

यथा विषं तथा वह्निः प्रमादः प्राणिनां तथा ।
प्रमादोन्मादिताः सत्वाः दुःखाद् दुःखं प्रयान्ति ते॥५॥

१- वर्तेत- क०,
वसेत - ख०

२- ०मुदयव्ययं - ख

३- प्रमादः - क० ख०,

४- म्रियते- क०, ख०

५- सदामृता- क०, ख०,

६- तु० - अप्पमादो अमतपदं पमादो मच्चुनो पदं ।
अप्पमत्ता न मीयन्ति ये पमत्ता यथा मता॥ (धम्मपद-२।१)

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्रमत्ताः परमां शान्तिमधिगच्छन्ति -

अप्रमत्ताः सदा मर्त्याः सर्वं प्रक्रमणं[1] कृताः ।
प्रयान्ति परमां शान्तिं प्रमादो यत्र नास्ति हि॥६॥

धर्मविमूढस्य स्वर्गो न भवति -

यः प्रमादेरतो जन्तुर्न शुभान्यनुचेष्टते ।
तस्य धर्मविमूढस्य कुतः[2] स्वर्गो भविष्यति॥७॥

अप्रमत्ता न म्रियन्ते -

प्रमादं वर्जयेद् यस्मात् प्रमादं विषमुत्तमम् ।
अप्रमत्ता न म्रियन्ते प्रमत्तास्तु सदा मृताः॥८॥

प्रमादहीन एव सौभाग्यं प्राप्नोति -

(ने०२४ ख०) सौभाग्यं प्राप्य यो मर्त्यः प्रमादेषु[3] न वर्तते ।
न पण्डित इति ख्यातो विपरीतस्तु नान्यथा ॥९॥

प्रमादस्य हर्षयुक्तः कालो न भवति -

न प्रमादस्य कालो हि हर्षस्य न कथञ्चन ।
व्यामोहजननाच्चैतौ मृत्युकाले महाबले ॥ १० ॥

प्रमादाग्नेर्भूय एव हर्षः -

हर्षो भूयः प्रमादोऽग्निर्देवान् दहति नैकशः[4] ।
विषयैर्मोहिता मूढा न च विन्दन्त्यवद्गुणः॥११॥

१- प्राक्रम - क,ख २- भूयः ख

३- विपरीतस्तु- ख ४- नैकशः ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादस्य विषवत्परित्यागः समुचितः -

अशुद्धिजन्यानि कुर्वन्ति संस्कारणि च देहिनाम् ।
यथा हि विषयैर्मूढा नाचरन्ति यथाविधः ।। २२।।

तस्मात् प्रमादं विषवत् त्यजन्ति मनीषिणः ।
सुखं न दृश्यते पुंसं प्रमादोन्मत्तबुद्धिभिः ।। २३ ।।

प्रमादवशात् नरकं यान्ति -

यथा प्रमादोत्कृष्टाः प्रयान्ति नरकं पुनः ।
कृते प्राप्तेऽप्रमादोऽयं पश्चात् तप्यते व्यग्र।। २४ ।।

प्रमादोऽनर्थकरः -

सर्वानर्थकरो दुष्टः प्रमादः पण्डितैः नरैः ।
तथा च कुशलं प्राप्तो यः प्रमादं न सेवते ।।२५ ।।

प्रमादकरं दुःखमेव -

दुःखं यस्य मेवेदिष्टं स प्रमादं निषेवताम् ।
न प्रमादपरः कश्चित् कदाचित् सुखमाप्नुयात्।।२६।।

प्रमादशून्याः अच्युतं पदं प्राप्नुवन्ति -

प्रमादविरताः सन्तो गच्छन्ति पदमच्युतम् ।
ना प्रमादपरः कश्चित् नरके दुःखमन्वयेत् ।।२७।।

१-१ ०मोहितानुसंगा० - क०,ख०, २- क०ख० कुतस्त्यो: नास्ति ।
२-२ ०प्रमादोत - क०,ख०, ४- निसेवतु:- क०,ख०
५- संत - क०,ख०, ६- ० नय - ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मन्दबुद्धयोऽपि प्रमादवन्तो भवन्ति तदा मनुजानाञ्च भेदो नास्ति -

(नै० २६ ब) यदि[1] देवाः सततं[2] रमन्ते[3] मन्दमेधसः ।
तिरश्चां हि सुराणां च विभेदो नैव विद्यते ॥१८॥

प्रमादवशात् देवलोकाद् पतन्ति -

प्रत्येकं कर्मबीजत्वं प्रमादपरमाः सुराः ।
नावगच्छन्ति पतनं देवलोकाद् भविष्यति ॥१९॥

प्रमादरतस्य च दुःखं सन्निहितं तिष्ठति -

सन्निकृष्टं तदा दुःखं पतनं वा भविष्यति ।
देवलोकोदरा देवा[4] यथा स्यात्[4] सुखात्मनः ॥२०॥

देवलोकं समासाद्यापि प्रमादवशाच्च्यवनं निश्चितम् -

देवलोकं समासाद्य यः प्रमादेषु रमते ।
स क्षीणपुण्यकर्मान्तं च्यवनान्ते विबुध्यते ॥२१॥

सुराणामपि प्रमादवशात् निश्चलतयास्खलनम् -

प्रमादपरा मा[5] भवत[6] प्रमादो नार्हति[7] सुरान्[8] ।
प्रमाददर्शिविज्ञाः च्यवन्ते निश्चलालयात् ॥ २२॥

१- ता यदि - व०, ख०, २- सतति - व०, ख०,
३- त्योरमते - व०, ख०, ४-४ देवशास्यथ- व०, ख०,
५- व०, ख० पुस्तकयोः नास्ति । ६- भवतः - व०, ख०,
७- ० नार्हन्ते - व०, ख० ८- सुराः - व०, ख०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादवशः पुरुषः नाश्नोति -

ह्रियते पुरुषः[1] सर्वः प्रमादेन[2] विमोहितः ।
स पश्चाद् विन्दते तस्मिन् प्रत्यादेशेन रुध्यते ॥२३॥

मूढा एव प्रमादवशगाः भवन्ति -

दोषादिभवाभिर्ष्यां[3] भूमिः प्रमादावृत्ताद्बलात्[4] ।
विचरन्ति सदा मूढाः पुराः सत्कृत्यपीडिताः ॥२४॥

प्रमादरतान्न विरमेत् -

अन्तता विषमास्ताश्च[5] प्रमादाः कामहेतवः ।
न तेषां विरमेद् धीरो यस्मात् स्वप्नोपमा स्थिति[*] ॥२५॥

कामः नरकस्य हेतुरिति -

न स्वप्नो नरके हेतुः कामाः स्वप्नस्य[6] हेतवः ।
(नै०२५ ख०) तस्मात् कामानिमं[7] मुक्त्वा नित्यं सुचरितं चरेत् ॥२६॥

अप्रमादात्सर्वं प्राप्तुं शक्नोति -

यज्ञावाप्तं पदं कृत्स्नं[8] सुरैः कामविमोहितैः[9] ।
तत् प्राप्यते पदं धीरैरप्रमादपरैर्नरैः[10] ॥ २७ ॥

प्रमादमूलक एव संसारः

प्रमादमूलसंसारो देवानामापायस्तथा[11] ।
ये प्रमादविनिर्मुक्तास्ते मग्ना भवसङ्कटे ॥२८॥

१- रुध्यते - क०,ख०, २- प्रमादेन - ख०,
३- दोषादिभवाद्यं क०,ख०, ४- ०बलात् - क०,ख०
५- ०स्तिन्न - ख०, ६- स्वप्नस्तु - क०,ख०
७- कामैमिमं - क०,ख०, ८- कृत्स्नं - क०,ख०
९- ०वैभविः - क०,ख०, १०- ०परैर्नरः - क०,ख०
११- ०नामतस्तथा - क०,ख०,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नटवदेव शुभाशुभकर्मवद्धाः देहिनः नृत्यन्ति -

शुभाशुभेन बद्धा हि कर्मणात्र सर्वदेहिनः ।
(नै० २५ क०) नटवन्नृत्यन्त्यैते[1] गत्यां गत्यां पृथक् पृथक् ॥३५॥

संसारः कर्मनाटकसम्बद्धः -

कर्मनाटकसम्बद्धः[2] संसारो भ्रमते सदा ।
न तत्र विरमेद्धीमाननित्या कर्मणां गतिः ॥३६॥

प्रमादः विषवदेव हानिकरः -

सर्वपापानि[3] विषवत्[4] प्रमादः परिवर्जितात् ।
प्रमादेन तु ये[5] मुक्तास्ते तरन्ति[6] भवार्णवात्[6] ॥३७॥

प्रमादपतितः कदापि सुखी न भवति -

प्रमादपतितो दोषो[7] कदाचिदपि जायते ।
न प्रमादप्रपतितः कदा[8]पि सुखवान् भवेत् ॥३८॥

प्रमादः परमोदोषः -

प्रमादपरमो दोषः कदाचित् सर्वकर्मसु ।
न रात्रौ[9] न दिवा तस्य शुभं भवति कर्हिचित्[10] ॥३९॥

१- ०नात्यन्त्यैते - क०, ख० २- ०सम्बद्धोयं - क०, ख०
३- ०पापेन - क०, ख० ४- विषवत् - क०, ख०
५- येमुक्ता - ख० ६- निःस्तरन्ति भवार्णवात्- ख०
७- दोषः - क०, ख० भवार्णवात् - ख०
८- कदाचिदपि - क०, ख० ९- क० पुस्तके नास्ति ।
१०- सर्वदा - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वं सुखं प्रमादेन नश्यति -

यत् सुखं लौकिकं किञ्चिद् यच्च लोकोत्तरं मतम् ।
नश्यते तत् प्रमादेन तस्मात् तत् परिवर्जयेत्।।४०।।

अप्रमादोऽमृतपदम् -

अप्रमादोऽमृतपदं[1] प्रमादो मृत्युनः पदम् ।
अप्रमादेन[2] ते देवाः[2] देवानां श्रेष्ठतां गताः[3]।।४१।।

प्रमादमूलः संसारोऽप्रमादश्च सद्गतिः -

प्रमादमूलः संसारः अप्रमादश्च सद्गतिः[4] ।
तस्मात् प्रमादविरतः सुखी भवति सर्वदा।।४२।।

दुःखाद् बिभेति चेत् प्रमादं परित्यजेत् -

इच्छते[5] यत्सुखं नित्यं यश्च दुःखाद् बिभेति[6] वै ।
स[7] हि प्रमादाद् विरमेत् प्रमादो विषवन्नृणाम्।।४३।।

प्रमादिनां प्रपातः सुनिश्चितः -

(जै० २६ उ०) प्रमादनिद्राविह्वला[8] प्रमादविषमोहिताः ।
प्रपातं हि प्रकुर्वन्ते जनाः शुष्क कृतात्मकाः।।४४।।

१- अप्रमादो - क० ख० २-२ मघेवन - क०, ख०
३- तु० अप्पमादेन मघवा देवानं सेट्ठतं गतो ।
अप्पमादं पसंसन्ति प्रमादो गरहितो सदा।। (धम्मपद-२।१०)
४- गतिः - क०, ख० ५- इच्छते - क०, ख०
६- दुःखाद्बिभेति- क०, ख० ७- स प्रमादाद्विरमेत- क०, ख०
८- ०विह्वलाः - क०, ख० ९- शुष्क - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्रमादः श्रेयस्करः -

अप्रमादः परं श्रेयो न प्रमादः कदाचन ।
अप्रमादेन सुखिनः प्रमादेन सुदुःखिताः[1] ॥४५॥

प्रमादमूढाः नरकं व्रजन्ति -

प्रमादमूढा हि[2] नरा[2] मूर्खा केन मोहिताः ।
भिक्षु प्रमादविमूढास्ते चरन्ति नरकं पुनः ॥४६॥

प्रमादवशादेव तृष्णया अनेकशः भ्रमति -

प्रमाद वागुराबद्धा[3] विषयार्णवसंस्थिताः ।
तृष्णाविषयसम्बद्धा[4] देवः भ्रमन्त्यनेकशः[5] ॥४७॥

प्रमादविवशः न मुच्यते -

आत्मनात्मस्य देहस्य तत् त्राणं जायते सुखम् ।
न विन्दन्ति विवशाः प्रमादावृत चेतसः ॥४८॥

प्रमादवशः कामवशादतृप्त एव तिष्ठति -

प्रमादाद् भ्रान्तमनसो[6] नित्यं विषयतत्पराः ।
अतृप्ताः कामभोगेषु सुखे सुखिता इव ॥४९॥

१-	दुःखिता - पा०,अ०	२-२	भ्रमुरा - पा०,अ०
३-	वागुर्बद्धा - पा०,अ०	४-	तृष्णाविनतसम्बद्धा-पा०
५-	भ्रिमन्त्यनेकशः - अ०		तृष्णानिगत - अ०
६-	भ्रान्ते मनसः - पा०,अ०	७-	०परेण - पा०,अ०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जीवनं विनाशान्तम् -

कामानलेन सन्दग्धाः विप्रमादेन मोहिताः ।
न विन्दन्ति वलं, सर्वं विनाशान्तं हि जीवितम्।।८०।।

कामानलसन्दग्धाः प्रमादेन विमोहिता जायन्ते -

अनेकानि सहस्राणि पुराणां नियुतानि च ।
कामानलेन संदग्धाः प्रमादेन विमोहिताः ।।८१।।

प्रमादविमोहिताः व्यसने पतन्ति -

ह्रियते पुरुषः सर्वः प्रमादेन विमोहितः ।
(नै०२६ ख०) स पश्चाद् व्यसने प्राप्ते बुध्यते कस्य तत्फलम्।।८२।।

प्रमादस्सर्वदा दहत्येव -

विषवत् प्राणहृद्[१] दृष्टः प्रमादस्तत्त्वदर्शिभिः ।
अग्निवद् दह्यते नित्यं शस्त्रवच्च[२] निकृन्तति।। ८३।।

मित्रवदादावन्ते च शत्रुवदेव प्रमादः -

मित्रवद् दृश्यते पूर्वं पश्चाद् भवति शत्रुवत् ।
वञ्चकः सर्वदेवानां प्रमादः सम्प्रवर्तते ।। ८४।।

प्रमादः सर्वान्नर्थान् करोति -

देवासुरमनुष्याणां नागानां च विशेषतः ।
प्रमादः कारणं[३] दृष्टं सर्वानर्थान् करोति[४] सः।।८५।।

१- प्राणहृभा - ख०, ग०   २- शस्त्रवच्च - ग०
३- कारणां - ख०   ४- करोहि - ख०, ग०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादयुक्त: कल्याणवर्जित: नरकं गच्छति -

यः प्रमादयुतो नित्यं नासौ कल्याणमर्हति ।
कल्याणवर्जित: पुरुषो नरकानुपकर्षति ।।५६।।

प्रमादिन: मैथुने भोजने सदारतास्तिष्ठन्ति -

त्रिविधा कृतयस्तिस्रः[१] प्रमादपारवञ्चिता: ।
मैथुने भोजने चैव योगानां बुद्धि: सदारता: ।।५७।।

प्रमादिनकर्म पतनाय जायते -

यथा[२] सुचारितं कर्म शान्तीभूतं[३] दिवौकसाम् ।
भविष्यति तदाभूय: क्व यास्यन्ति प्रमादिन: ।।५८।।

प्रमादिनां विनिपात: पदे पदे -

प्रमादचारिणां[४] दुष्टा:[४] कर्म वायुभिराहता: ।
पतन्ति वृन्तवद् देवा गत्वा गत्वा पृथक् पृथक् ।।५९।।

सुराणामपि संवेगाभावत: शोको जायते -

शक्रो नहुषश्चैव दिवि[६] जाता दिवौकस: ।
न च संवेगजातो हृदि शोक: प्रजायते ।।६०।।

देवा: अपि प्रमादजन्यमोहमवाप्य पतन्ति -

(ने० २७ ३०) प्रमादपूर्णं पीत्वा मोहासवं दिवौकस:[८] ।
पतन्ति नरके ताम्रे[७] वह्निना परिवारितम् ।।६१।।

१- ०कृतयस्तिस्र्या:- क०,ख०, २- सदा- क०,ख०
३- शान्ति - ख०, ४-४ प्रमादेचारिणादुष्टा: -क०,ख०
५- गत्वो - क०,ख० ६- कृ कृ पुनी - क०ख०
७- तिम्रं - ख० ८- परिचारितं - क०ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुदुर्लभं मानुषं जन्म प्राप्यापि यदि सुकर्म न कुर्वीत तदा वृथैव तो जन्म-

सुलब्धं मानुषं जन्म ये लब्ध्वा अप्रमादिनः[1] ।
कुर्वन्ति सुकृतं कर्म देवलोकाभिगामिनः ।।६२।।

दुर्लभं मानुषं कर्म लब्ध्वापि ये प्रमादिनः ।
ते प्रमादात् परिभ्रान्ताः[2] पतन्ति नरके नराः ।।६३।।

मृत्युसमये प्रमादी तपत्येव -

यः प्रमादरतस्तत्त्वेन कृपयां[3] परिवर्तते ।
स पश्चान्मृत्युसमये तप्यते स्वेन चेतसा ।।६४।।

प्रमादो विनिवाग्निं दहति -

न तथा दह्यते वह्निना च शस्त्रैं विकृन्तति ।
यथेन्द्रियप्रमुखमूलः प्रमादो दह्यते तथा[4] ।। ६५।।

प्रमादसेविनो दूरतः परिहर्तव्याः -

सुरूपं तथा दुःखं मित्ररूपं तथा रिपुः ।
प्रमादसेविनो[5] भवति तस्मात्तं परिवर्जयेत् ।।६६।।

प्रमादतृष्णा रागवर्धिका जायते -

प्रमादतृष्णयो[6] मित्रो रागस्तदनुवर्धकः ।
त्रय एते रिपवः क्रूष्टा नाशयन्ति सुखं नृणाम् ।।६७।।

१- प्रमादिन - घ०, ङ०   २- ततप्रान्ताः - घ०, ङ०
३-३ ०रतोसत्वोनकृपयो - घ०, ङ०   ४- यथा - घ०, ङ०
५- ०सेविनो - घ०, ङ०   ६- ०तृष्णयो - घ०, ङ०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादरताः यमदूतैः पराकृता भवन्ति -

ये प्रमादरता नित्यं न च धर्मरता बुधाः ।
ते मृत्यु समये प्राप्ते यमदूतैः[१] पराकृताः ।।६८।।

विषवत्प्रमादं मत्वा तत्परित्यागिनः धन्याः -

प्रमादं विषवद् ये तु परित्यजन्ति पण्डिताः ।
ते मृत्युसमये प्राप्ते भवन्ति सुखभागिनः ।। ६९ ।।

सुखार्थिना प्रमादेनासक्तिर्न करणीया -

प्रमादः परमो मृत्युरप्रमादः परं सुखम् ।
(ने० २७८०) तस्मात् सुखार्थिना[२] नित्यं मा प्रमादे मतिं कृथाः ।।७०।।

धात्वायतन सम्मोहः श्रेयसां विघ्न -

धात्वायतनसम्मोहः[३] श्रेयसां विघ्नकारकः[४] ।
तन्मात्सः सर्वकर्माणां प्रमादः सम्प्रवर्तते ।।७१।।

प्रमादिनः दोषैरतिर्भवति -

दोषैर्यत्रविलग्नाय मायायाकारतुलकः ।
सम्मोहश्चाग्रणी पापः प्रमादः सम्प्रवर्तते ।।७२।।

प्रमादरतामृत्युमुखं प्रति गच्छन्ति -

ये प्रमादरताः[५] कालान्ते मृत्योः[६] सम्पारिस्थताः ।
प्रमादसेवका ये तु ते सर्वे निधनं गताः ।। ७३ ।।

१- ०दूतैः ध०, ऊ   २- ०र्थिनो - ध०, ऊ
३- धातायतनसम्मोहः - ऊ   ४- विघ्नकारकः - ध०, ऊ
५- ०रतो - ध०, ऊ   ६- सर्वे - ध०, ऊ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादिनो देवा अपि क्षीणपुण्याः भवन्ति -

पुण्यक्षयाय देवानां प्रमादेन विहिंसिताः ।
पतन्ति[1] दुःखसंभूतास्त्राणं तेषां सदा कुतः[2] ॥७४॥

सत्कर्माचरणं भूतदयैव श्रेयसे जायते -

दानं धर्मस्तथामोघः कृपया संयतः पृथुः ।
शान्तिश्चापि सदा युक्ता दया भूतेषु सर्वदा ॥७५॥

मृत्युकाले प्राप्ते दुःखानि जायन्त इति प्रमादरहितैर्भाव्यम् -

व्याकुला भवन्त्येते मृत्युकाले महाभये ।
तस्मात् प्रमादरहितैः सेवनीयाः प्रयत्नतः ॥७६॥

विद्याविहीनस्यैव प्राणिनः शान्तिर्नायते -

अविद्यावर्जनं श्रेयो[3][4] विद्यया[4] रक्षणं सदा ।
विद्याविहीनो यः सत्त्वः[6] प्रमादस्तस्य शाम्यति[5]
पुरुषार्थो नियतो ह्यत्र यत् प्रमादस्य वर्जनम् ॥ ७७॥

अप्रमादरतस्यैव पुरुषार्थसिद्धिर्भवति -

अप्रमादरतस्यैव पुरुषार्थः सतां मतः ।
प्रमादो बन्धनं प्रायो मुक्तिस्तस्याप्रमादतः ॥७८॥

प्रमादसेवनाद्बन्धनं भवति -

मोक्षबन्धनयोरेतल्लक्षणं स्यात्[7] सतां मतम्[7] ।
(नै० २८८०) एवं मत्वा सदा देवो यः प्रमादेन रक्षति ।
स पश्चान्मृत्युभये शाम्यते तस्य[8] तत्फलम्[9] ॥ ७९ ॥

१- पतन्ते - क०,ख०   २- भुतं - क०,ख०
३- विद्याऽविशेषः क०,ख०   ४-४ क०ख०पुस्तकयोः नास्ति।
५- शाम्यते - क०,ख०   ६-६ ,, ,, ,,
७-७ प्रमादेषु वर्तते क०,ख०   ८-[illegible] तस्य यत्फलं क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सन्तोष एव निर्वाणसाधनम् -

यथा यथा हि सन्तोषः सेव्यते यतिभिः सदा ।
तथा तथा हि निर्वाणमन्तिके तस्य वर्तते ॥ ८०॥

सर्वकामविराग एव श्रेयः साधनम् -

विरागः[1] सर्वकामेषु निर्वाणे च प्रवर्तनम् ।
नासौ मारस्य विषयः कदाचित् सम्प्रवर्तते ॥८१॥

ज्ञानेनैव दुःखप्रहाणं भवति -

नराणां[2] यस्य मनसो नित्यं व्यापारमेव च ।
उपभोगस्य उदासीनं स कथं दुःखमेष्यति ॥ ८२॥

अनागतविधिज्ञः बन्धनमुक्तो भवति -

अतीतस्य मध्यस्थः[3] प्रत्युत्पन्ने च बुद्धिमान् ।
अनागतविधिज्ञो[4] यः[4] स मुक्तः लोकबन्धनात्[5] ॥८३॥

अप्रमादरतः संज्ञानसेवी निर्वाणभागी भवति -

अप्रमादरतो नित्यमविश्वासे च कातरः[6] ।
संज्ञानसेवी विमलो[7] निर्वाणस्यान्तिके स्थितः ॥८४॥

महत्सुखं प्रमादेन नश्यति -

प्रमादेनापि नश्यन्ति देवाः प्राप्यमहत् सुखम् ।
किं पुनर्येन वा मूढाः प्रमादवश सेवनः ॥ ८५ ॥

१- निरागः ८०,८०   २- नराणां - ८०,८०
३- ०सम[illegible]- ८०,८०   ४-४- ०विधिज्ञः - ८०,८०
५- ० बन्धनैः - ८०,८०   ६- कातरे - ८०,८०
७- विमला - ८०,८० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादविहारी जीवन्नपि मृत एव -

मृतः स नरो भवति यः प्रमादविहारवान् ।
जीविते च प्रमत्तोऽयं सततं जीवधारणे[1] ॥८६॥

प्रमादवर्जनं दुःखमृत्युवर्जनम् -

अप्रमादप्रमादाभ्यां[2] भिदमन्तरमिष्यते ।
मृत्युं च वर्जयेद् दोषं प्रमादं दुःखमूलकम्[3] ॥८७॥

प्रमोदः सर्वेषां पश्वादीनामपि समान इति धर्माचरणं कर्तव्यम् -

नित्यं प्रमुदिता देवाः नित्यं प्रमुदिता वयम् ।
(नै० सू० ७०) पक्षिणां च सुराणां च विशेषो नोपलभ्यते[4] ॥८८॥

न धर्माचरणं दृष्टं मोक्षाचर्या न दृश्यते ।
तथैव यदि देवानां ते गताः पक्षिभिः समा ॥८९॥

ये प्रमादविनिर्मुक्ता ये च धर्मरताः सदा ।
ते देवाः[5] सत्यथा लोके न प्रमादविहारिणः ॥९०॥

यदि क्रीडारता देवाः प्रमादचरिताः सदा ।
देवानां[6] च जनानां च विशेषो नोपलभ्यते ॥९१॥

धर्मपतितः आस्था न लभते -

कर्मणां तु विशेषेण जातिधर्मो[7] विशिष्यते ।
न धर्मपतितः कश्चिद् आस्था भवति लोभनः ॥९२॥

१- ०धारिणः - पा०, ख०　　२- ०प्रमादायो० - पा०, ख०
३- ०मूलवत् - पा०, ख०　　४- नोपलभ्यते - पा०,
५- देवसत्यता - पा०, ख०　　६- सहादेवानां - ख०,
७- आस्था - पा०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संसारस्य सर्वदायात्मकत्वम् -

ये न निन्दन्ति संसारमिदं सर्वदायात्मकम् ।
ते सुराणि समा नित्यं पाशाभिर्मूढबुद्धयः ॥६३॥

प्रमादशून्या धर्मरता एव देवा भवन्ति -

येषामेवास्थिता बुद्धिरमता[१] धर्मगोचरे ।
ते देवाः सम्मता[२] लोके न प्रमादविचारिणः[३] ॥ ६४॥

कामरता एव क्लिशशून्या भवन्ति -

ये जन्महेतुप्रभवं दुःखं बुध्यन्ति शोभनम्[४] ।
ते देवा न तु ये सक्ताः[५] कार्येषु हलिकारिषु ॥६५॥

स्वजनवियुक्ताऽपि ये नोद्विजन्ति त एव देवाः -

वियुज्यमाना बहुशो मृत्युना[६] जनबान्धवैः ।
ये नोद्विजन्ति[७] संसारे ते देवाः पशुभिः समाः ॥६६॥

मद्यपानात्मकः प्रमादो हेय एव -

मद्यपानाधिको दृष्टः[८] प्रमादस्तत्त्वदर्शिभिः[८] ।
(नै० २९८०) जायते[९] मद्यपानं हि प्रमादो नैव जायते ॥६७॥

१- बुद्धिरता - क०, ख०
२- संमता - ख०
३- ०रिणो - क०, ख०
४- शोभनाः - क०, ख०
५- सक्ता - क०, ख०
६- मृत्युः - क०, ख०
७- ०जेत - क०, ख०
८- दृष्टे प्रमादः तत्त्वदर्शिभिः क०, ख०
९- जायते - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादवशो गलितकन्थके भ्रमते -

प्रमादोन्मत्तो लोको भ्रमते गलितकन्थके ।
तस्मात् प्रमादवशो हि सर्वोपायैर्विवर्ज्यते।।९८।।

प्रमादः कल्पादपि हानतरः -

एकाहं[1] परमं मर्त्यं प्रमादयति दैविकः ।
प्रमादः कल्पकोटिभिर्भ्रमतोऽपि न बोध्यते।।९९।।

प्रमादविरहिताः अव्ययं पदं प्राप्नुवन्ति -

ये प्रमादैर्विरहितास्ते गताः पदमव्ययम् ।
ये तु प्रमादवशगास्ते भ्र भवन्ति[2] तथा[2] नराः।।१००।।

हितार्थिना प्रमादो वर्ज्य एव -

हितार्थिना मनुष्येण प्रमादो वर्ज्य एव हि ।
यस्मात् प्रमादवशगाः [illegible] बुद्धेन देशिताः[3]।।१०१।।

देवानां कृतेऽपि प्रमादो हेय एव -

देवा यदि प्रमादेन कुर्वन्ति[4] तथुचेतसः ।
तस्माद्देवाः प्रमादं तं[5] न वहंति विशेषतः।।१०२।।

प्रमादतः व्यसनं प्राप्यतापेन दह्यते -

यस्तु दूरात् प्रमादेन मर्त्यं नावैति दुर्मतिः।
सोऽवश्यं व्यसने प्राप्ते पश्चात्तापेन दह्यते।।१०३।।

१- एकोऽहं - क०, ख०
२-२ भवन्तित्यागा - क०, ख०
३- कार्तिताः - क०, ख०
४- त्रिधते - क०, ख०
५- प्रमादोयं - क०, ख०
६- क०, ख० पुस्तकयोः नास्ति।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पतनसाधनमिति प्रमादः न संसेव्यः -

पतनं देवलोकात्[1] ते यान्ति[1] दारुणम् ।
तद् विचिन्त्य प्रमादस्ते न संसेव्यः कदाचन ।।२०४।।

प्रमादरताः सुखभागिनो न भवन्ति -

ये प्रमादरता नित्यं ते सौख्यस्य भागिनः ।
प्रमादो दुःखमूलस्य मूलमेकं सुदारुणम् ।। २०५।।

प्रमादेन सर्वेषां विनाशो भवति -

पद्मकोटिसहस्राणि नियुतान्यर्बुदानि च ।
असंख्यानि[2] च देवानां प्रमादेन विनाशिताः ।।२०६।।

अप्रमादः परं मित्रं प्रमादश्च शत्रुः -

(नै० २८४०) अप्रमादः परं मित्रं[3] नित्यं हितकरं नृणाम् ।
प्रमादस्तु परं शत्रुस्तस्यानिष्टपरो भवेत् ।। २०७।।

सुखनाशकर एव प्रमादः -

सुखस्यान्तकरो[4] ह्येष विवादं[5] दारुणं[5] परम् ।
दुर्गतीनां[6] परं मार्गः प्रमाद इति कथ्यते ।। २०८।।

प्रमादिनः दुःखं भजन्ते -

प्रमादेन प्रमत्ता ये विषयैश्चापि रञ्जिताः ।
नरास्ते मूढमनसो नित्यं दुःखस्य भागिनः ।।२०९।।

१- ०कादेनिरयैति- क०, सनैरभ्यैति - ख०
२- असंख्येयानि - क०, ख० ३- नित्यं - क०, ख०
४- ०सर्वं - क०, ख० ५-५- विषं चतुर्दारुणं- क०, ख०
६- दुर्गतिनां - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

२९१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानशून्या: मनुज: सर्वाण्यपि पशुभि: समाना: भवन्ति -

येषां भयं न दुःखं[1] च[2] न च ज्ञानविलोकनम् ।
पशुभिस्ते समाविष्टा न पुरा दुष्कर्मिण: ॥११०॥

आहाररतिपरा: पशुभि: समा भवन्ति -

आहारमैथुनरति: पशूनां[3] हृदि वर्तते ।
सा रतिर्यदि देवानां ते गता: पशुभि: समा: ॥१११॥

मृत्योर्विस्मरणादुत्तमैव प्रमादिनाम् -

श्रोत्रन्त्यतिशयं[4] मृत्योर्गम्ये पुर: स्थितम् ।
सम्प्राप्ते मृत्युसमये फलं धास्यन्ति दारुणम्[5] ॥११२॥

प्रमाद: मृत्यो: पर्याय एव -

विषादनुमारोचोऽयं[6] सर्वरात्रि सुदुःसह:[6] ।
मृत्यो:[7] पर्यायनामैतत्[7] प्रमादो हृदि दोषकम् ॥११३॥

प्रमादेन पूर्वमेव निहता: भवन्ति -

प्रमादेन हतान्[8] पूर्वं[9] पश्चान्मृत्यु: प्रमर्दति[10] ।
धर्मं ज्ञानविलसौख्यानां तमेकान्तं[11] प्रवक्ष्यते ॥११४॥

१- दुःखेन - क०, ख०
२- क०ख० पुस्तकयो: नास्ति।
३- पशूनां - ख०
४- श्रोत्यतिशयं हेतो - क०ख०
५- क०ख० पुस्तकयो: नास्ति
६-६ क०ख० पुस्तकयो: नास्ति।
७-७ मृत्युपर्यायनामेतत् - क०, ख०
८- हता: - क०ख०
९- पूर्वा: - क०, ख०
१०- प्रमोदति - ख०
११- तमेकं - क० , ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्रमाद एव स्वर्गमार्गः -

अप्रमाद इति ख्यातः स्वर्गमार्गप्रदेशकः[1] ।
अथाऽनर्थौ समावेतौ पश्चान्मोदास्तथैव[2] च ।।२२५।।

अप्रमादः गुणः प्रमाद एव दोषः -

अप्रमादः प्रमादश्च गुणदोषसमन्वितौ[3] ।
(ने० २०३०) तत्रैव मूढमनसो विजानन्ति च नैहिताः ।।२२६।।

प्रमादविषवृक्षस्य तिस्रः शाखाः -

अगुणाः सह रुदन्ति[4] ज्ञानं[4] परिहरन्ति च ।
प्रमादविषवृक्षस्य शाखास्तिस्रः प्रतिष्ठिताः ।।२२७।।

सत्क्रियान्वितानां गुणवतानां व्याधयो न बाधन्ते -

जरा व्याधिश्च मृत्युश्च नित्यं तस्योपरिस्थिताः ।
जरादयो न बाधन्ते गुणवतं सत्क्रियान्वितम् ।। २२८ ।।

अप्रमादशीलानां दोषराहित्यं न भवति -

संसारे तिष्ठते धीमानप्रमादरतः सदा ।
निकृन्तन्ति सदा दोषा न प्रमादं परिव्रजेत्[5] ।।२२९।।

अप्रमादी सदाभयान्निर्मुक्तः सन् सुखी तिष्ठति -

सदा भयविनिर्मुक्तः सुखं प्राप्नोत्यनुत्तमम् ।
अप्रमादाच्च[6] यत् सौख्यं शाश्वतं स भवं हि तत् ।।२३०।।

१- अमाद - ध०,७०   २- कायमोदारो तथैव-ध०७०
३- ०विदंसमं - ध०,७०   ४-४- रुदन्ते ज्ञानं -ध०,७०
५- [redacted] परिव्वजे-ध०७०,   ६- प्रमादाच्च - ध०, ७०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादविनिर्मुक्ता: ह्यच्युतं सुखमाप्नोति -

यत्[१] तस्माद् विनिर्मुक्तं ~~सुखं~~ तत् सौख्यं ध्रुवमच्युतम् ।
अतो[२] मनुजा ह्येव[२] प्रमादेन विमोहिता: ॥१२१॥

प्रमाद: दौःखाय जायते -

तथापि[३] नाम वसन्तस्ते प्रमादे प्रतिष्ठता:[३] ।
चत्वारो हि विख्याता: प्रमादस्योपरिस्थिता:॥१२२॥

प्रमादविरहात् लोकत्रय: नश्यन्ति -

प्रमादविरहाच्चापि नश्यन्ति लोकत्रय: ।
यदनेकविकल्पोऽप्यनेकत्रयसंकट: ॥ १२३॥

प्रमादशून्योऽच्युतं सुखमश्नुते -

संसारो भ्रमते दु:खे तत् प्रमादस्य चेष्टितम् ।
एक:[४] प्रमादविरहात्[४] प्राप्यते सुखमच्युतम्॥१२४॥

प्रमादेन जनानां विनाशो जायते -

(नै० ३०८०) प्रमादेन[५] विनश्यन्ति सर्वधर्मा ह्यागता:[५] ।
देवानां च प्रमादोऽप्यनुर्ध्वपरि वर्तते ॥१२५॥

प्रमादसंमूढा: निर्वृतिनाप्नुवन्ति -

कथं प्रमादसम्मूढा: देवा यास्यन्ति निर्वृतिम्।
तदेतत्[६] सौम्यकथा चिन्तयित्वा विकल्पयेत्॥१२६॥

१- यत् - ल०
२-२ नानत्वशानास्तेषां बाधावतिष्ठत: - व०, ल०
३-३ ततस्त्वदुमतरैव - व०, ल०
४-४ एको प्रमादविहारा - व०ल०
५-५ विनश्यन्ते सर्वधर्माकुलाश्चा: - व०, ल०
६- तदेत् - व०, ल०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादरहिताः देवाः सन्तोऽच्युतं सुखमश्नुवते-

तथा मे हि भा?धेयं यथा यत्[१]कुर्यात् सुखावहम्[१] ।
ये देवा[२] यच्च तत्कार्यं परत्र यदपि किञ्चन ॥१२७॥

संस्कृतस्यैव ध्रुवपदप्राप्तिर्भवति -

तत् सर्वं ध्रुवं गत्वा[३] संस्कृतस्यैष सम्भवः ।
अवश्यं ते विनश्यन्ति[४] ये भावाः संस्कृतात्मकाः ॥१२८॥

प्रमादवशात् दुःखभागिनः भवन्ति -

प्रमाद[५]निरता देवा[५] नित्यं दुःखस्य भागिनः ।
प्रमादा[६]पहृतज्ञानो यस्तेषां कुरुते मतिः ॥१२९॥

प्रमादवशात् वियोगः वियोगाच्च दुःखं जायते -

संवियोगे समुत्पन्ने दुःखेन परितप्यते ।
विषयेषु सकामेषु तृष्णाविनगतेषु वा ॥१३०॥

प्रमादवशाद्देवा अपि दुःखमाप्नुवन्ति -

तेन ते वञ्चिता[७] देवाः[८] प्रमादवशवर्तिनः ।
मूलमेतदनर्थानां यत्प्रमादानुसेवनम् ॥ १३१॥

प्रमादवर्जनं सुखसाधनम् -

तस्मैतद् वर्जनं पन्थं सर्वकर्मकरं महत् ।
सत्त्वा[९] नैवाभवन्सुखा दुःखेनापि समन्विताः[९] ॥१३२॥

१-१	पश्चात्तु पश्यते -	ध०,ख०	२-	देवौ -	ध०ख०
३-	मत्वा -	ध०,ख०	४-	विनश्यन्ते-	ध०ख०
५-५	विनाशादथमुखं-	ध०,ख०	६-	प्रमाद० -	ध०ख०
७-	०तदर्थानां -	ध०ख०,	८-	०प्रमादवृ० -	ध०,ख०

९-९ सत्वन्नवोपन्ने सुखेदुःखेनापि समन्विताः -- ध०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुरा अपि प्रमादवशगाः नश्यन्ति -

तथा बुद्धिरनुष्ठेया[१] यथा[२] न मत्स्या जलानुगाः ।
स्वर्गे प्रमादवशगा भ्रश्यन्त्येव ते सुराः ॥२३३॥

प्रमादिनो दुःखभागिनो भवन्ति -

(ने०२४३७) ते सर्वाङ्गीर्णनिर्दग्धा[२] नित्यं दुःखस्य भागिनः ।
तस्मात् प्रयत्नतो देवैरुत्पन्नानापारवर्जिनम्[३] ॥ २३४॥

कामकौतुकस्य कार्याकार्यविमूढतया विनाशो निश्चित एव -

कर्तव्यं कामतोऽस्य मनसा[४] धृतिवर्जनम् ।
कार्याकार्यविमूढस्य[५] धर्माधर्मे तथैव च ॥२३५॥

लोकमूढस्य निर्वाणं दूरे तिष्ठति -

पुरुषस्य यास्यमप्युत्पन्नस्य[६] निर्वाणं दूरमेव तत् ।
गुरुतामावतत्त्वज्ञो निपुणो धर्मगोचरः[७] ॥२३६॥

धर्मिणः एव सुखमाप्नुवन्ति -

धर्मकांक्षी[८] फलाकांक्षी तादृशं लभते सुखम् ।
निर्घातितमलकल्याणाः[९] नित्यं धर्मानुवर्तिनः ॥२३७॥

१- बुद्धिरनष्टेया- क०ख०, २- ०वान्ति० - ख
३- ०पारवर्जितं० - क०ख० , ४- मनसे - ख०,ग०
५- ०कार्य० - क०ख० , ६- ०तामगिम्य- ख०,ग०
७- ०गोचरे: - ख०, ८- ०कांक्षि - क०ख० ,
९- ०घातिनश्चकल्याणाः: ख०,ग० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादविमोहिता एव दुःखमाप्नुवन्ति -

सुखिनस्ते सदा दृष्टा न प्रमादविकारिणः ।
[1]प्रमादापहृतः पूर्वं[1] प्रमादेन विमोहितः ॥१३८॥

मदेन देवोऽपि प्रमादमेति -

देवा वा पुरुषाश्चापि न मुक्त्यान्तिके[2] हि सः[3] ।
मृतः स पुरुषो नित्यं यो मदेन प्रमाद्यति ॥१३९॥

मददोषवशात् नरके जनाः यान्ति -

[4]मददोषाकुलाः सर्वे भवन्ति नरके नराः ।
असंसर्गी दोषो मद्यमित्यभिधीयते ॥१४०॥

मदेन मोहिताः नरकगामिनः भवन्ति -

मदेनमोहिता नित्यं देवा नरकगामिनः ।
तत्प्रसूतेषु स्थाने न सम्भूते कथञ्चन ॥१४१॥

मदात्काम कामाच्च तत्त्वाद् विच्युता भवन्ति -

मदात्स्वाका[6]रपतिता देवाः वर्णेर्विमोहिताः ।
(नं०३१ क०) कामेन मोहिता देवा मदेनापि तथैव च ॥१४२॥

न तत्त्वमत्र[7] पश्यन्ति जात्यन्धा इव सत्पथम् ।
प्रमादाकुलितं चित्तं न तत्त्वमनुपश्यति ॥१४३॥

१-१	प्रमादोपहतः पूर्वं - क०, ख०	२-	हर्षयान्तिके - क०,
३-	प्रमादति - क०, ख०		समस्यान्तिके - ख०,
४-	मद - क०, ख०	५-	मद इत्यभिधीयते - क०, ख०
६-	मदाद्वैकार(०- क०, ख०,	७-	०मत्र - क०, ख० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादाग्निः दूरात् परिहरणीयः -

प्रमादमाग्निवत्तस्मात् परिवर्ज्यं समन्ततः ।
प्रमादेन विनश्यन्ति[1] कुशला सर्वदेहिनः ॥१४४॥

प्रमादविषसेवनं नाशायैव जायते -

मार्गं[2] च विषसंपृष्टं[2] सर्वथानैव पश्यति ।
दलधर्मा विनश्यन्ति[3] प्रमादविषसेविनाम् ॥१४५॥

प्रमादिनां कामविवर्जितानां पदे पदे विनिपातो भवति -

ध्यानानि चैव[4] चत्वारि[4] प्रणश्यन्ति प्रमादिनः ।
अप्रमादं प्रशंसन्ति बुधाः कामविवर्जिताः ॥१४६॥

अप्रमत्ता जरामुक्ता भवन्ति -

प्रमादेव गुप्यन्ति[5] जरामरणबन्धनम् ।
अप्रमत्ता जरामुक्ता प्रमत्ता दुःखभागिनः ॥१४७॥

प्रमाद एव बन्धनम् -

प्रमादो बन्धनं[6] ह्येतद् दुःखितं मन्दबुद्धिनाम् ।
अप्रमादेन कुशला देवानां समितिङ्गताः ॥१४८॥

प्रमत्तपुरुषः संसारान्नैव प्रमुच्यते -

तस्मात् ते पतिता मूढा ये प्रमादानुसेविनः ।
प्रमत्तपुरुषः सर्वं संसारान्नैव मुच्यते ॥१४९॥

१- विनश्यते - ४०.८०, २- ०मार्गं विषसंपृष्टं - ४०,८०
३- विनश्यते - ४०.८०, ४- च चत्वार्येव - ४०,८०
५- गुप्यन्ति - ४०.८०, ६- ०बन्धना - ४०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादमार्गबद्धाः नाश्यन्ति -

प्रमादमार्गाचारेण येन बद्धा हि देहिनः ।
अकार्यं[2] कार्यरूपं कार्यं[2] कुर्वन्ति सर्वदा[3] ।। १५० ।।

अप्रमादिनः कल्याणपरम्परामाप्नुवन्ति -

(नै०२४०) अप्रमादान्नरः[4] सर्वान् विपरीतान्हि[4] पश्यति ।
न लौकिकेषु कार्येषु कुतो नैश्रेयसेषु च ।।१५१।।

पण्डिताः बुद्धिपारगाः प्रमादं न प्रशंसन्ति -

प्रमादं[5] न प्रशंसन्ति पण्डिता बुद्धिपारगाः ।
यथा सुखं परित्राणं भविष्यति दिवौकसाम् ।।१५२।।

प्रमादकर्म हानिकरं भवति -

तदा प्रमादस्य कर्म नाशयन्ति स्वकं हि तत्[6] ।
कामसंक्लिष्टमनसां[7] तस्यान्ते दुःखदर्शनात् ।।१५३।।

आशागतात्मनां विषयाभिनिवेशवशाद् विनिपातो भवति -

भविष्यति सुखं तस्माद् विनिपातोदयो महान् ।
विषयाभिमुखेन्द्रियाणां[8] नित्यमाशागतात्मनाम् ।।१५४।।

१-	०पाशानां -	क०, ख०	२-	अकार्यं-	क०, ख०
३-	कार्यंवाकार्यं तत्सर्वदा -	क०, ख०	४-	४- दान्नरागः सर्वान्- विपरीतानि-	क०, ख०
५-	प्रमादे -	क०, ख०	६-	ते -	क०, ख०,
७-	मनसो -	क०, ख०	८-	०मुखेना -	क०, ख०,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्त्रीदर्शनप्रसक्तानां विनिपातो भवति -

स्त्रीदर्शनप्रसक्तानां विनिपातो भविष्यति ।
नित्यं[1] कामान् निषेवन्ति[1] प्रमादरागमोहिन: ॥१५५॥

मृत्युभयात् योषित: अपि परित्यजन्ति -

ता: सर्वमृत्युभये परित्यजन्ति योषित: ।
व्यवसानं पुर: सर्वं न कश्चिदनुगच्छति ॥ १५६॥

मोक्षाभिलाषिण: दुष्कृतं त्यजन्ति -

कर्मणा[2] पृष्ठत: सर्वं गच्छन्तमनुयाति च ।
सुकृतं[3] च हि सदा सेव्यं वर्जनीयं च दुष्कृतम्[3] ॥१५७॥

प्रमाद: कदापि शान्तये न जायेत -

प्रमादं च मदं जह्यात् प्रमादविरतो[4] भवेत् ।
प्रमादो भवमूलोऽयं प्रमादस्तु न शान्तये ॥१५८॥

प्रमादाप्रमादौ विचिन्त्य धीर: सुखमेधते सत्कर्मवशात् -

अप्रमादप्रमादाभ्यामिदमुक्तं स्वलक्षणम्[5] ।
तद् विचिन्त्य सदा धीर: सुखं सुचरितं चरेत् ॥१५९॥

सदाचारी कदापि दु:खं नाप्नोति -

(नै०३२ ब०) न धर्मचारी पुरुष: कदाचिद् दु:खमृच्छति[6] ।
संसरन्त्यथ[7] संसारे प्राणिन: स्वेन कर्मणा ॥१६०॥

१-१- यतिसार्धं निषेवन्ते- ब०, छ०   २- कर्मैव - ब०, छ०
३-३ सुकृतञ्च सदा सेव्यं वर्जनीयश्च दु:ष्कृतं- ब०, छ०   ४- प्रमादरतो- ब०, छ०
५- स्वलक्षणम् = स्वभाव इत्यर्थ: -
६- दु:खमर्छति- ब०, छ० ।
७- संसरन्त्यथा- ब०, छ० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमाद: मेधसां नाशाय बन्धनाय च जायेत -

किमर्थमिह लोकेऽयं प्रमादेन विहन्यते ।
प्रमाद: मेधसां[1] नाश:[2] प्रमादो बन्धनं परम् ।।१६१।।

प्रमादो विनिपाताय भवति -

प्रमादो विनिपाताय प्रमादो नरकाय च ।
दु:खस्य हेतुरेक: प्रमाद: परिकीर्तित: ।।१६२।।

सुखाभिलाषिणा प्रमादं परिवर्जयेत् -

तस्मात् सुखार्थी[3] पुरुष: प्रमादं परिवर्जयेत् ।
यै: प्रमाद: परित्यक्त: प्राप्तं तै: पदमच्युतम् ।।१६३।।

अप्रमादरतो निर्वाणमाप्नोति-

अप्रमादरतो यो हि निर्वाणस्यैव सोऽन्तिके ।
अप्रमादपदं श्रेष्ठं निर्वाणस्यामृत: पदम् ।।१६४।।

प्रमादो विनिपाताय -

प्रमादो[4] विनिपाताय हेतुरेष[5] प्रकीर्तित: ।
प्रमत्त: पुरुष:[6] सर्वै: सोन्माद इव लक्ष्यते ।।१६५।।

प्रमत्त: पुरुष: न [illegible] भवति लघुतां याति -

लघुत्वं याति लोकेऽस्मिन् प्रत्यवायेषु पच्यते ।
प्रमत्त: पुरुष: [illegible] विपरीतेषु वर्तते ।।१६६।।

१-	मेधसां -	९०,३०	२- नाश:	-	९०,३०
३-	सुखार्थी-	९०,३०	४- प्रमादे	-	९०,३०
५-	[illegible]रेष -	९०,३०	६- पुरुष: -		९०,३०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादः नरकमनुगच्छति -

हेतौ[1] कर्मविपाके च मृत्यूत्पत्तौ तथैव च ।
प्रमादान्मानवं यं तीक्ष्णो नरकानुपकर्षति।
तस्मान्नरकमोक्षार्थं[2] प्रमादं[2] विनिवर्जयेत्॥१६७॥

नरकविमुक्त्यै प्रमादपरित्यागपूर्वकं ज्ञानरतिर्भाव्यम् -

ये प्रमादं विनिर्जित्य नित्यं ज्ञानरता नराः ।
(लै० ३३८०) ते क्लेशबन्धनं[3] छित्वा पदं याता सुखोदयम्॥१६८॥

प्रमत्ताः सदैव दुःखिनो भवन्ति -

कर्मसूत्रैर्विनिबद्धाः स्वकीर्ता समाश्रिताः ।
भ्रमन्ति निर्मये सत्त्वा मा प्रमादेषु रज्यथ॥१६९॥

प्रमत्ताः सदा दुष्टाः सन्तः सुखं लभन्ते -

सुखी[4] भवति दुःखी वै दुःखितश्चापि सुखितः[5] ।
भद्रोऽपि दुष्टो[6] भवति मा प्रमादेषु रज्यथ ॥१७०॥

प्रमादात् रागो रागाद् द्वेषः तेन च नरकं गच्छति -

माता पिता वा भवति भार्या भ्रातृत्वमेव च ।
पारवर्ती महानेषु[7] च मा प्रमादेषु रज्यथ ॥१७१॥

१-	हेतै	- क०,ख०	२-२	तस्मान्नरके मोक्षार्थे प्रमादे-	क०,ख०
३-	०क्लेशश्चान्धनं	- क०,ख०			
४-	सुखि -	- क०,ख०	५-	खि -	क०,ख०
६-	दुष्टो -	- क०,ख०	७-	महानेषा -	क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादाज्जायते रागो[1] रागाद्[1] द्वेषः[2] प्रवर्धते ।
स दीर्घमध्वानापन्नो नरकाननुधावति ॥१७२॥

प्राज्ञः प्रमादलुब्धः सन् शिवं पन्थानमाप्नोति -

प्राज्ञः प्रमादमाकृष्य योगक्षेममनुत्तमम् ।
एष पन्थाः[3] शिवः श्रेष्ठो यः प्रमादविवर्जितः ॥१७३॥

अप्रमत्ताः निर्वाणं प्राप्नुवन्ति -

तेन मार्गेण सततं[4] निर्वाणं यान्ति पण्डिताः ।
विरोधो मार्गसम्प्राप्तौ चित्तस्यानद्युतः ॥१७४॥
आद्येन धर्मकेतूनां प्रमादः परिकीर्तितः ॥

प्रमादः दुर्गतीनां नेता -

स्मृतिं सन्दूषकं दुष्टं नाशाय वृत्तिनाशकः ।
दुर्गतीनां[6] परं नेता प्रमादः[7] सम्प्रवर्तते ॥१७५॥

देवविकुर्वाणोऽपि प्रमत्ताः सन्तः पशुभिः समानाभवन्ति -

अनेन पुरुषः क्षिप्तो नात्मनो विन्दते[8] हितम् ।
नावाच्यं न च कार्याणां चिन्तयितुमक्षमः ॥१७६॥

१-१	रोगो रोगाद्द्वेष-	क०,ख०	२-	नरकादप -	क०,ख०
३-	पण्डा-	ख०,		हस्तोग्रे-, नास्यपदेनमदान्तदति	
४-	सतता-	क०		पण्डित-	क०
	संमतां -	ख०		वे भेद नयका तद्वन्ति-	ख०
५-	कुष्ट -	क०,ख०	६-	दुर्गतीनां -	क०,ख०
७-	प्रसादः -	क०,ख०	८-	विन्दते० -	क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादोपहताः नाशं यान्ति -

(ने०२२ क०) त एते[1] पशुभिस्तुल्या देवविग्रहधारिणः ।
प्रमादोपहता मूढा नृत्यन्ति च हसन्ति च ॥१७७॥

उत्पन्नास्त्वकुलाः स्वकर्मेण[2] यान्ति च नाशं[3] यान्ति च ।
न भवार्णवमुत्तरन्ते[4] ये प्रमादानुचारिणः[5] ॥१७८॥

प्रमादानुचारिणः पापकर्मबन्धनं प्राप्नुवन्ति -

जनकः सर्वदोषाणां बन्धनं पापकर्मणाम्[6] ।
प्रमोषः[7] सर्वधर्माणां प्रमादारिः प्रवर्तते ॥१७९॥

सर्वेषां शुभकर्मणां प्रमादः शत्रुरेव -

नाध्यात्मिकानि[8] कर्माणि न बाह्यानि कथञ्चन ।
प्रमादोपहतो जन्तुर्जानाति[9] नष्टचेतनः ॥१८०॥

प्रमादविमोहिताः नाशं यान्ति -

क्रीडायां[10] व्यग्रमनसो नृत्यगान्धर्वलालसाः ।
अतृप्ता विषयैर्दिव्यैर्नश्यन्ति विबुधालयाः ॥१८१॥

मधुस्थाने हसन्त्येते प्रमादेन विमोहिताः ।
मार्गामार्गं न विन्दन्ति बाल्यत्वेन सुराः समाः ॥१८२॥

१-	ते -	क०,ख०	२-	स्वकर्मेण -	क०,ख०
३-	नश्यति -	क०,ख०	४-	०मुत्तान -	क०,ख०
५-	०नुचारिणः -	क०,ख०	६-	कर्मणाः -	ख०,
७-	प्रमोष -	क०,	८-	नाध्यात्मिकानितवानि -	क०
	प्रमादो -	ख०,		नाध्यात्मिकाणि -	ख०
९-	जीवति - क०, जनितो - ख०		१०-	क्रीडातद्व्यग्रमनसो नृ०-	क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामधातावेव प्रमादाः प्रवर्तन्ते -

कामधातौ[१] प्रवर्त्तन्ते बहवदुर्गति[१] संकटे ।
ध्यानेष्वपि[२] विमलनं तत् प्रमादस्य चेष्टितम् ।।९३।।

प्रमादचेष्टितं कर्मकलाय जायते -

तत्पौन्मस्य यत्स्थानं चतुर्थं प्राप्यतीर्थिकात् ।
प्रयान्ति[३] प्रमदोतायां तत् प्रमादस्य चेष्टितम् ।।९४।।

प्रमादबन्धनैर्बद्धा तृष्णापाशैर्नियन्त्रिताः जायन्ते -

प्रमादबन्धनैर्बद्धं तृष्णापाशैश्च[४] यन्त्रितम्[५] ।
लोकानुशासनं कृत्स्नं न च बुध्यन्त्य चेतसः ।।९५।।

तृष्णाया लोभात् तृष्णामात्ताः श्वभ्रस्थानं प्राप्नुवन्ति -

यत् प्रयान्ति श्वभ्रस्थानं तृष्णामदादिताः ।
न भूयः ऽवमायाति तत् प्रमादस्य चेष्टितम्।।९६।।

प्रमादवशात् दुःखोत्पत्ति जनः -

(नै० २४ ७०) प्रियाविरलेषजं नृणां[७] यद्दुःखं हृदि जायते ।
हेलनादि[८] प्रमादस्य यत्[९] क्थयन्ति तथागताः।।९७।।

१- १ कामधातुप्रभोत
बहव दुर्गति- ध०, प०
२- ध्यानेष्वपि - ध०, प०
३- प्रयान्ति - ध०, प०
४- पाशैश्च - ध०, प०
५- यन्त्रितम् - प०,
६- अपि - ध०, प०
७- नृणां - ध०, प०
८- हेलनात् - ध०, प०
९- यत् - ध०, प०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रमादोऽनर्थाय भवति -

अनर्था हि यथा लोके वैरिदं नश्यते जन् ।
व्याधिर्जरा च मृत्युश्च प्रमादाच्च[1] सम्भवा: ॥१८८॥

प्रमादिनां क्लेशा: भवन्ति -

प्ररोहन्ति यथा भूमौ सर्वौषधितृणादय: ।
तथा प्रमादिनां क्लेशा: प्रवर्धन्ते पृथग्विधा: ॥१८९॥

स्त्री लोभो मदमानं च क्रोधो च विषाद: सह।
आत्मस्थमय[2] शीर्षदं प्रमादस्य विपाकदुर:[3] ॥१९०॥

प्रमाद: परमदु:खाय -

प्रमाद: परमं दु:खमप्रमाद: परमं सुखम् ।
एतावल्लक्षणं प्रोक्तम् प्रमाद प्रमादयो: ॥१९१॥

दु:खविमुक्तिं यदीच्छन्ति जनास्तदा प्रमाद: दूरत एव परिहरणीय: -

तस्मात् प्रमादो न नरेण[4] सेव्य:
स दुर्गतीनां प्रथमाग्रहेतु[5] ।
विहाय तं दु:खकरीं योनिं,
प्रयान्ति बुद्धा: भवपारमग्रयम्[6] ॥ १९२॥

इति अप्रमादवर्ग: षष्ठ:

---:0:---

१-	०चाग्र -	क०,	२-	०मद्य -	ख०,ग०
	प्रमादो -	ख०,	३-	विपाकदुर-	ख०,ग०
४-	नरेन -	ग०,	५-	प्रथमाग्रहेव-	क०,
६-	०मग्रम् -	क,ग०		हेतु -	ख०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(७) कामजुगुप्सावर्गः सप्तमः

कामस्य नरकहेतुत्वम् :-

न कामेषु गतिं[1] कुर्यात्[2] कामाः[2] परमवञ्चकाः ।
संसारबन्धना[3] घोरा सर्वे नरकहेतवः ॥ १ ॥

कामरोगदष्टः क्वापि सुखं नाश्नुते -

यः संश्रयति कामेषु तस्य दुःखमनन्तकम् ।
न कामरोगदष्टस्य सुखमस्ति कथञ्चन ॥ २ ॥

कामस्य क्षुरधाराभ्योऽपि भयङ्करत्वम् -

वरं निशितधारेण क्षुरेण[4] स्वयमात्मनः ।
(नै० २४ क०) संछिद्य[5] भवेज्जिह्वा न चोक्तं[6] कामगं[6] वचः ॥३॥

रागद्वेषमोहानां बन्धितत्वादिसम्पादकत्वम् -

रागेण बन्धिताः सत्त्वा द्वेषेण परिपीडिताः[7] ।
मोहस्य वशमापन्ना भ्राम्यन्तेऽमधुरं[8] भवः ॥ ४ ॥

रागवशगः सदा दुःखमनुभवति -

सत्त्वरागाग्निसंदग्धो यः कुरुते दुष्कृतं बहु ।
स रागवशगो मूढो दुःखाद् दुःखमवाप्नुयात् ॥५॥

१-	गतिं - क०, ख०		२-२	कुर्यात्कामा - क०,
३-	संसारबन्धना० - क०,			दृढायुत्कामा - ख०,
४-	क्षुरेण - क०, ख०		५-	संछेद्य० - क०, ख०
६-६	चोक्तो कामगं - क०, ख०		७-	परिदीपिता - क०,
८-	भ्राम्यन्त्यमधुर- क०, ख०			परिपिता - ख०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामस्य परिणाम: दु:खात्मक: -

अतृप्तिरस्मात्[1] कामास्ते न सुखा नापि शाश्वता: ।
परिणामे महातीव्रा[2]स्तस्मात् तान् परिवर्जयेत् ।।६।।

रागवशगा नरकालयं गच्छन्ति -

रागाभिभूता पुरुषा नरकालयवर्तिन: ।
न रागवशगा ये तु न तेषां नरकाद्भयम् ।।७।।

कामविषस्य सर्वथा परित्याग: करणीय: -

कष्टाभिष्वङ्गमुखास्ते कष्टास्ते परिणामत: ।
कामा[3]: विषाग्निप्रतिमा: परिवर्ज्या: प्रयत्नत: ।।८।।

पारदार्जितकाम: मोदारत: अकुशलकर्मं नानुभवति -

पारदार्जितकामस्य नित्यं मोदारतस्य च ।
नश्यन्त्यकुशला[4] धर्मास्तम: सूर्योदये यथा ।।९।।

कामानल: नरके पातयति -

इन्द्रियाणीन्द्रियार्थेषु[5] मोहयित्वा पृथग्विधा: ।
नरके पातयन्त्येते कामा: कालनोदिता[6]: ।। १० ।।

१-	अमूर्तिरस्या:	- क०, ख०	२- यदतीव्रा०		क०, ख०
३-	काम:	- क०, ख०	४- ०शान्त्या०	-	क०, ख०
५-	काम	- क०, ख०	६- नाश०	-	क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पञ्चेन्द्रियप्रलुब्धकः रागाग्निर्विषयैः कदापि न तृप्यति -

पञ्चेन्द्रियप्रलुब्धकस्य[1] विषयैः[2] पञ्चभिस्तथा ।
मुहूर्तमपि रागाग्निर्विषयैर्नैव तृप्यति ॥ ११॥

संश्लेषाग्निः दुःखायैव जायते -

संश्लेषाज्जायते[3] वह्निर्विश्लेषान्नैव जायते ।
संश्लेषादपि विश्लेषो रागाग्निर्जायते[4] नृणाम् ॥१२॥

रागाग्निः दूरादपि दाहमुत्पादयति -

(ने०३।८०) दूरान्न दाहको वह्निर्विषयस्य नास्ति सः ।
दूराग्निरसमो घोरो रागाग्निरतिदाहकः ॥१३॥

तृष्णाघृतप्रसक्तो रागाग्निरत्यन्तं तापयति -

संकल्पकाष्ठप्रक्षेपैः[5] स्पृहावृद्धिवेगवान् ।
तृष्णाघृतप्रसक्तोऽयं रागाग्निरपि दाहकः ॥१४॥

रागाग्निः कदापि शान्तिं नायाति -

दग्ध्वा शरीरमेवाग्नि[6] हि ज्वलनः सम्प्रशाम्यते ।
नामकर्मविनिर्मुक्तो रागाग्निर्नैव शाम्यते ॥१५॥

रागाग्निः उद्वेजको भवति -

उद्वेजयति भूतानि वह्निः[7] परमदाहकः[7] ।
रागाग्निरतितीक्ष्णोऽपि नोद्वेगं कुरुते नृणाम् ॥१६॥

१- ०पारसकस्य - ने०,८०　　२- विषये - ने०,८०
३- संश्लेषाज्जायते - ने०,८०　　४- ग्निर्जायते - ने०,८०
५- काष्ठप्रकरः - ने०,८०　　६- दग्धाशरीरमेवा - ने०,८०
७-७ वह्निरमदाहकः - ने०,८०　　८- ०तीक्ष्णोऽपि - ने०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रागाग्निः तृष्णासमीरणवशाद् दहति -

सर्वेन्द्रियसमुत्थोऽयं विषयैः[१] सम्पिवृतः ।
तृष्णासमीरणवशाद्[२] रागाग्निर्दहति[२] प्रजाः ।।१७।।

चित्तवृत्त्यरणि[३]सम्भूतो विषयैः सारवार्धैः[४] ।
काष्ठवद्[५] दह्यते तेन[५] न च दृश्यो जनस्य सः ।।१८।।

रागान्धः सुखं प्राप्यापि तप्यत एव -

यथा यथा हि प्रज्वाली[६] रागाग्निर्वर्धते महान् ।
तथा तथा च रागान्धः स्वसुखं[७] परिखेद्यते ।।१९।।

रागाग्निः तत्स्वाकृतः न प्रशामक इति तं परिवर्जयेत् -

अग्निः प्रशामको[८] भवति रागाग्निस्त्वप्रशामकः ।
तस्मादग्निशिखावद् धीमान् रागाग्निं परिवर्जयेत् ।।२०।।

विषयाभिरतः दारुणं दुःखमनुभवति -

विषयाभिरतो जन्तुर्न सुखी स्यात् कथञ्चन ।
विषया[९] विषवद्[९]दृष्टाः परिणामे च दारुणाः ।।२१।।

विषयाः कदापि सुखकारिणो न जायन्ते -

नादौ[१०] नान्ते[१०] न मध्ये न नारम्भादौ न चापरे ।
(नै० ३५. ८०) सुखकारिणो[११] विषया भवन्तीह कथञ्चन ।। २२।।

१- विषयैः - क०,ख०
२-२ ०वशाद्रागाग्नि० - क०,ख०
३- चित्तवृत्त्यरणि० - ख०,
४- पारन्धैर्वितः - क०,ख०
५-५ काष्ठवद्दह्यतेदेवं - क०,
  देहं - ख०
६- क०ख० पुस्तकयोर्नास्ति ।
७- स्वसुखम् - क०,ख०
८- तस्मादि० - क०,ख०
९-९ विषयाविषवद्दृष्टाः: क०,ख०
१०-१० नान्तेनादौ - ख०
११- सुखकर० - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयेन्धनैर्भोगाग्निः शान्तिर्नाधिगच्छति -

बालिशस्य हि सर्वस्य तृष्णा ह्याजनकस्य वै[1] ।
न तृप्तो[2] विषयैरग्निर्ज्वलनस्य यथेन्धनैः ॥२३॥

विषयैरतृप्तो दोषैर्दह्यते -

अतृप्तो विषयैः[3] सर्वैर्जनोऽयं पारवञ्चितः ।
मृत्युनाभ्यासनिरत स्ते दोषैर्विदह्यते ॥२४॥

मोक्षेऽपि फलं सुखमनुभवन् जनस्य एव -

सुखानां[4] कामचाराणां[5] मोक्षस्य च वेष्टनम् ।
तदेव यदि देवानां नैः स्पृहन्ते समाः सुराः ॥२५॥

कामो न सुखाय -

कल्पान्तेष्वप्यभिवर्षः[7] सह्यते[8] चरितं यतिः ।
न दुष्टस्तृप्यते[9] यैः कल्पकोटिशतैरपि ॥२६॥

कामो नैव तृप्तिदायको भवति -

यथा समुद्रस्य वर्षाभिः सलिलैर्वसाभिभिः[10] ।
न तु दुष्टसमुद्रस्य नार्थे तृप्तिरस्ति हि ॥२७॥

१-	ह्याजनकस्यवै	- क०, ख०	२-	तृप्ते	- क०, ख०
३-	मृत्युरभ्यासोनिनर	- क०, ख०	४-	सुखानां	- क०, ख०
५-	कामचराणां	- क०, ख०	६-	न तु	- क०, ख०
७-	कल्पान्तेष्वप्यभि०	- क०, ख०	८-	सम्यते	- क० ख०
९-	दुष्टस्तृप्यते	- क०, ख०	१०-	सलिलैर्वसाभि०	- क०, ख०
	हुत	- ख०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामातृप्तस्य कामेभ्यो न सुखं जायते -

अवितृप्तस्य कामेभ्यः किं सुखं पारकल्पते[1] ।
तृष्यन्ति[2] चित्तृष्णास्य[3] गतागतेन देहिनः ॥२८॥

भोगान्धाः कर्तव्यमपि नावगच्छन्ति -

माकुर्वन्ते[2] बहुभोगान्धा[3] न च बुध्यन्ति बालकाः ।
अन्धेन [illegible] यद्ध [illegible] ॥ २९॥

कामा असाराः गन्धर्वा इव भवन्ति -

स्वप्नभ्रमोऽवभासाणां गन्धर्वनगरोपमाः ।
रिक्तास्तुच्छा[4] असाराश्च कामाः सम्भवसम्भवाः ॥३०॥

कामा भोगेन तीव्रतरा एव -

कामा[5] भोगेन[6] वै शमं किं च [illegible][7]तथा ।
(नै० २६८०) कामा तीव्रतरा वह्निवत् पारकीर्तिताः ॥३१॥

कामः दुःखाय भवति -

[illegible] ज्ञात्वा येन [illegible] ।
तेन च तद्भक्ताः प्रोक्ता[8] गन्धर्वा[9]न्[10] देहिनः ॥३२॥

१-	पारकल्पते	-७०,८०	२-	तृष्यन्ति[illegible]	-७०,८०
३-३	बहुर्योति	-७०,८०	४-	[illegible]तुच्छा	-७ ८०
५-	मा	-७०,८०	६-	७०,८० कुत्रचित् नास्ति।	
७-	वन्हि	-७०,८०	८-	[illegible]	-७०,८०
९-	०कार्तिराण	- ८०	१०-	७०,८० कुत्रचित् नास्ति ।	

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामा विनाशिना एव -

अन्यथा[1] चिन्त्यमानानां[2] यथा प्राप्ता[3] पुनस्तथा ।
सर्वैः पापकर्मैः दीना लोके विनाशिनः ॥ ३३॥

कामेन वञ्चिता मूढाः नरके पतन्ति -

कामैस्तृप्यमानास्ते ते देवाश्च्युताः पुनः ।
पतन्ति नरके मूढाः कामेन परिवञ्चिताः ॥३४॥

नारीविकल्पस्य कामतो विनाशकत्वम् -

नदीतरङ्गचपला विद्युल्लेखाचरै[5]व ते ।
मीनावर्तकला नार्यः कामतोऽविनाशप्रदाः ॥३५॥

कामपरित्यागे कारणनिरूपणम् -

चिचिन्तिता विवर्धन्ते वर्धिता[7] वह्निसन्निभाः ।
बाधन्ते तथा कामास्तस्मात्[8] कामान्[8] विवर्जयेत् ॥३६॥

कामसेवनात् तद्वृद्धिर्भवति -

यथा यथा हि सेव्यन्ते विवर्धन्ते तथा तथा ।
वह्नि[9]न्यायात्समाहृताः कामाः कटुविपाकिनः ॥३७॥

कामवर्जने नैष्ठिकसुखं भवति -

एवं दोषान् सदा ज्ञात्वा धीरः कामान्[10] विवर्जयेत्[10] ।
परिवर्जितकामस्य सुखं भवति नैष्ठिकम् ॥ ३८ ॥

१-	न्यथा	-क०,ख०	२-	चिन्त्यमानाय	- क०,ख०
३-	०प्रान्यारच	-क०,ख०	४-	काम	- क०,ख०
५-	रमारिच	-क०,ख०	६-	मीनवर्तं	- क०,ख०
७-	वंन्हि	-क०,ख०	८-८	०कार्यं	- क०,ख०
९-	वन्हि	- क०,ख०	१०-१०	कामैर्विवर्ज्यते	- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामाग्निरेव देवान् पातयति -

अष्टषष्ट्यानि सहस्राणि देवानां नियुतानि च ।
कामाग्निनैव[१] पातिता:[१] नरकं वह्निभैरवम् ।। ३९।।

नरकहेतव: कामा: वर्ज्या एव -

यथाग्निविषशस्त्राणि वर्जयन्ति सुखार्थिन: ।
तथा कामा: सदा वर्ज्या हेतवो नर[२]कस्य ते[२] ।।४०।।

कामवशग: दु:खपीडितो भवति -

(नै०३६ क०) न दृष्टो न श्रुत:[३] कश्चिद्[३] य: कामवशग: पुमान् ।
न कामैर्विप्रलब्ध: स्यान्न च दु:खेन पीडित: ।।४१।।

काम: सदा विषसदृश एव -

तस्मात्सम्यक् कामेभ्यो चेतांसि[४] मन: कृथा: ।
सर्वे सर्वास्ववस्थासु कामा वह्निविषोपमा:[५] ।।४२।।

काम: सदा घातको भवति -

अनादिमति[६] संसारे[६] शत्रव: स्वल्पमप्यथा: ।
अहत्वा तु भवेत् प्रीतिर्न सा काम: कथञ्चन ।।४३।।

कामोद्भवा रतिर्दु:खाय भवति -

सकलेना बहुफला: दु:खात् कामोद्भवा रति: ।
या तु कामविनिर्मुक्ता सा रति: पारमार्थिकी[७] ।।४४।।

१-१ कामाग्निनैवपातितान् - क०,ख०   २-२ नवस्यते - क०,ख०
३-३ ०दृष्टश्चयेन - क०,ख०   ४- चेतसां - क०,ख०
५- वह्निविषोपमा - क०,ख०   ६-६ अहं त्वाप्नुयेत् - क०,
७- पार... - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

योगिनः कामविमुक्ताः परमां गतिं यान्ति -

तां समाश्रित्य गच्छन्ति[1] योगिनः परमां[2] गतिम् ।
न तु कामयुता प्राप्तिर्यते पदमच्युतम् ।। ६५ ।।

कामजा रतिः नरकगामिनी -

आपातमधुरा[3] रम्या विपाके ज्वलनोपमा ।
रतिर्भवति या कामजा[4] सा नरकगामिनी।।६६।।

कामजन्यं सुखमापातरम्यम् -

आपातरम्या मधुरा मध्ये रम्या च सर्वदा ।
अन्तकाले च विमलं नयते पदमच्युतम्।। ६७।।

कामपरित्यागः सदा कल्याणाय भवति -

आद्यन्तमध्यकल्याणीं नित्यं मातेव शोभना[5] ।[6]
तां व्युदस्य कथं बालाः रमन्ते कामजां रतिम् ।।६८।।

काम आदौ मध्ये निधने च दुःखावहो भवति -

मध्यादिनिधने दुःखा नित्यं दोषादिभिर्युता[7] ।
कथं सा सेव्यते बालैर्या न दृष्टा सुखावहा।।६९।।

विद्यानन्दविरुद्धस्य कामस्य विषोपमत्वम् -

विद्यानन्दविरुद्धा रम्या स्वर्णे ज्वलनसम्भवा ।
तथा कामयुता प्राप्तिः पारणाय विषोपमा।।७०।।

१- गतिं - क०,ख० २- परमच्युत - क०,ख०
३- क०,ख० पुस्तकयोः नास्ति। ४- क०,ख० पुस्तकयोः नास्ति।
५- कल्याणं - क० ६-६ क०,ख० पुस्तकयोः नास्ति।
कल्याणीं - - ख० ७- दोषाद्यै - क०,ख० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामकृता रतिः निरतं तपति -

(ने० २७ ख०) धूमवानो[१] यथा वह्निर्ज्वलनेन[२] प्रशाम्यति[३] ।
दाहेन च प्रदोषः स्यात् तद्वत्कामकृता रतिः ॥५१॥

कामकृताः कुबुद्धय नाशायैव जायन्ते -

पतङ्गः पश्यति[४] वह्निं दाहदोषं न पश्यति ।
तथा कामकृतां[५] प्रीतिं पश्यन्त्यकृतबुद्धयः ॥ ५२॥

रागकृतो दाहः पतङ्गसदृशं कामिनं नाशयति -

यस्तु रागकृतो[७] दाहः पच्यते[८] कामिनां सदा ।
पतङ्गानसदृशं दाहं सर्वथा नैव पश्यति ॥५३॥

कामप्रमादात् पतनं ध्रुवमेव -

कस्मात्[११] कर्म[९] क्रियां[१२] त्यक्त्वा नित्यं सुराः[१०][१३] ।
भव तु मा वृथा जन्म प्रमादेन प्रपातनम् ॥५४॥

काममोहिताः कामेन वञ्चिताः दुःखमश्नुते -

संसारगहनकर्मणो[१४] नित्यं कर्मविमोहिताः ।
तं हित्वा नरकं यान्ति काममोहेन वञ्चिताः ॥५५॥

१-	धूमवा०	- ख०	२- वह्निर्ज्वलते-		ग०,ख०
३-	०शाम्यते	- ग०,ख०	४- ०कृतः	-	ग०,ख०
५-	पश्यन्त्येकृत	- ग०,ख०	६- ०कृता	-	ग०,ख०
७-	०रागकृत	- ग०,ख०	८- ते	-	ग०,ख०
९-	काम	- ग०,ख०	१०- मानवासुराः:		ग०,ख०
११-	त	- ग०,ख०	१२- वृथा	-	ग०,ख०
१३-	प्रपातनः	- ग०,ख०	१४- ०कर्माणो	-	ग०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामर्मोहितः विषबुद्धयामयं मुख्यं पिबति -

विषबुद्धयामयं मुख्यं पायते भ्रमरैर्यथा ।
तथा विषात्मकमिदं मुखं मुञ्चति मोहितः ॥५६॥

कामविषदग्धानां जीवनमपि दुर्लभम् -

जाड्येषु पामराः केचित् विषं पात्वाऽपि कुर्मगाः ।
न कामविषपीतस्य जीवितं दुर्लभं भवेत् ॥ ५७ ॥

कल्पना वह्निर्नित्यं दहति -

यथा हि नरके वह्निर्दहत्यदृविचारिणम् ।
तथा काममयो वह्निर्दहते हि विवेकिनः ॥५८॥

कामाग्निः हिंसक एव -

मृतिवारमयो वह्निः प्रेतानेव दहत्यपि ।
दहते हिंसको वह्निर्नृणां यौवनारम्भकः ॥५९॥

काममोहितः सर्वथा दग्धो भवति -

एवमाग्नेयं तावत् पारदार्यं समन्ततः ।
सर्वतोभयदर्शेण दह्यते काममोहितम् ॥६०॥

१-	विद्युण्णानिवायेदं	- ५०,८०	२-२	मुखंमुञ्चति-	५०,८०
३-	भ्रमरैः	- ५०,८०	४-	पीवा -	५०,८०
५-	कनन:	- ५०,८०	६-	कामेo -	५०,८०
७-	oदहु	- ५०,८०	८-	oमया -	५०,८०
९-	मृत्युत्पपाशमया	- ५०,८०	१०-	वन्हौ -	५०,
११-	तिव्यक्तु	- ५०,८०	१२-	oयौवनारo	५०,८०
१३-	तावः	- ५०,८०	१४-	पारदार्यं:	५०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयासक्तं मनः व्यसने पातयति -

विषयेषु सदा चित्तं धावन्तं[1] वञ्चतं मनः ।
न स्थाप्यं[2] व्यसने मूढ पश्यसि यद् भविष्यति ।।६१।।

व्यसने समुत्पन्ने पारतन्त्र्यं भवति -

कामेषु रमते चित्तं व्यसनेनावबुध्यते ।
(नै०३७ क०) व्यसनेऽपि समुत्पन्ने स पश्चात् परितप्यते ।।६२।।

कामनोहिता मदकुम्भमपि न पश्यन्ति -

यथा कुम्भदैर्मोहा देवाः प्रवृत्तिदुर्बलाः[4] ।
भ्रमन्ति प्रार्थिताः कामं पश्यन्ति मदकुम्भवत् ।।६३।।

कामेषु विरक्तो नाराय भवति -

विरज्यन्ति हि ये देवाः कामेष्वाहतचारिषु[6] ।
व्यतिरेकेषु[7] ते पश्चात् प्रतिबुध्यन्त्यमेधसः[9] ।।६४।।

कामाः परमवञ्चकाः भवन्ति -

न च पश्यन्ति विकुर्वाणान्[10] पारवञ्चिताः ।
प्राणिनां मधुरा जाताः कामाः परमवञ्चकाः ।।६५।।

१-	धावते	- क०, ख०	२-२	तं त्वक्यं	- क०, ख०
३-	पश्यन्ति	- क०, ख०	४-	०दूर्बला	- ख०,
५-	तरन्ति	- क०, ख०	६-	कामेषु०	- क०, ख०
७-	व्यतिरेषु	- क०,	८-	कृते	- क०, ख०
	व्यतारेषु	- ख०,	९-	०यन्त्यमेधसा	- क०, ख०
१०-	०कुर्वाणि क०	- क०, ख०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामं प्रति न विरचेत् -

आशस्व सक्तुरः कौटिलः[1] पद्मपत्रस्तथा ।
दृष्ट्वा नष्टा पुनः कामा न तेषां विरचेत्[2] पुमान्।।६६।।

विषयं परित्यज्य श्रेयसे मनः कर्तव्यम् -

विषयात् कर्मणां तावत् सर्वं[3] नरश्चैव च:।
तस्मात्कृत्यन्ततस्त्यक्त्वा[4] श्रेयसे क्रियतां मनः।।६७।।

रागद्वेषमोहाकृष्टा अशुभकृत्यकारिणो भवन्ति -

रागेण रञ्जिताः पूर्वं द्वेषेण च तिरस्कृताः।
मोहेन मोहिताश्चैव तेऽशुभाकृत्यकारिणः[5]।।६८।।

कामविमोहितः पतङ्गसमो नरकाग्निना दह्यते -

कामार्थानेषाति[6] बालः पुनः कामविमोहितः ।
स पतङ्गसमो[7] मूढः दह्यते नरकाग्निना।।६९।।

कामवशगाः सुरलोकादपि पतन्ति -

अवश्यम्भावि[8] पतनं सुरलोकात्[9] समन्ततः ।
न ज्ञात्वा कामवशगो न स्यादिह कथंचन।।७०।।

१-	कौटिला	- ५०,६०	२-	विरचेत	- ५०,६०
३-	सर्वं	- ५०,६०	४-	०त्यक्त्वा	- ५०,६०
५-	तेऽशुनाकृत०	- ५०,६०	६-	कामानर्थे०	- ५०,६०
७-	०समा	- ५०,६०	८-	०म्भावि	- ५०,६०
९-	०लोके	- ५०,६०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामवशगा: नरके पतन्ति -

कामेन वञ्चिता: सत्त्वा: कामेन च विमोहिता: ।
कामपाशावकृष्टास्ते पतन्ति नरके सदा ।। ७१ ।।

कामव्यसनेन मनुष्या: नित्यं नरयं गच्छन्तीति स्वहिते मन: कर्तव्यम् -

तदेतद्[1] व्यसनं सत्त्वा स्वहिते क्रियतां मन: ।
मनसापि स्वदान्तेन नानुतप्यन्ति देहिन: ।।७२।।

कामानलदग्धा कामवेगेन मूढा भवन्ति -

मनोविक्षोभ ये दृष्टा: कामवेगेन सर्वदा ।
ते मूढा मृत्युवशगा[2]: कामानलदग्धा नरा: ।।७३।।

कामानां क्वापि शान्तिर्न भवति-

(ने०३८८०) न तृप्तिरस्ति कामानां तृष्णया[3] हितकारिणाम् ।
तृष्णापि तृप्तिजननी[4] मनो नैव हि तृप्यति ।।७४।।

ज्ञानदानैरेवेन्द्रियाणां विषयेभ्यस्तृप्तिर्जायते -

न जातु विषयैस्तृप्तिरिन्द्रियाणां[5] भविष्यति[6] ।
यदि न ज्ञानदानेन शमयिष्यन्ति ते नरा: ।।७५।।

नारीसेवनेन नाश: सुनिश्चित: -

योषित: सेव्यमाना हि वितर्कैस्तमालिका: ।
प्रवर्धन्ति[7] यथा वा लनवह्निना समुदाहृत:[8] ।। ७६।।

१- तदेत - क०,ख० | २-वशगा - क०,ख०

२- तृष्णा - क०, | ४- स्त्रीप्रजन: - क०,

तृष्णाह - ख० | ५- विषयै तृप्तिरिन्द्रियाणां - ख०,

६-६ क०,ख० पुस्तकयो: नास्ति । | ७- प्रवर्तिप्रवर्धन्ति - क०,ख०

८- समुदीरित: - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कामाग्निदग्धाः क्वापि शान्तिं नाप्नुवन्ति -

तं मत्वा वैरमेतु नित्यं कामोऽग्निदाहितः[1] ।
कामान् शमयति[2] ज्ञानी[3] बुद्धतत्त्वविविक्तकः ।।७७।।

विषयतत्परा भ्रान्तमनसः मोहवेष्टितम् रमन्ते -

ये नित्यं भ्रान्तमनसो[3] नित्यं विषयतत्पराः ।
रमन्ते[4] विबुधाः सर्वे तत् एवं मोहवेष्टितम् ।।७८।।

कामो विषयाग्निमिवर्द्धते -

दैव्यमानो[5] हि विबुधैर्विषयाग्निर्विवर्धते ।
पाशेनानेन संयुक्तो वह्निर्वायुसमीरितः ।। ७९।।

रागविवशाः अमरा अपि पतन्ति-

अमरा रागविवशा नित्यं विषयतत्पराः ।
देवलोकात् पतन्त्येते मोहरागेण वञ्चिताः ।।८०।।

विषयैः रमन्तो मूढाः दुःखमाप्नुवन्ति -

रमन्ते[7] विषयैरेते रमते तद्गतमानसैः ।
न च विन्दन्ति यद् दुःखं वियोगो भविष्यति ।।८१।।

वियोगजं दुःखं कष्टप्रदमेव -

यदेतत् सुखमेवादौ[8] दिव्यं पञ्चगुणान्वितम्[9] ।
वियोगजस्य दुःखस्य[10] कलां नार्हति षोडशीम् ।।८२।।

दोषवर्ज्यो[3] गुणाढ्यो[3] पुरुषः पुरुषोत्तमः ॥३०॥

सुखोदयं सुखोदर्कं सुखेन नारपच्यते ।
सुखेन[4] लभते सत्यं सत्यं[5] निर्वाणगामिकम् ॥३१॥

दुःखोदयं कटुकफलं दुःखेन सह पच्यते ।
अनृतं सर्वदुःखान्तं[6] कः पुमान् न विवर्जयेत् ॥३२॥

नान्यदेशागतं सत्यं नान्यस्मात् प्रार्थ्यते[7] हि तत्[8] ।
सर्वतीर्थोत्तमं[9] सत्यं न तीर्थसलिलावृतम्[10] ॥३३॥

(ने० ६४ अ०) दानानां[11] न परं दानं सत्यं सुखेन देहिनाम्[12] ।
दोषघ्नानां परं तच्च सदा दुःखानिषूदनम्[13] ॥३४॥

अमृतञ्च विषञ्चैव जिह्वापार्श्वे[14] स्थितं नृणाम् ।
अमृतं[15] सत्यमित्युक्तं विषं तूक्तं[16] मृषावचः ॥३५॥

१-	पेरुषाः	-	क०	२-२	०याणानां	-	क०,ख०
३-३	दोषवर्ज्या गुणाढ्यो	-	क०	४-	सुखेन	-	क०,ख०
५-	क०ख०	कुशलकर्माः नास्ति		६-	०दुःखान्ति	-	क०,ख०
७-	प्रार्थ्यते	-	क०,ख०	८-	नतु	-	क०
९-	०तिर्थोत्तमं	-	क०	१०-	०सलिलावृतं	-	क०
११-	दानानाञ्च	-	क०,ख०	१२-	देहिनानां	-	क०,ख०
१३-	०निसुन्दनं	-	क०	१४-	जिह्वापार्श्वस्थितं		ख०
१५-	अनृत्य	-	क०,ख०	१६-	विषवच०	-	क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कन्यानृतमभिप्रेतं कस्य सत्यं ध्रुवं स्थितम् ।
विवाहन्तु कन्याभिमतं तस्येष्टं स्यान्मृषावचः ॥३६॥

विकीर्ण[1] निश्चितं नार्थं[2] मृषावादेन[3] निश्चितम् ।
मूलकर स पुमानस्ति यो मिथ्यामभिभाषते ॥३७॥

नास्त्यनृते[5] हि हितं पथ्यं[4] परस्य[4] न कथञ्चन ।
पश्चात्तु परदुःखाय तत् कथं सेव्यते नृभिः ॥३८॥

देहे[7] देहे[6][7] मया[6] दृष्टं जन्ममृत्युसहस्रकम् ।
कनयति परः सहस्राणि नास्त्यनृतं[8] वचः[8] ॥३९॥

अभिजातस्य निष्कर्षो द्विजातीनां च भूषणम् ।
दर्शनं[9] मोक्षमार्गस्य सत्यमित्यभिधीयते ॥४०॥

तृष्णानदी कुमाराणां सतां सत्येन[10] कर्षणम् ।
पूर्ववत् सत्यमित्युक्तं परं सुगतदेशितम् ॥४१॥

अनादिनिधने[11] लोके तृष्णापाराङ्गता नराः[12] ।
नास्त्यत्राणं[13] यथा सत्यमिति धर्मविदो विदुः[14] ॥४२॥

१-	विकीर्णानि	-	४०,८०	२-	नार्थं	-	८०
३-	०देवा	-	४०,८०	४-४	०स्यानु	-	४०,८०
५-	पश्चात्त्व	-	४०	६-६	देहमहं	-	४०,८०
७-७	ज्यात्यत्पर:	-	४०	८-८	०नृतश्च	-	४०,८०
९-	दर्शकं	-	४०,८०	१०-	सत्यनास्त्येन-		४०,८०
११-	०निधिले	-	४०,८०	१२-	४०,८० पुस्तकयो: नास्ति।		
१३-	नास्त्यत्राणं	-	४०,८०	१४-	विदु:	-	४०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अभिध्यानाशो न सेवनाय -

(ने०६४ ख०) सत्वकथ्या सदा[१] क्रोशा[२] वक्रुबृध्या[३] यथा नगाः ।
हतास्ते कुलजाः ज्ञेया अभिध्यापरिवर्जिताः ॥४३॥

परवित्तसमेदं[४] अपादुर्थं[५] परिवर्ज्यते[६] ।
अभिध्यामानवं पापं[७] सेवितं न विचारणैः[८] ॥४४॥

दह्यतोऽविकृत[९] आत्मा सेंदीप्तिरिवानलः[१०] ।
अभिध्यादग्धमनसः[११] कारणान्नोपलभ्यते[१२] ॥४५॥

व्यापादः सत्त्वान् मोहयत्येव -

तस्मात् तत् सर्वदा वर्ज्यं कटुकाशाविषादयम्[१३] ।
व्यापादमोहिताः सत्त्वा नित्यं तद्गतमानसाः ॥४६॥

न शान्तिमधिगच्छन्ति सर्पा इव विषोल्बणाः ।
अथ क्रूरस्वभावा[१४] ये व्यापादपरमा नराः ॥ ४७॥

न तेषां विद्यते शान्त्यमादित्यैव[१५] यथा[१६] तमः ।
न धर्मो[१७] नार्थं निर्वाणं न धर्मा[१८] न च बान्धवाः ॥४८॥

१-	०सदा	- ख०,ग०	२-	हतकुलजाः	- ख०,ग०
३-३	ख०,ग० पुस्तकयोः नास्ति		४-	०समेदं	- ख०
५-	०पादेवं	- ख०,ग०	६-	०परिवर्ज्यते	- ख०,ग०
७-	पापं	- ख०	८-	विचारण	- ख०
९-	दह्यवकृत	- ख०,ग०	१०-	०दिप्तिरिवानल	- ख०
११-	०नसं	- ख०	१२-	०णापोपलभ्यते	- ख०,ग०
१३-	०काशा	- ख०,ग०	१४-	दाडाः	- ख०,ग०
१५-	शान्त्यमादित्य	- ख०,ग०	१६-	तथा	- ख०,ग०
१७-	निवारण	- ख०,ग०	१८-	धा	- ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रदान्ते पुरुषान्[1] सर्वान् व्यापादात्तचेतसः ।
तमसामाकरोहृदयेन व्यापाद[2] इह कथ्यते ॥४९॥

व्यापादयति अर्थं व्यापादः पारकीर्तितः[3] ।
अव्यापादः परं श्रेयो न व्यापादः कथञ्चन ॥५०॥

अव्यापादपरा ये[4] तु ते यान्ति पदमच्युतम्[4] ।
निष्कालधवादो योऽधर्मवादी न धार्मिकः ॥५१॥

(ने०६५ अ०) स चौरः सर्वलोकस्य न चौरः प्राकृतः स्मृतः ।
धर्मवादी नरो यस्तु वदते धर्ममेव च ॥५२॥

स याति शाश्वतं स्थानं यत्र गत्वा[5] न शोच्यते ।
मिथ्यावचोरतः[6] पुमान्[6] लौकिकः सम्प्रकीर्त्यते ॥५३॥

लोकोत्तरैः कल्पशतैः कदाचित् कथ्यते न वा ।
तस्मात् लोकोत्तरं वाक्यं लौकिकं न कथञ्चन ॥५४॥

संसारबन्धनं दृष्टं लौकिकं विषवद्[7] वचः ।
तृष्णारतः सदा पुण्यान्मुच्यतेति सुनिश्चितम्[8] ॥५५॥

लोकोत्तरो नरो[9] धन्यो विद्वद्भिः समुदाहृतः[9] ।
हितं तत्त्वं च यो मूढो न गृह्णाति गुरोर्वचः ॥५६॥

१- पुरुषाः - क०,ख०
२- इव - क०,ख०
३- ०कीर्तिते - क०,ख०
४-४ ०व्येत्पुनाति पदमच्युते- क०
५- गत्वा - क०,ख०
६-६ ०चोवचनरत - क०
७-७ पुण्यमवश्यमुच्यकारणं- क०,ख०
८-८ ०नरं बरोधन्यं विद्वद्भि- समुदायते - क०,ख०
९-९ ०दात - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्यवादी सदा देवताभिः पुरस्कृतः -

स परत्र व्यसने प्राप्ते तप्यते स्वेन चेतसा ।
सत्यवादी सदा दान्तो[1] देवताभिः पुरस्कृतः ॥५७॥

प्रि[2]यो[4] भवति लोकस्य परत्र[5] देवेषु मो[5]दते[3] ।
प्रियो भवति लोकस्य परत्र स्वान्तेन वर्तते ।
दर्शनीयं मुखञ्चास्य देवलोकेषु जायते ॥ ५८॥

अनृतवादी पुरुषः[7] सर्वसत्त्वोपघातकः[6][8] ।
तमोनिश्चयसंकाशो जीवन्नपि मृतः स्मृतः ॥५९॥

कथं न पतति[9] जिह्वा वाक्यसंस्तुतिकर्तृका ।
(ने०६५ ख०) यो मृषा वदति[10] वाचं सद्भूतगुणनाशिकाम् ॥६०॥

मुखे सन्निहितो व्यालो मुखे सन्निहितोऽनलः ।
मुखे[11] संज्वलितो वह्निर्[11]यो वाचा भाषते मृषा ॥६१॥

जिह्वा संगृह्यते पापैः[12] नरकस्याग्रहेतुकैः[13] ।
देशा च धर्महेतूनां मृषावादः प्रवर्तते ॥६२॥

न तस्य माता न[14] पिता न बुद्धो नापि सम्वरः ।
यः पापबुद्धिः पतितो मृषावादं प्रभाषते ॥६३॥

१- दात - ख०,ग०
२- शिवबुद्धे यं पंक्तिः - ख०,ग० पुस्तकयोः ।
३- मोदतो - ख०
४- प्रिया - ख०
५-५ परत्र स्वर्गं याति - ख०,ग०
६- ०पतापकः - ख०
७- ०तमोनिश्चयकारी - ग०
८- मतेः - ग०
९- पतते - ख०
१०- ०वदते - ख०
११-११ मुखात्प्रज्वलन्तोर्वह्निन - ग०
१२- पापे - ख०
१४- ~~नरो~~ ना - ख०
१५- ०द्रुतकः - ख०,ग०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अकस्मात्लघुतां[1] याति पङ्कमिव परिवर्तते ।
मुच्छी देवताभिश्च यो वाचं भाषते मृषा ॥६४॥

अभ्यूह्य तथा वाक्यं यथा विचारित[2] क्रोधनस्य च ।
चपलस्याल्पभाग्यस्य[3] स्थितं दुःखमनन्तकम् ॥६५॥

परस्य दुःखं दृष्ट्वाऽपि[4] सत्य: सत्यविपातक: ।
परव्यसनवत् तज्ज्ञ: पुमान् नरकगामिक: ॥६६॥

ये कामादिना मर्त्या न च तत्कारिण: सदा ।
तत्र सहस्राण्यर्बुदानि षट्कल[5] विंशतिवार्बुदानि ॥ ६७ ॥

सत्यमेव स्वर्गस्य, निर्वाणस्य च सोपानम् -

(नै० ६६३०) सत्यं स्वर्गस्य सोपानं निर्वाणद्वारमेव तत् ।
तस्मात् सत्यपरो नित्यं नित्यं धर्मरता स्मृता: ॥ ६८ ॥

धार्मिकमेवारं स्थानं प्रयाति पुरुषोत्तम: ।
वर्जयेदनृतं धीमान् निन्दितं तत्त्वदर्शिभि: ॥ ६९ ॥

॥ इति वाक्कर्मा ...दश: ॥

---:०:---

१- क्रमा लघुत्वं - क०   २- व्यावक्रयचारित- क०

३- चपलस्याल्पभाग्यस्य- क०   ४- विशेषि- - ख०
विशेषी - ग०

५- इतोऽग्रे आपृष्ठचतुष्टयं केचित् श्लोका:
सन्ति, ये प्रथमपुस्तके भ्रष्टा: ।
द्वितीयपुस्तकेऽपि दशदाभिधानि भग्नपृष्ठा:
तत्वत् निरर्थकपदानां संग्रहमात्रम् । तेन
न वयं श्लोकान् पारखतुं समर्था: अभूम ।
अत: श्लोकानां स्थानं रिक्तमस्ति इति
सिद्धकोऽस्मत्पादनम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।१३। कर्मवर्गस्त्रयोदशः

शुभाशुभकर्मणां फलभोगः -

शुभानामशुभानां च कर्मणां फलनिश्चयः[1] ।
भुज्यते सुकृतं सर्वं कर्मबद्धा हि देहिनः ॥१॥

यद्दृश्यसङ्गो[2] क्रियते कर्म तत्स्वृद्धिरनुभुज्यते ।
विद्यमानेन मूढेन तृष्णानगरवासिना[3] ॥२॥

स्वयमेव फलं भुङ्क्ते --

सहायैर्बहुभिः[4] सार्धं कुरुते कर्म दुष्कृतम् ।
एकाकी कर्मणस्तस्य फलं भुङ्क्ते भवे भवे ॥३॥

कर्मणामविसंयोगः सर्वैः स्वजनबान्धवैः ।
शुभाशुभं परं लोके गच्छन्तमनुगच्छति[5] ॥४॥

यत्र[6] प्रयान्ति पुण्यानि गन्धस्तत्रानुधावति[6] ।
तथा शुभाशुभं कर्म गच्छन्तमनुगच्छति।
स्वकर्मफलदायादा[7] प्राणेन कर्मयोनिनः ॥५॥

१- अष्टाशीति श्लोकात्मकोऽयं वर्गः पाण्डुलिपेः पुष्पिकायां संयोजनवर्गं नाम्ना संबोधितः। परं अत्र विषयवृद्ध्या षट्त्रिंशत् श्लोकाः कर्मणा सम्बद्धाः अवशिष्टाश्च ज्ञानेन। अतः अत्र षट्त्रिंशत श्लोकपर्यन्तं त्रयोदशः कर्मवर्गः, अवशिष्टश्च संयोजनवर्गो बोध्यः।

२-	क०, ख० पुस्तकयोः नास्ति	३- तृष्णान्वर	-	क०
४-	सहायेबहुभिः - ख०	५- ०मच्छति	-	क०
६-६	क० पुस्तके नास्ति	७- ०फलफलदायादा-		क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सुकृतैः सुरलोकेषु दुष्कृतैश्च तथाप्यधः ।
यद्दुःखं कर्मफलजं जायते कटुकोदयम् ॥६॥

(नं० ६६७०) तस्योपममसुखं त्रिषु धातुषु जायते ।
त्रिदोषजं त्रिविधोत्थं त्रिषु धातुषु[१] पच्यते॥७॥

तस्य कर्मविपाकस्य त्रिषु धातुषु लक्ष्यते[२] ।
हेतुप्रत्ययसामग्री[३]समुत्थं च क्रमेण[४] तत् ॥८॥

अन्यकृतकर्मणः फलं नान्यः भुङ्क्ते -

न ह्यन्येन कृतं पापमन्येन[५] परिपच्यते[५] ।
सुकर्मफलदायादः प्राणिनां सर्व एव हि॥९॥

पूर्वोक्तानां त्रिविधानां एकस्य कृत एव विपाको भवति -

कर्मणास्त्रिविधस्यास्य न चाप्यन्यस्य[६] पच्यते ।
चत्वारिंशद्विपाकस्य घोरं भवति वेष्टितम्॥१०॥

अत्र दृष्टान्ताः -

एकः करोति कर्माणि[७] एकश्च फलमश्नुते[८] ।
एकस्तरति दुर्गाणि सहायो जायतेऽपरः॥११॥

कल्पकोटी कर्मयस्तु[९] कुरुते[१०] कर्म दुष्कृतम् ।
न कर्मो अनशतानां मुच्यते हि कथञ्चन[१०]॥१२॥

१- धातुषु - क०, ख०
२- लक्षणे - क०
३- ०धष्टं - क०, ख०
४- गेव - क०, ख०
५-५ ०मन्यस्यपरि -क०, ख०
६- नाप्यस्य- क०
७- दुर्गं - क०, ख०
८- ०मेकम - क०, ख०
९- ०सतानामवर्ता-क०, ख०
१०-१० मुच्यते कौः:क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न ह्यन्येन कृतं कर्म संक्रामत्यपरस्य[१] तत् ।
न मन्येऽनादिनिधनं अस्मिंल्लोके न चापरः॥१३॥

सुखोदयं दुःखास्वादं येन दुश्चरितं कृतम् ।
तेन चरति[२] संसारे प्रेरिते कर्मवायुना ॥१४॥

<u>कस्य धर्मो वर्धते ?</u>

अनपेक्षिततत्त्वस्य व्याकुलीकृतचेतसः[४] ।
वर्धते[५] सकलो धर्मः धर्माकृतमनोहरः[५]॥१५॥

<u>के नरकं गच्छन्ति ?</u>

मनसा वञ्चिताः सत्त्वा मनसा विप्रलोभिताः।
गच्छन्ति नरकं पापास्तमस्तमपरायणाः॥१६॥

तमो वृते हि संसारे दुर्लभं[६] बुद्धशासनम्[७] ।
(नै० ६७ अ०) दुःखाद्दुःखतरं यान्ति येषां धर्मो न रोचते॥१७॥

अनादिमतिसंसारे कर्मजालावृता प्रजा ।
जायते म्रियते[९] चैव[१०] स्वकर्मफलहेतुना॥१८॥

जायन्ते नरके देवा नारकेयास्तथाविधाः[११] ।
मनुष्याः प्रेतविषये नरकं वा प्रयान्ति हि॥१९॥

१-	संक्रामेतपरस्य	- क०, ख०	१-	संक्रामेतपरस्य	-ग०, घ०
२-	चरित	- क०, ख०	३-	अनवेक्षित०	-ग०, घ०
४-	व्याकुल०	- क०, ख०	५-५	वर्धतेत्सकलो धर्मकृत-मनोहरा	-ग०, घ०
६-	दुर्लभे	- क०			
७-	०शासने	- क०, ख०	९-	जायते	-ग०
८-	संस्कृतव्याकरणनियमदृष्ट्या 'चैयः' इति पाठः साधुः।				
१०-	च	- क०	११-	०नारकिय	-ग०, घ०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्योन्यप्रभवं दृष्टं दुःखं वा यदि वा सुखम् ।
क्लेशयमर्दिभवे[1] अन्यमन्यपराधि कृतं च तत् ॥२०॥

असंख्येयकृतं कर्म संसारे प्राणिभिः सदा ।
तत्र शून्यं बुधैर्गन्तुं वर्जयित्वा तथागतैः ॥२१॥

नाधर्मस्य फलं साधु[2] विपरीतं[3] न पच्यते ।
हेतुसदृशता[4] दृष्टा बलस्य विविधस्य वै ॥२२॥

सादृश्यस्य[5] हेतुफलं विपरीतं न वास्तु हि[6] ।
संस्कृतानामरूपाणां[7] हेतुः प्रत्ययसम्भवः[8] ॥२३॥

सहेतुकमेव सर्वं कर्मफलं भवति, नरकपातस्तु कर्मणस्य एवं -

नाहेतुकं फलं दृष्टं नरके तु विशेषतः ।
हेतुसङ्घातसंघर्षं[9] नरकेषु विपच्यते ॥२४॥

कृतोपरतगाढानां[10] नियतं[11] पापकामिनाम्[12] ।
कर्मणां फलसम्बन्धो नरकेषु विपच्यते ॥२५॥

देशनां प्रति काले तु यत् कर्म[13] विनिवर्तते[13] ।
तस्य नेष्टं फलं दृष्टं तत्त्वमार्गविदर्शिभिः ॥२६॥

१-	अन्येश्वरादि	- क०,ख०	२-	साधु	- ख०
३-	विपरितं	- क०,ख०	४-	०सादृश्यता	- क०,ख०
५-	शाठ्यस्य	- क०	६-	हो	- क०,ख०
७-	०नामामा	- क०,ख०	८-	संभवेत्	- क०,ख०
९-	०शूर्ता	- क ख०	१०-	०परिख०	- क०,ख०
११-	नियता	- क०	१२-	०नामिनं	- क०,ख०
१३-१३	कर्मनिवर्तते	- क०,ख०			

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उदाहरणप्रदर्शनपूर्वकं फलस्य कर्माधीनत्वमेवेति -

दीपाधीना प्रभा यद्वत् कर्माधीनं फलं तथा ।
(नै० ६७ख०) अन्योऽन्यफलसम्भूतः संस्कृतः सर्व एव हि ॥२७॥

कार्यकारणभावेनैतस्य प्रकाशनपूर्वकं बौद्धदृष्ट्या प्रतीत्यसमुत्पादसमर्थनम्-

अन्योन्यहेतुका दृष्टा अन्योन्यवशवर्तिनः ।
सादृश्यस्यानुबन्धेन[1] दृश्यन्ते तत्त्वदर्शिभिः ॥२८॥

नाहेतुफलसन्धानमीश्वरादिभिरास्थितम्[2] ।
भवन्ति संस्कृता धर्मा देशितास्तत्त्वदर्शिभिः[3] ॥२९॥

अनादिमति संसारे हेतुप्रत्ययसम्भवे ।
सादृश्यं कर्मणा दृष्टं विपरीतं न कल्प्यते[4] ॥३०॥

बुद्धस्य स्वरूपम्-

तत्स्थेषु कर्मवशगाः प्राणिनः कर्महेतुकाः ।
स कर्मफलतत्त्ववशी बुद्ध इत्यभिधीयते ॥३१॥

केषां शान्तिः न विद्यते ?

मार्गामार्गविरक्ता[7] ये मूढा बुद्धस्य शासने ।
न[8] तेषां विद्यते शान्तिरादित्यस्य तमो यथा ॥३२॥

१- सादृश्यानुबन्धेन - क०,ख० २- ०थानामीश्वरादिभिरास्थितः - क०,ख०
३- ०देशिभिः - क०,ख०
४- कल्पते - क०,ख० ५- तत्त्वशः - क०,ख०
६- क०,ख० पुस्तकयोः नास्ति। ७- ०विरागये - क०,ख०
८- क०,ख० पुस्तकयोः नास्ति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्मायत्तं सुखं दुःखं सुखायत्तं मनस्तथा ।
मनोऽवबद्धास्ते[1] धर्मा ये व्युत्पत्तिविचारिणः[2] ॥३३॥

सुचरितस्य कर्मणः फलम् -

अनित्याः सर्वसंस्काराः[3] जलबुद्बुदसन्निभाः ।
तस्मात् सुचरितं कर्म इह लोके परत्र च ॥३४॥

दुष्टं[4] कर्मफलं लोके दृष्टा एव विचित्रता ।
यः प्रमादपरः पुंसस्तस्यात्मा सुखमप्रियः ॥३५॥

कर्मबन्धनं उच्यते -

कर्मरज्ज्वातिदीर्घया दुष्प्रमोक्षसुगाढया[5] ।
बद्धा बाला न गच्छन्ति निर्वाणपुरमुत्तमम् ॥३६॥

॥।इति कर्मवर्गः त्रयोदशः ॥।

---::---

१- मनोनुबद्धा - क०,ख०
२- व्युतिप्रतिविचारिणः - क०,ख०
३- क०,ख० पुस्तकयोः नास्ति ।
४- दुष्टा - क०,ख०
५- ०दृढः - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१४) संयोजनवर्गः चतुर्दशः

ज्ञानेन निर्वाणाधिगमः -

(ने० क० ख०) ज्ञानशस्त्रेण[१] तां[१] छित्वा निर्मुक्ता विगतज्वरा ।
प्रयान्ति निर्वृतिं धन्या यत्र ज्ञान्यैव[२] विद्यते।।१।।

सदृशं हि फलं हेतोः कथयन्ति मनीषिणः[३]।
हेतोरसदृशं नैव फलं भवति[४] देहिनाम्।।२।।

हेतुप्रत्ययसम्बद्धकर्मप्रत्ययसङ्गताः[५] ।[६]
यया बद्धा हि संसारे प्रमुच्यन्ति न देहिनः।।३।।

परम शान्तिः उपायः -

तां विश्लिष्य सुसम्बद्धां[७] गाढां दुर्विमोक्षां[८] पराम् ।
गच्छन्ति परमां शान्तिं यत्र दुःखं न विद्यते ।।४।।

कर्मणा नियतं जन्तुः कर्मणा परिपच्यते[९] ।
सूक्ष्ममपि संसारे च सुखं नैवोपलभ्यते ।।५।।

दुःखे दुःखाभिषक्तानां[१०] जन्तूनां मूढचेतसाम् ।
सन्मार्गदेशको नास्ति योऽस्माद्दुःखात् प्रमोचयेत्।।६।।

१-१	०शस्त्रेयातं -	क०, ख०	२-	ज्ञानैव -	क०, ख०
३-	मणिषिणः	क०,	४-	पश्यति -	क०, ख०
५-	०प्रयतसङ्गता	क०, ख०	६-	क० ख० कृतकर्मा:नास्ति।	
७-	०सुसंबद्धां	क०, ख०	८-	दुर्विभाषा -	क०
९-	परिचयते	क०, ख०	१०-	०भिषक्तानां -	क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ये न धर्मपरा नित्यं ये न सत्यपराः सदा ।
ये च योनिरता[1] नित्यं येषां दुःखं न हीयते ॥७॥

धर्मः इह परत्र च सुखावहः -

मातृवत् पितृवच्चैव मित्रवद्[2] बन्धुवत् सदा ।
धर्मो वै देहिनां बुद्धैरिह लोके परत्र च ॥८॥

त्र्यात्यावस्थिताः सत्त्वाश्चित्तदोषवशमागताः[3]।
त्रिधातुगतिका[4] नित्यं त्रिलोक्यां[5] पतिताः जनाः[5] ॥९॥

त्रिकर्मपान्तवशगाः स्त्रीपानादिपराश्च ये[6]।
न भवान्मुक्तिगतिकाः स्वभूमौ विचरन्ति ते ॥१०॥

केषां दुःखं न विद्यते ?

(नै० क० ख०) त्रिरत्ने[7] न प्रमाद्यन्ति[8] त्रिबोधिवशगाश्च[9] ये ।
त्रिबुद्धिवर्जिता ये तु तेषां दुःखं न विद्यते ॥११॥

त्रिकालावस्थानिरता विज्वरास्तत्त्वदर्शिनः ।
त्रिमार्गकृति सन्तुष्टा वीतशोका[10] निवृत्तिगाः[10] ॥१२॥

त्रिराशिसमवेता[11] ये त्रिकर्मप्रविचारिणः ।
न ते वत्स्यन्ति संसारे वीतदोषा[12] गतज्वराः ॥१३॥

१-	०नरता -	क०, ख०	२-	क०, ख० पुस्तकयोः नास्ति।	
३-	०वशगासदा -	क०	४-	गतिकांतिका	- क०
५-५	त्रिवेदनासहस्रवनित्यं-	क०, ख०	६-	ते	- क०, ख०
७-	त्रिरत्न -	क०	८-	क०, ख० पुस्तकयोः नास्ति।	
९-	प्रमादेष्वादेषु	क०, ख०	१०-१०	विगतशोका विमर्दिते-	क०, ख०
११-	त्रिराशिसमर्पिता	क०, ख०	१२-	वित०	- क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मार्गामार्गविधिज्ञा ये भावाभावविचिन्तकाः ।
मैत्रीभावविविक्ता[1] ये ते यान्ति परमां गतिम्।।१४।।

नरः कान् भजेत् -

अनाविलेन[2] मनसा[3] विप्रसन्नेन चेतसा[4] ।
सर्वदा धर्मवशगान्[5] धीरान् विप्रान् भजेन्नरः[5]।।१५।।

सत्यमेव[6] प्रपन्ना ये स्मृत्या[7] हित्वा[8] मनोमलान् ।
भावाभिलाषाद् विरता मुक्ता निःसंशयं हि ते।।१६।।

नित्यं दुःखदुर्बद्धा[9] विप्रलब्धा ह्यनेकशः ।
नरा निधनतां यान्ति प्राणिनो मोहवञ्चिताः।।१७।।

कैः दुर्गुणैः स्वर्गो न लभ्यते -

नाक्रोश्यमनपत्राप्यं[10] कौशेयं[10] पापमित्रता ।
नैतानि नाचरीतानि सभ्यो रज्येन्न पण्डितः।।१८।।

आक्रोश्यमनपत्राप्यं नित्यं पापानुचारिणः ।
नरः प्रपातात्[11] पतति[11] च पश्चात् प्रतिबुध्यते।।१९।।

क्रोधेर्ष्यालस्यानभिद्रोहश्च मनस्तथा ।
(नै० ६६ ३०) मोहमादाप्रदास्ता[12]श्च न स्वर्गं प्रभवन्ति ते।।२०।।

१-	०भावविचिन्ताये - ख०	२-	अनाविलनुमनगा- ख०,ग०
३-	ख०,ग० पुस्तकयोः नास्ति	४-	ख० ग० पुस्तकयोः नास्ति।
५-५	अश्वसु विश्लेषावाराविप्र- सुवार्थेनरः - ख०,ग०	६-	सत्यम - ख०,ग०
		७-	स्मृति - ख०,ग०
८-	ख०,ग० पुस्तकयोः नास्ति	९-	नित्यथरा - ख०,ग०
१०-१०	०कुमणांयत्राप्यकौशिय-ख०	११-११	प्रपातात्पतोत- ख०
१२-	०मुदाप्रदाप्राश्च - ख०,ग०		

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मद्यपानममूर्तं च मिथ्यादृष्टिश्च लुब्धता[1] ।
कारणानि च करणस्य व्यापादकुरकर्मता ।।२१।।

<u>कुदृष्टेः कुफलम्</u> -

अदर्शनं परं श्रेयो न कुदृष्टिः कथञ्चन ।
कुदर्शनेन संमूढाः प्रयान्ति नरकं नरा ।।२२।।

अहेतुके हेतुं पश्यन्त्यनित्यं[2] च नित्यम्[3] नराः ।
प्रयान्ति नरकं तीव्रं[4] मिथ्यावादेन वञ्चिताः ।।२३।।

कष्टेन लेशा तेषां मिथ्यादर्शनतत्पराः ।
प्रज्ञाभिमानिनो[5] मूढा मोहयन्त्यपरान् जनान् ।।२४।।

मोहान्धकारगहने पतन्त्येव[6] महार्णवे ।
लोके[7] प्रकृति दुःखेऽस्मिन् हेतुभूता हि ते जनाः ।।२५।।

शराणां[8] तापनं दीर्घं कथयन्ति मनीषिणः[9] ।
चिन्तता या तु दह्यन्ते सर्वतः क्लेशपर्वतैः ।।२६।।

क्लेशनागाद् विमोक्षो यो यस्य ज्ञानपुरःसरः ।
प्राप्यते तीतकैः पैः पुराणैस्तत्त्वदर्शिभिः ।।२७।।

१-	लब्धता	-	क०	२-	दर्शनं	-	क०,ख०
३-	वानराः	-	क०,ख०	४-	तिक्त०	-	क०
५-५	०भिनामूढामोहन्त्य- पराञ्जनां	-	क०,ख०	६-	संतपनि	-	क०,ख०
				७-	लोको	-	क०,ख०
८-	शरारे	-	क०,ख०	९-	मणिभिणः		क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्योऽन्यमतिभि: सर्वो लोकोऽयं विप्रलोभित: ।
न याति परमां शान्तिं यत्र मिथ्या न कथ्यते।।२८।।

नरकहेतव: -

कौटिल्यपापसंसर्ग: कौशीर्यं[1] लुब्धता[2] तथा ।
हेतवो नरकस्यैते शीलस्य हि विवर्जनम्।।२९।।

(नै० ६६ क०) मद्यपानं सदा हिंसा परदाराभिवर्शनम्[2] ।
लोभ: क्रूरा मतिश्चैव हेतवो नरकस्य ते।।३०।।

नाश हेतव: -

पैशुन्यं[3] पापसंसर्गो मिथ्यादृष्टिरसंयम: ।
चापल्यं मनसश्चैव[4] नाशयन्ति नरं सदा ।।३१।।

अविद्या सह पारुष्यै: मिथ्यावागभिमानता ।
न सुखाय भवन्त्येते अस्मिल्लोके न चापरे।।३२।।

के परिवर्जनीया: ?

यस्तै भ्राम्यते लोके इह[5] लोके न चापरे ।
च यस्सम्भ्रामिते[6] लोके ये[7] च[7] दु:खे निमज्जते।।३३।।

१-१	कौशिर्यं लब्धता -ख०, ग०	२-	हिंसावृत्तोऽयं श्लोक:	
३-	पैशुन्यं - क०		क० ख० पुस्तकयो:।	
४-	मनश्चैव - क०	५-	क० ख० पुस्तकयो: नास्ति।	
६-	संभ्राम्यते - ख०	७-७	यश्च	- क ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तच्चैष्टितमविद्यायाः[1] कथयन्ति तथागताः ।
मिथ्यामानाऽतिमानो च सर्वथा परिवर्जयेत्[2]।।
परिवर्ज्याः[3] सदा ह्येते दुःखवृन्दस्य हेतवः।।३४।।

ज्ञानिनः परमोदारा नित्यं क्लेशवधेरताः।
छित्त्वा[4] तद्बन्धनं सर्वं गच्छन्ति पदमच्युतम्।
[5]आदिमध्यान्तकल्याणमस्मिंल्लोके न चापरे।।३५।।

दोषाणां सेवनं[6] दृष्टमविद्यासम्प्रवर्तकम्[7] ।
वर्जनीयाः सदा क्लेशाः सेव्यं ज्ञानमनुत्तमम्।।३६।।

ज्ञानेन मुक्तिर्भवति-

मुक्तिर्भवति ज्ञानेन न च क्लेशैरिहोच्यते ।
ज्ञानाग्निना हि दह्यन्ते क्लेशकाष्ठा न शेषतः।।३७।।

(ने०७०क०) क्लेशैः किमर्थं संरुद्धा मालिनी विषयैरता[8] ।
पुनः काममयं ज्ञानं चक्षुः परलवाचकम्।।३८।।

रागनिन्दा :-

निपातयति[9] सम्बुद्धवाक्यसैकाज्यमोर्मिः ।
सद्धर्मसेनापतिना रागसेना विमर्दिता[10]:।।३९।।

१-	तेचैष्टित० -	क०,ख०	२-	क०ख० पुस्तकयोः नास्ति।	
३-	क० पुस्तकयोः नास्ति।		४-	बन्धनं -	क०,ख०
५-	रादिमध्येकल्यानम० - क०		६-	सेवनं -	क०
७-	०चा प्रवर्तकं -	क०,ख०	८-	विषयरता -	क०,ख०
९-	निपातयति -	क०,ख०	१०-	विमर्दिता -	क०,
				विवर्दिता -	ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उदीरिता सुना वाणी[1] निश्चेतव्या प्रयत्नतः ।
चत्वारो हि विपर्यासा बुद्बुदवच्चकासते[2] ।
लोकधर्मास्तथा चाष्टौ नाशयन्त्यखिलं जगत्।।४०।।

ज्ञानप्लवः सन्तरणसमर्थः -

शालिनी प्रभवा नद्यो वितर्कशतसुस्तराः ।
ज्ञानप्लवं समारुह्य तरन्ति मुनयः शिवाः।।४१।।

केषां मुक्तिर्न विद्यते ?

मूढा ये मूढमनसो नराः कामस्य सेविनः ।
सदा च पञ्चभिः स्थानैर्मुक्तिस्तेषां न विद्यते।।४२।।

अयोनिशोमनस्कारैर्यो वह्निः समुदीर्यते[3] ।
स योनिशोमनस्कारवर्षणैः प्रतिकल्पते।।४३।।

अविद्यासंभवं अन्धत्वं कथं दूरी भवेत् ?

अन्धत्वं[4] चिरकालीत्थमविद्यासम्भवं नृणाम् ।
तदल्पकाले जातेन प्रदीपेन न पश्यति।।४४।।

रागमूढा विपच्यन्ते नरके मन्दमेधसः ।
ज्ञानिनस्तु न नश्यन्ति निर्वाणगमना यथा।।
क्षयो दोषा[5] विनश्यन्ति ज्ञानलोकेन देहिनाम्।।४५।।

१- वाचि - क० २- चकास्तावदेव च- क०
३- समुदियते - क० ४- यमुन - क०
५- दो - क०,ख० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्मादशेषविज्ञानशीलत्वान्निरतो भवेत् ।
अमूढानां प्रणश्यन्ति त्रयो दोषाः शरीरिणाम्।।४६।।

(नै०७० ख०) ज्ञानानलेन मन्दस्य क्लेशेन्धन महत्त्विषः[१] ।
व्याधिनिमग्नतनवः शय्यावेष्टन गोचराः।।४७।।

यत्र याति परं वेदं मनोमोह[२]मयं फलम् ।
यानि दुःखान्यनेकान्यनेका[३] मुच्यते गतीः[४]।।४८।।

पञ्चकैः[५] प्राणिभिर्नित्यमेतन्मोहस्य वेष्टितम् ।
त्रयं वा निर्मिता दोषा यैरिदं दह्यते जगत्।।४९।।

तमग्नि[६] ज्ञानयोगेन[८] निवार्य सुखितो[७] भवेत्[७] ।
तस्माज्ज्ञानाग्निना नित्यं निर्दहेत्[९] क्लेशपर्वतम् ।
क्लेशपर्वतदग्धस्य सुखं परमवस्थितम्।।५०।।

।।इति संयोजनवर्गश्चतुर्दशः।।

---:o:---

१-	महत्त्विषा -	ख०,ग०	२-	मनमो० -	ख०,ग०
३-	दुःखान्यनेकान्यनेकानि-	ख०,ग०	४-	गतिः -	ख०,ग०
५-	पंचाकैप्रमतैः -	ख०,ग०	६-	तानग्नित्र -	ख०
७-७	सुखितस्मामवेत्-	ख०,ग०	८-	०ज्ञानाग्निना	ख०,ग०
९-	०वर्हितं -	ख०,ग०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१५) अथ पापवर्गः पञ्चदशः

पापकर्मस्य अज्ञाता परितापं लभते -

क्रियमाणस्य[१] पापस्य विज्ञेयं कटुकं फलम् ।
यं न विन्दति मूढात्मा पश्चात् स परितप्यते ।।१।।

फलं[२] वै[२] लभते पुरुषः सर्वपापस्य[३] कर्मणः ।
तस्मात् पापं न सेवेत यदीच्छेत् सुखमात्मनः[३] ।।२।।

अल्पादपि[४] महाघोरात् नरकात् पापचेतसः ।
सुखस्यार्थं[५] तु पापानि मूर्खा मोहवशं गताः ।।३।।

न विश्वसेद्धि[६] पापस्याल्पतां[७] नरकात्मिकाम्[८] ।
अल्पेन वह्निनाशैले[९] दह्यन्ते[१०] सर्वतो द्रुमाः[१०] ।।४।।

पापेन नरकं याति[११] पापेन परिदह्यते ।
(ने०७१८०) पापेन नैति[१२] निर्वाणं[१२] नास्ति पापसमो रिपुः ।।५।।

पापाचारो हि पुरुषो न क्वचित् सुखमेधते ।
पापं[१३] तस्मान्न सेवेत यदीच्छेत्[१३] सुखमात्मनः ।।६।।

१- क्रियमानस्य - क० ; २-२ क०, ख० पुस्तकयोः नास्ति।
३-३ परिहेत्सुखमात्मनः - क०, ख० ; ४- अल्पादपि - क०
५- सुखार्थं - क०, ख० ; ६- विश्वसे - क०
७- पापश्य - - क० ; ८- ०त्मिकं - क०
९- ०नाशैला - क०, ख० ; १०-१० दह्येन्ते सर्वद्रुमाः क०, ख०
११- यांति - क० ; १२-१२ नैतिवाणं - क०
१३-१३ तमतस्मान्सवेतयदिछेत् क० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साधुकारं च साधुनां[1] पापमार्गस्य दुष्करम्[2] ।
कुर्वन्तः[3] पापकान् सत्त्वा मोदन्ते[3] ह्यचेतसः ॥७॥

विपाककटुकं यस्मात्[5] पापस्यात्यचेतसः[4] ।
कृतोऽपचितमात्रस्य कर्मणो दृश्यते फलम् ॥८॥

तस्मात् पापं न कुर्वीत कष्टा पापस्य वेदना ।
पापं पापविपाकं च पापिनां पश्यते ध्रुवम् ॥९॥

न हि पापं न पापस्य तस्मात् पापं विवर्जयेत्।
पापवर्जितपापस्य न पापाद् भयमस्ति हि ॥१०॥

स्वकृतं बाधते पापं परोदयं[6] नैव भुज्यते ।
कल्याणस्य फलं साधु कष्टं पापस्य पच्यते॥११॥

कृत्वा तु पुरुषः पापं कल्याणं[8] नानुसेवते ।
न तस्याग्निप्रतप्तेभ्यो दुःखं स्यात् तादृशं नृणाम्॥१२॥

यथा निर्जीवितं मिथ्यापापं पापेषु कल्प्यते[9] ।
विनिवर्तितपापस्य नित्यं च सुचेतसः॥ १३॥

१- साधुनां - ख
२-३ पापमार्गस्य दुःकरं कुर्वन्तः पापकान् मोदति- ख, ग
६- परोदये - ख, ग
८- कल्यानं - ख

२- दुकरं - ख, ग
४- ह्यचेतसः - ख, ग
५- गात्रस्य - ख, ग
७- कल्यानस्य - ख
९- कल्पते - ख

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

<u>शान्तस्य भिक्षोर्निर्वाणं नातिदूरम् -</u>

देहिनां[1] शान्तचित्तस्य निर्वाणं नातिदूरतः ।
तीव्रात् तीव्रतरं[2] यान्ति नराः दुष्कृतकारिणः ॥१४॥

सुखात् सुखतरं[2] यान्ति नराः सुकृतकारिणः ।
न हि ताकृस्य[3] पापस्य सुखं फलमवाप्यते ॥१५॥

(ने०७१ ख०) सुखस्य वा फलं तीव्रं विपरीतं[4] न पच्यते ।
अनादिमति संसारे सुकृतानां फलं सुखम् ॥१६॥

कर्मणां सुकृतानां च तथा दुःखफलं स्मृतम् ।
पापं पापानुगं दृष्टं शुभस्य च शुभं तथा ॥१७॥

<u>पापी नरकेषूपपद्यते -</u>

पापाचारः शुभद्वेषी नरकेषूपपद्यते[5] ।
परिवर्जितपापस्य नित्यं च शुभचेतसः ॥१८॥

कृतावताम्ब निर्वाणमदृष्टं[6] तदनादिकम् ।
आदिमध्यान्तकल्याणा[7] धर्मा नित्यं सुखोदयाः ॥१९॥

आदिमध्यान्तकटुकं फलं पापस्य कर्मणः[8] ।
तस्मात् पापं सदा वर्ज्यमाचरेच्च शुभं[9] सदा ॥२०॥

१- क०, ख० पुस्तकयोः नास्ति
२-२ तीव्रात्तरं - क०
३- तिकृस्य - क०
४- विपरितं - क०
५- नरकेनुपपद्यते - क०
६- स चनादिकैः - क०, ख०
७- ०कल्याना - क०
८- कर्मणा - क०
९- शुभं - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पापवर्जितचित्तस्य नित्यं सुखमवस्थितम् ।
अनादिमति संसारे दग्धाः पापैः पुनर्नराः ।
ते दुःखमापन्न गच्छन्ति[1] बाला मोहवशानुगाः ॥२१॥

तस्मात् पापं विवर्जयेत् -

आपातमधुरं[2] पापं परिणामेऽग्निसन्निभम्[3] ।
पापकारी[4] तु पुरुषः सर्वलोके विगर्हितः ।
सुखकारी सदा शान्तस्तस्मात्[5] पापं विवर्जयेत् ॥२२॥

अनिष्टकर्मफलं दृष्टं विपाके कटुवेदनम् ।
पापं पापविपाकं च तस्माद् धीमान् विवर्जयेत्[6] ॥२३॥

अस्ति नूनं[7] ध्रुवं पापे पापमस्ति न पातकम् ।
(नै०७२३०) मायावेष्टा दयापेता कृपणचित्तगामिता ॥२४॥

पापं[9] पापाश्रितं नित्यं धर्मो धर्माश्रितस्तथा[10] ।
उन्नयत्युक्तमेतद्धि[11] धार्मिकैस्तत्त्वनिदर्शकैः[12] ॥२५॥

अचेतना ध्रुवं बाला येषां दुश्चरितं प्रियम् ।
विनिवर्तितपापास्तु[13] गच्छन्ति परमां गतिम् ॥२६॥

१- गर्हति - क०
२- रम्येव दृश्यते - क०
३- दृश्यते - क०
४- पापकारि - क०
५- ०कार्मत० - क०
६-६ ०विपाकस्तस्माद्धीमान्निवर्जयेत् - क०, ख०
७- पापे - क०, ख०
८-८ पापं वेष्टिदयापेताकृपाश्चित्तसुगामतः - क०, ख०
९- ०श्रित - क०
१०- धर्मश्चतथा - क०, ख०
११- ०यत्यघाते - क०, ख०
१२- ०धर्मार्गनिदर्शकैः - क०, ख०
१३- गर्हति - क०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतीव वञ्चनाघोरा निष्ठा पापगामिना ।
मानुष्यं दुर्लभं[1] प्राप्य कृत्य पापं प्रियं बहु[2] ॥२७॥

शुभकर्मा सुखमाप्नोति -

पापाद्विरज्यते[3] जन्तु[3] शुभेनाऽतीव रज्यते ।
स सुखात् सुखमाप्नोति निर्वृतिं वा प्रयाति हि ॥२८॥

शुभाशुभफलयोः परिणामभेदः

नरो[4] भवति धन्योऽयं[4] यः शुभान्युपसेवते ।
स त्वधन्यतमो लोके यः पापमुपसेवते ॥२९॥

आदिमध्यान्तनिधनं सद्भिरेव विगर्हितम् ।
पापं पापानुगं दृष्टं नरकायोपकल्पते ॥३०॥

अतीव शोभते लोके शुभकर्मा जितेन्द्रियः ।
कामस्य भेदात् सततं देवलोके स जायते ॥३१॥

पापस्य परिणामः सुदारुणः -

दुष्कृतस्यानुबद्धं हि दुष्कृतं फलमुच्यते ।
सुकृतस्य तथा दृष्टं फलं सुखविपाकजम्[5] ॥
सोकस्याशुभिर्मातस्य परिणामः सुदारुणः[6] ॥३२॥

निमित्तं सदृशं दृष्टं फलं पापस्य कर्मणः ।
पापेनाकृष्यते जन्तुः दुर्गतौ[7] वडिशैरिव ॥३३॥

१- लभं - ख,ग
२- बहु - ख
३-३ पापादुरज्यतेऽजन्तु- ख,ग
४-४ अवलोपुरुषा-धन्याय: - ख,ग
५- ०विपाकं- ख,ग
६- सुदारुणाः ख,ग
७- कुगतौ - ख,ग

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(नै०७२ क०) बडिशैर्मुच्यते मीनः[1] पापं पापान्न[2] मुच्यते[2] ।
पापरमोऽपि पापस्य सर्वथा दुःखकारिका ॥३४॥

अमेध्यस्य[3] यथा गन्धः प्रतिकूलो हि देहिनाम्[4] ।
शुभस्य वासना रम्या विप्रणष्टस्य दुर्गतौ[4] ॥३५॥

चिरेण[5] वासनं[5] यद्वत् पुष्पे नष्टे प्रदृश्यते ।
तद्वत्स्थं पापकारी नित्यं पापवशानुगः ॥३६॥

आलस्यानृतिको नित्यं नाशं[6] कल्याणमर्हति[7] ।
अनन्ता रजनी तेषां[8] येषां पापे स्थितं[9] मनः[9] ॥३७॥

प्रभातं[10] रजनी तेषां येषां[11] बुद्धे स्थिरा[10] मतिः ।
अनीर्ष्यकास्तु कल्याणाः पुरुषाः शुभचारिणः ॥३८॥

<u>अल्पपापी सुखमाप्नुते</u> -

ये[12] न पापात्मनो मूढास्ते[13] नित्यं कीटचारिणः ।
अल्पभारा यथा नावा प्लवते न निमज्जति ॥३९॥

तथाल्पपापपुरुषः प्लवते[14] न निमज्जति ।
न पापमित्रसंसर्गात् पुरुषः सुखवान् भवेत् ॥४०॥

१-	मिनः -	क०	२-२	पापनुमुच्यते -	क०
३-	प्रमेध्यस्य -	क०	४-४	विरनष्टस्यदुर्गतौ-	क०
५-५	बलवैर्युर्यापकारि-	क०	६-	नाशौ -	क०
७-	कल्यानमर्हति-	क०	८-	क०,ख० पुस्तकयोः नास्ति।	
९-९	स्थितामतिः -	क०	१०-१०	प्रभाजनी येषां बुद्धेस्थिता-	क०,ख०
११-	अनेर्ष्यासुकल्यानः	क०	१२-	ये तु -	ख०
१३-	मूढास्थे -	ख०	१४-	प्लवतेन -	क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पापमित्रं समासाद्य सर्वानर्थपरो भवेत् ।
धर्मकर्मविविक्तो यो नित्यं सूक्ष्मार्थदर्शकः[१] ॥४१॥

नासौ[२] लिम्पति पापेन पङ्केन गगनं यथा ।
आमूलं पुरुषः शृण्वन् श्रुतञ्चापि भवेद् दृढम् ॥४२॥

पापं च वर्जयेद् धीमान् प्रेत्य देवेषु नाकले ।
गुणदोषपरिज्ञानमेतत् पण्डितलक्षणम् ॥४३॥

(नै०७२ श०) गुणदोषापरिज्ञा[३]नमेतन्मूढस्य लक्षणम् ।
गुणेषु गुणसञ्चारी दोषेषु च तथैव च ॥४४॥

सदोषगुणतत्त्वज्ञो[५] नित्यं भवति शोकभाक्[४] ।
पापकर्मा तु पुरुषः[५] शत्रुश्चात्मनः स्थितः ॥४५॥

सुकर्मा तु[६] यथा पुंसो मित्रवत् प्रतिपद्यते[७] ।
तमोनिरयमुपक्वभूतोऽयं प्रपद्यते ॥४६॥

यस्य पापरता बुद्धिर्नित्यं विषयतत्परा ।
विषयारामचपला नित्यं रागानुचारिणी ॥४७॥

यस्य बुद्धिर्न धर्मेषु[८] नरस्य दुःखभागिनः[८] ।
कारणान्महादुःखान्तकारणाद् वह्निसंकुलात् ॥४८॥

१- सूक्ष्मार्थ - क०   २- नासौ - क०
३- गुणदयो - क०,ख०   ४- शोकभाक - क,
५-५ पुरुष - क०   सौख्यभाक् - ख०
६- तमोनिरयश्च - क०   ७- मनशोयक्र - क०
८-८ धर्मेष्वासनरो दुःखभागिणं - क०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जीर्णपापा वयं सर्वे भूयो लोकमिहागताः ।
सुकृतस्य फलं साधु अनेकगुणमण्डितम् ॥४९॥

दुष्कृतस्य फलं दुःखं विसंवादकं हि तत् ।
ते वयं सुखदुःखाभ्यां भ्रमाम भवसंकटे ॥ ५०॥

कर्मवायुसमुद्भ्रान्ताः समुद्रस्य यथोर्मयः ।
कृतं पापेष्वमनसः पापैः रमन्ति ये जनाः ॥५१॥

ते तस्य हेतोर्नरकं प्रयान्त्यशुभचारिणः ।
तस्मात्तु[१] नरकान्मुक्ताः ते गच्छन्ति[१] त्रिविष्टपम् ॥५२॥

ते हि दुःखं विस्मृत्य पुनः कामवशानुगाः ।
(नै०७२ ख०) वशीभूतमिदं चित्तं दोलादोलैः सुखासुखैः ॥५३॥

वियोगोऽयं परीभातो[२] न च दुःखं विद्यते ।
अपारदारसंयुक्त इन्द्रियैः पारवञ्चितः ॥५४॥

जनो भ्रमति[३] संसारे तृष्णापाशवशानुगः[४] ।
नरकात् प्रेतभुवनं प्रेतेभ्यस्तिर्यग्योनिषु[५] ॥५५॥

तिर्यग्भ्यो नागभुवनं नागाद् भूयो नृजातिषु ।
स्वकर्मपाशभ्रान्तो जगद्भ्रमति चक्रवत् ॥ ५६॥

१-१ तस्मान्नरकान्मुक्ता नरा गच्छन्ति - क० २- परिभातो - क०
३- भ्रमति - क०, ४- विरावृत्तेर्यं पंक्तिः - क० पुस्तके ।
५- प्रेतेभ्यस्तिर्यग्योनिषु - क०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च तेषवशं यान्ति अध्यात्म[1]वशमागताः ।
रमन्ति नाकभुवनं विरज्यन्ते तथा सुखैः ॥५७॥

सुखात् सुखान्तरं[2] क्रान्ता भ्रमन्ति[3] भवचारिणः[4] ।
दुःखं बहुसहस्राणि पद्मकोटिशतानि च ॥५८॥

[5] ~~[illegible]~~
तानि दुःखानि मुक्तानि न च छिद्यन्ति[6] चारिकाः[6] ।
न सुखं विद्यते लोके सर्वदुःखैः परिप्लुतम् ॥ ५९ ॥

उद्वेगं नैव गच्छन्ति[7] प्राणिनो मोहचारिताः ।
दुःखेन न छिद्यन्ते बाला दुःखार्ता[8] च वर्तते ॥६०॥

सतो शतकं[9] दृष्टं बीजं प्राप्त यथा फलैः ।
सुखदुःखव्यवस्थिताः प्राणिनस्त्रिभवानुगाः ॥६१॥

न यान्ति परमं सौख्यं सर्वदुःखविवर्जितम् ।
स्वर्गस्थे[10] हि[11] यदा दुःखं तदा विन्दति[12] देहिनम् ॥६२॥

(ने०७४ ७०) च्युते च पुनर्दुःखे चरन्ति विगतज्वराः ।
नारकं तु सदा दुःखं स्फुटं भवति देहिनः ॥६३॥

तदा कृष्णाब्दं सौख्यमनुमानेन तिष्ठति ।
तदेव विदितं मत्वा जगत् सर्वं[13] समन्वितम् ॥६४॥

१- ख०,ग०पुस्तकयोः नास्ति । २- माता - ख०,
३- भ्रमति - ख०,ग० ४- भवचार० - ख०,
५- ख०,ग०पुस्तकयोः नास्ति ६-६ त्रिधातिचारिका- ख०,
७- गच्छति - ख० ८- दुःखार्ता - ख०,
९- शतकं - ग० १०- संसारेति - ख०
११- ख०,ग०पुस्तकयोः नास्ति । १२- विपति - ख०
१३- सारवत् - ख०,ग०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्रेयांसि[1] क्रियां बुद्धिपूर्वाभ्यो विनिवार्यते[2] ।
दारुणापिकारचपलं जीवितं वेत्ति वर्तते[3] ॥६५॥

दारायन्ते वापि कर्माणि तस्माच्छ्रेयः परो भवेत् ।
निर्वेगेण मनः सर्वं जीवितं वेत्ति वर्तते ॥६६॥

<u>अनागताद् दुःखात् ज्ञानी न बिभेति-</u>

तस्मान्न बालकालेऽपि पापं कुर्याद्विचक्षणः ।
अनागतस्य दुःखस्य न बिभेति महाजनः ॥६७॥

येनास्य[4] पच्यते पापं नीचनामवलङ्घितम् ।
मोहितः पापकैर्वैरिभिः सुकृतवर्जितैः ॥६८॥

नाप्नोति नरकं मूढो यश्च पापं विवर्जयेत् ।
यस्य पापाद् भयं नास्ति स पापं कुरुते बहु[5] ॥६९॥

स पापानलसन्दग्धः पश्चान्नरकमाप्नुते ।
अपि[6] सूक्ष्माग्निकणिका[6] यथा दाहाय कल्पते ॥७०॥

अन्यैरपि तथा पापैर्नरकं यान्त्यबुद्धयः ।
अपापभीरुता तस्मात् कर्तव्या सुखमिच्छता[7] ॥७१॥

१- श्रेयस - क०, २- विनिवार्यतां - क०
३-३ त्रिवर्ति - क०, ४- येना - क०,ख०
५- बहु - क० ६-६ स सूक्ष्माप्यग्निकणिका-क०,
७- सुखमीप्सता - क०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हिंसा[1] मिथ्यवादिक्रूरत्वं महददुःखोदयम्[1] ।
(ने०७४ख०) जाड्यं व्यसनप्राप्त्यं पाण्डित्यं पापमित्रता ।।७२।।

विषाग्निचक्रशस्त्रेभ्यो[2] तेभ्यो रक्षेत्[3] प्रयत्नतः[3] ।
दुःखं हि पापधर्मोऽयं सुखं धर्मसमन्वितः ।।७३।।

तयोर्णां सुखदुःखानां[4] विदुस्तत्त्वविदो[5] जनाः ।
सत्यं दानं तथा शान्तिः सदा चापापमित्रता ।
मैत्री सदाभिभूतेषु प्रस्थानं त्रिदिवस्य हि ।। ७४ ।।

।। इति पापवर्गः पञ्चदशः ।।

---:०:---

१-१- स हिंसतापत्ये मत्स्मिथापेक्ष्यः सुखोदयात् - क०,ख०
२- ०शस्त्राहृये - क०
३-३ रक्षातेनातः - क०
पण्डितः - ख०
४- दुःखान्यं - ग०
५- विदुस्त० - ख०
६- त्रिदिवस्य - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१६) नरकवर्णः पाठः

अष्टौ नरकाग्नयः -

कृत्वा दुष्कृतकर्माणि मत्त्वा विषमजीवनैः[1] ।
या गतीः[2] प्रेत्य ग्रन्त्यथा यान्[3] शृणुया हि मे[4] ॥१॥

सञ्जीवं कालसूत्रं च सम्पातं[5] तौ च रौरौ ।
तथा परं महाविक्लवनं[6] च प्रतापनम् ॥ २ ॥

इत्येते नरका अष्टावाख्याता दुरतिक्रमाः[7] ।
रौद्रकर्माभिसंकीर्णाः प्रत्येकं षोत्सदा मताः[7] ॥३॥

चतुष्कन्धाश्चतुर्द्वारा विभक्ता भागशो मिताः ।
अयः प्राकारपर्यन्ता अयसा प्रतिकुब्जिताः ॥४॥

नरकाग्नीनां भयानकत्वम् -

तप्तायोमयी भूमिर्ज्वलिता तेजसा युता ।
अनेकयोजनशतं दहति[8] स्वार्चिषा भृशम्[9] ॥५॥

क्रन्दयन्तमना घोरा अविश्रान्ता दुरासदाः ।
रोमहर्षणजनास्तेऽप्याहुर्दुःखा[9] भयानकाः ॥६॥

१- जीवनः - ख०
२- गति - ख०
३- प्रेतहत्यथायान्तान- ख०, ग०
४- तान् - ख०, ग०
५- संघातं - ख०,
६- महाविचिक्यनं- ख०, ग०
७-७ षोडशोत्सदाः: ख०, ग०
८-८ स्फुटा निष्टप्ति- हार्चिषाः: ख०, ग०
९- भयावहोमा सर्वादुःखा- ख०, ग०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एते[1] पतन्ति नरके ऊर्ध्वपादा अवाङ्मुखाः ।
(नै०७५।७०) कर्मणामतिवक्तारः[2] संस्थानां तपस्विनाम् ।।७।।

ते पुनस्तत्र[3] पच्यन्ते तप्ताम्भसि[3] कृता इव ।
क्रन्दमाना दिवारात्रौ, नगा[4] वातेरिता इव[4] ।।८।।

नरके पतिता मूढं तप्यन्ते -

महानादं प्रणदन्ति ताडकैः प्रताडिताः ।
सर्वदिक्षु च धावन्ति नारकैः पुरुषैर्हताः ।।९।।

कुबुद्ध्या मोहयित्वार्थं मोहपाशावृतो जनः[5] ।
प्राप्नोति नरकं घोरं कारणादविसंवृतेः ।।१०।।

कुबुद्ध्या दम्भसर्वो मनुष्यः पुरुषाधमः ।
तथा वर्तेऽस्मि नरके पातिनां घोरकारणम् ।।११।।

ये मिथ्यावृत्तमापन्नाः पुरुषाः मन्दमेधसः ।
ते सर्वे नरकं यान्ति विहीर्हे[6] पारवञ्चिताः ।।१२।।

कस्त्वया दुष्कृतं पूर्वं कृतं चित्तानुवर्तिना ।
तस्य मुक्तकर्तं मूढ[7] विपाकोऽयमवाप्स्यसि[7] ।।१३।।

कार्याणि[8] परवित्तानि[8], संसेव्याः परयोषितः ।
कृता हि अन्तवो नित्यं स्वविद्यापरिवञ्चिताः ।।१४।।

१- एता - ४०,८०
२- कर्मिणामिति - ४०,८०
३-३ पुनस्तत्र पच्यते तत्-स्थामलिल- ४०
४-४ नागवाती महरिता: ४०,८०
५- व्यापारावृत्तजनं - ४०,८०
६- वित्तानि - ४०
७- मूढो विपाकोऽयं - ४०,८०
८-८ कृता इव - ४०,८० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्य कर्मविपाकस्य वश एव[1] त्वमागतः ।
किं क्रन्दसि स्वयं कृत्वा कुकर्म पुरुषाधम ॥१५॥

ये नराः कुकृतं कृत्वा पञ्चत्वं[2] यान्त्यमेधसः[2] ।
येषां तु निष्कृतं कर्म को ऽमुष्यं यमागरे ॥१६॥

अल्पमायुःसंयुक्तान् कामान् कटुविपाकिनः[4] ।
(ने०७५ख०) सेवते[3] कृत्स्नशो मूढः स याति[5] तमसोऽधमम् ॥१७॥

मूढः किं कुकृतं कृत्वा पुत्रदारसुतार्थिकः ।
दह्यसे चैकाकी नरके[6] स्वकर्मफलवञ्चितः ॥१८॥

यः पुत्रदारवशगः सेवते दुष्करं नरः ।
स रमयति[7] नारके पापे तदनुभूयते ॥ १९ ॥

न दारा न सुता नार्थं न मित्राणि कथञ्चन ।
मृत्युकाले समुत्पन्ने रक्षन्ति समुपस्थिताः ॥२०॥

येषां सांसारिकं[8] वित्तं तृष्णया[9] परिवञ्चितम् ।
सहायता कृतस्तेषां कस्मात्त्वं परितप्यसे ॥२१॥

कृतोऽपि पूर्वविषये तृष्णया परिवञ्चितः ।
किं क्रन्दसि स्वयं कृत्वा कुकृतं मूढचेतनः ॥२२॥

१-१ मम - क०   २-२ पश्चात्प्यत्यमेधसः क०,ख०
३- कृत्वत्वानु- क०   ४- दक्षपक्षाकिनः क०,ख०
५- स्वयाति - ख०   ६- नरकत्वं - क०,ख०
७- रमयति - क०,ख०   ८- शोकेलिकं - क०,ख०
९- क०,ख० पुस्तकयोः नास्ति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न तथाग्निर्नशस्त्राणि न विषं नारयः स्थिताः ।
बाधते पुरुषं लोके यथा कौटुम्ब्यमात्मकम् ।। २३।।

पक्षिणां नीडवासवत् भववत्कुटुम् -

दिग्भागे हि यथा गत्वा संवसन्ते वनपतीन् ।
विहगाः कालमुत्थाय तथा प्राणिसमागमः ।।२४।।

नाशयित्वा परं द्रव्यं कृत्वा लोकव्यतिक्रमे ।
किं कौटुम्ब्यमुखं धर्मं मोहेन परिवञ्चितः ।।२५।।

येन याति परां शान्तिं येन यात्यसुरालयम् ।
तत्र हेतुः परं मोक्षस्तमसामपि यत् तमः ।।२६।।

कुटुम्बाय कृतं पापं नरके पातयति -

(नै०७६ अ०) पुत्रदारमयैः पाशैरानीता नरकालयम् ।
यदर्थं क्रियते पापं युष्माभिरिव वञ्चितैः ।।२७।।

मित्राणि पुत्राः पितरौ किं स्नुषा बान्धवाः ।
येषामर्थे कृतं पापं भवद्भिर्मन्दबुद्धिभिः ।।२८।।

नूनमात्मा न ते कान्तो बभूव नरपुङ्गव ।
येन त्वया कृतं पापं पुत्रार्थेन नराधमः ।। २९।।

१-	कुटुम्बमा०	-	क०, ख०	२-	कालमु०	-	क०, ख०
३-	ग्रीवं	-	क०, ख०	४-	लोकव्यतिक्रम०	-	क०, ख०
५-	यन्न	-	ख०	६-	यांतिसु०	-	क०, ख०
७-७	कृते पुत्राः स्वमित्राः स्व-		क०, ख०	८-८	कान्तः बभुव-		क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

येन पूर्वकृतं पापं पश्चान्न परितप्यते[1] ।
स याति नरकं घोरं पुत्रदारणवञ्चितः ॥२०॥

किं करिष्यन्ति पुत्रास्ते[2] किं दारा[2] किं च[2] बान्धवाः ।
दह्यमानादि नरके वह्निना पापकर्मणः ॥२१॥

स्वयं कृत्वाऽशुभं कर्मासुतोदयमनिन्दितः ।
तप्यतेऽपि कृतापानः पश्चान्मोहेन वञ्चितः ॥२२॥

रागद्वेषातुराः पापं मोहेन परिवञ्चिताः ।
नरकं प्रयान्ति ते सर्वे पुत्रदार सुतार्थिनः ॥ २३॥

कन्दर्पेण च दुर्बोध्येन[3] च वह्निना ।
दह्यमाना हि दुःखेन नरके पापकर्मणा ॥२४॥

[5]वशं प्राप्ताः स्वविकृत्य[5] सर्वं स्व विडम्बिताः ।
किं क्रन्द च वृथानादे वह्निना परितापिताः ॥२५॥

नानानुगकं दृष्टम् -

[6]अथ पापानि कर्माणि कृतवानसि मन्यसे ।
दुर्मते तत्र[7] मा क्रन्द किं वृथा परिदेवसे ॥२६॥

१- °दारेणवञ्चिताः - क०,ख० २- °नादौ - क०,ख०
३-३ वह्निः कर्मरपश्यदुनाहूयते - ४- रुची - क०,ख०
५-५ तद्गगवलवर्चिस्वं - क०,ख० ६- यथा - क०,ख०
७- तत्रोपमुद्धा - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(नं०७६८०) पापेन तु कृते मूढः कारणाच्छुचि[1] दृश्यते ।
पापानुगकं[2] दृष्टं हेतुप्रत्ययसम्भवम् ॥३७॥

तस्मान्न सेवितो धर्मः पापञ्च नहि वर्जितम् ।
पापात्माहिव पुरुषो नरकं नैव पश्यति ॥३८॥

यो न विन्दन्ति मूढात्मा फलं पापस्य कर्तृणम्[3] ।
[4]सोऽवश्यं लभते दोषान् कथं मोक्ष्यति दुर्गतेः[4] ॥३९॥

पापेन वञ्चितः पूर्वं पापेन परिदह्यते ।
न करिष्यसि पापानि स्वदुःखेनैव यास्यसि ॥४०॥

कृतवानसि पापानि शुभानि[5] न कथञ्चन ।
पापेन दह्यसे तस्माद्दुःखे न मनः कृथाः ॥४१॥

किं दुःखादपि दुःखम् ?

नास्ति दुःखततो दुःखं यः पापमनुसेवते[6] ।
तस्मात् पापं न सेवेत यदि दुःखं[7] न वाञ्छसि[8] ॥४२॥

दुर्भिक्षकानां स्पष्टोक्तिः -

[9]न किञ्चिदपि दुर्भिक्षे[9] यस्य[10] शान्तिर्न विद्यते ।
कारुण्यास्त्रवमुक्ताः स्मः नास्माकं करुणा हृदि[11] ॥४३॥

१- शुचि - क०
२- ०नुगकं - क०, ख०
३- कर्तृणः - क०
४-४ स च लभते दोषाच्छाश्वत- मोक्ष्यति दुर्गते- क०, ख०
५- तस्मात्पापक्षयार्थाय- क०, ख०
६- ०सेवति - क०,
७- दुःखे - क०
८- लिप्यते - क०, ख०
९-९ किंचाऽष्टक्षयानहृदये- क्लिन्नः - क०, ख०
१०- क०, ख०पुस्तकयोः नास्ति ।
११- निधः - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यथा कृतं भवद्भिरत्र पापं पीडाबृंहितं ।
तद् वः प्रभावते गाढं न च ये तत्र हेतवः ।।४४।।

शीलं न रक्षितं मूढ,पापं च बहुसञ्चितम् ।
सम्भूतस्य च पापस्य फलमेतदुपस्थितम् ।।४५।।

न वयं कारणं तत्र यूयमेव हि कारणम् ।
यः पापं कुरुते कर्म स हेतुस्तस्य कर्मणः ।।४६।।
(नै०७७ ज०) भवद्भिर्यत्[1] कृतं पापं तृष्णार्ताभिर्विमोहितैः ।
तदो[2] दूषयसे घोरं किमस्मान् परिभाषित ।।४७।।

नाकृतं पच्यते पापं न पापं स्यादहेतुकम् ।
येन यदि कृतं पापं तस्य तत् परिपच्यते ।।४८।।

तद् भवन्तः क्रियाहीना[3] भुवनानेन[4] वञ्चिताः ।
पतिता नरके तीव्रे किं वृथा परितप्यथ ।।४९।।

ते यूयं कामपरमाः[5] घोरं[5] नरकमागताः ।
कारणेष्वपि तीव्रेषु किं तथा परितप्यथ ।।५०।।

यदा कृतानि पापानि भवद्भिः कामभोहितैः ।
तदा कस्मान्न विकृष्टं किमद्यपरितप्यथ ।।५१।।

१- ०णार्तविमो० - ख०,ग० २-२ तदः प्रभवतो - ख०,ग०
३- तिग्रे - ख०, ४- विधा - ख०,
५-५ कारणान्यपि तीव्राणु- ख०,ग०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हेतुभूतो हि नरको मृषावादस्य देहिनः ।
हेतुं वै सेवितं पूर्वं निष्फलं परिदेवथ ॥५२॥

नार्थेन लभते सत्यं न कृच्छ्रेणोपपद्यते ।
तस्मात् सत्यं परित्यज्य मृषावादेषु रज्यसे ॥५३॥

पूर्वेषु[1] अर्जितं पापं[1] भवता मूढचेतसा[2] ।
भव वञ्चिता तु भवता कौकृत्यं परिपच्यते ॥५४॥

पापदायाद्विनिर्मुक्तो नरकं नोपलप्स्यते ।
नाक्रन्दमानाः पुरुषाः विमुच्यन्ते कथञ्चन[3] ॥५५॥

किं क्रन्दथ वृथा मूढा वञ्चिताः स्वेन कर्मणा ।
(ने०७७ख०) मुञ्चितां[4] वञ्चिता बाला वृथा क्रन्दन्त्यबुद्धयः ॥५६॥

बालतोऽहिककैस्त्वं मित्रपैश्च सङ्गमः ।
विप्रलब्धोऽसि भो मर्त्य गच्छन्नपि महत् तमः ॥५७॥

नान्यः शत्रुर्यथा[5] कर्मं[6] दुष्कृतं तव पापकम् ।
त्रिविधेन कर्मणा तेन नायसे यमशासनम् ॥५८॥

कस्मादसि ततो[8] मूढ, वञ्चितः पुत्रसंश्रये[7][9] ।
न दानादिषु बुद्धिस्ते कृता ते पोहवञ्चिता ॥५९॥

१-१ कृतं भवन्तिकुकृतं - क०　　२- क०,ख०पुस्तकयोः नास्ति।
३- किराबृतोऽयं पाठः　　४- मुञ्चितं - क०,ख०
५- कर्मणा - क०　　६- नीते - क०,ख०
७- ०संश्रये: - ख०　　८- ०दोषु - क०,
९- क०,ख०पुस्तकयोः नास्ति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्माल्लोकात्परं लोकं शत्रुपृष्ठोरगो यथा ।
शत्रूणां[1] प्रथमः शत्रुः सर्वपापनिदर्शकः ॥६०॥

विषाग्निशस्त्रप्रतिमः स्वयं हि दुष्कृतं कृतम् ।
त्वया कृतानि कर्माणि त्वमेवमनुमोक्ष्यसे ॥६१॥

यस्य शान्तं[2] सदाविदं विषयैर्यान हन्यते ।
न दृश्यस्यामिमां यान्ति तथा त्वमनुपश्यसि ॥६२॥

नरकस्य[3] स्थानं श्रुत्वा कथं क्रन्दसि[4] दुर्मते ।
किं पुनर्यत्र वह्निस्त्वां धक्ष्यते शुष्ककाष्ठवत्[5] ॥६३॥

न दग्धाः वह्निना ये च दग्धास्ते कुकृतैः[6] स्वकैः[6] ।
वह्निस्तु शाम्यते[7] क्वापि[8] दुष्कृताग्निर्न[8] शाम्यति ॥६४॥

नाग्निर्निर्याति लोकान्तं नाग्निस्पृष्टो नरो[9] मृतः[10] ।
(ने०७८ख०) कुकृताग्निमयं पापं यद्[11] धक्ष्यति हि तत्त्वतः[11] ॥६५॥

कुकृताग्निना ये दग्धास्ते दग्धा नरके नराः[12] ।
पापाग्निवर्जिता ये तु न तेषां नरकोदयः ।
यद्यात्मनः[13] प्रियो नित्यं बिभेषि नरकाद् यदि ॥६६॥

१- शत्रुणां - क०,ख० २- शान्तं - क०
३- स्थानि - क० ४- सि - क०
५- शुष्क - क० ६-६ कुकृतास्ये - क०,
७- शाम्यते - क० ०श्ये - ख०
८-८ पापिकुकृताग्नि क्वापिते - क०,ख० ९- नृणां - क०,ख०
१०- क०,ख० पुस्तकयोः नास्ति ११-११- यं पापीयत्वा धक्ष्यति- तत्त्वम् - क०,ख०
१२- त्रिरावृत्तोऽयं पाठः
१३- यथात्मनः - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विवर्जय स्वपापानि[1] ततो दुःखं न यास्यसि ।
यान्ति[2] पापमये नित्यं[3] नरा मोहवशानुगाः ॥६७॥

प्राप्नोषि[4] नरकं घोरं किमूर्णि विकुर्वसि ।
दुःखं दुःखविपाकं च दुःखान्तगमनं तथा ॥६८॥

सुकृतं नादिमध्यान्तशोभनं परिपठ्यते ।
नात्र लोके त्वयाऽवापं[5] यत्कृतं[6] सुकृतं मुहुः[7] ॥६९॥

तस्य तीव्र विपाकस्य फलमद्योपपादयते ।
हेतुप्रत्ययसादृश्यं विपरीतं न कल्पते ॥७०॥

हेतुः कृतो यथा पूर्वं तथा फलमवाप्स्यसि[8] ।
यथा तव तथान्येषां प्राणरक्षा प्रयत्नतः ॥७१॥

कस्मात् प्राणातिपातास्ते कृताः पापानुवर्तिना[9] ।
प्राणत्यागेन[10] पुरुषार्थैधनं समुपार्जितम् ॥७२॥

धर्माद्यकृतं तद्धि यत्त्वया समुपार्जितम्[11] ।
सर्वेषां दयिता दाराः प्राणेभ्योऽपि गरीयसः ॥७३॥

१-	स्वपापणि	-	क०,ख०	२-	सन्न	-	क०,ख०
३-	निस्य	-	क०,ख०	४-	प्राप्नोसि	-	क०,ख०
५-	यत्पापं	-	क०,ख०	६-	सुकृतं	-	क,
७-	क०,ख० पुस्तकयोः नास्ति ।				कुकृतकत:	-	ख०
८-	०वाप्स्यशि	-	क०	९-	पपनुवर्तिणा-		क०
१०-	प्राणत्यागिमदि	-	क०	११-	घनकादिन(णा)		क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्त्वया रागरक्तेन कस्मादप्यकृताद्वनात् ।
बुद्धे व्यामोहजनकं धर्माणां दुःखं न परम्।।७४।।

धर्मपानं त्वया कार्यं कर्मानुपरिवर्जितम् ।
(ने०७८ ख०) जिह्वाविषासमुत्थं यत् सर्वप्रत्ययकारकम्।।७५।।

तृष्णावादं त्वया पापं कर्मानुपरिवर्जितम् ।
एवं यन्त्वविधेयेषु कस्मात् त्वमनुरज्यवान्।।७६।।

तस्मात् संमुद्य मा रोदि किं वृथा परिदेवसे ।
क्रियायं पापका धर्मा कस्मान्नु परिवञ्चितः ।।७७।।

तस्मात् प्राप्नोषि नरकं ज्वालामालाकुलं महत् ।
एषा तृष्णाग्निना सर्वं प्रदीप्तं भुवनत्रयम् ।।७८।।

धर्माचरणे सावहितेन भवितव्यम् -

दृष्ट्वा नाचरितो धर्मः किमथ परितप्यसे ।
श्रुत्वा ते मधुरं चित्तं कामसन्दरकं वचः ।।७९।।

उदीरिते महापापे तस्मै तत्फलमागतम् ।
स कृत्वा पापकं कर्म नियता पापवेदना ।।८०।।

करुणां विकलं दीनं किमद्य परितप्यसे ।
कर्मदायेण मोदयसे नरकात् पापकारिणः ।।८१।।

१-१	दूषणं	-	ख०	२-	पापं	-	क०,ख०
३-	व्येयोय	-	क०,ख०	४-	परिदेवशे	-	क०,
५-५	मधुरेमकं	-	क०,ख०	६-	मु·यते	-	क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विक्रोशमाना बहुशो न मुच्यन्ते कथञ्चन ।
अनिष्टं पापकं कर्म कृत्वा रोगवशे स्थिताः ॥८२॥

परिदेवति यो मूढो वृथा स परिदेवति ।
अनागतफलशो यः प्रयुत्पन्नशुभे रतः ॥८३॥

नाहं क्रोशते नरके यथा स्वयमनुतप्यते ।
मया कृतानि कर्माणि फलदानि ममैव[1] हि ॥८४॥

रोगेण शत्रुणा दग्धः पश्चान्नरकमागतः ।
प्रमादभूमिपरशुमा रागदग्धस्य देहिनः ॥८५॥

(ने०७६ ख०) तेन पापेन बद्धोऽहं गतोऽवस्थामिमां भृशम् ।
दुराचाररतानां[2] तु[2] नृणामस्य फलं कटु ॥८६॥

अज्ञानबाधितोऽस्मीति स्वकृतं भुज्यते मया ।
निर्दयानां कुमाराणां[3] पापानां वशमागतः ॥८७॥

मुक्तिरस्मात् कथं स्यान्मे दुःखसंसारसागरात् ।
दुःखाद्दुःखतरं कर्म ममेदं परिपच्यते ॥८८॥

सुखावाप्तिं न पश्यामि दोषं वा नरकस्य मे ।
लोकालोकादहं भ्रष्टो भ्रष्टो[4] मार्गाद्धि ज्ञानिनाम्[4] ॥८९॥

जीवेयं विवशो भूत्वा[5] विकृतैः परिवारितः ।
ज्वालामालाकुलं सर्वमन्तरिक्षं निरन्तरम्[6] ॥९०॥

१- मयैव - ख०
२-२ दुराचाररतु पूर्त- क०, ०पूर्वं - ख०
३- कुमारैराणा- क०, ख०
४-४ भ्रष्टः मार्गाद्विचारबुद्धः क०, ख०
५- भूतं - क०, ख०
६- तरं - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिशश्च[1] विदिशश्चैव पृथिवी[2] च निरन्तरा ।
कृपणोऽस्मवशो[3] दुःखी विवासं नोपलक्षये ॥६१॥

चातुरपारविलप्तस्य नृपस्याद्याति मोक्षणम्[4] ।
कान्तारे वाह्यमानस्य निःसहायस्य सर्वतः ॥६२॥

त्रातारं नावगच्छामि योऽस्माद् दुःखात्प्रमोचयेत् ।
निःशक्तिरवशो दुःखी वह्निना परितापितः ॥६३॥

नायेऽहं विवशः क्वापि वायुबन्धनयन्त्रितः ।
न चार्था नापि मित्राणि न पुत्रा न च योषितः ॥६४॥

त्रायन्ति व्यसनादस्मात् कृतघ्ना बत[5] ते मम[5] ।
निरानन्दस्य न सुखं दुःखं गृह्णामि सर्वशः ॥६५॥

मृत्युपाशेन बद्धस्य[6] शरणं नोपलभ्यते[7] ।
संक्रुद्धाः इव ते क्रूरा भविष्यन्ति समन्ततः ॥६६॥

नरकं[8] वा पतेयं नु न पश्यामि शरणं क्वचित्[8] ।
यच्च यच्चेहं पश्यामि जङ्गमं स्थावरं तथा ॥६७॥

अग्निवारिणो न क्वापि शरणम् -

तत् सर्वं व्याकुलं चैव वह्निना परिदीपितम् ।
निरानन्दा दिशः सर्वाः व्यालैश्च परिवारिताः ॥६८॥

१- दिवश्च - क०,ख०   २- पृथि - क०,ख०
३- कृपास्यास्यवसौ क०   ४- विमोक्षणं - क०
५-५ क०,ख० पुस्तकयोः नास्ति ।   ६- मा - क०
७- महयति - ख०   ८-८ कंपतकस्यचायतेय
भावधृति सर्वतः क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नाधिगच्छामि शरणं[1] निःसहायोऽस्मि सर्वतः ।
घोरे तपसि मज्जामि सागरे च हृतप्लवः ।। ९९ ।।

गगनं[2] नैव पश्यामि नक्षत्रग्रहतारकम् ।
विपरीतमिदं सर्वं समन्ताद् परिवारितम् ।।१००।।

पञ्चेन्द्रियाणि सर्वाणि विरतानि हि सर्वतः ।
कृन्दनैश्च सर्वं हि शरीरं परिपाट्यते[3] ।।१०१।।

निधिगच्छामि[4] शरणं काम्यं बन्धो भविष्यति[5] ।
वर्धन्ते दुःखनिकराः सर्वतः परिहायताम्।।१०२।।

मुहुर्मुहुश्च वर्धन्ते वेदनाश्चितदेहकाः ।
दुःखैश्च परिवर्धन्ते निस्सहायं च सर्वतः ।।१०३।।

समीक्ष्य कर्मजं नित्यं[7] ध्येयोहेतुः पुनः पुनः[7] ।
कथयन्ति बुधं बहुः स्वकर्मफलकैः[8] खलु ।।१०४।।

यत्तु पूर्वं करणार्यं ते तत्पश्चात् परिचिन्त्यते[9] ।
मोहेन वञ्चितः पूर्वं किमद्य परितप्यसे ।।
(नै०८०७३०) [10] किं पुनः पापकर्तुंयः कटुकं परिपच्यते ।। १०५।।

१- मन्हामि - क०,ख० २- गगण - क०
३- परिपायते - क० ४- तेनाधिगच्छामि- क०,ख०
५- परिपायतां - क०,ख० ६- क०,ख०पुस्तकयोः नास्ति।
७-७ नितायमपेक्ष्यापुनर्वन: क०,ख० ८- ०फलकैः - क०,ख०
९- साहायेकयत्रशुनुतह - क०,ख०
१०- लेखकस्य लेखनवैकल्पा टिप्पणी प्रतिभाति-
"९कपत्रमा २७ श्लोकहरु ६७ का पत्र दुते का हरु बेतन भए"-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनेकदुःसहे[1]तूत्थं तव[2] दुःखं भविष्यति ।
त्राणं नैव यत्रास्ति विना कर्मपारदायात्।।१०६।।

एवं सत्यस्य[3] नाशेन[3] यमदूतैरनेकशः ।
नीयते नरकं घोरं कर्मणा स्वसङ्गतः ।।१०७।।

चतुष्कोणश्चतुर्द्वारो विभक्तो भागशो स्थितः ।
पच्यते यत्र विवशा नारकेया ह्यनेकशः ।।१०८।।

भेदप्रत्ययो[4] बहुशो यत्त्वया कथितं बहु ।
कल्मषं मूलकर्माणां तस्यैतत् फलमागतम्।।१०९।।

भस्मीभवन्ति ते नित्यं मित्रस्वजनबान्धवैः ।
एषामभिमतं दुष्टं पैशुन्यं सर्वगर्हितम् ।।११०।।

तस्मान्न चरितो धर्मः पैशुन्यं च न वर्जितम् ।
पैशुन्यं सफलं भुक्त्वा किमद्य परितप्यसे ।।१११।।

जिह्वाघन विनिर्मुक्तं[5] तीक्ष्णं[6] विषममुच्छ्रितम्[6] ।
पारुष्यमिति सन्दृष्टमसौ तत्फलमीदृशम् ।।११२।।

सत्त्वं पारुष्यपरमं घोरं नरकमागतम् ।
जिह्वायातं तवाकृत्यं किमद्य परिदेवसे ।।११३।।

सहस्रगुणपर्यन्तः ते स्वहृदयसम्भवः ।
क्षुत्पिपासाभयो वह्निः समादहति पारतम्।।११४।।

१- मूलसे - क०,ख०   २- तस्या - क०,ख०
३-३ सत्यनाशानाशे- क०,ख०   ४- ०प्रायेण - ख०
५- विनीर्मुक्त - क०   ६-६ तीक्ष्णोवाविशरुचया- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पारुष्यवाचो नरकस्य चान्तरम् -

यदन्तरं हिमाग्निभ्यां मेरुसर्षपयोश्च यत् ।
तदन्तरं विह्नयोर्वत्या नरके ज्वलनस्य च ।। ११५ ।।

नरकप्रभवो वह्निर्नैवाप्यन्यत्र प्राप्यते ।
(नै०८०ब०) दाहप्तिपासामयो वह्निर्देवेष्वप्युपलभ्यते ।। ११६ ।।

यो ह्यतः कारणाद्वाक्कणो[२] वह्निर्वै[१] नरकोपमः[१] ।
न तथा स प्रभवति यथा वह्निस्तदुद्भवः ।। ११७ ।।

पूर्वोदाराबद्धपदं निरर्थकमसङ्गतम् ।
विरुद्धं[३] यत्त्वया प्रोक्तं तस्यैतत्फलमागतम् ।। ११८ ।।

परेषां सम्पदं दृष्ट्वा[४] मम स्यादिति चिन्तितम् ।
तस्याभिध्यासमुत्थस्य विषस्य फलमागतम् ।। ११९ ।।

व्यापारानलदग्धोऽपि[६] पारुष्यैः[५] पुरुषाधम[६] ।
दहनाद्दहनं प्राप्तो तप्यसे च विकत्थसे ।। १२० ।।

व्यापारपरमोहे तु नरकायोपपत्तये ।
रज्ज्वैस्तथैव बद्धोऽपि पुरुषः परिक्रन्दसे ।। १२१ ।।

व्यापादेनाकृष्टोऽपि घोरं नरकमागतः[७] ।
कर्मदायाद् भवेन्मोक्षो नरकाच्च[७] विमोक्ष्यसे ।। १२२ ।।

१-१	भवति नरकेमम:	-	क०,ख०	२-	प्रभवते	-	क०
३-	अवद्यं	-	क०,ख०	४-	दृष्टा	-	क०,ख०
५-	मानुष्यं	-	क०,ख०	६-६	प्राप्तविकथाये च तप्यसे	-	क०,ख०
७-७	नरकं च विवेस्तनात्-		क०,ख०				

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अधर्मकथनं दहत्येव -

अधर्मो धर्मरूपेण साधुरूपेण पापकम् ।
यत् त्वया कथितं पूर्वं तत् त्वां दहति नानलः ।। १२३ ।।

कथं तत्त्वविनष्टानां धर्माधर्मविनिश्चताम् ।
देशितं विवरं पापं[1] नियतं पापगामिकम् ।। १२४ ।।

यस्त्वया वर्जितो धर्मः साधवश्चापि निन्दिताः ।
यत्त्वयोपार्जितं कृष्टं तत्त्वयाद्य विपच्यते ।। १२५ ।।

तृष्णाविषय[3]युक्तेन मोहवेगेन सर्वदा ।
यतः सद्धर्मविनयैः किं तथा परिदेवसे[4] ।। १२६ ।।

(नं० ८१३०) स भवेत् पापकृन्नित्यं मोहपाशवशङ्गतः ।
किं तप्यसे रौद्रिणो[5] व धर्मं[5] कृत्वा सुदारुणम् ।। १२७ ।।

हेतुप्रत्ययमूढस्य धर्माधर्मेषु सर्वदा ।
प्राप्तोऽसि नरकं घोरं नारकाग्रं सुदारुणम् ।। १२८ ।।

कामैः भ्रमति[6] संयुक्तैर्यन्न भवति चेष्टितम् ।
सुकृतं कर्मविरतं फलमेतदुपस्थितम् ।। १२९ ।।

१- संपापं - क०, ख० २-२ त्वयाविवर्जितो - क०, ख०
३- व्यमति - क०, ख० ४- परिदेवशे - क०
५-५ धुनाचालकर्मं - क०, ६- कुमति - ख०
सेधुना चालकर्म - ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दापयित्वा प्रमादेन सुखासक्तेन चेतसा ।
सुकृतं नरकं यान्ति देवाः कामवशानुगाः[1] ।। १३० ॥

आर्यापवादका नरकं यान्ति -

आर्यापवादका ये च यैव[2] कर्मकलहप्रियाः ।
ते मृत्वा नरकं यान्ति ये च मिथ्याविनीतकाः[3] ।। १३१ ॥

जननीगुरुपापीयान् ये चान्ये धर्मवञ्चकाः ।
तेषामिष्टकरा लोके नरकस्य च गामिनः ।। १३२ ॥

ये चान्ये सुखसंसक्ता नित्यं पापरता नराः ।
दुःखाद्दुःखं तु ते यान्ति चित्तेन परिवञ्चिताः ।। १३३ ॥

तस्मादवद्यकार्ये न मतिं कुर्यात्[4] कथञ्चन[4] ।
हीनान्यवद्यकार्याणि नरके पातयन्ति च ।। १३४ ॥

कर्माणि[5] कुर्यात्[5] कुशलानि नित्यं,
परार्थवद्धेन मनोरथेन ।
हितः[6] सदैव नरकस्य रोधी[6],
श्रेष्ठोऽपवर्गो[7] दशधर्मरूपः ।। १३५ ॥

।।इति नरकवर्गः षोडशः।।

---:0:---

१- ०वशानुगा- क०
२- एव - क०
३- ०विनितका - क०,ख०
४-४ क०,ख०पुस्तकयोः नास्ति
५-५ / ७- श्रेष्ठोऽपवर्गस्य - क०,ख०
६-६ क०,ख०पुस्तकयोः नास्ति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१७) प्रेतवर्गः सप्तदशः

अदीपिका प्रभावत् अदान्तस्य कुतः सुखम् ?

अदान्तस्य कुतः शान्तिरतृप्तस्य[1] कुतः फलम् ।
अदीपिका प्रभा नास्ति अदानस्य कुतः[2] सुखम् ॥१॥

तृष्णान्निर्हि तथा नास्ति नयनार्थस्य देहिनः ।
दानेन विरहात् तद्वत् सुखं प्रेतैर्न लभ्यते ॥२॥

(ने० ८१ ख०) यं प्रेत्य प्रेतलोकस्य त्रिलोके च यथाक्रमाः ।
प्रमेण[3] परमोद्विग्नास्तस्मात्स्वयंकृतं फलम् ॥

न दात्रा[4] लभ्यते किञ्चित् कृतनाशो न विद्यते ।
स्वकर्मफलभोक्तारः प्राणिनः कर्मभोगिनः ॥४॥

तव यत्सुकृतं दग्धाः प्रेत्यलोकेष्ववस्थिताः ।
क्षुत्पिपासा[5]समर्थेनेह वह्निना परिदीपिताः ॥५॥

कदा तु विषयोऽस्माकं भविष्यति सुखोदयः ।
परिदाहात् कदा चास्मात् परिमोक्षो भविष्यति ॥६॥

१- प्राप्ता - क०,ख०   २- कुतो - क०,ख०
३- प्रमति - ख०   ४- दातु - क०,ख०
५- क्षुत्पिपासा० क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मार्गामार्गविहीना दुःखित एव जीवति -

मार्गामार्गं विविक्तोऽहं न ज्ञातं कर्मणः फलम् ।
दुर्भिक्षनाशमयो वह्निरशात:[१] कण्टकोदयः[२] ।। ७॥

क्लेशान्धकारवदना निराशास्त्यक्तजीविका: ।
त्वन्मनायुजासंबद्धा: स्म जीवामो बत दुःखिता:।।८।।

[४] [५] न सर्वतोऽस्ति त्राता नो हन्त कृच्छ्रगता[५] वयम् ।
उत्पन्नेषु मनुष्येषु लपिष्ठता: स्वेनकर्मणा।।९।।

कस्मान्न चरितो धर्मो रत्नदीपेषु सञ्चित: ।
य: करोति शुभं नित्यमशुभं न च सर्वदा ।।१०।।

स्वदृष्टिपथेनैति[६] स्वर्गसोपानमाश्रित: ।
येषामर्थे[७] कृतं पापं देहजम् मानसं बहु।।११।।

अनेन ते गता: सर्वे भवानत्रासने स्थित: ।
बद्धोऽसि बन्धनैस्तीव्रैर्मदचैरधिष्ठित: ।।१२।।

१- वान्हनरि - क०,ख०   २- कण्टकोदयम्- क०,ख०

३- क्लेशान्धकार० - क०,ख०

४- कान्तारमग्नदेशानां दुःखितानाञ्च सर्वत: - ख०

५-५ नां च सर्वत्र त्राता नास्ति हत किंचत्कृष्टार्पणगता- क०

६- स्वेदृष्टिपथनेति -क०,ख०   ७- कन्यार्थेन - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(ने० ८२ अ०) प्राप्तोऽसि तमसो घोरं यमलोकं दुरासदम् ।
इहोपभोक्ष्यसे कर्म यत्त्वया कुकृतं कृतम् ।। १३।।

पापरज्ज्वाऽऽकृष्यमाणः स्वकृतं भुनक्ति -

स्वकृतं भुज्यते बालः परेषां[1] नैव भुज्यते ।
स कृष्याकृष्यमाणो हि पापरज्ज्वा सुघोरया।।१४।।

अनलः[2] प्रेतलोकस्य क्षुत्पिपासामयोमहान्[3] ।
नाग्निशस्त्रविषाणां हि निपातस्तादृशः कटुः।।१५।।

क्षुत्पिपासामयाग्नेर्निपातो यादृशः[4] कटुः ।।
न क्षणो नापि हि लवो न मुहूर्तो न शर्वरी[5]।।१६।।

यत्र सौख्यं भवेन्मृत्युर्नित्यं दुःखावृता वयम् ।
दुःखाद् दुःखतरं प्राप्ता दुःखहेतुर्निषेवितः।।१७।।

दुःखात् कदाचिन्मोक्षः स्याद् भविष्यति सुखोदयः ।
नोत्सवे दृश्यते तोयं तडागेषु[6] च शुष्यति।। १८।।

सरितो[7] नाश्मायासु: कथं धावामहे वयम् ।
ते वयं शुष्कसलिलाः सशैलवनकाननाः ।।१९।।

१- पारक्यं - क०,ख० २- आनिला - क०,ख०
३-३ प्रेतभुवनक्षुत्पिपासामयं महत्- क०,ख०
४-४ क्षुत्पिपासाख्यस्याग्निन्निपातोयादृ- क०,ख०
५- सर्वरी - क०,ख० ६- तादागेषु - क०,ख०
७- शरितो - क०,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परिधावामहे भूमौ नित्यं सलिलकांक्षिणः ।
ते वयं दग्धतनवः क्षुत्पिपासाहता नराः ॥२०॥

शरणं नाधिगच्छामः कष्टं व्यसनमागताः ।
वज्रदंष्ट्रैर्मशातीक्ष्णैः काकोलूकैरिव सम्मतः ॥२१॥

अभिद्रुता न पश्यामि शरणं सौख्यदायकम्[1] ।
प्रतिबिम्बमिदं तस्य कर्मणः समुपस्थितम् ॥२२॥

(नै० ८२ब०) कृतं[2] कर्म यथा ऽस्माभिस्तथेदं[2] फलमागतम् ।
कर्मवागुरया बद्धाः कर्मसूत्रेण पाशिताः ॥२३॥

<u>कर्मक्षयादृते न मुक्तिः -</u>

पलायनं न पश्याम ऋते कर्मक्षयादिति ।
यस्य पापान्यनिष्टानि वह्निवत् तानि पश्यति ॥२४॥

स नैतिप्रेतभवनं क्षुत्पिपासानलावृतम् ।
मुहुर्मुहुः प्रवर्धन्ते वेदना नरकोद्भवाः[3] ॥२५॥

ज्वालामालाकुलस्यैव शैलस्य सदृशा वयम् ।
ज्वलितः शाम्यते शैलः सलिलैर्येन सर्वथा ॥२६॥

स समुद्रोपमो वह्निरस्माकं नैव शाम्यति[4] ।
कस्मिन् क्षणे समुद्भूतस्तृष्णा वायुसहायवान् ॥२७॥

१- सौख्यदर्शनं - क०, २-२ कृतास्तर्यथास्माभिस्तथेदं - क०,ख०
३- तृषमुद्भवा - क०,ख० ४- शाम्येत् - क०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्माग्निर्निर्दहत्यस्मान् परिवार्य समन्ततः ।
ते वयं पापकर्माणः शुक्लधर्मविवर्जिताः ॥२८॥

प्रेतलोकमिमं प्राप्ताः स्वर्गस्य फलमोहिताः ।
क्षुत्पिपासामयो[१] वह्निर्ज्ञेया यस्याग्निसम्भवः ॥२९॥

मुद्गराभिमया दारा[२] न पुत्रा न च बान्धवाः[२] ।
वञ्चितोऽस्मि स्वचित्तेन कर्मणा पारवञ्चितः[३] ॥३०॥

प्राप्तोऽस्मि प्रेतभवनं मित्रज्ञातिनिराकृतः ।
न दारा नापि मित्राणि न पुत्रा नापि बान्धवाः ॥३१॥

ज्ञायते कर्मपाशेन नीयमानं बलीयसा ।
(नै०८३ अ०) नान्यस्त्राता यथा कर्म त्रिविधं मुच्यते मया ॥३२॥

दानं शीलं श्रुतं चापि त्रिविधं परिकीर्तितम् ।
मोहजालवृतेनेह यन्मया सुकृतं कृतम् ॥३३॥

कर्मणो[४] हेतुभूतस्य यत्कृतं फलमागतम्[४] ।
यदि मुच्यामहे पापात् प्रेतलोकाद् दुरासदात् ॥३४॥

१- ०शावय० - क०

२-२ चापितृतीयं मुक्तो मया - क०,ख०

३- परिमोहिता - क०

४-४ हेतुभूतस्य कर्मणफलमागतः यत्कृतं - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अशुभानि कुकर्माणि विवर्जयेत् -

न भूयः पापकं कर्म करिष्यामि कथञ्चन:[1] ।
उष्णान्युष्णविपाकानि महापापकराणि च ।
कुकर्माण्यशुभानीह तस्मात्तानि विवर्जयेत् ।।३५।।

।। इति प्रेतवर्गः सप्तदशः ।।

---:o:---

१- कथयंचन: - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१८) तिर्यग्वर्गोऽष्टादशः

परद्रोहं कदापि न कुर्यात् -

भक्षणं भवत्यन्योन्यवधबन्धावरोधनम् ।
तिर्यग्योनिं समासाद्य तस्माद् द्रोहं विवर्जयेत् ॥१॥

मोहापहतविज्ञानाश्च[१] शीलदानविवर्जिताः ।
तिर्यग्योनौ च जायन्ते बालास्तृष्णाविडम्बिताः ॥२॥

गम्यागम्यं न विन्दन्ति भक्ष्याभक्ष्यं तथैव च ।
कार्याकार्यबहिष्ठा ये धर्माधर्मतिरस्कृताः ॥३॥

पञ्चेन्द्रियवशा मूढाः तृष्णापाशवशानुगाः ।
क्रोधेर्ष्याप्रतिघग्रस्तास्तिर्यग्योन्युपगा नराः ॥४॥

पर्यैष्ट्युपहता मर्त्याः प्रमादोपहताः सुराः ।
दुष्कर्व्यसनाः प्रेताः कारणाश्च च नारकाः ॥५॥

(ने०८३ ख०) परस्परवधात्युक्तास्तिर्यग्योनिपरायणाः ।
एवं बहुविधैस्तैस्तैस्तिर्यग्जनैराकुलं जगत् ॥ ६ ॥

१- ०विज्ञानाः - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मात्सर्योपहतो दुष्कृतं न कुर्यात् -

न कुर्याद् दुष्कृतं कर्म मात्सर्योपहतः परम् ।
मात्सर्योपहताः यान्ति प्रेतास्तिर्यक्षु जन्तवः ।।७।।

तेषां हि सफलं जन्म तेषां बुद्धिरवञ्चिता ।
ते च पूज्याः सदा सद्भिर्येषां धर्मे सदामतिः ।।८।।

एवं त्रिदोषाकुलकर्मसारं,
जगद् भ्रमत्येव दुरावगाढम्[1] ।
करोति यस्तस्य च शुद्धसत्त्वो-
ऽवमाननां[2] ज्ञानरथावरूढः[2] ।।९।।

।। इति तिर्यग्वर्गोऽष्टादशः ।।

---:o:---

१- दुरावगाधं - क०,ख०
२-२ विमानं ज्ञानरथावरूतः - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(१९) क्षुधावर्ग एकोनविंशः

क्षुधापीडिताः नराः अशुभं कुर्वन्ति -

संसारे प्रायशो दुःखं[1] त्रैधातुकक्षुधामयम्[2] ।
येनेमे पीडिताः सत्त्वाः कुर्वन्त्यशुभमात्मनः ।।१।।

स्वदेहे क्षुधितो वह्निर्बुद्बुदोत्पद्यते ।
शेषो दहति लोकान्[3]वै कल्पानल इव द्रुमान् ।।२।।

लोकोत्तरमिमं वह्निं गच्छन्तमनुगच्छति ।
नात्मनिर्वाणसन्तुष्टं कल्पान्तरशतैरपि ।।३।।

नानात्वस्य हि तद्वीर्यं क्षुधाया यादृशं बलम् ।
त्रैधातुकमिदं कृत्स्नमाहारं प्रतिवर्तते ।। ४ ।।

मोहयेद् विविधाः चिन्ता लोके मनुजसम्भवाः ।
ताः सर्वा भोजनार्थाय भवन्ति त्रिभवार्णवे ।।५।।

दुःखं वर्णयितुमशक्यम् -

(नै०८४अ०) अन्तराभवसंस्थस्य कृष्यमाणस्य कर्मभिः ।
दीर्घागमस्य[4] यद् दुःखं न तद्वर्णयितुं क्षमम् ।।६।।

१- दुःखेन - क०,ख० २- त्रिदुःखक्षुधा० - क०,ख०
३- लोकानां - क० ४- ०ध्वस्य - ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अविद्येन्धनमग्नस्य[1] दह्यमानस्य चोष्मणा ।
गर्भस्थस्य हि यद्दुःखं न तद्वर्णयितुं क्षमम्।।७।।

आहाररसगृद्धस्य नित्यं तद्गतचेतसः ।
यद्दुःखं परगृद्धस्य न च वर्णयितुं क्षमम्।।८।।

दृष्टा विदग्धमनसः कामे वा तप्तचेतसः ।
यद् भवत्यधिकं दुःखं न तद्वर्णयितुं क्षमम्[2]।।९।।

अप्रियैः सह संसर्गो विषयास्तस्य नित्यशः[3] ।
प्रणष्टे हृदि यद् दुःखं न तद्वर्णयितुं क्षमम्।।१०।।

तृष्णाविषविदग्धस्य नित्यं पर्येषणात्मकम् ।
आमृत्यु यद् भवे दुःखं न तद्वर्णयितुं क्षमम् ।।११।।

अभ्युच्छिन्नं बहुविधं यद् दुःखं पापमित्रजम् ।
अपायजनकं यस्य न तद्वर्णयितुं क्षमम् ।।१२।।

व्यसनं पुत्रदाराणां यद् दृष्ट्वा[4] हृदि बाध्यते ।
नरकाणां[5] महामार्गो[5] न तद्वर्णयितुं क्षमम् ।।१३।।

१- कुणिपामेध्यमग्नस्य - क०, ख० २- भ्रमं - क०
३- नित्यशः - क०, ख० ४- दृष्टा - क०, ख०
५-५ महामन्ययेन - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्षुत्पिपासा विदग्धस्य दीप्यमानस्य[1] वह्निना ।
यद् दुःखं नष्टमनसो न तद्वर्णयितुं क्षमम्॥ १४॥

अवज्ञां परिभूतस्य मित्रज्ञातिसुहृज्जनैः ।
(नै०८४४०) यद् भवेच्छोककं[2] दुःखं तद्वर्णयितुं क्षमम्॥१५॥

दारप्रलम्बनगतं[3] दुःखलं प्रियचेतसः ।
यद् दुःखं जाण्डीयस्य न तद्वर्णयितुं क्षमम्॥१६॥

मृत्युना म्रियमाणस्य तस्माल्लोकात्मनो रसात् ।
यद् दुःखं जायते मूर्ध्नि न तद्वर्णयितुं क्षमम्॥१७॥

दानेन अशुभनाशः कर्तुं शक्यते -

यत् कुर्वन्त्यशुभं बाला यच्च गच्छति दुर्गतिम् ।
तदाहरति दानेन कथयन्ति मनीषिणः ॥१८॥
प्रतिकृष्कृतकर्माणि वर्जनीयानि सर्वदा ।
सुकृतेषु मनः कार्यं दानशीलविभूषितम्॥१९॥

॥इति क्षुधावर्ग एकोनविंशः ॥

---:o:---

१- दीप्यनस्य - क०,ख० २- यद्भवेच्छोकं - क०
३- दारप्रलम्बन - क०,
दण्डावलम्बन- ख०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

: : : (२०) कौशीद्यवर्गो विंशः

कौशीद्येन ज्ञानहानिः -

कौशीद्यमतिमाया च दम्भः पारुष्यमेव च ।
नियातभूमयो दृष्टा ज्ञानस्य च विवर्जनम् ॥१॥

संश्लेषश्चाप्यसाधूनां साधूनां वर्जनं तथा ।
नाशस्य हेतवः शङ्का मिथ्यादर्शनमेव च ॥२॥

आदेशकालसंरम्भो वाच्यावाच्यमजानतः ।
अनर्थभूमयो ह्येता विश्रम्भश्चापि तन्मयः ॥३॥

अनर्थभूमयः -

येन तेन च सम्प्रीतिः यत्र तत्र च भोजनम् ।
लाघवं जनयत्यन्तेऽप्रशंसा चात्मनस्तथा ॥४॥

धैर्यनाशः स्मृतिभ्रंशो विरोधः पार्थिवेन च ।
अक्रान्तमृत्यवो[1] ह्येते क्रूरता मनसंभवा ॥५॥

अस्मात्फलतत्त्वज्ञो धर्माधर्मबहिष्कृतः ।
(नै०८५८०) पुरुषः साधुनिर्मुक्तः प्रपातगमनाशयः[2] ॥६॥

कौशीद्यमतिनिद्रा च रसना गृध्यते तथा ।
पुंश्चयोनयः प्रोक्ताः पारुष्यवचनं तथा ॥७॥

१- अकालमृत्यवो - क०, ख०
२- ०नाशः - क०,
नायमः - ख० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतिलोभोऽभिमानं च अतिमानश्च चापलम् ।
धर्मवर्ज्या[1] कामसेवा[1] मोहस्य परिवारिका॥८॥

दोषाणां मूलं कौशीद्यम् -

त्रयाणामिह दोषाणां कौशीद्यं मूलमुच्यते ।
वीर्यारम्भेण दूष्यन्ते दोषा[2] मनसि सम्भवा[2]:॥९॥

वीर्यारम्भेण हि फलं ह्यवश्यमुपभुज्यते[3] ।
न्यायेनारब्धतत्त्वस्य कर्मणो दृश्यते फलम्॥१०॥

कर्मणास्त्रिविधस्यास्य फलं त्रिविधमुच्यते ।
त्राणि नियतं तच्च त्रिमूलं त्रिभवानुगम्॥११॥

कौशीद्यसेविनो दुर्गतिः -

पापसेवी प्रचण्डो यः कौशीद्यमपि सेवते[4] ।
धर्मविद्वेषकः क्रूरोऽनुत्पथानुधावति[5] ॥१२॥

यत्र[6] तत्र[6] च सन्तुष्टो यत्र[6] तत्र[6] प्रकुप्यते ।
यत्र तत्र च संसक्तो स मूढ इति कथ्यते॥१३॥

कौशीद्यं यत्[7] स्वमनसः[7] प्रमादविषमूर्च्छितम् ।
प्रयातं तं च प्रारब्धमविसंवादकं परम् ॥१४॥

१-१ धर्मवर्जनकामसंसेवनं चैव - क०,ख०   २-२- दोषाऽस्यानुसयातृणां - क०,ख०
३- हि अवश्यमुपभुज्यते - क०,ख०   ४- शेवते - क०
५- क्रूरोन्सकानुपधावति - क०   ६-६ यस्य तस्य - क०,ख०
७-७ समयनस - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वीर्यारम्भे महापाप कौशीद्यमलवर्जिता: ।
विमुक्तेरुपभोक्तारस्ते जना: सुखभागिन: ।।१५।।

कौशीद्यं सर्वधर्माणामवरामरकं परम् ।
(नै०८५ ख०) तेन दोषेण महता नरा दु:खस्य भागिन: ।।१६।।

सहायस्ते[2] सुखावेशो तस्मात् तत् परिवर्जयेत् ।
तेन विद्धो हि पुरुष: स्वपिस्तुल्य: समन्तत: ।।१७।।

कुशीदस्यालस्यभाजस्य मोहापहृतचेतस: ।
कुत्सित: स्वजनै: सर्वैर्नगतिर्वर्धते शिवा ।।१८।।

कौशीद्यपापसंसर्गी स्त्यानमिद्धं तथैव च ।
मोदाकारविघाताय भवन्त्येन्ते महाभया: ।।१९।।

दु:खस्थैतानि कर्माणि -

आक्रोश्यमनशाप्यमौद्धत्यं पापमित्रता ।
दु:खस्थैतानि कर्माणि तेभ्यो रक्षेन्तु पण्डित: ।।२०।।

कौशीद्येनाभिभूता ये निरारम्भा गतत्विष: ।
सौख्यावासमरणं तेषां जी[2]वितं चा[3]पि निष्फलम् ।।२१।।

जीवमाना न जीवन्ते कौशीद्योपहता नरा: ।
मृत्योरत्यधिकं ह्येतत् कौशीद्यमिति मन्यते ।।२२।।

१- विमुक्ति: - क०,ख०

२- सहायंत्र - ख०

३-३ जीतार्थीपि - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आरब्धवीर्या एव भवसागरं तरन्ति -

कौशीद्यपङ्कमग्ना ये मग्नास्ते दुःखसंस्तरे[1] ।
आरब्धवीर्या ये पुंसस्ते तीर्णा भवसागरात्।।२३।।

कौशीद्यान्मन्दवीर्यो यः सदा पापरतश्च यः[2] ।
स जीवमानोऽपि मृतो मृतस्तु नरकाय सः[3]।। २४।।

मानवानां निर्धनत्वे कौशीद्यं कारणम् -

निर्धनाः पशुभिस्तुल्यास्ते नरा दुःखभागिनः ।
परपिण्डाशिनो दीनाः कौशीद्यं तत्र कारणम्।।२५।।

(नै० ८६ ख०) प्रायशस्तु[4] कुशीदानां[4] परदारोपजीविनाम् ।
रतामिलाषोऽत्यधिको मैथुने च सदा रतिः।।२६।।

ते तत्त्वकारिका रिक्ताः केवलाहार तत्पराः ।
मृत्युकाले समुत्पन्ने दह्यन्ते स्वेन[5] चेतसा।।२७।।

शीतोष्णं च सहन्त्येते क्षुत्पिपासे तथैव[6] च[6] ।
गात्रान्ता च क्रिया कार्या यात्रार्थाय सर्वदा।।२८।।

अतः सुखार्थिना कौशीद्ये न मतिः कार्या -

न कौशीद्ये मति कुर्यात् कुशीले शीलकामुकः[7] ।
संसारे सीदति नित्यं न च दुःखात् प्रमुच्यते।।२९।।

१- दुःखसागरे - क०   २- सु - क०
३- शः - क०   ४-४ प्रायशः सुकशीदाना - क०,ख०
५- स्व न - क०   ६-६ महतथा - क०,ख०
७- ०पामका - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परिभूयते सतां मध्ये कुशीदाल्लोके वञ्चितः ।
वञ्चितस्य भवत्यन्ते कर्मणो[१] वा विमुच्यते ।।३०।।

वीर्यवान्[२] लब्धस्मृतिमान् स्वान्तनिरतः[२] सदा[३] ।
विमुक्तः पापकर्मभ्यो दीर्घं प्राप्नोति यत्नतः ।।३१।।

एवं विधा दुःखपरम्परा हि,
सत्त्वे[४] कुकर्मेषु[५] मतिं[५] न कुर्यात् ।
लोके त्रिदोषानलसम्प्रदीप्ते,
कुर्यात् परां शान्तिं कृपाजलेन[६] ।।३२।।

उदानम् -

विषयान्कर्मसंयोजनः यथापापम् ।
नरकप्रेत तिर्यक्षु कौशीद्यं दरमं विदुः ।। ३३ ।।

।।इति कौशीद्यवर्गो विंशः।।

---:o:---

१- कर्मतो - क०,ख०
२-२ वीर्यालब्धस्मृतिर्मां च स्वान्तरि न रतः - क०,ख०
३- पण्डित - क०,ख०
४-४ सत्त्वा - क०,ख०
५-५ कुकर्मेषु ति-- क०,ख०
६- मृतेन - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२१) करुणावर्ग एकविंश:

करुणा मातेव हितकारिणी भवति -

कृपा सर्वेषु भूतेषु मातेव हितकारिणी ।
(ने०८६ ख०) यां समाश्रित्य पुरुषाः प्रयान्ति सुखमुत्तमम्।।१।।

दयान्वेषीह पुरुषः सर्वसत्त्वहिते रतः ।
पूजनीयः सतां याति प्रेत्य स्वर्गे च मोदते ।।२।।

दयावन्तः सदावृत्तं सर्वभूत हिते रतम् ।
तमेवं पुरुषं नित्यं प्रणमन्ति दिवौकसः।।३।।

प्रयाति देवलोकं च शीलवान् करुणान्वितः।
कृपान्वितः स पुरुषो हि चन्द्रमा इव शोभते[1]।।४।।

सुखार्थिना करुणा सेवितव्या -

आश्रयन्ति च भूतानि गतशोकगतव्यथाः ।
तस्माद् दयाप्रयत्नेन सेवितव्या सुखार्थिना।।५।।

यस्य वाङ्[2] कायचित्ते[2] च कारुण्येन विभूषिते ।
तस्य भिक्षया लोका भवन्ति यशसा[3] वृताः।।६।।

कारुण्याद्रस्य विदुषो नित्यं मुदिन्द्रियस्य[4] च ।
सम्यग्दृष्टिप्रयत्नस्य निर्वाणं नाति दूरतः ।।७।।

१- शोभते - क०   २-२ क वाकधर्तचित्तं - क०,ख०
३- यशसा - ख०   ४- सुर्यन्द्रियस्य - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारुण्यविभूषिता मनुष्यलोकं देववद् भूषयन्ति -

मनुष्यलोके ते देवा ये कारुण्येन विभूषिताः ।
कारुण्येन दरिद्रा ये ते दरिद्राः सतां मताः ।।८।।

मृदाशया मर्त्याः साधवः -

मृदाशया हि ये मर्त्याः साधुवत् काञ्चनोपमाः ।
कारुण्यमाधुर्यं येषां सदा मनसि वर्तते ।। ९।।

ते च सत्त्वाः सदोद्युक्ता नित्यं धर्मपरायणाः ।
येषां कारुण्यदानेन हृदयं सम्प्रकाशितम् ।।१०।।

न रात्रौ न दिवा तेषां धर्मो हि विनिवर्तते ।
(नै०८७ अ०) येषां[१] सर्वास्ववस्थासु करुणाभिरतं मतम् ।।११।।

कारुण्यशालितं[२] चित्तं[२] सर्वसत्त्वहितेरतम्[३] ।
भुक्त्वा सौख्यं निरुपमं पश्चाद् गच्छति निर्वृतिम्।।१२।।

कारुण्यमविनाशि धनम् -

कारुण्यं मुनिभिः शस्तं कारुण्यं निर्मलं परः ।
कारुण्यं दोषनिर्घाति कारुण्यं धनमव्ययम् ।।१३।।

गुणानां भूषणं चाग्र्यं सर्वदोषनिघातकम् ।
कारुण्याद्वा हि परमं प्रयान्ति धनमच्युतम्।।१४।।

१- षणा - ब०

२-२ ०शीतचित्तं - प०

३- सर्वसत्त्वहितैरत प०,ब०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारुण्यं बंधनं यस्मान्माधुर्यपयसा युतम् ।
न दाहः शोकजस्तस्य हृदये सम्प्रवर्तते ।।१५।।

कारुण्यनावमारुह्य प्रीतिधैर्यपरायणः ।
त्रिदोषोर्मिमहावेगं प्रयाति भवसागरम् ।।१६।।

गुणानामक्षयं श्रेष्ठं विना विघ्नं भूषणम् ।
साधूनां दीयते नित्यं कारुण्यमिति कथ्यते ।।१७।।

मार्दवं यस्य हृदये विलीनमिव काञ्चनम् ।
स[1] अनोऽस्मिन् हि कल्पान्ते दुःखादाशु विमुच्यते[1] ।।१८।।

दयालोः श्रेयांसि रोहन्ति -

यस्य पात्रीकृतं चित्तं मार्दवेण समन्ततः ।
श्रेयांसि तस्य रोहन्ति केदारे[2] इव शालयः[2] ।।१९।।

चेतोगृहे निधानं तदव्ययं सर्वदेहिनः[3] ।
निर्वासयति दारिद्र्यं नृणामध्याशयं महत् ।।२०।।

(नै०८७क०) तादृणोन्द्रियस्य शान्तस्य निध्यानस्य[4] विचारिणः ।
विषयेषु[5] प्रमत्तस्य दुःखं नैव प्रधावति ।।२१।।

मैत्रेण चेतसा नित्यमनुकम्पादयापराः ।
ते हेतुफलतत्त्वज्ञा दुःखपाशाद् विनिर्गताः[6] ।।२२।।

१-१ सोऽअनिश्चितकल्पानो दुःखात्तु विमुच्यते - क०,ख०

२-२ केदारे विवशालयः - क०,ख० ३- देहिनो - क०,ख०

४- नित्यध्यानस्य - ख० ५- विषयेणुवा- क०,ख०

६- विनिर्मुक्ताः - क०

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न सङ्कल्पे मनो येषां रमते दोषवर्जितम् ।
ते दोषभयनिर्मुक्ताः[१] पदं गच्छन्त्यनुत्तमम्।।२३।।

शान्तिक्रियासमायुक्ते मित्रवानकुतोभयः ।
प्रियो भवति लोकेऽस्मिन् पश्चाद् देवेषु मोदते।।२४।।

दयारत्नं सदा श्रेष्ठम् -

मातृवत् पितृवच्चैव सर्वलोकस्य ते जनाः ।
दयारत्नं सदा येषां मनसि स्थितमुत्तमम्।।२५।।

सुखस्य च परं मूलं कृपैव[२] परिकीर्तिता[२] ।
यदि[३] यस्य कृपा नास्ति स दुःखी परिकीर्त्यते[३]।।२६।।

एकसत्योदरं ब्रह्म एकस्यानुत्तरं शिवम् ।
एकविद्या परं तात[४] मैत्री एका सुखावहा।।२७।।

अहिंसका सदा धन्या सद्दृष्टिपरमाशुभा[५] ।
एतज्ज्ञा[६]तु सदा सत्ये[६] पापानां चापि वर्जनम्।।२८।।

कर्तव्यः पुरुषैस्तस्मात् कृपासंवेगमानसैः ।
दानशीलक्षमामैत्रीज्ञानाभ्यास एव निर्मलः।।२९।।

।।इति करुणावर्ग एकविंशः।।

---:०:---

१- ०भयविनिर्मुक्ता - क०,ख०   २-२ कृपैवैकस्यप्रकीर्तिता - क०,ख०
३-३ दयायस्य नास्ति हृदये स सदुःखित्वं प्रकीर्त्यते - क०,ख०   ४- माता - क०,ख०
५- ०पराशुभाः - क०,ख०   ६-६ कुर्वेतावदासत - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२२) दानवर्गो द्वाविंशः

शुद्धदानस्य माहात्म्यम् -

द्वादशगुणसंयुक्तं[१] मलैर्द्वादशभिर्विना ।
(नै० ८८ अ०) दानं भवति शुद्धं तद् विपरीतं सकल्मषम् ॥१॥

देवानामथ वा[२] नृणां धनस्य[२] बलमुत्तमम् ।
दानेन रक्षिता पादे पतन्ति पुरुषाधमाः ॥२॥

लोभमात्सर्यमलिनाः[३] पुत्रदारवशानुगाः ।
मनुजाः निधनं यान्ति केवलाहारकांक्षिणः ॥३॥

लोभग्रन्थिविभेदाय यान्त्वाकृष्टादायाय[४] च ।
तमोनिचयनाशाय प्रदानमिह दीयते ॥४॥

अदुष्टां[५] वरते दानं[५] दातापि तदनन्तरम् ।
मार्गसन्दर्शिवद्दानं[६] परलोकं समृच्छति[७] ॥५॥

दानाम्भसि नरः स्नात्वा शीलेन[८] परिभाविते ।
ज्ञानविस्तीर्णविमलं[९] पारं दुःखस्य यान्ति वै ॥६॥

१-	द्वादश०	-	क०	२-२	पुंसानांधनं	-	क०,ख०
३-	०मलिन	-	क०	४-	मा च	-	क०,ख०
५-५	अग्रतश्चरतेदानं		ख०	६-	०संदर्शी दानं	-	ख०
७-	समिच्छते	-	क०,ख०	८-	शीतोम्भि	-	क०,ख०
९-	०विस्तीर्ण	-	क०,ख०				

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दोषनाशकाः त्रयो दीपाः -

पुरुषोणे[1] त्रयो दीपाः प्रज्वाल्या हितमिच्छता[1] ।
दानं शीलं तथा ज्ञानमेते दोषविनाशकाः ॥७॥

तृष्णाविवर्ते[3] दुर्गन्धिवितर्कोर्मिफेनाकुले[2] ।
दुःखार्णवे प्लुता ह्येते ज्ञानशीलेषु रक्षिताः॥८॥

क्लेशस्य भेषजं दानम्, शीलम्, ज्ञानम् -

क्लेशव्याधिनिहन्तारस्त्रयो वै भेषजाः स्मृताः ।
दानं शीलं तथा ज्ञानमेते नित्यं सुखावहाः ॥९॥

प्रमादविषमं[4] चित्तं[4] संकल्पकुटिलं लघु ।
बध्यते बन्धनैरेतैः त्रिभिर्ज्ञानादिभिर्नृणाम्॥१०॥

दोषाग्निभिः सदा[5] प्लुष्टो[5] यैरिदं दह्यते सदा।
(नं० ८८ क०) दानादिज्ञानयोगेन हत्वा गच्छति निर्वृतिम् ॥११॥

न दानज्ञानशीलेषु[6] येषां सन्निहिता मतिः ।
ते नित्यदुःखिता सत्त्वाः सुखं तेषां न विद्यते॥१२॥

१-१- त्रयः प्रदीपाः पुरुषः प्रज्वाल्यो हितमहिता- क०,ख०
२- दुर्गन्धिवितर्कोर्मिसंकुले- क०,ख०
३- पूर्वा - क०,ख०   ४-४ प्रमादविषमचिन्तं-ख०
५५- यत्रयोदृष्टा - क०,ख०   ६- ०ज्ञानशीलेषु -क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अदानक्रोधित सुखारिवद्दोषेण वञ्चिताः ।
भवन्ति विबुधाः[1] स्थित्वा[2] तस्माद्[2] दानपरो भवेत् ।।१३।।

दानोत्कर्षक्रमैर्युक्ताः मात्सर्यमलवर्जिताः ।
भवन्ति[3] हृष्टमनसो देवाः श्रीजापरायणाः ।।१४।।

दारिद्र्यपाशमयो वह्निरयं[4] प्रशान्तं प्रयाति ।
मात्सर्यं वै[5] फलं[5] तु तदुक्तं तत्त्वबुद्धिभिः ।।१५।।

दानप्रशंसा -

यो ददाति सुखं तस्य जायते जायते सुखम् ।
सुखं भवति दानाद्धि तस्माद् दानं प्रशस्यते ।।१६।।

लोकालोकान्तरं दानं गच्छन्तमनुगच्छति[6] ।
गतं च मन्त्रदानेन युज्यते मद्वत्सलैः ।।१७।।

अविसंवादकं स्थानमेतदुक्तं तथागतैः ।
अविसंवादकत्वाच्च नित्यं[7] दानपरो[7] भवेत् ।।१८।।

दानी भवार्णवं तरति -

मात्सर्यादिं विनिर्जित्य कृत्वा चित्तं शुभान्वितम्[8] ।
ये[9] प्रयच्छन्ति[9] दानानि ते तरन्ति भवार्णवम् ।।१९।।

१- विबुधा - क०,ख० २-२ शीवास्तस्मा - क०,ख०
३- भवति - क०,ख० ४- प्रेतानस - क०,ख०
५-५ विफलं - ख० ६- गच्छतः मनगच्छति - क०,ख०
७-७ नित्यादापरो क०,ख० ८- शुभान्वितम् - क०,ख०
९-९ यप्रयच्छन्ति - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दानं तु त्रिविधं दानं त्रिगुणं त्रिवर्जितम्[1] ।
तस्य दायविहीनस्य फलं दृष्टं त्रिवद्गुणः[2] ।।२०।।

सुखानुगन्ता मार्गः -

दानमादौ सदा देयं शीलं लभ्यं प्रयत्नतः ।
(ने०८६ ख०) तृष्णा ज्ञानेन हन्तव्या मार्ग[3] एष[3] सुखाय वै ।।२१।।

अनित्या[4] पापिका[4] तृष्णा लोकस्याहितकारिका ।
न शक्यं तद्विनाश्रेयः प्राप्तुं पदमनुत्तमम् ।।२२।।

अदाने न मनः कार्यं नित्यं दानरतो भवेत् ।
अदानात् दारिद्र्यपाताभ्यां दह्यते प्रेमभूमिषु ।।२३।।

दानेन शीलरक्षा सदा कार्या -

राजा भवति दानेन चक्रवर्ती सुधार्मिकः ।
दानभूमिं[5] समाश्रित्य शीलं रक्षन्ति पण्डिताः ।।२४।।

शीलवानपि कालशोऽज्ञानाद्[6] वै परिमुच्यते ।
दुःखैर्याणिको मार्गः स्वतोऽयं मुनिपुंगवैः ।।२५।।

तं विदित्वा महावीरो नित्यं[7] दानरतो[8] भवेत्[8] ।
अदानादपि[9] देवेषु देवा हि न सुखा मताः ।।२६।।

१-	त्रिव्यर्जितं -	क०	२-२	दात्राहितस्यैवं फलं	
३-३	सुखानवेह -	क०,ख०		दृष्टंत्रिवद्गुणा -	क०,ख०
४-४	अनित्यापापका	क०,ख०	५-	भूमि -	ख०
६-	कालशोऽज्ञान-	क०,ख०	७-	नित्यां -	क०,ख०
८-८	नित्यदानरभवत-	क०,ख०	९-	अदादपि -	क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आजन्मविपिने मत्स्या भवन्ति सुखभागिनः ।
दानस्य तत्फलं सर्वचेतनाभावितस्य हि ॥२७॥

<u>दाता यत्र कुत्रापि वसन् सुखी भवति-</u>

तिर्यक्ष्वपि समुत्पन्ना भवन्ति सुखभागिनः ।
तत्सर्वं दानजं सौख्यं कथयन्ति[1] मनीषिणः[1] ॥२८॥

यत् प्रेताः प्रेतभवने भवत्याकारभोजिनः ।
स्वयं[2] कृतस्य[2] दानस्य फलं भवति तादृशम् ॥२९॥

न दद्यात्[3] क्षुत्पिपासे च दह्यते[3] येन देहिनः ।
कदापि[4] न तपस्ताभ्यां[4] सफलं भवति शीतलम् ॥३०॥

<u>पापचारी मृत्युसमये दाहं प्राप्नोति -</u>

पूर्वं प्रमादचारी यो न दानादिषु वर्तते ।
(नै० ८९ क०) स पश्चान्मृत्युसमये दह्यते[5] स्वेन चेतसा ॥३१॥

<u>दानस्य फलम् -</u>

प्रियो भवति दानेन चेतसापि[6] स[6] तुष्यति ।
पश्चाद् भवति स श्रीमान् दानस्य फलमीक्षते[7] ॥३२॥

यत्र दानादि[8] वित्तस्यास्त्युपभोगाय सर्वदा ।
तत्र नष्टं[9] धनं तेषां[9] दयया परिरक्षितम् ॥३३॥

१-१ कथयन्ति मनीषिणः - क०,ख०   २-२ स्वयं कृतस्य - क०,ख०
३-३ दैवेत्क्षुत्पिपास्या येन दहति - क०,ख०   ४-४ तत्सर्वदानतप - क०,ख०
५- दह्यते - क०,ख०   ६-६ चेतसापि - क०,ख०
७- फलमीक्षते - क०,ख०   ८- दानाय - क०,ख०
९-९ क्षयन्ति धनं तेषां वाददया - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद् भुज्यते सदा विप्रैं गुरुभ्यश्चापि दीयते ।
यद् वनं शोभनं दृष्टं विपरीतं यथा तृणाम् ।।३४।।

दुर्बलानां ह्यनाथानां सत्त्वानां वदतां[1] कृतम्[1] ।
दानं निःकल्मषं यस्मादस्मिंल्लोके परत्र च ।।३५।।

मनुष्यभूमौ दानानि दत्त्वा यान्ति शुभां गतिम् ।
न देवा दानफलदः फलभूमिरसौ मता ।। ३६।।

मनुष्यभूमिः कर्मभूमि -

कर्मभूमिर्मनुष्याणां फलभूमिः सुरालयः ।
कर्मार्थं फलं सर्वं न फलं स्याद् हेतुकम् ।।३७।।

ध्यानाध्ययनानिर्मुक्तो दानशील विवर्जितः ।
सुवर्णकर्णयुक्तो[2] जीवन्नपि मृतैः समः ।।३८।।

स जीवति हि लोकेऽस्मिन् यो धर्ममनुवर्तते ।
धर्मच्युतः[3] सदामूढो जीवन्नपि मृतैः समः ।।३९।।

अज्ञानी तु बालिश एव -

मनुष्यकर्मणा हीनस्तिर्यग् भवति बालिशः ।
यस्य ज्ञानप्रदीपेन हृदयं[4] नावभासितम् ।।४०।।

भवत्येतावता पुरुषः यः शीलमनुवर्तते ।
(नै० ६०७०) शीलभ्रष्टं [5]पुमार्थं च जानीयात् निः[5]पराक्रमम् ।।४१।।

१-१ वदतामुत्तमम् - ४०,६०
२- दुर्वृत्तः कर्मभूतो - ४०
३- धर्ममूढ - ४०,६०
४- हृदयं - ४०
५-५ पुमान्सर्वैः श्वभिस्तुल्यो - ४०,६०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दानहीन: प्रेतविग्रहवान् -

दानहीन: प्रमादी[1] च[1] पापचारी चलेन्द्रिय: ।
नासौ मर्त्य इति ज्ञेय: प्रेतो विग्रहवानयम्।।४२।।

ज्ञानेन हीनो मृत एव -

ज्ञानशीलविनिर्मुक्तो दानरत्नविवर्जित: ।
जीवमानोऽपि पुरुषो मृत इत्यभिधीयते।।४३।।

दानशीलतपोध्यानाद् वीर्यस्मृतिसमाधिमान् ।
पुरुषोऽनु[2] च स रेजे देवैरपि स वन्द्यते[2]।।४४।।

गुणी नर एव पूज्यते लोके -

गुणवांस्तु नरो वन्द्य: निर्गुण: पशुभि: सम:।
गुणागुणविधिज्ञो य: स देव इति कथ्यते ।।४५।।

सुखी वित्तं भवेत्तस्य यस्य त्यागे स्थितं मन: ।
न हि त्यागविनिर्मुक्तं[3] जीवितं जीवनं मतम्।।४६।।

गतिपञ्चकमापन्नानां सत्त्वानां स्वेन कर्मणा ।
मातृवत् पितृवद् दृष्टं दानं नित्यं सुखावहम्।।४७।।

दानरता भवसंकटान्मुच्यन्ते-

एतां भूमिमवस्थाप्य[4] सत्त्वो दानरतो भवेत् ।
दानशीलरता नित्यं मुच्यन्ते भवसंकटात् ।।४८।।

।।इति दानवर्गो द्वाविंश:।।

---:o:---

१-१ प्रमादश्च - क०   २- पुरुष पुरुषो रेजे देवैरपि वद्यते - क०,ख०
३- ० विमुक्तं - क०
४- भूमिमवस्थाद्य - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२३) शीलवर्गस्त्रयोविंशः

शीलं सूर्य इव शोभते -

धनानामुत्तमं शीलं सूर्यो ज्योतिष्मतामिव ।
विहाय गच्छति धनं शीलं स्थितमिवाग्रतः ॥१॥

शीलेन त्रिदशान् याति ध्यानगोचरमेव वा ।
(नै० ६० क०) नास्ति शील समं ज्योतिरस्मिंल्लोके परत्र च ॥२॥

अल्पेन हेतुना स्वर्गम् प्राप्नोति ह स्वर्गकामिकः ।
तस्माद् दुश्चरितं हित्वा नित्यं सुचरितो[१] भवेत्[१] ॥३॥

चेतनाभावितं दानं शीलं च परिरक्षितम् ।
नयते देवसन्दर्शं पञ्चकामगुणान्वितम् ॥४॥

सुरक्षितेन शीलेनैव सुखं प्राप्तुं शक्यते -

न माता न पिता भार्या दयिता नापि बान्धवाः ।
न सुखाय[२] तथा दृष्टा यथा शीलं सुरक्षितम् ॥५॥

शीलं त्राणमिहामुत्र शीलं गतिरिहोत्तमम् ।
शीलवान् पुरुषो नित्यं सुखात् सुखमवाप्नुते ॥६॥

दानशीलसमाचाराः ये नराः शुभचारिणः ।
ते यान्ति देवसदनं रचिताः स्वेन कर्मणा ॥७॥

१-१ सुचरितं चरेत् - क०

२- सुखा - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निधानमव्ययं शीलं शीलसौख्यमतर्कितम्[1] ।
शीलाभिका हि पुरुषा नित्यं सुखविहारिण: ॥८॥

शीलं रक्षेतु[2] मेधाविन् यथा[2] यानं सुखत्रयम् ।
प्रशंसावृत्तलाभं च प्रेत्य स्वर्गे च मोदते ॥९॥

शीलवान् निर्वाणं प्राप्नोति -

शीलवान् यो हि पुरुष: शीलमेवाति सेवते[3] ।
ससुखो निर्वृतिं याति यत्र मृत्युर्न विद्यते ॥१०॥

अनादिमति संसारे तृष्णामोहादिभिर्वृते[4] ।
ज्योतिर्भूतं सदाशीलं तस्माच्छीलमनाविलम्[5] ॥११॥

(नै०९१ ख०) शीलं[6] धनमसंहार्यं राजचौरोदकादिभि: ।
तस्माच्छीलं सदा सेव्यं[7] दौ:शील्यं च विगर्हितम् ॥१२॥

शीलाभिरतपुरुषस्य[8] निर्वाणं ह्यन्तिकेस्थितम् ।
शीलवान् पुरुषो धन्य: शीलवांश्चापि सेव्यते ॥१३॥

रविवद् भ्राजते शीलं दौ:शील्यं चैव गर्हितम् ।
निर्मलं वीतकान्तारं निर्ज्वरं वीतकांक्षि च ॥१४॥

१- ०लमनतर्क: - क०,ख०   २-२ रक्षत: मेधावियार्थं-क०,ख०
३- शेवते - क०,   ४- ०णामोहादिभिर्वृतं:-क०
५- ०लौहदमनाविला क०,   ६- श्लोकोऽग्रे - प्रशस्यं हि सदाशीलं-
७- शेव्यं - क०   शीलं हिन्दमनाविला-ख० पुस्तके
८- ०पुरुंषो - क०,ख० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीलप्रशस्तसच्छुद्धैर्निर्वाणपुरगामिकम्[1] ।
आयुर्याति[2] ध्रुवं धीमान् नित्यं शीलेन बृंहितम् ।।१५।।

न बिभेति मृत्युकाले शीलेन परिरक्षितः ।
शीलमाद्यन्तकल्याणं सर्वसौख्यप्रवर्तकम् ।।१६।।

शीलवान् पुरुषो धन्यो दाः शील्याभिरतः पशुः ।
[3]तीरं नैव समायान्ति[3] पुरुषाः शीलवर्जिताः ।।१७।।

कार्याकार्यं न विन्दन्ति तस्माच्छीलं समाचरेत् ।
शीलवस्त्रेण ये छन्नास्ते छन्ना पुरुषा मताः ।।१८।।

शीलेन वर्जिता ये तु नग्नास्ते पशुभिः समाः ।
शीलवान् पुरुषः स्वर्गमुद्यानमिव गच्छति ।।१९।।

बन्धुवन्मन्यते तत्र शीलवान् सुप्रभागतः[4] ।
शुचिशीलसमाचारः शुभधर्मसमन्वितः ।।२०।।

देवलोकोपगास्तेषु जनाः सुकृतकारिणः ।
(नै०६१ ब०) यो न प्रार्थयते कामान् शीलवान् पुरुषः ।।२१।।

शीलेन परिबृंहिता गुणाः वर्धन्ते -

गुणास्तस्य[5] प्रवर्धन्ते[5] शीलेन परिबृंहिताः ।
महाधर्मसुखं शीलमस्मिंल्लोके परत्र च ।।२२।।

१- निर्वाणपुरगामिकं - क०,ख०
२- आयुर्यति - ग०,ख०   ३-३ तीरन्यासमयान्ति - ग०,ख०
४- प्रभागतः - ग०,ख०   ५-५ तितस्यप्रतिध्यन्ते - ग०
कृपया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्मात्[1] प्रज्ञाय त्रैगुण्यं[1] शीलमेव सदा चरेत् ।
देवेभ्यो रोचते तद्धि त्राणं शीलं सुभावितम्।।२३।।

शीलं स्वर्गस्य सोपानम् -

भावितं परमं धन्यं परलोकोपकामिकम् ।
शीलवान् यदि जानीयात्[2] फलं शीलस्य यादृशम्।।२४।।

शस्त्रं सुतीक्ष्णमादाय यदि[3] छिन्द्याद्विहात्मनः।
अनुपमोऽस्य[4] निन्द्यस्य अभिसौख्यसमन्वितम् ।।२५।।

शीलस्य फलं सुगतेन प्रदर्शितम् -

फलं शीलस्य विमलं सुगतेन[5] प्रदर्शितम्[5] ।
आदौ शस्तं तथा मध्ये निधने शस्तमेव तत्।।२६।।

फलं शीलस्य विपुलं सुखात् सुखमनुत्तरम्[6] ।
शीलचर्या परं सौख्यं धनचर्या न तादृशी।।२७।।

नर धनेन हीयन्ते शीलेन न कथञ्चन ।
शोचते पुरुषस्तेन पृथक् वा तद्विराजते[7]।।२८।।

शुभं तस्मान्मुनिवरैः प्रशस्तं सर्वगामिकम्[8] ।
उद्यानमिव गच्छन्ति पुरुषाः शुभचारिणः।।२९।।

१-१ तस्मात्महायत्नां गुण्या॰ - क०,ख०   २- प्रजानीया - क०,ख०
३- वाञ्छा - क०,ख०   ४- अतोपमास्य - क०
५-५ सुगतमाहात्म्यं वर्णयता लेखकेन स्वकीयं बौद्धत्वं साधितम्-
६- ०सुखतरं च तत्- क०,ख०   ७- ०राजते - क०,ख०
८- सुप - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देवलोकसमं तेषां सौख्यानामाकरं परम्[1] ।
दुःशीलितस्य[2] शीलस्य मदितस्याप्यनेकशः ॥३०॥

(नै० ८१३७०) फलं विपच्यते स्वर्गस्तस्माच्छीलं समाचरेत् ।
शीलं स्वर्गस्य सोपानमाकरं[3] सुखनिर्वृतेः ॥
शीलवर्जी हि पुरुषो न क्वचित् सुखमेधते ॥३१॥

<u>शीलवान् असंख्यानि सौख्यानि लभते-</u>

शीलाम्भसा प्रसन्नेन विपूर्णेन सर्वदा ।
स्नात्वा गच्छन्ति पुरुषा देवलोके च निर्वृते ।
यदिव्यमाल्याभरणैर्दिव्यैः सौख्यैः समन्विताः ॥३२॥

रमते देवभवने तत् सर्वं शुभहेतुकम् ।
असंख्यानि च सौख्यानि वर्धमानानि सर्वदा ॥३३॥

लभते पुरुषः सर्वं यः शीलमनुवर्तते ।
शुभचारी सदा सत्यः पूज्यते[4] सोऽपराजितः[4] ॥३४॥

शुभेन शोभते मर्त्यैः पूज्यते राजभिः सदा ।
शीलेन[5] शोभते मर्त्यस्तस्माच्छीलं समाचरेत् ॥३५॥

१- क०,ख० पुस्तकयोः नास्ति   २- दुःशीलितस्य- क०,ख०
३- सोपानिमाकर - क०,ख०४-४ पूज्यस्पराजभिःसदा-क०,ख०
५- शुभेन - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनेकसौख्यदायकं शीलमाचरणीयम् -

अनेकसौख्यजनकं सर्वमाश्वासकारकम् ।
शीलं सुचरितं[१] कार्यं दुष्कृतं च विवर्जयेत्॥३६॥

ये दानशीलकर्चारैः स्वर्गतद्गतमानसाः।
तेषां सकल्मषं शीलं विपाकं यथोदकम्[२]॥३७॥

नानाविधस्य शीलस्य रक्षितस्याप्यनेकशः ।
शुभकार्यविपाकाय देवेषु परिपच्यते ॥३८॥

शीलसम्पन्ना प्रसन्नेषु संकीर्णेषु च सर्वशः[३]।
स्नात्वा गच्छन्ति मनुजा देवाश्चात्यन्तिकं[४] सुखम्॥३९॥

(नै० ९२ श०) दानशीलाः सदा दान्ताः सर्वभूतहितेरताः।
ज्ञानयुक्ता[५] मैत्रयुक्ताः यान्ति ते देवसंगतिम्[५]॥४०॥

हतदोषाः क्रियावन्तः शीलरत्नेन भूषिताः।
सर्वसत्त्वदयावन्तः सुरलोकेषु ते बुधाः॥४१॥

विशुद्ध[६]काञ्चनप्रख्या निर्ध्मातमलकल्मषाः ।
सम्यक्कर्मसुनिरता देवलोकेषु ते बुधाः॥४२॥

सर्वसत्त्वदयायुक्ताः[७] सर्वसत्त्वहितैषिणः।
सर्वपापविरक्ताश्च य तेषां वासः सुरालये॥४३॥

१- सुचरितं - श०,स० २- यथोदनं - श०,स०

३- सर्वदा - श०,स० ४- देवात्मप्रतिकं- श०,स०

५-५ ज्ञानायुक्तामैत्र फिताग‌च्छदेवसंमिति-श०,स०

६- मेघजका० - श०,स० ७- दयावन्तः - श०,स०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अहन्यहनि ये शीलं रक्षन्ति सुपरीक्षकाः ।
अहन्यहनि तेषां हि सुखं भवति नैकशः ॥४४॥

शीलवाजिसमारूढा देवभवनं प्रयान्ति -

शीलवाजिसमारूढाः[1] पुरुषास्तत्त्वचिन्तकाः ।
प्रयान्ति देवभवनं क्रीडायुक्तमनेकशः ॥ ४५ ॥

या क्रीडा देवभवने यच्चसौख्यमनुत्तमम् ।
तत् समग्रस्य शीलस्य फलमुक्तं तथागतैः ॥४६॥

देवसुखं शीलजमेव -

यद्दिव्यमाल्याभरणा दिव्याम्बरविभूषिताः ।
क्रीडन्ति विबुधाः सर्वे तत्सर्वं शुभहेतुकम्[2] ॥४७॥

पद्मोत्पलवने रम्ये वनोपवनभूषिते[3] ।
(नै० ६३८०) स्वर्गे रमन्ति ये देवास्तत् सर्वं शुभजं फलम् ॥४८॥

यदाकाश इवात्यर्थं दिव्यरत्नविभूषिताः ।
विराजन्तेऽमला[4] देवास्तच्छीलस्य महत् फलम् ॥४९॥

यत्काननेषु रम्येषु चित्रेषु[5] च सर्वतः ।
रमन्ति गिरिपृष्ठेषु सुरास्तच्छीलजं फलम् ॥५०॥

१- ०समारूढं - क० २- ०हेतुके - क०, ख०
३- वनोपवनं भूषिते - क०, ख० ४- विराजत्यमला - क०, ख०
५- चित्रेषु पुष्पितेषु - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वगृहं हि यथा मर्त्याः प्रविशन्ति गतव्यथाः ।
तथा शीलसमाचाराः प्रयान्ति त्रिदिवं नराः ।।५१।।

एतत् सुखी वित्तं श्रेष्ठं यच्छीलपरिरक्षणम् ।
मरणानां परं मृत्युः यच्छीलपरिवर्जनम् ।।५२।।

एतान् गुणान् सदा मत्वा प्रियत्वमपि चात्मनः ।
शीलं सुरक्षितं कार्यं दीः शील्यं च विवर्जयेत् ।।५३।।

शीलवान् सदा दान्तः दामावांश्च[1] सुदर्शनः[1] ।
सोपानमिव चारुह्य प्रयात्युद्यानन्दसन्निभम् ।।५४।।

शीलेन प्लवभूतेन संसारोत्तरणम् -

फलं शीलस्य तु सुखं देवलोकेषु पच्यते ।
शीलेन प्लवभूतेन संसारादुत्तरन्ति च ।।५५।।

शीलाम्भसा विशुद्धा ये स्वाध्यायपरचेतसः ।
जाम्बूनदमयैः पुष्पैस्तेऽत्रार्चन्ति[2] दिवौकसः ।।५६।।

ये नवा दालमनसो नित्यं शीलेन भूषिताः ।
ते यान्ति देवसदनं यत्र सौख्यमनन्तकम् ।।५७।।

सौख्यात् सौख्यतरं यान्ति नराः सुकृतकारिणः ।
क्रीडन्ति देवसदने शीलेन परिवृंहिताः ।। ५८।।

१-१ दामावान्सुदर्शनः - क०,८०
२- पुष्पैस्तेऽत्रापति - क०,८०।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीलसोपानमारूढाः सुगतिं प्रयान्ति -

शीलसोपानमारुह्य ज्ञानेन परिबृंहिताः ।
नराः प्रयान्ति सुगतिं ज्ञानेन सम्परायणाः ॥५९॥

(नै०९३ क०) सुप्रसन्नेन मनसा शीलं यदभिरक्षितम् ।
तस्य शीलस्य शीतस्य सुखमेतदुपस्थितम् ॥६०॥

शीलस्य परिणामो निर्वाणसुखम् -

सुरक्षितस्य शीलस्य भावितस्याप्यनेकशः ।
परिणामे[1] सुखं[1] भवति निर्वाणं चाधिगच्छति ॥६१॥

शीलं रक्षत्यपायेभ्यः[2] शीलं नयति संगतिम् ।
तस्माच्छीलं सदा रक्ष्यं परिणामोऽस्य शीतलः[3] ॥६२॥

मृत्युकाले समुत्पन्ने शीलवानकुतोभयः ।
न मे दुर्गतिनिर्वाणं हि त्राणमुत्तमम् ॥६३॥

काचाभ्रपटलं[4] यस्य शीलं भवति कुत्सितम् ।
स कुत्सितेन शीलेन कुत्सितो जायते नरः ॥६४॥

शीलवतः स्वर्गादिदाया तृष्णादायो न भवति -

शीलमूलेन लब्धेदं सुखं स्वर्गेषु देहिभिः ।
तृष्णादायो[5] न भवति[5] स पश्चात् परितप्यते ॥६५॥

१-१ परिणामसुखी - क०,ख०   २- रक्षत्यपायसः - ख०
३- शीतलम् - क०   ४- ०भ्रपटल - क०
५-५ तृष्णाक्षयोनभवते - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्माच्छीलवता नित्यं शीलमेव विशिष्यते ।
निःशीलः पुरुषो मूढो न स्वर्गमधिरोहति ॥६६॥

कल्पकामोपमं दिव्यं यदिदं भुज्यते सुखम् ।
तच्छीलस्य विशुद्धस्य प्राप्यते हि फलं महत् ॥६७॥

यथैवः काञ्चनस्यास्य मेरुपर्वतशालिनः ।
तच्छीलतेजसस्तेजः[1] कलां नार्हति षोडशीम् ॥६८॥

दीप्यमानैः[2] सदा शीलैः निर्धातुकनकत्विषा[3] ।
संयुक्तास्त्रिदिवं[4] यान्ति मण्डिताः स्वेन कर्मणा ॥६९॥

त्रिविधस्य शीलस्य त्रिविधं फलम् -

हीनमध्यविशिष्टस्य शीलस्य त्रिविधस्य वै ।
(नै०६४ अ०) फलं हि त्रिविधं दृष्टं हीनमध्योत्तमं तथा ॥७०॥

प्रासादिकं शीलमप्रमादेनोपबृंहितम् ।
नित्यं तत् सुखदं दृष्टं धर्मतेयं व्यवस्थिता ॥७१॥

शीलप्रभया सूर्येन्द्वोरपि पराभवः -

शीलोद्भवा या विमला प्रभा भवति देहिनाम् ।
न सा सूर्येन्दुद्वयस्य संयुक्तस्य भविष्यति ॥७२॥

१- तेजः शीलतेजस्ये - क०,ख०   २- दीप्यमानः - ख०
३- निर्धातुकनकत्विषं - क०,ख०   ४- संयुक्तात्रिदिवं - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीलं सप्तविधं सम्यं यो रक्षति नरोत्तमः[४] ।

स [२]कामं भुञ्जति फलं स्व् सुगतेन देशितम्।।७३।।

कष्टतपः कारिणः शीलचर्यां विना स्वर्गं न यान्ति -

शीलचर्यां समाश्रित्य सम्यग्दर्शने तत्परः ।

मर्त्यलोकाद् दिवं यान्ति न कष्टतपचारिणः।।७४।।

यच्छीलं[३] शीलसंस्पर्शं प्राणामोऽपि शीतलम् ।

निषेवते सदामूढः स पश्चात् परितप्यते।।७५।।

सप्तविधेन शीलेन देवसान्निध्यं प्राप्यते -

शीलं सप्तविधं धन्यमविसंवादकं परम्[४] ।

शीलेन रक्षितः[५] पुरुषो[५] देवानामन्तिकं गतः।।७६।।

यथा पक्षैर्दृढैः पक्षी खेद[६] विहन्यते ।

तथा नरो दृढ शीलैर्देवलोकाय कल्पते।।७७।।

अतिमात्रं[७] च[७] तच्छीलं[८] स्याद्[९] सम्यक्तरं[९] च सत् ।

लभते पुरुषः कर्त्ता फलं शीलस्य शोभनम्।।७८।।

१- सगेतम - क० २- कामं - क०,ख०

३- यच्छीलं - क०,ख० ४- पदं - क०,ख०

५-५ रक्षितोपुरुषः - क०,ख० ६- खेदहत्रं - क०,

७-७ अतिमात्रञ्च - क०,ख० ८- क०ख० पुस्तकयोः नास्ति।

९-९ सम्यारमातरञ्च - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दानशीलमयं[1] रत्नं हृदयैरेव[2] समन्वितम्[2] ।
देवता वा मनुष्यो वा[3] लभते परमं पदम्।।७९।।

नन्तर्बहिश्च निःसारास्ते पुरुषा धर्मवर्जिताः[4]।
संसारात् फलकांक्षिभ्यः[5] सद्धर्मो[5] न रोचते ।।८०।।

नन्तर्बहिश्च[6] ये सारास्ते पुरुषा वस्तुतो दृढाः[6]।
(नै०९४ व०) ये धर्मचारिणः शान्ताः परतत्त्व विर्णिणः।।८१।।

अनुचरः शीलगन्धः -

न केतकी चम्पक पुष्पगन्धा,
न मालती नागरकं च गन्धः ।
प्रयान्ति गन्धा हि यथा सुरेण,
अनुचरः शीलवतां सुगन्धः ।।८२।।

दौःशील्यं च सदा वर्ज्यम् -

तस्माच्छीलं सदाकार्यं दानज्ञानतपोधनैः ।
दौःशील्यं च सदा वर्ज्यं[8] विषकृष्णानलोपमम्।।८३।।

१-	०शीलमयो	- क०,ख०	२-२	हृदयैरेव समन्वितं	-क०,ख०
३-	तेनोता	- क०,ख०	४-	०विवर्जिताः	-क०,ख०
५-५	फलमकांक्षायां धर्मो	- क०,ख०	६-६	अन्तर्बहिश्च सारास्तेषु पुरुषाव च वदृढाः	-क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं सुरक्षितं शीलं नयते सद्गतिं[1] नरान्[2] ।
न हि शीलादृते कश्चित् पदं सुखमवाप्नुते ।।८४।।

तस्माद्[3] देवगुणं मत्वा[3] शीलमेव सदाऽऽचरेत् ।
न शीलसदृशं किञ्चिदन्यत् त्राणमिहास्ति वै ।।८५।।

।। इति शीलवर्गस्त्रयोविंशः ।।

---:०:---

१- सङ्गति - क०,ख०
२- नराः - क०,ख०
३-३ तस्माद्देवान्गुणान्मत्वा-क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२४) क्षान्तिवर्गश्चतुर्विंशः

क्षमाभूषणेनैव भूषितो भवति पुमान् -

क्षान्त्या[1] विभूषितः पुरुषो भूषितो नेतरैर्धनैः[2] ।
धनं विना समायाति क्षान्तिर्नैव कथञ्चन ।। १।।

क्षमावान् पुरुषः सर्वप्रियो भवति देहिनाम् ।
पूज्यते दैवतैर्नित्यं तस्मात् क्षान्तिः परन्तप ।।२।।

क्षमावान् पुरुषः सर्वैः क्रोधदोषैर्विवर्जितः ।
यशसा पूज्यते नित्यमिह लोके परत्र च ।।३।।

क्षान्तिर्धनं धनशीलप्रज्ञावर्धनमेव च ।
धनानि[3] तानि[3] क्षतानि नेतराणि[4] कथञ्चन ।।४।।

सद्भिः क्षमावानेव पूज्यते -

पूज्यते सततं[5] सद्भिर्यशसा चैव पूज्यते ।
क्षमावान् पुरुषः सर्वैस्तस्मात् क्षान्तिपरो भवेत् ।।५।।

क्रोधविषस्य क्षमैव भेषजम्-

(नै०६५ ख०) क्षान्तिः क्रोधविषस्यास्य भेषजं परमं मतम् ।
क्षान्त्या न[6] नाशितः[6] क्रोधोऽनर्थायोपजायते ।।६।।

१- दयान्त्या - क०   २- नैतरैवनैः - क०,ख०
३-३ धनान्येतानि - ख०   ४- नक्तिरन्य - क०,ख०
५- क्षतं - क०   ६-६ क्षांतिनिनाशितः क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मानाशी[1]लाभिभूतानां बालिशानां विशेषतः ।
[2]प्रतापकार्यं कुरुते शान्तिस्सन्मार्गनिदर्शिका ।।७।।

शान्तिमन्त एव लोके धनिनः -

स धर्मधनहीनानां प्रमतां गतिपंचके ।
येषां शान्तिमयं द्रव्यं ते लोके धनि[3]नः स्मृताः ।।८।।

तमोनि[4]बयकान्तारे दुःखौघेन दु[5]स्तरे ।
शान्ति[6]र्यथा स्मृता सद्भिः तारयति[6] कुल मानवान् ।।९।।

सद्धर्मपाठनष्टानां देशिका शान्तिरुत्तमा ।
अपायभयभीतानां न भयं शान्तिरुच्यते ।।१०।।

नृणां शान्तिः सुखावहा -

सुखावहा सदा नृणां दुःखस्य च विघातिका ।
शोमसद्भ्राजिका नित्यं विश्वासगुणकारिका ।।११।।

शुभास्ति[7] नायिका धन्या ह्युपशुभेभ्यो विवर्जिता ।
मोक्षसंदे[8]शिका पुंसां संसारभयनाशिका ।।१२।।

१- बालमशीलाभी - क०,ख०
२- प्रतिक० - क०
३- धनीन - क०
४- नीचय - क०
५- दुस्तरां - क०,ख०
६-६ यथास्मृतां तरति बहुमानवा - क०,ख०
७- शुभयि - क०,ख०
८- ०संदेसिका - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वर्गसोपानभूता सा नरकार्ति[1]विनाशिका ।
त्रायते प्रेतलोकात्सा तिर्यग्योनौ तथैव च ।।१३।।

शान्तिः सन्मार्गामृतदीपिका-

सा गुणार्थैः सदा पूर्णा शिवा भवति देहिनाम् ।
सा प्रशस्ते[2] सुखे प्राप्ते[3] शान्तिः कार्या प्रयत्नतः ।
सर्वलोकस्य मातेव सन्मार्गामृतदीपिका ।।१४।।

।। इति शान्तिवर्गश्चतुर्विंशः ।।

---:०:---

१- नरकाग्नि० - क०,ख०
२- प्रशस्तु - क०
३- प्राप्तो - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२५) वीर्यवर्गः पञ्चविंशः

न्यायदेशक्रियायुक्तानि कार्याणि सिद्धयन्ति -

(ने० ६५ क०) देशकालोपपन्नस्य क्रियाभिः[1] संस्कृतस्य वै[1]।
न्यायेनारभ्यमाणस्य[2] वीर्यस्य सफलं[2] फलम्॥ १ ॥

न्यायदेशक्रियाहीना अधर्मेण विवर्जिताः।
सीदन्ति कार्यनिकरा वीर्येण[3] परिवर्जिताः॥२॥

आरब्धवीर्या मोक्षं प्राप्नुवन्ति -

ध्यानेनारब्धवीर्येण[4] मोक्षं गच्छन्ति पण्डिताः।
भवन्त्यप्सराकारा देवलोके प्रयान्ति च ॥३॥

यान्यारभन्ति कार्याणि वीर्यवान् पुरुषो बली।
तानि तानि प्रसिद्धानि विपुलानि भवन्ति वै[5] ॥४॥

येऽर्था लोकोत्तरे सिद्धा ये च लोकेषु सम्मताः ।
ते वीर्येण प्रलभ्यन्ते[6] वीर्यहीना न जातु वै ॥५॥

मन्दवीर्यं विरोत्साहं सद्धर्मेण विवर्जितम् ।
नरः[7] प्रविशते[7] लोके शशाङ्कमिव कल्मषम्[8]॥६॥

१-१ क्रियातियोजितस्य - क०,ख० २-२ आरभ्यमानस्य वीर्यस्य समूलफलं - क०,ख०
३- वीर्ज्येण - क०,
४- ध्यानैर्येनारब्धवीर्य- क०,ख० ५- अयं श्लोकः क० पुस्तके नास्ति।
६- प्रलभ्यते - क० ७-७ नरेणाविशते क०,ख०
८- कल्मसम् - क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आर्याष्टाङ्गमार्गेण [1] स ज्ञानपरिपालितः ।
वीर्यवान्[2] महोत्साहो प्रयाति परमां गतिम् ।।७॥

बोधिः वीर्येणावाप्यते -

वीर्येणावाप्यते बोधिः स्ववीर्येण तथा मही ।
अर्हत्त्वं वीर्यवद्भिश्च तस्मान्नाग्निसमा गतिः ।।८।।

उत्तमस्थानप्राप्त्यर्थं वीर्यारम्भे मतिः कार्या -

तस्माद् देवान् गुणान् मत्वा वीर्यवान् नियतेन्द्रियः ।
वीर्यारम्भे मतिं कुर्यान्नास्ति वीर्यसमर्थनम् ।। ९ ।।

वीर्यार्थी[3] स्मृतिमांश्च[3] नरो ज्ञानपरायणः ।
प्रयात्यनुत्तमं स्थानं जरामरणवर्जितम् ।।१०।।

।। इति वीर्यवर्गः पञ्चविंशः ।।

---:०:---

१- न - क०, ख०

२- वीर्यवता - क०

३-३ वीर्यारथस्मृतिमाञ्च - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२६) ध्यानवर्गः षड्विंशः

एकाग्रचित्तं पुरुषं दोषा न बाधन्ते -

असंसक्तमतिर्नित्यं[1] नित्यं ध्यानविहारिणः[1] ।
(नै०९६ क०) विशुद्ध[2] मनसो नित्यमेकाग्राभिरतस्य च ।। १।।

यस्यैकाग्रपरं चित्तं तस्य दोषा न बाधकाः ।
स[3] दोषभयनिर्मुक्तः स्वस्थ इत्यभिधीयते ।।२।।

एकाग्राभिरतश्चेतो विवेकमनुधावति[4] ।
सर्वतर्क[5]विनिर्मुक्तः स्वस्थ इत्यभिधीयते।।३।।

यस्य चित्तं ध्रुवं शान्तं निर्वाणाभिरतं सदा ।
न तस्येन्द्रियजा दोषा भवस्य शुभहेतवः[6]।।४।।

एकारामो यतिरेव सुखं लभते -

यच्च ध्यानकृतं सौख्यं यच्चापि च[7] समाधिजम् ।
चित्तं[8] तत्सर्व[8]मेकाग्रं नित्यं भवति देहिनः।
एकारामस्य यतिनो यत् सुखं जायते हृदि।।५।।

१-१ क० पुस्तके नास्ति — २- क० पुस्तके नास्ति ।
३- च - क०,ख० — ४- विवेकमेवधावते - क०,ख०
५- अत्र पत्रसंख्यानिर्देशरूपेण "८१पत्रमदु" इत्यधिकं लिखितं लेखकेन । — ६- शुभवहेतवः - क०
७- यच्च - क०,ख० — ८-८ तत्सर्वमेकाग्रमतो - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत् सौख्यमपि[1] विज्ञेयं न सौख्यं लौकिकं मतम् ।
एकाग्राभिरतं चित्तं विशुद्धाकृतमेव च ॥ ६ ॥

दोषजालविनिर्मुक्तः शान्तिं[2] समधिगच्छति ।
एकान्तमनसो नित्यं संक्षिप्तेन्द्रिय पञ्चके ॥७॥

तृष्णाग्निनातिदग्धं[3] च हन्ति ज्ञानाम्बुना बुधः[4]।
तस्य तृष्णाविमुक्तस्य विशुद्धस्य सुखैषिणः॥८॥

अदार्थं[5] वाच्यार्थं चैव[5] पदं हि स्थितमग्रतः।
वितर्ककुटिलं चेतो यत्र यत्रोपपद्यते ॥ ९॥

निर्वाणपुरगामि श्रेष्ठं वर्त्म -

एकालम्बनयुक्तेन धार्यं तेन समाधिना[6]।
तस्मादेतत् परं वर्त्म निर्वाणपुरगामिकम्॥१०॥

(नै० ६६ब०) एतदग्रं मनः कृत्वा छन्दरागसमुत्थकम्[7]।
मनो हार्दं[8] विनिगृह्य चैव[9] ध्यानं दृढं[9] खलु॥११॥

१-	ज्मति	- क०,ख०	२-	शांति	- क०
३-	तृष्णाग्निकातवदग्धस्य	- क०,ख०	४-	बुधाः	- क०,ख०
५-५	अदार्थवाच्यार्थश्चैव	- क०,ख०	६-	तत्समाधिना	क०,ख०
७-	छन्दामरिच्यसमनं	- क०,ख०	८-	हृदयं	- क०,ख०
९-९	ध्य नबेदृढैः	- क०,ख०			

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरुपमं ध्यानजं सुखम् -

प्रयान्ति परमं स्थानमशोकं हतकिल्बिषम् ।
निर्विण्णस्य[1] च[1] तुष्टस्य निरामस्य[2] नियामतः ॥ २२ ॥

यत् सुखं ध्यानजं होति[3] कुतस्तस्योपमा परा[3] ।
एतत्सारं सुखाराणां योगिनां पारगामिनाम् ।
तदेवेदं[4] मनः कृत्वा प्रयान्ति पदमच्युतम् ॥ २३ ॥

॥ इति ध्यानवर्गः षड्विंशः ॥

---:0:---

१-१ निर्विण्णकस्य - ख०

२- निरामस्यमधीमनः - क०, ख०

३-३ भवति तस्यनापेक्षुतः - क०

४- यदेवार्यं - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२७) प्रज्ञावर्गः सप्तविंशः

प्रज्ञा मातेव हितकारिणी -

धर्मानुसारिणी[1] प्रज्ञा वीर्येण परिवृंहिता[2] ।
समाधिबलसंयुक्ता मातेव हितकारिणी ।।१।।

प्रज्ञा गतिपर्यवकात् त्रायते -

तां[3] हि सन्त्रायते सर्वान्[4] पुरुषान्[4] गतिपर्यवकात् ।
न माता न पिता तत्र गच्छन्तमनुगच्छति[5] ।।२।।

प्रज्ञाशिखरमारुह्य शीलकन्दरशोभनम् ।
भवदोषमिमं[6] सर्वं[6] पश्यति ज्ञानभूषणः ।।३।।

समाधिना भवार्णवं तरति-

इन्द्रियाणीन्द्रियार्थेभ्यो[7] यदा विन्दन्ति तत्पदम्[8] ।
तदा समाधिना ज्ञानं तरते भवसागरम् ।। ४ ।।

दानशीलतपोध्यानैर्ज्ञानमेवाग्रमुच्यते ।
अपवर्गाद् यदा ज्ञानं ज्ञानशीले सुखावहे ।।५।।

प्रज्ञा अष्टमो मार्गस्तथागतेनोपदिष्टः -

षड्गुणां च परां दृष्ट्वा प्रज्ञोक्ता या[9] सुनिर्मला[9] ।
मार्गाणां[10] चाष्टमो[10] मार्गः शिवः प्रोक्तस्तथागतैः ।।६।।

१-	०सारिणा	- क०,ख०	२-	परितंहिता	- क०,ख०
३-	स	- क०,ख०	४-४	सुर्वपुरुषं	- क०,ख०
५-	गच्छंतमनुगच्छती	- क०	६-६	पश्यत्य च भूषणः	क०
७-	०यार्थाय	- क०	८-	तत्स्थतः	- क०,ख०
९-९	सुनिर्मला	- क०,ख०	१०-१०	मार्गाणांवाचाष्टमः	क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चक्षुर्णां[१] चैव[१] सत्यानामग्रे द्वे तु प्रकीर्तिते ।
(नै० ६७ ख०) बालानां च सदादृष्टं प्रज्ञाचक्षमिहोत्तमम् ॥७॥

जन्मपद्धतिर्ज्ञानशस्त्रेण छेत्तव्या -

ज्ञानशस्त्रेण तीक्ष्णेन लता छेद्या दुरासदा ।
हन्तव्या[२] दोषनिवहाश्छेत्तव्या[२] जन्मपद्धतिः ॥८॥

न ज्ञानात्परो बन्धुः -

अमृतानां परं ज्ञानं श्रेयसां निधिरुत्तमम् ।
न ज्ञानाच्च[३] परं बन्धुर्न ज्ञानाद्धनमुत्तमम्[३] ॥९॥

ज्ञानशीलयुता[४] वृद्धा वीतरागा[५] गतस्पृहाः ।
सेवितव्याः सदा सन्तस्तत्त्वमार्गनिदर्शकाः ॥१०॥

क्लेशादीन् प्रज्ञाशस्त्रेण विदारयेत् -

प्रज्ञावज्रेण तीक्ष्णेन महोदयवलेन[६] च ।
महायोगरथारूढः क्लेशादीन् प्रविदारयेत्[७] ॥११॥

॥इति प्रज्ञावर्गः सप्तविंशः॥

---:o:---

१-१ चक्षुष्टत्व - क०,ख०
२-२ हतव्याश्चैषनिवहा- छेतव्या - क०,ख०
३-३ च ज्ञानं च परं बंधुर्ज्ञानाधन- मुत्तमं - क०,ख०
४- ०युक्ती - क०,ख०
५- वीतछंदिता - क०,ख०
६- ०वलेन - क०
७- प्रविदारयन् - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२८) निर्वाणवर्गोऽष्टाविंशः

क्लेशक्षय एव निर्वाणगामी मार्गः -

क्लेशक्षयात् परं सौख्यं कथयन्ति मनीषिणः ।
एष निर्वाणगो मार्गः कथितस्तत्त्वदर्शिभिः ॥ १॥

तत्पदं[१] शाश्वतं बुद्धं कथयन्ति[१] तथागताः ।
यत्र जन्म न मृत्युर्न विद्यते दुःखसम्भवः ॥२॥

विमुक्तस्याप्रमत्तस्य शान्तस्य वनचारिणः ।
अलोलुपस्य वीरस्य निर्वाणस्य विभूतयः[२] ॥३॥

विषयेष्वप्रमत्तो निर्वाणं नातिचिरं प्राप्नोति-

मित्रामित्रप्रहीणस्य[३] भवरागविवर्जिनः ।
विषयेष्व[४] प्रमत्तस्य निर्वाणं नातिदूरतः ॥४॥

शुभकार्येषु सक्तस्य मैत्रीकारुण्यभाविनः ।
संसारभयभीतस्य निर्वाणं नातिदूरतः[५] ॥५॥

क्लेशक्षयविधिज्ञस्य नैरात्म्यस्यापि तस्य च ।
कौशीद्याच्चैव[६] मुक्तस्य निर्वाणं नातिदूरतः ॥६॥

१-१ ये च जातिर्न मृत्युर्वा विद्यन्ते - क०, ख०
२- जातिभूतयः - क०, ख०
३- हीनस्य - क०
४- विषयेषु - क०, ख०
५- श्लोकोऽयं कण्ठतुकायां नास्ति ।
६- कौशिद्येन - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वश्येन्द्रियस्य शान्तस्य निर्वाणं समीपतरम् -

(ने० ६७ ब०) चतुः[1]सत्यविधिज्ञस्य[1] त्रिदोषवधसेविनः ।
वश्येन्द्रियस्य शान्तस्य निर्वाणं नातिदूरतः ।।७।।

सुखदुःखयोर्मुक्तो मुनिः पारग उच्यते -

सुखदुःखैः पार्श्वस्थस्य चेतो न हन्यते ।
स दोषभयनिर्मुक्तः पारगो मुनिरुच्यते।।८।।

शुभकारी निर्वाणमधिगच्छति -

पुरुषोऽपापकारश्च प्रसादबलवर्जितः ।
शुभकारी शुभान्वेषी[2] निर्वाणमधिगच्छति[2]।।९।।

।।इति निर्वाणवर्गोऽष्टाविंशः।।

---:०:---

१- चतुर्सत्यविधिज्ञस्य - ब०

२-२ शुभान्वेषी निर्वाणमपि
गच्छति - ब०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(२९) मार्गवर्ग: एकोनत्रिंश:

आर्यचतुष्टयीपावक: पारं गच्छति -

सत्यानि चत्वारि शिवानि तानि,
　　　　सुभावितान्येव[1] समीक्ष्य विद्वान् ।
सुचिन्तको जाति-जरा-भयेभ्य:,
　　　　प्रमुच्यते पारमुपैति शान्त: ।।१।।

अचिन्तको यस्तु विभूतबुद्धि:[2],
　　　　कामेषु सक्तो भवभोगबद्ध: ।
स बन्धनै: काममयैर्विबद्धो,
　　　　न मुच्यते जाति जरा भयेभ्य: ।।२।।

भवार्णवे सुखद्रष्टा अन्ते नरकं गच्छति -

विचिन्त्य यो दु:खमिदं विशालं,
　　　　न क्षेममायाति भवार्णवेभ्य: ।
स कामभवार्णोनिहतो[4] हि मूढ:[4],
　　　　कष्टामवस्थां नरके लभेत् ।।३।।

आभ्यन्तरं[5] कामसुखं च[5] हित्वा,
　　　　किं कामभोगाभिरता हि बाला: ।
नैते विजानन्ति भयं[6] च[6] तीव्र-
　　　　मभ्येति मृत्युज्वलनप्रकाश: ।।४।।

१- सुसमाविलान्येव - क०　　२- विमूढबुद्धि: - ख०
३- कथमु ०मद्धौ विमुक्तो - क०,ख०　　४-४ ०वार्णविशवेशमूढ- क०,ख०
५- आभ्यंतिकदामदु:खम्व - क०,ख०　　६-६ भयेषु - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनित्यदुःखशून्योऽयमात्मा कारकवर्जितः।
(नै० ६८४०) संसारः कथितो बुद्धः तत्त्वमार्गप्रदर्शि[1]:॥५॥

तेन सर्वमिदं तत्त्वज्ञानं ज्ञेयं समासतः।
ज्ञानज्ञेयविनिर्मुक्तं तृतीयं नोपलभ्यते॥६॥

अन्तपार[2]विधिज्ञो यः सोऽशाकारतत्त्ववित्।
ऊर्ध्व[3]गति विधिज्ञो हि धारान्ततत्त्वविचक्षणः॥७॥

तत्त्वविदेव धर्मतामनुविशति -

कुशलोकुशलधर्मज्ञः समनन्तरतत्त्ववित्।
स धर्मतामनुविशेद् यथा च[4] न विकम्पते॥८॥

क्रयोपाय[5]विनिर्मुक्तो नष्टान्[6][7] नाशयति मुहुः[6]।
नष्टपापकालिवीरः स्रोतापन्नो निरुच्यते॥९॥

स्रोतसश्च[8] कुशला धर्मा जीर्यन्ते[9] पापगामिनः[9]।
मोक्षाग्निना[10] प्रतप्यन्ते स्रोतापन्नो[10] भवत्यतः॥१०॥

प्रणिधिवं महादर्श[11]मुक्तं संसारमोक्षकम्।
तृष्णादाहसुखं दृष्टं सत्यतः सुखकारकम्॥११॥

१-	प्रदर्शी:	- क०, ख०	२-	अनापारवि०	- क०, ख०
३-	पुष्पगत	- क०, ख०	४-	क०, ख० पुस्तकयोः नास्ति।	
५-	क्रयोपाय	- ख०	६-६	नष्टानष्टमुपसंट:	क०,
७-	स्रोतापन्ननिरुच्यते	क०, ख०	८-	स्रोतान्यसु ख०	- क०
९-९	नियतापापमितः	- क०	१०-१०	मोक्षाग्नातप्तितः	
११-	महादर्शमुक्त	- क०, ख०		स्रोतापन्नो	- क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नावबध्नाति यं तृष्णा न वितर्कैर्विहन्यते ।
सम्प्राप्तभवपारस्तु सुखी[1] भवति सर्वदा ।।१२।।

आर्यमार्गचतुष्टयम् अन्योन्यफलसम्भूतम् -

अन्योन्यफलसम्भूतं सर्वतः[2] सम्प्रवर्तते ।
तदेव कारणं ज्ञेयमार्यमार्गचतुष्टयम् ।।१३।।

आर्यसत्येषु विदितः पुरुषो[3] विद्यते ध्रुवम् ।
विषयेषु हि[4] संघुष्टं[5] जगद् भ्रमति चक्रवत् ।।१४।।

स मार्गो देशकः श्रेष्ठो यो मार्गो भाषितः शिवः ।
(ने० ६८ क०) येन मार्गेण प्राचीना[5] उदयं याता[5] मनीषिणः ।।१५।।

त्रिशरणगत एव सुखं जीवति-

सुखी चित्तं भवेत् तस्य यस्य बुद्धे[6] स्थितं मनः[6] ।
न हि बुद्धविनिर्मुक्तं जो चित्तं जो चित्तं भवेत् ।।१६।।

सुखी चित्तं भवेत् तस्य यस्य धर्मे[7] स्थितं मनः ।
न हि धर्मविनिर्मुक्तं जो चित्तं जो चित्तं भवेत् ।।१७।।

सुखी चित्तं[8] भवेत् तस्य यस्य संघे स्थितं मनः ।
न हि संघविनिर्मुक्तं जो चित्तं जो चित्तं भवेत् ।।१८।।

१-	सुखि	- क०	२-	सत्य	- क०,ख०
३-	पुरुषाणां	- क०,ख०	४-४	हिसंमूढं	- क०,ख०
५-५	यातनः श्रेयुयंददाति	- क०,ख०	६-६	धर्मस्थितं मनः	- क ख०
७-	बुद्धः	- क ख०	८-	सुखी चित्तं	- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सुजीवितं भवेत्तस्य यस्य सत्यस्थितं मनः ।
न हि सत्यविनिर्मुक्तं जीवितं जीवितं भवेत्[1]।।१९।।

सुजीवितं भवेत् तस्य यस्य मार्गे स्थितं मनः ।
न हि मार्गविनिर्मुक्तं जीवितं जीवितं भवेत्।।२०।।

निर्वाणगमने यस्य नित्यं बुद्धिरवस्थिता ।
स दोषादेव निर्मुक्तो न देवः क्रीडते परः।।२१।।

या भवव्यापिनी क्रीडा नित्यमेकाग्रचेतसः ।
सा सुखोद्भाविका क्रीडा न क्रीडा रागकारिका।।२२।।

सुखादीनां[2] हि सत्यानि यदा दान्तेन[3] विन्दति[3] ।
तदा क्षेमं शिवं स्थानं प्राप्नोति पुरुषोत्तमः।।२३।।

।।इति मार्गवर्गः एकोनत्रिंशः।।

---:o:---

१- श्लोकोऽयं कमातृकायां नास्ति।

२- सुखादिनां हि - क०,ख०

३-३ दानेनविन्दता - क०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३०) भिक्षुवर्गः त्रिंशः

आदर्शो भिक्षुः लोकमार्गदर्शकः -

यो न हिंसति भूतानि मित्रवेत्ता सदाऽऽशयः ।
पितृवत् सर्वभूतानि लोकस्तमनुपश्यति॥ १ ॥

(नै०६६ख०) अदत्तादानविरतो नित्यं ज्ञानी जितेन्द्रियः ।
प्रशान्तदेहकर्मा च[1] तापसिम्भव[2]संभ्रमः ॥ २ ॥

नाप्यालेख्यगता नापि वदतृणा सा[3] निरीद्यते[3]।
हतकामो दृष्टसत्यो[4] मुक्तस्तादृश उच्यते ॥ ३॥

समलोष्टाश्मकाञ्चनो यो वीतशोकः समाहितः।
न क्लेशरागसंस्पृष्टः स सौख्यसुखमाप्नुयात् ॥४॥

अर्थानर्थक्षमो यस्य लाभालाभौ तथैव च ।
सुखदुःखसमायुक्तः[5] भिक्षुः स खलु कथ्यते ॥ ५॥

मित्रामित्रप्रहीणो यः समवेता जितेन्द्रियः ।
दु[6]ष्यते यो न विषयैः विज्ञेय[7]स्तादृशो यतिः॥६॥

१-	क०ख,० पुस्तकयोः नास्ति।		२-	०भवसंकटात्	- ख०
३-३	सतिनिरिक्ष्यते	- क०,ख०	४-	दृढालो	- क०,ख०
५-	०समाविवर्त्त	- क०,ख०	६-	दुरायते	- क०,
७-	दृशोपति	- क०,ख०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयद्वेषी निर्वाणमधिगच्छति -

विषमत्वाद्धि[1] विषयान् द्वेष्टि धीरो गतव्यथः ।
न तस्य दूरे निर्वाणं सम्यक्सम्बुद्धदेशितम्[2] ।।७।।

स उदय व्ययतत्त्वज्ञः सम्यग्दृष्टिरलोलुपः ।
क्लमवानिव निष्क्रम्य संसारान्मुक्तहेतुकः ।।८।।

तृणचन्दनतुल्यो हि समतृष्णाम्बराशिनः ।
स कौशेयवल्कपतितृष्णया नैव बाध्यते ।।९ ।।

लाभसत्कारसन्तुष्टः[3] सन्तुष्टस्तृण संस्तरैः ।
वह्निवल्लाभसत्कारं यः पश्यति स पश्यति ।।१०।।

बुद्धदेशिताः भिक्षुधर्माः -

बाध्यते यो न विषयैस्तृणानद्या न बाध्यते ।
स्वकर्मफलतत्त्वज्ञः[4] स भिक्षुर्बुद्धदेशितः ।।११।।

नानीतं शोचते यो हि बुद्ध्या[5] चैव गतस्पृहः[5] ।
(ने०९९ ख०) प्रत्युत्पन्न क्रियायोगो न बुद्धिस्तस्य लिप्यते ।।१२।।

निर्वाणे[6] च[6] मतिर्यस्य धर्मे नित्यं स्थिता भवेत् ।
न वर्तते स संसारे शुक्लधर्म समावृतः ।। १३।।

१- विषयत्व हि- क० २- सम्यकाबुद्ध - क०,ख०
३- नालाभख० - क०,ख० ४- स्वेनकर्म० - क०,ख०
५-५ बुद्धिनानागतस्पृहः क०,ख० ६-६ निवृतक - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नार्चितं क्रियते यस्य चित्तं विद्याग्निकल्पया ।
दारुवह्निषया यस्य तस्य दुःखं न विद्यते ॥१४॥

इन्द्रियाणि वशे यस्य इन्द्रियेषु वशानुगः ।
क्रियते यो न पुरुषार्थनिष्ठस्तादृशो मुनिः ॥१५॥

साधुबुद्धि[1] मनो यस्य क्षमावान् प्रियदर्शनः ।
प्रह्लादयति चेतांसि स नृणां शशिवन्मुनिः ॥१६॥

अरण्याभिरतो यस्तु हर्म्याग्रेषु न रज्यते ।
सन्तुष्टः पांशुकूलेन भिक्षुर्भिक्षारतो भवेत् ॥१७॥

शान्तो दान्तः[2] सुधीरधी[3] तत्त्ववित् सुखदुःखयोः ।
स यात्युत्तमाध्वानं यत्र गत्वा न शोचते[4] ॥१८॥

अनुमत्पातकान्यस्य[5] नित्यं ध्यानपरायणः ।
प्राकृतैरेव[6] मलैर्हीनः[6] स योगी सत्यवर्त्मनि ॥१९॥

सर्वेन्द्रियविघाती यः सर्वभूतहिते रतः ।
शान्तो दान्तेन्द्रियः स्वस्थो भिक्षुर्भवति तादृशः ॥२०॥

षडिन्द्रियरथारूढो रागशत्रुनिवारकः ।
प्रज्ञाधीरः क्रियावान् यः स शान्तपदमश्नुते[7] ॥२१॥

१- साधवोऽपि - क०,ख० २- ०तोऽशान्तः - क०,ख०
३- सुधीरधी - क०,ख० ४- शोचती - क०,
५- रिपुमत्यक्तकल्मषो - ख० ६-६ प्राकृतैर्मलिसमता - क०,ख०
७- ०पदमाप्नुते - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अरण्यवासी सन्तुष्टो[१] भूमिवासी च समाहित: ।
(ने० १००३०) पुनाति पापको धर्मस्त्वायुर्मेघानिवाम्बर: ।।२२।।

शुभं वा देशमान्ति: शुभचर्यासु संरत: ।
तत्त्वदृष्टि: क्रियादक्षो नाशयन्पापसाधनम्।।२३।।

<u>दयालुर्भिक्षुर्निर्वाणमार्गस्थितो भवति -</u>

रागात्यये न बाधेत शुभचित्तं गतालयम् ।
मैत्र्या कारुण्यबहुलो भिक्षुर्नैर्याणिके स्थित:।।२४।।

यस्य ह्यपादयो नेष्टा विषया बन्धहेतवे ।
स याति परमां शान्तिं यत्र गत्वा न शोच्यते[२]।।२५।।

हेतुप्रत्ययतत्त्वज्ञ: सूक्ष्मार्थे कृतनिश्चय:[३] ।
मोक्षप्रीतिस्वभिरतस्तृष्णया नैव रज्यते।।२६।।

यो नाददेऽशुभं कर्म शुभकर्मरत: सदा ।
चन्द्रांशुनिर्मलगतिर्योगी भवति तादृश:।।२७।।

प्रदहन् पापकान्[४] धर्मान् शुष्केन्धनमिवानल: ।
विभ्राजते[५] त्रिभुवने मुक्तपापो गतव्यथ: ।।२८।।

मोक्षेऽस्ति यस्य तु मनो न संसारे कथञ्चन ।
नासौ बध्नाति संसारे मुक्त: पक्षी यथाम्बरे।।२९।।

१-	संप्रष्टो	- ब०	२-	शोचते	- ब०
३-	राज्यते	- ब०,ल०	४-	पापया	- ब०,ल०
५-	विताव्यथ	- ब०,ल०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वेदनोदयस्तत्त्वज्ञो वेदनाफलनिश्चय: ।
स मुक्त इति विज्ञेय[1]स्तत्त्वविद् कृतवांश्च[2] स: ॥३०॥

तथाप्येते सुखदु:खे मृष्टामृष्टैर्न लिप्यते ।
दोषं पश्यति संसारं य: स योगी सतां मत: ॥३१॥

<u>भिक्षुर्भवति कीदृश: ?</u>

यथाभूतमतिर्नित्यं नित्यं धर्मपरायण: ।
भिक्षुवृत्तावभिरतो भिक्षुर्भवति तादृश: ॥३२॥

(नै०१००क०) न वृष्टिदर्शनारामै:[3] साधूनां दर्शने रति[4]: ।
निष्क्रान्तगृहकल्याणो भिक्षुर्भवति तादृश: ॥३३॥

न नृत्यगीतसन्दर्शी स[5]त्यं च पुनरादाते[5] ।
संरदाते श्मशानेषु भिक्षुर्भवति तादृश: ॥३४॥

एकाहं परमं पिण्डमाददेऽन्यन्न कांक्षते ।
त्रिभागकु[6]क्षिसन्तुष्टो भिक्षुर्भवति तादृश: ॥३५॥

वस्त्रौदर्मविवर्जी[7] य: पांसुकूलेषु[8] रज्यते[8] ।
मुक्ताहारविहारो यो भिक्षुर्भवति तादृश: ॥३६॥

१- विज्ञेय:स्तत्त्वविन्नृतवश्च स: - क०,ख० २- नृतवश्च - क०,ख०
३- रामै: - क०, ४- साधुनां - क०,ख०
५-५ स चदुनरदाते - क०,ख० ६- कुक्षिसंतुष्टा- क०,ख०
७- वस्त्रौतुमविवर्जीया- क०,ख० ८-८ पांसुकूलेषु रदाते- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्माण्यारभते[1] यो न[1] निराशः स च कर्मसु ।
निराशको नोपरतो भिक्षुर्भवति तादृशः ॥३७॥

कार्यकोटिविनिर्मुक्तो मोहध्वान्तविवर्जितः ।
अलिप्तः पापकैर्धर्मैर्भिक्षुर्भवति तादृशः ॥ ३८॥

सर्वाश्रयज्ञानातीतः सर्वाश्रयविवर्जितः[2] ।[3]
सर्वाश्रयविनिर्मुक्तो भिक्षुर्भवति तादृशः ॥३९॥

आर्याष्टाङ्गेन मार्गेण निर्वाणपुरतः स्थितः ।
सर्वधर्मता ह्येषा[4] भिक्षुर्भवति तादृशः ॥४०॥

शान्तेन्द्रियो दृढमतिः कामपाक[5]विवर्जितः ।
स्वाग्रसंस्थितमना भिक्षुर्भवति तादृशः ॥४१॥

भूमिसंक्रमणज्ञो यो भूमितत्त्वनिदर्शकः ।
भूमेः परापरज्ञो[6] यो भिक्षुर्भवति तादृशः ॥४२॥

सम्भवासम्भवान्[7] धर्मान् हेतु प्रत्ययसम्भवान्[8] ।
(नै०१०६ख०) जानाति विधिवत् सर्वान् भिक्षुर्भवति[9] तादृशः ॥४३॥

१-१ ये नारम्भति कर्माणि - क०, ख०   २- वर्जितः - क०, ख०
३- श्लोकोऽयं क० पुस्तके नास्ति   ४- क्लेशा - ख०
५- कामकवि० - क०, ख०   ६- परापर० - क०, ख०
७- साम्भवानामुच० - क०, ख०   ८- ०सम्भवान् - क०, ख०
९- भिक्षावति - क०,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ब्रह्मचारी श्रुतज्ञानी[1] स्त्यानमिद्धविवर्जितः[1] ।
कल्पोवग्रो मुविददो भिक्षुर्भवति तादृशः ॥४४॥

शमथविपश्यनास्थश्च चतुर्ध्याननिरतश्च यः ।
आलयमुदितारामो[2] भिक्षुर्भवति तादृशः ॥४५॥

पक्षिणो गगनस्थस्य छायेवानुगतः[3] सदा ।
सद्धर्मस्यानुजीवी स भिक्षुर्भवति तादृशः ॥४६॥

क्लेशोपक्लेशवधकः समदर्शी[4] शुभान्वितः ।
अनापानविधिज्ञो यो भिक्षुर्भवति तादृशः ॥४७॥

अनुक्रमविधिज्ञो यो योगवित् तत्त्वदर्शकः ।
पारापार[5]विधिज्ञो यो भिक्षुर्भवति तादृशः ॥४८॥

यो न हृष्यति हर्षेषु भयेषु[6] न बिभेति च ।
मुक्तो[7] हर्षभयोद्वेगैर्भिक्षुर्भवति तादृशः ॥४९॥

जन्ममरणतत्त्वज्ञः सुरासुरनमस्कृतः ।
परावरज्ञः[8] सत्त्वानां भिक्षुर्भवति तादृशः ॥५०॥

संघातिमात्र[9]संतुष्टः सन्चयेषु न रज्यते ।
अल्पेच्छो ब्रह्मचारी यो भिक्षुर्भवति तादृशः ॥५१॥

१-१ श्रुतःज्ञानस्त्यानमिद्धवर्जितः क०, ख० २- आरशमामु० - क०, ख०
३- छायोवानुता - क०, ख० ४- शुभमवति - ग०, क०,
५- नागपार० - क०, शुभमति - ख०,
मार्गपार० - ख०, ६- भूयेषु - ग०,
७- सदा - क०, ख० ८- परापरेज्ञः - क०, ख०
९- संघातमात्र० - ख०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकाशी[1] वृक्षमूले यः सदाध्यानं समीहते[1] ।
लाभसत्कार[2]विरतो भिक्षुर्भवति तादृशः ॥५२॥

उपेक्षाकरणारागी मोक्षादोषविवर्जितः ।
निर्दग्धदोषसर्वस्वो भिक्षुर्भवति तादृशः ॥५३॥

मन्दवी कुशोदानां[3] भिक्षूणां दर्शनाय च ।
नान्ययोगाभिरतो यो भिक्षुर्भवति तादृशः ॥५४॥

कौशाद्याभिरतो भिक्षुः न हि कल्याणमर्हति -

न शय्यासनसम्भोगो[4] भिक्षुर्बुद्धेन भाषितः ।
कौशेय भिरतो यस्तु नासौ कल्याणमर्हति ॥५५॥

क्लेशानां मूलपाकं हि कौशेयं यस्य विद्यते ।
तस्य दुःखं महाघोरं[5] संसारे सम्प्रवर्तते ॥५६॥

कौशेयमेव[6] यस्यास्ति तस्य धर्मो न विद्यते ।
केवलं वस्त्रमात्रेण भिक्षुः स इति कथ्यते ॥५७॥

भिक्षुर्भवति न तादृशः-

नाध्यापने रतिर्यस्य न ध्यानेनाशु रक्षति: ।
केवलं वस्तुमात्रेण भिक्षुर्भवति तादृशः ॥ ५८॥

१-१	एकाक्षाशीमूलारज्ञ		२-	लाभवस०	- क०,ख०
	मुध्यान मूहते	- क०	३-	नान्योयोगाभि०	क०,ख०
	०शो विमुलारस०	- ख०	४-	०संभोवि	- क०;ख०
५-	मनन्वा	- क०,ख०	६-	कौशेयमेव	- क०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विहाराभिरतो[1] यस्तु न रतो धर्मगोचरे ।
स्त्रीमद्यलो[2]लुपमतिर्भिक्षुरस्ति न तादृशः[2]॥५९॥

भवेन्मतिर्यस्य[3] नित्यं विविधे[3] पापकर्मणि ।
स भिक्षुर्दर्शितो बुद्धैः न भाषिता स्वर्गगोचरे[4]॥६०॥

वरमाशी विषविषं कथितं ताम्रमेव च ।
भुक्तं यात्यन्तदुःशीलैरधिकं[5] पापभोजनम्॥६१॥

यो हि नार्हति पिण्डाय नासौ पिण्डाय कल्पते।
(ने०१०२३०) यस्य पिण्डीकृताः[6] क्लेशाः सर्पा इव विलेशयाः[7]॥६२॥

स भिक्षुः पिण्डभोजी[8] स्यान्न स्त्रीदर्शनतत्परः।
बन्धकं यदि चात्मानं कृत्वा परशुभदातिम्[9]॥६३॥

कथं स भिक्षुर्विज्ञेयः संघरत्नप्रदूषकः[10] ।
यस्येष्टा लाभसत्कारा विषया यस्य सम्मताः॥६४॥

नारिदर्शनतत्कांक्षी न भिक्षुर्न, गृहीव सः ।
राजसेविषु दुष्टाशो मद्यपः क्रोधनस्तथा[11]॥६५॥

१- विहारभरतो - क०,ख० २-२ स्त्रीमद्यलोलुपमतिर्न
३-३ क०,ख० पुस्तकयोः नास्ति । भिक्षुस्तादृशः - क०,ख०
४- संघगो० - क०,ख० ५- ०लैराधिकं - क०,ख०
६- नरकारसकल्पते - ७- श्लोकोऽयं ख पुस्तके एवं :+:
:+: विद्यते - यस्य पिण्डकृता क्लेशा नरकारसकल्पते ।
ये नरान्ताश्चक्लेशाः सर्पा इव विलेशया॥
८- पिण्डभोजि - क०,ख० ९- परशुरदाते - क०,ख०
१०- प्रदुःषकः - क०,ख० ११- क्रोधनः - क०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सदा भिक्षुर्वञ्चयते[1] दायकान्ननु चेतसा[1] ।
उपायनान्युपादाय[2] राजद्वाराश्रिता हि ये।
रंस्या गृहिभि: सार्धं यथा नागा वनाश्रिता:।।६६।।

तस्मात्[3] तानेव पृच्छन्ति वार्तेष्वस्ति[3] समागता: ।
पुत्रदारान् परित्यज्य ये शान्ता रत्नमाश्रिता:।।६७।।

भिक्षोर्गुणानां माहात्म्यम् -

प्रहाय[4] दोषान् यो भिक्षुरस्ति[4] दर्शनतत्त्ववित् ।
रूपादिस्कन्धतत्त्वज्ञो मोक्षाय यतते सदा ।।६८।।

धर्मविबोधाभिरतो ध्यानारामविहारवान् ।
तत्त्वलक्षण सम्बोधात् प्राप्नुयात् पदमव्ययम्।।६९।।

मैत्र्यारामो हि सततमुद्युक्तो धर्मगोचरे ।
तत्त्वलक्षणतत्त्वज्ञो[5] भिक्षुर्भवति तादृश:।।७०।।

योनिशस्तु[6] मतिर्यस्य कामक्रोधैर्न हन्यते ।
(नै०१०२ क०) स भिक्षुरिति विज्ञेयो विपरीतस्ततोऽन्यथा।।७१।।

सर्वभूतदृढ: शान्त: सर्वसङ्गविवर्जित: ।
सर्वबन्धननिर्मुक्तो भिक्षुर्भवति तत्त्ववित्।।७२।।

१-१ नाधावन्वयतेदायकान्न वेतस: -ब०,क० २- उपायन्युपादाय- क०
३-३ तस्यास्तान्येव पृच्छन्ति वार्तासैन्ते - -ब०,क० ४-४ यो भिक्षुरेतानदोषान् न प्रहाय -ब०,क०
५- कपिल० - - ब०,क० ६- योनिसेतु - ब०,क०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्माणि[१] यस्य विज्ञानविषयैर्यो न हन्यते ।
निर्मलः स्यात् कनकवत् सन्तुष्टो भिक्षुरुच्यते ॥७३॥

प्रियाप्रिये[२] मनो यस्य न लेपमनुगच्छति ।
संकल्पानां विघिज्ञो यः सर्वपापविवर्जितः ॥७४॥

सन्याकृष्टचरितो धर्मशीलो जितेन्द्रियः ।
अहीनसत्वो मतिमान् भिक्षुर्भवति तादृशः ॥७५॥

शास्त्रे शास्त्रार्थविज्ञाने मतिर्यस्य[३] सदा रता ।
न पानभोजनरतः स भिक्षुः शान्तमानसः ॥७६॥

वनारण्यविहारेषु श्मशाने तृणसंस्तरे ।
रमते यस्य तु मनो भिक्षुर्भवति तादृशः ॥७७॥

दोषाणां कर्मतत्त्वज्ञः फलवित्[४] परिशेषतः[४]।
हेतुप्रत्ययतत्त्वज्ञो भिक्षुः स्याद् वीतकल्मषः ॥७८॥

हतकिल्विष[५]कान्तारो[५] हतदोषो जितेन्द्रियः ।
पुनर्भवविधिज्ञो यो[६] भिक्षुः शान्तमनाः[७] स्मृतः ॥७९॥

१- कर्मण्य - क०,ख०   २- संकल्पा - क०,ख०
३- मतोर्यस्य - क०,   ४-४ फलवन्नारिशेषतः - क०,ख०
५-५ किल्विषः कान्तरे - क०,ख०   ६- यः - क०,ख०
७- शान्तमनासनः - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नोत्कर्षेत् कृष्टहृदये निन्दया नैव कुप्यते ।
समुद्रतुल्यगाम्भीर्यो[1] योगवान् भिक्षुरुच्यते[1]।।८०।।

आवेष्टिको[2] दृढमतिः सूक्ष्मवादो न लोलुपः ।
कामवादो[3] समो दक्षः स भिक्षुः शान्त उच्यते।।८१।।

कामधातुगतान् हेतून् रूपधातौ तथैव च ।
आरूप्येषु च तत्त्वज्ञः शान्ता भिक्षुः स उच्यते।।८२।।

न लौकिककथासक्तः शत्रुदोषवधे[4] सदा ।
विषवद् यस्य विषयाः स भिक्षुर्दीक्षितो बुधैः[5]।।८३।।

शुद्धा[6] यस्य[6] कामेषु मतिर्भवति नित्यशः ।
स निर्मुक्तमतिर्भिक्षुर्[7]मुक्तः संसारबन्धनात्[8]।।८४।।

ध्यानाध्ययनकर्मण्यः कौशीद्यं यस्य दूरतः ।
हितकारी च सत्त्वानाम् शास्यो भिक्षुरुच्यते।।८५।।

प्रत्नीचरमतिर्यस्य प्रतिभावान् जितेन्द्रियः ।
स धर्मः कथितो ज्ञेयो विपरीतस्तृणैः समः।।८६।।

१-१ व्यसास्तो योगारि भिक्षु० - क०, ख०   २- आविकप्ठिको - क०, ख०
३- कालवादी - क०   ४- शत्रोदाष - क०, ख०
५- बुधैः - क०, ख०   ६-६ यं कस्य - क०, ख०
७- ०मतिविमामुक्तः - क०, ख०   ८- बन्धनैः - क० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बुद्धशासने कीदृग् भिक्षुः श्रेष्ठः ?

कार्यमानस[1]मीक्ष्यैव सर्वदा नैव खिद्यते ।
सर्वकृत्यकरो ज्ञेयो यः संघाय च तत्परः ॥८७॥

न परा[2]र्थं न लाभार्थं यशोऽर्थं कुरुते न तु ।
सद्धर्मकार्यमित्येव स मुक्तः सर्वबन्धनैः ॥८८॥

स स्वर्गार्थं मतिश्चैव लाभार्थं य[3]शसे न वा[3] ।
निर्वाणार्थं क्रिया सर्वा स भिक्षुः प्रोक्त उच्यते ॥८९॥

पापेभ्यो नित्यविरतः सत्कृत्ये[4]षु रतः सदा ।
(नै० १०३ब०) न पापमित्रसंसर्गी [5]भिक्षुः स्याद् बुद्धशासने[5] ॥९०॥

मैत्र्या भावितचित्तस्य प्रसादस्य च बुद्धेतः ।
शिक्षापदेषु र[6]क्तस्य निर्वाणं नातिदूरतः ॥९१॥

जरामरणशील[7]स्य संसारविमुखस्य च ।
ध्याने[8]ऽप्यप्रमत्तस्य निर्वाणं नातिदूरतः ॥९२॥

अनित्यताविधिज्ञस्य शून्यतावत्क्रियावतः ।
ध्यानोत्कर्षं विधिज्ञस्य निर्वाणं नातिदूरतः ॥९३॥

१- कार्यकामस० - क०, ख० २- परायार्थं - क०, ख०
३-३ यशोर्थंन्वा - क०, ख० ४- सत्कृपासु - क०,
५-५ भिक्षुस्याद्बुद्धशासने- क०, ख० सद्विन्यासु- ख०
६- कपदस्य - क० ७- ०णभीतस्य- क०, ख०
८- ध्यानोऽप्यप्रमत्तस्य - क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घोरोऽयमगृवोरोऽयं योऽयं भिक्षुरसंवृतः ।
अन्तःपूरो वरछावी बहिश्चीवरसंवृतः ।।९४।।

धर्मविनयाद् रिक्तो भिक्षुर्दुःखभागी स्यादेव -

यथा यत्नमयो राशिः सर्वो ऽसारश्च दुर्बलः ।
एवं सञ्चरति रिक्तो वितथो भिक्षुवादिकः ।।९५।।

स नारकेयो दुःशीलः संघरत्नबहिष्कृतः ।
कायस्य भेदान्नरकं नीयते चिर वञ्चितः ।।९६।।

वञ्चितो धर्मविनयाद् याति तत् स्वेन कर्मणा ।
मलिनस्तमसा बद्धो दुःखभागी भविष्यति ।।९७।।

अप्राकृतः शुक्लधर्मान्निग्नः साधुजुगुप्सितः ।
नयते नरकं घोरं यथा धर्मबहिष्कृतः ।।९८।।

अशोभनस्य[1] निचयो दुःखद्वारमनावृतम् ।
संसारबन्धनं तीव्रं दौःशील्यमिति कथ्यते।।९९।।

असंवरेण यो दग्धः स दग्धो वह्निनाभृशम्[2] ।
तस्य संवरक्षीणस्य[3] विनिपातो ध्रुवं स्थितः।।१००।।

(नै० १०४८०) मनसा संवरस्थेन आचारैः सम्वरायते ।
समुद्रययामाश्रुय[4] नरकायोपकल्पते ।।१०१।।

१- असोभनस्य - क० २- ०भृशं - क०
३- वारितक्षीणस्य - क०,ख० ४- ०चारिकुत्सृष्य - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अशुभं वर्धते तस्य दिवारात्रौ च सर्वतः ।
यस्य शीलमयं रत्नं दौःशील्येन निवारितम् ॥१०२॥

धर्मशून्यस्य रिक्तस्य तमसा संवृतस्य च ।
विद्यतेऽसंवरस्तस्य यो न शौचाय कल्पते ॥१०३॥

असंवरमयः पाशो मलिनः साधुवर्जितः ।
आकर्षति स दुःशीलान्[1] पापिष्ठान् शीलवर्जितान्[1] ॥१०४॥

असंवरैश्च दौःशील्यैः पापैश्च सह संगतिः ।
दूतका नरकस्यैते कामानामपि सेवकाः[2] ॥१०५॥

असंवृतप्रसृतस्य चपलस्य विशेषतः ।
पापकर्माभियुक्तस्य नरकं[3] नातिदूरतः ॥१०६॥

छिद्यते नावगच्छन्ति कर्मणां सदृशं फलम् ।
अदिपातय[4] मूढाय दुर्मतौ[5] ये[5] विमोहिताः ॥१०७॥

बहून्यहनि[6] वर्धन्ते पापधर्मा दुरासदाः ।
दुःशीलमिथ्याताश्चपलाः पापिष्ठजनहारिणः ॥१०८॥

न तेषां सुकरं जन्म न[7] तेषां सुकरं मनः ।
ये शीलवर्जिताः पुरुषाः शुक्लधर्मविवर्जिताः ॥१०९॥

१-१ दुःशीलानापापीष्टा- शीलवर्जिताः - क०,ख०
२- सेवर्णाः - क०,ख०
३- नरका - क०,ख०
४- आत्मघाताय - ख०
५-५ दुर्मते - क०,ख०
६- दुःशील्यमाश्च - क क०,ख०
७- पुरुषाश्चैते- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मोऽत्युच्चः शुभो मार्गः -

अत्युच्चश्च शुभो मार्गः स धर्म[1] इति कथ्यते[1]।
तत् प्राप्यमनुजः शीघ्रं प्रयाति पदमच्युतम्।।११०।।

(ने०१०४ क०) ततोऽपवादाः साध्यन्ते[2] शक्तिमन्तः[2] सुखास्तु ये।
संवरस्य सदा दासास्तेषां[3] दुःखं न विद्यते।
दौश्शील्यपरमो धूर्येण मलिनीकुरुते नृणाम्।।१११।।

ये शैल्यपदविभ्रष्टा[4] मार्गिणो रनकस्य ते।
एवं ज्ञात्वा नरः सर्वं संवरं प्रतिपद्यते।।११२।।

भवार्णवस्य सर्वस्य सेतुभूतो हि संवरः।
शुद्धाजीवविशुद्धस्य शान्तवक्त्रस्य[5] कर्मणः।।११३।।

ध्यायिनो विप्रमुक्तस्य निर्वाणं नातिदूरतः।
धूर्तस्याप्रमत्तस्य श्मशानवनसेविनः।। ११४।।

शायिनोभूतले नित्यं निर्वाणं नातिदूरतः।
पांशुशय्यावलम्बांसपातमेकं सजीरम् ।।११५।।

सन्तोषः फलमूलैश्च[7] स सुखी सुखसम्भवः[6][7]।
विप्रमुक्तस्य कामेभ्यः सन्तोषो शीतरस्य च ।।११६।।

१-१ पदमात्मनः - ख० २-२ साध्यमशक्तिया - क०,ख०
३- दासतेषां - क०,ख० ४- शिल्यापदमंभ्रष्टा - क०,ख०
५- शांतवीर्याय - क०,ख० ६- ०संमतः - क०,ख०
७-७ कामेभ्यो संतोषाशितस्य - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सविमुक्तकविकल्पस्य[1] निर्वाणं नातिदूरतः ।
दुःखकाममुक्तस्य रतो वा तस्य तायिनः ॥११७॥

आकाशसमविकल्पस्य निर्वाणं[2] नातिदूरतः ।

भवचारिका-

बहुबद्धपदैर्युक्ता विज्ञेया[3] भवचारिका[3] ॥११८॥

नाशिका ब्रह्मचर्यस्य निर्वाणगतिदुःखिका[4] ।
सेव्यते या जनैर्नित्यं प्राकृतैः शीलवर्जितैः ॥११९॥

अस्पृश्यं परिवर्ज्या सा ध्यायिभिस्तत्त्वदर्शिभिः ।
(नै०१०५ ख०) दौर्बल्यमूलमेका सा मनस्कारप्रणाशिका ॥ १२०॥

नाशिनी ब्रह्मचर्यस्य नरकस्य प्रदर्शिका ।
भ्रंशिका[5] स्वर्गमार्गस्य दुःखसागरचारिणिका ॥१२१॥

दूतिका प्रेतलोकस्य तिर्यग्योनिनिपातिका ।
नाम्ना संगणिका[6] सेवा संसारबन्धमातृका ॥१२२॥

ध्यानाध्ययनशत्रुश्चैव वर्ज्या नित्यं हि भिक्षुभिः ।
ध्यानाध्ययननिर्मुक्तो निमित्ताभिरतः सदा ॥१२३॥

१-	सुविकल्पस्य	- क०,ख०	२-	निर्वाणाति	- ख०
३-३	विज्ञेयकारिका	- क०,ख०	४-	दूणिका	- ख०
५-	भ्रष्टिका	- क०,ख०	६-	संगणनिका	- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परधर्मो भयावहः -

विवर्जितः स्वधर्मैर्पापकमनाय च सः ।
स्वधर्मं यः परित्यज्य परधर्मेण रज्यते ।।१२४।।

धर्मद्वयपरिभ्रष्टो विनिपाताय कल्पते ।
स्वगृहं[1] यः परित्यज्य परवेश्मानि[2] तिष्ठति।।१२५।।

सदाऽयं लाघवं याति निधनं चाशु गच्छति ।
तथा यो[3] विमतिर्मूलो[4] विहन्माना अनेच्छया[4]।।१२६।।

स्वधर्मविरतिं कृत्वा परधर्मेण वर्तते ।
अधर्मं चाश्रयस्तस्य परलिङ्गोपजीविनः।।१२७।।

तृष्णाविद्याभिलिप्तोऽयं[5] क्रूरः पापेषु पच्यते ।
यतोऽनन्तं पदमास्थाय पापकर्माणि वर्तते ।।१२८।।

शश्वत स पतितो दृष्टः शासनान्तात् प्रवर्तते ।
निस्पृहं कामबाधासु निरामोहः प्रवर्जितः ।।
सारव्यवार्यः सन्तुष्टो ध्याये भिक्षुरिहोच्यते।।१२९।।

नासौ भिक्षुरिहोच्यते -

(नै० १०५ श०) न च कामेषु संसक्तो[6] नित्याहार विहारवान्[6] ।
कषायसंवृतः चौरो[7] नासौ भिक्षुरिहोच्यते ।।१३०।।

१- स्वधेश्य - क०,ख० २- रमाति - क०,ख०
३- यः - क०,ख० ४-४ कुमतिर्मूढाविहन्मानो-
५- तृष्णाविद्याभिलोऽस्य-क०,ख० अनेप्सया - ख०
६-६ यशक्तो नित्याहारविचारवान्- ७- चौरो - ख०
-क०,ख० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निमित्तबोधको यस्तु[1] नक्षत्रादिचिन्तकः[1] ।
राजसेवाप्रसक्तश्च नष्ट[2] स भिक्षुरिहोच्यते[2] ॥१३१॥

वैद्यकर्माणि[3] कुर्वंश्च श्रुति संग्रन्थनं[3] तथा ।
संकीर्णां[4] दिनचर्यां[4] च कुर्वन् भिक्षुः प्रणश्यति ॥१३२॥

ध्यानाध्ययनविद्वेषी रतः संगणिकासु च ।
लाभसत्कारलाभं च कुर्वन् भिक्षुः प्रणश्यति[5] ॥१३३॥

सुवर्णधातुसंसक्तो बहुमित्ररतिश्च यः ।
अन्यथाभाभिलाषितो[6] भिक्षुः पतति[7] शासनात् ॥१३४॥

तपसः[8] संगनिर्मुक्तो[8] न पापगणसेवकः ।
स्वतुष्टेन सन्तुष्टः स भिक्षुर्निष्फुर[9](?)स्मृतः ॥१३५॥

<u>शुद्धो भिक्षुः-</u>

आगतान् विषयान् सर्वान् त्यजते ज्वलनोपमान् ।
विशुद्धदोषो मणिवद् शुद्धो भिक्षुरिहोच्यते ॥१३६॥

१-१ निमित्तादयोनक्षत्र- चिन्तकः - क०, ०ज्ञाण० - ख०

२-२ नारोविनसिहोच्यते-क०,ख०

३-३ वैद्यकिंचित्र कर्माणिगु- श्रुतिगन्थनं - क०,ख०

४-४ वा सरीवाम्च - क०,ख०

५- प्रणश्यते - क०,ख०

६- अन्यथाभाभिलाषीत्-ख०

७- पापतति - क०,

८-८ तपस्तुसंगविनिर्मुक्तो-क०,ख०

९- भिक्षुनिहर- क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्तर्बहिर्विशुद्धात्मा ज्ञानादिभिरलंकृत: ।
भद्रेण[१] शीलवस्त्रेण क्रियावान् भिक्षुरुच्यते।।१३७।।

लोभधर्मव्यतीतो य: स्थितो मेरुरिवाचल: ।
सर्वलोकप्रिय: शान्त: पारगो भिक्षुरुच्यते।।१३८।।

त्रिरात्रिवासी[२] कुत्रापि कुशासनविचारक:[२] ।
गिरिगह्वरसेवी च विमुक्तो भिक्षुरुच्यते।।१३९।।

(नै० १०६३०) पापाचारसंस्पर्शी संवृतं च सुसंवृत: ।
ज्ञानसेवी स्थिर: शान्त: एकाकी भिक्षुरुच्यते।।१४०।।

अचल: प्रियवादी च पापमित्रविवर्जित: ।
अशक्त: सर्वकृत्येषु मुक्तो भिक्षुरिहोच्यते।।१४१।।

<u>राजसेवा कुभार्योचितसेवा -</u>

राजसेवा विगर्ह्यास्ति भिक्षूणामरण्यवासिन:[३] ।
कुभार्योचितसेवाऽपि मृत्युतस्करबोधिका ।।१४२।।

न हि राजसेवको[४] भिक्षुर्य: सेव्यो देवतैरपि ।
न हिंसासवसंदुष्टो महतोऽशुचिसेवक: ।।१४३।।

<u>भिक्षो: राजसेवा न शोभते -</u>

निर्मलस्य निरामस्य निस्पृहस्य च देहिन: ।
संसारभयभीतस्य राजसेवा न शोभते ।।१४४।।

१- संदन - ख०,ग० २- त्रिरात्रिवासी न स्वे
३- भिक्षुर्वीरनवासिन: ख०,ग० यत्नैव क्वासिन: -ख०,ग०
४- सेवा - ख०,ग० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वनारण्यश्मशानेषु पल्वलगिरिभूमिषु[1] ।
प्रान्तभूमिषु ग्रामस्य स्थितः भिक्षुः प्रशोभते ॥१४५॥

वनारण्यश्मशानेषु[2] भिक्षुर्न राजसेवया[2] ।
ध्यानाध्ययननिर्मुक्तः कवलाहारगृद्धिता ।
न भिक्षुरिति विज्ञेयः पिशाचसममानसः ॥१४६॥

ध्यानादि विमलं सौख्यं प्रवदन्ति मनीषिणः ।
न तस्मात्सुखमन्यदस्ति लोके कथञ्चन ॥ १४७॥

तदुत्तमध्यानसुखं मुक्त्वा यः पुरुषाधमः ।
रसेषु रमते बालस्तेन मूढो विहन्यते ॥१४८॥

विषयैरभिमतस्यास्य नित्यं तद्गतमनसः ।
(नै० १०६ ब०) वर्धन्तेऽकुशला धर्माः परलोकापकर्षिणः ॥१४९॥

आत्मज्ञो भिक्षुर्निर्वाणमधिगच्छति -

आत्मनो यानहीनश्च गुरुपृच्छनकस्तथा ।
भिक्षुरुद्युक्तवीर्यश्च निर्वाणमधिगच्छति ॥१५०॥

श्रुतं यावद् भवत्येव तावदेव प्रभाषते ।
आत्मज्ञो मानहीनश्च भिक्षुर्भवति तत्त्वविद् ॥१५१॥

मानापमानहीनो यो मार्गामार्ग विचक्षणः ।
स्वपरार्थविधिज्ञो यः[3] स[3] तुष्टो भिक्षुरुच्यते ॥१५२॥

१- पल्वलेषु गिरि० - ब०, छ० २-२ स्थितप्रशोभतेवनार-
३-३ या सा - ब०, छ० ण्यश्म० - ब०,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मानिन: कुत: शान्ति: ?

मानिन: क्रूरमनसश्चपलस्याल्पमेधस: ।
लाभसत्कार[1] यातस्य कुत: शान्तिर्भविष्यति।।१५३।।

प्रसन्नाचार[2]युक्तस्य ज्ञानगोचरसेविन:।
संसारदोषभीतस्य प्रव्रज्या सफला मता[3]।।१५४।।

स्वभावपरभावेषु यस्य बुद्धिर्नमुह्यते ।
न कर्मण्यविपाके च मार्गामार्गे तथैव च।।१५५।।

निवासोपहतो भिक्षु: सुखं न विन्दति -

सदाचार[4]वियुक्तस्य सुखदु:खाश्रयस्य च ।
निवासोपहतो[5] भिक्षुर्बालवद् दृश्यते परै:।।१५६।।

तृणवल्लघुतां याति स्वार्थाच्च परिहीयते ।
निवासोपहतो भिक्षु: परिक्षीणव्रते स्थित:।।१५७।।

ध्यानाध्ययनकृत्येषु मनो नैव प्रवर्तते ।
निवासोपहतो भिक्षुर्जनसम्पर्कतत्पर:।।१५८।।

(नै० १०७३०) सम्पर्कव्यग्रमनसो यो चित्तं परिहीयते ।
दरिणाति रतसं[6] स्वस्य यो चित्तं नैव गच्छति[6]।।१५९।।

१- गतस्य - क०   २- प्रपाचार० - क०,ख०

३- मुता - क०   ४- आचरणाति० - ख०

५- दु:खेनैवारतिष्ठस्तेनिवा० - क०,ख०   ६-६ रतसं यो चित्तं नैव-विन्दति - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च विन्दति यत् कृत्वा सुखमन्यत्र भुज्यते ।
निवासेऽभक्तो भिक्षुर्जनसम्बन्धतत्परः[1] ।।
पापानि[2] याति[2] नित्यं स तेन गच्छति दुर्गतिम् ।।१६०।।

निर्वाणाभिरतस्य भिक्षोः प्रशंसा -

अनभियुक्तमनसो निराशस्य च देहिनः ।
सर्वसङ्गविमुक्तस्य श्रामण्यं सफलं मतम्[3] ।।१६१।।

गिरिगह्वरकुञ्जेषु नित्यं ध्यानविहारिणः ।
प्रसीदति सुखं शान्तं दोः शैल्यपरिवर्जितम् ।।१६२।।

सर्वसङ्गाद्विनिर्मुक्तो विशार्थे च वञ्चितः ।
स भिक्षुर्ज्ञेयो[4] निःसारः शुष्केन्धनमिवानलः[4] ।।१६३।।

निर्वाणाभिरतो यो हि भीतस्य विभवार्णवात् ।
भिक्षुर्भवति शुद्धात्मा न निवासेन कश्चित्[5] ।।१६४।।

लोभमोहेषु[6] ये सक्तास्ते सक्ता तृष्णया सदा ।
तृष्णाबन्धनबद्धानां नायं लोको न चापरः ।। १६५।।

अपदापाती दुर्गतिं न लभते -

असंसक्ता मतिर्यस्य मिथ्याकर्मसु[7][8] सर्वदा[7] ।
अपदापाती धर्मज्ञो न स गच्छति दुर्गतिम्[8] ।।१६६।।

१-	०जनतत्परः	- क०, ख०	२-२	यायेन गच्छते	- क०, ख०
३-	मताः	- क०, ख०	४-४	भिक्षुर्वहति क्लेशान्	
५-	वञ्चितः	- ख०		शुष्केन्धनमिवानलः	- क०, ख०
६-	निवासेन तु	- ख०	७-७	निस्सङ्गः	- क०
८-८	[illegible]	- क०, ख०		मित्रामित्रेषु	- ख०

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दोषपङ्के मनो यस्य न लिम्पति कथञ्चन ।
एकाराम विहारी यो निराशो मुनिरुच्यते।।१६७।।

आरण्यो मुनिरेव भिक्षुः -

निर्मुक्तो विमलाचारो निवृत्तमलकल्मषः ।
(मं०१०७क०) मुक्तो यो विषयैः सर्वैरारण्यो मुनिरुच्यते।।१६८।।

भिक्षुर्निर्मलो मुनिः -

लोकधर्मैर्न निर्वेदं समायाति कथञ्चन ।
सुखदुःखसमप्रज्ञो निर्मलो मुनिरुच्यते ।।१६९।।

सन्तोषः परमो धर्मो[1] नित्यं कामविवर्जितः।
निरामयः[2] कृच्छ्रजीवी[2] शुचिर्मुनिरिहोच्यते ।।१७०।।

नयेन्न तेन संक्लेशं यत्र यत्रानुगच्छति ।
एकचारी दृढमतिः क्रियावान्[3] मुनिरुच्यते।।१७१।।

शुभाशुभानां सर्वेषां कर्मणां फलतत्त्ववित् ।
शुभाशुभपरित्यागी लोकेऽस्मिँ मुनिरुच्यते।।१७२।।

उद्युक्तो दोषनाशाय नित्यमगतिःस्मृतः।
उदयव्ययतत्त्वज्ञो बुद्धिमान् मुक्त[4] उच्यते।।१७३।।

देशकालविदां[5] श्रेष्ठोऽव्ययवादी[5] जितेन्द्रियः।
संसारभयभीतोऽयं प्रशान्तो मुनिरुच्यते।।१७४।।

१- क०,ख० पुस्तकयोः नास्ति। २-२ निरामःकृच्छ्रजीविव-क०,ख०
३- क्रियावान् - क०,ख० ४- मुक्ति - क०,ख०
५-५ लोकपरभोगमायावादी-क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकारामगतो भिक्षुः संक्षिप्तेन्द्रियपञ्चकः ।
देहलक्षणतत्त्वज्ञो निर्वाणमधिगच्छति ।। १७५ ।।

वीर्यवान् सत्यवाक्[१] भिक्षुर्नित्यं दोषविवर्जितः ।
उद्यानमिव क्रीडाया निर्वाणमधिगच्छति ।। १७६ ।।

दग्धे क्लेशेके वयं दग्धा[२] वनं[२] दग्धं यथाग्निना ।
कल्याणधर्मे[३] संरक्षा[३] न रक्ताः कामभोगे ।। १७७ ।।

मायया जनान् वंचका धर्मवर्त्मनि मूढा एव -

(ने० १०८ अ०) नित्यं प्राप्त्युत्सुका[४] ये हि[४] नित्यं स्वजनसंरताः ।
मायया[५] वञ्चका ये तु[५] मूढास्ते धर्मवर्त्मनि ।। १७८ ।।

समवीर्याण्यवस्थानि च तत्रैव[६] रमते मनः ।
रमन्ते[७] वीतरागास्ते न तु कामगवेषिणः[७] ।। १७९ ।।

स कथाभिरतो यस्तु रतो विषयतृष्णयोः ।
न यास्यति[८] पुरं शान्तं यो[९] च[९] मृत्युं न विन्दति[१०] ।। १८० ।।

१- क०,ख० पुस्तकयोः नास्ति। २-२ वर्द्धितं - क०,ख०
३-३ तैदिकतेवकल्याणा-क०,ख० ४-४ प्राप्तोत्सुकानिगतं-क०,ख०
५-५ मयाः परात्मवञ्चका-क०,ख० ६- नराय - क०,ख०
७-७ वीतरागात्ररम्यते नतु कामसेविणः - क०,ख० ८- यास्यसे - क०,ख०
९-९ यत्र - क०,ख०
१०- विद्यते - क०,ख० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

योऽत्यन्तशान्तमनसा नित्यं ध्यानपरायण:।
आदिमध्यान्तकल्याणो नित्यमद्वयगोचर:[1]।। ८१।।

उदानम् -

करुणादानं शीलक्षान्ति वीर्यमथ ध्यानम्।
प्रज्ञानिर्वाणमार्गं च भिक्षुदर्शनं विदु:।। १८२ ||

।। इति भिक्षुवर्गस्त्रिंश:।।

---:o:---

१-१ ते छिन्नस्ते च कल्पाना कल्याणायणगोचरा- क०, ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३१) पुण्यवर्ग एकत्रिंशः

पुण्यप्रशंसा-

रमणीयानि पुण्यानि फलं परं सुखम् ।
तस्मात् कुरुत पुण्यानि नास्ति पुण्यसमं धनम् ॥१॥

पुण्यं निधानमक्षय्यं पुण्यं रत्नमनुत्तमम्[1] ।
श्रद्धा पथदृशं पुण्यं मातृवत् पितृवत् सदा ॥२॥

पुण्यं कृत्वा गता देवाः पुण्यं नयति सद्गतिम् ।
पुण्यं कृत्वा नरा लोके मोदन्ते त्रिदिवे[2] हि ते[2] ॥३॥

पुण्याधिका हि पुरुषा भवन्ति सुखिनः सदा ।
तस्मात् कुरुत पुण्यानि नास्ति पुण्यसमं सुखम् ॥४॥

पुण्येन लोकत्रयहितम् -

(नै० १०८ श्लो०) पुण्यं[3] कृत्वा गता ये देवाः पुण्यप्रियजनस्य च[3] ।
हेतुभूतं सदा[4] दृष्टं तस्मात् पुण्यं परं[4] सुखम् ॥५॥

पुण्यं नित्योत्तमं दृष्टं छायावदनुगामिकम्[5] ।
तस्मात् सुखं परं पुण्यं नास्ति पुण्याद् ऋते[6] सुखम् ॥६॥

१- रत्नमुत्तमं - क०,ख० २-२ त्रिदिवोहि - क०,ख०
३-३ लोकत्रयं हितं पुण्यं कृत्वागता देवाः,
पुण्यप्रियस्य जनस्य च - क०,ख०
४-४ सदृष्टं तस्मात्पुण्यपरसुखं - क०,ख० ५- क० पुस्तके नास्ति ।
६- ऋते - क०,ख० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुण्योपेता नराः पुनर्देवा भवन्ति सुकृतानुगाः ।
पुण्यापुण्यफलो लोकस्तस्मात् पुण्यं समाचरेत् ॥७॥

अपुण्यनिन्दा-

ये पुण्यहीना दुर्दान्ता नित्यं कुमतिगामिनः ।
दुःखस्तेषां सुखं दृष्टं सिकतासु यथा घृतम् ॥८॥

चिरेण वञ्चिता मूढाः पुण्येन परिवञ्चिताः ।
न तेषां विद्यते शर्म दुःखं तेषामनुचरम्[1] ॥९॥

मानुष्यं सुकृतम् -

मानुष्यं सुकृतं कुर्यात् कुले भवति देहिनः ।
तेन धर्मविपाकेन स्वर्गलोकेषु वसते ॥१०॥

प्रियो भवति यस्यात्मा यस्य सौख्ये स्थिता मतिः ।
स करोतु महत्पुण्यं देवलोकोपपत्तये ॥११॥

धर्मचारी हि पुरुषः सुखात् सुखमवाप्नुते ।
निर्मलश्च परां[2] शान्तिं क्षिप्रमेवाधिगच्छति ॥
तस्मात् कुरुत[3] पुण्यानि यान्[4]नित्यं संप्रवाधिकम् ॥१२॥

पुण्यकारी सदा दान्तो गच्छति[5] पदमव्ययम् ।
रमणीयानि पुण्यानि करणीयान्यनेकशः ॥१३॥

१- तेषामनन्तरं- क०,ख० २- याति - क०,ख०
३- कुरुते - क०,ख० ४- क०,ख० पुस्तकयोः नास्ति।
५- गच्छते - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुष्पस्य वैचित्र्यं धर्मस्य उपादेयता च -

(ने० १०६८०) विचित्रं हि कृतं पुष्पं[1] विचित्रं पारकच्यते ।
धर्माधर्मप्रधानस्य जीवलोकस्य सर्वतः ।
स्मत्राणां[2] यथा धर्मस्तस्माद् धर्मरतो भवेत्।।१४।।

यो हि धर्मं[3] परि[4]त्यज्य रमते कुशले नरः ।
तस्य दुष्कृतबन्धस्य दुःखं भवति नित्यशः।।१५।।

यावन्नाभ्येति मरणं यावद् स्वस्थचिन्तनम्[5]।
तावद् धर्मे मनः कार्यं पश्चात्तापी भविष्यति।।१६।।

यो हि देशयते धर्मं परेषां हितकाङ्क्षया ।
स माता स पिता चैव निर्वाणपुरदेशकः।।१७।।

शास्तुः सुभाषितममूल्यम्-

सुभाषितपरस्वैकः यो देशयति देशिकः ।
स गत्यन्तरमार्गज्ञो नाथो भवति देहिनाम्।।
न मूल्यं विद्यते शास्तुः[6] सुभाषितपदस्य वै।।१८।।

साधारणद्रव्याद् धर्मद्रव्यस्य वैलक्षण्यम्-

[7]न पदं[7] लभते शान्तं यद् धनैरुपलभ्यते ।
द्रव्यं साधारणं दृष्टं न धर्मो बुद्धिवन्धनम्।।१९।।

१- पुण्या - क०,ख० २- स्मत्राणं - क०,ख
३- क०,ख०कुशलकयोः नास्ति। ४- ०धारा - क०,
५- ०चिन्तकाः - क०,ख० ६- सस्तु - क०
७-७ यत्पदं - क०,ख०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुण्यस्य वैचित्र्यं धर्मस्य उपादेयता च -

(ने०१०६८०) विचित्रं हि कृतं पुण्यं[१] विचित्रं पारपच्यते ।
धर्माधर्मप्रधानस्य जीवलोकस्य सर्वतः ।
श्रमणाणां[२] यथा धर्मस्तस्माद् धर्मरतो भवेत्।।९४।।

यो हि धर्मं[३] परित्यज्य[४] रमते कुकृते नरः ।
तस्य दुष्कृतबन्धस्य दुःखं भवति नित्यशः।।९५।।

यावन्नाभ्येति मरणं यावद् स्वस्थचिन्तनम्[५]।
तावद् धर्मे मनः कार्यं पश्चात्तन्न भविष्यति।।९६।।

यो हि देशयते धर्मं परेषां हितकांक्षया ।
स माता स पिता चैव निर्वाणपुरदेशकः।।९७।।

शास्तुः सुभाषितममूल्यम्-

सुभाषितवरत्नैः यो देशयति देशिकः ।
स गत्यन्तरमार्गज्ञो[६] नाथो भवति देहिनाम्।।
न मूल्यं विद्यते शास्तुः सुभाषितपदस्य वै।।९८।।

साधारणद्रव्याद् धर्मद्रव्यस्य वैलक्षण्यम्-

[७]न पदं[८] लभते शान्तं यद् धनैरुपलभ्यते ।
द्रव्यं साधारणं दृष्टं न धर्मो बुद्धिवन्धनम्।।९९।।

१- पुण्या - क०,ख०   २- श्रमणाणं - क०,ख
३- क०,ख०पुस्तकयोः नास्ति।   ४- धारा - क०,
५- ०चिन्तकाः - क०,ख०   ६- स्स्तु - क०
७-८ स्थ पदं - क०,ख०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यं[1] विनश्यति नृणां धर्मद्रव्यं न जातु वै[1] ।
आभ्यन्तरसहस्राणि धर्म एकोऽनुगच्छति ।।२०।।

न धनं पदमप्येकं गच्छन्तमनुगच्छति[2] ।
शाश्वते द्रविणं नृणां राजचौरोदकाग्निभिः ।
धर्मवित्तं न तच्छक्यमपहर्तुं कथञ्चन ।।२१।।

धर्मपरो भवेत् -

अचिरेणापि कालेन भुक्त्वा[3] सौख्यमनेकशः ।
भवत्यवश्यं मरणं तस्माद् धर्मपरो[4] भवेत् ।।२२।।

(ने०१०९ख०) धर्म एकः परं त्राणं धर्म एकः परा गतिः ।
धर्मेण पूर्ववर्त्येन मरणं वाप्यकर्मतः ।।२३।।

धर्मचारिणः प्रशंसा -

परं धर्मं धर्मचारी धर्ममेव निषेवते ।
स सुखात् सुखमाप्नोति न दुःखमनुपश्यति ।।२४।।

अधर्मचारिणो निन्दा -

अधर्मचारी पुरुषो यदाऽधर्मं निषेवते ।
स सदा[5] दुःखमाप्नोति नरकेषु पुनः पुनः ।।२५।।

निर्वाणमहत्त्वम् -

रत्नत्रयप्रसादस्य भावितस्याप्यनेकशः ।
फलं भवति निर्वाणं पुंसः वर्गापवर्जितः ।।२६।।

१-१ क० पुस्तके नास्ति । २- गच्छन्तमनुगच्छति - क०,ख०
३- भुक्त्वा -क०,ख० ४- धर्मपरो - क०,ख०
५- सदा -क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मना क्रियते पुण्यमात्मना प्रतिपद्यते ।
सुखं वा यदि वा दुःखमात्मनैवोपभुज्यते ॥२७॥

शीलवतः पुण्यप्रभावो विपुलः -

नदीस्रोत[1] इवाजस्रं पुरुषस्य प्रवर्तते ।
पुण्यप्रभावो[2] विपुलो यस्य शीले रतं मनः ॥२८॥

भवत्यन्यं[3] फलं यस्य कर्म[4] धर्मो न रोचते[5] ।
धर्मो हि नयति स्वर्गं धर्मचारी सुखान्वितः ॥२९॥

एतदेव हि पर्याप्तं यद् धर्मपरिपालनम् ।
धर्मादृते हि पुरुषो नरकानुपधावति ॥३०॥

धर्मविगर्हणान्मरणं श्रेयः -

श्रेयो भवेद्धि मरणं न तु धर्मविगर्हणम् ।
धर्मेण वर्जितो लोकः संसारे भ्रमति सदा ॥३१॥

धर्मविद्याविमुक्तस्य मोहेनाक्रान्तचेतसः ।
वृथा हीत्थमिदं दृष्टं[6] दृष्ट्वा यातो यथापरः[6] ॥३२॥

धर्माद्विदूरो मनः शान्ते नैव रोहत्यचेतसः ।
यस्य शीलप्रदा[7] बुद्धिः धर्मविधानतत्परा[7] ॥३३॥

१- स्रोति - ४०,६०　२- ०प्रभावो - ४०,६०
३- रिपुवैकल्य - ४०,६०　४- ४०,६० पुस्तकयोः नास्ति।
५- रोच्यते - ४०,६०　६-६ दृष्टा यातो यथापरे - ४०,६०
७-७ शीलस्य सा बुद्धिधर्म-
वर्णितरा - ४०,६०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शुभेन संविशुद्धेन[1] भावितेन प्रयत्नतः ।
(ने०११०८०) प्रयान्ति तत्[2] पदं[2] शान्तं यत्र दुःखं न विद्यते ।।३४।।

<u>इन्द्रियवशी मारं नातिवर्तते -</u>

इन्द्रियाणां[2] वशे[3] यस्तु विषयेषु तथैव च ।
स सर्वबन्धनैर्बद्धः स मारं[4] नातिवर्तते ।।३५।।

<u>नाकर्मभिरलिप्त एव स्वस्थः -</u>

अलिप्तपापकर्मभिर्निर्भात कनकद्युतिः ।
स मुक्तभवकान्तारः स्वस्थो भवति सर्वतः ।।३६।।

<u>बुद्धादीनां पूजया निर्वाणलाभः -</u>

बुद्धो[5] येषां बहुमतो[5] नित्यं धर्मश्च गोचरः ।
गु[6]णाचार्यपादा बहुमानश्च कर्मणाम् ।।३७।।

त्रिरत्नपूजया नित्यं सद्बुद्धिश्च सुनिर्मला[7] ।
मातापितॄणां[8] पूजातः निर्वाणपुरगामिनाम् ।।३८।।

प्रव्रज्याभावधर्माणां सर्वेषां[9] सम्प्रकीर्तितः ।
ब्रह्मचर्यादिधर्माणां सर्वं संख्याग्रगारिका ।।३९।।

१-	शुचि०	- १०,८०	२-२	तत्परं	- १०,८०
३-३	इन्द्रियानां स्वर्गे गां	- १०,८०	४-	नातिवर्तिवर्तते	- १०,८०
५-५	बुद्धो येषां बहुमते	- १०,८०	६-	गुणा०	- १०
७-	निर्मला	- १०,८०	८-	पूर्वं	- १०८०
९-	सर्वेषां	- १०,८०।			

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मदानमुत्तमम् -

दानानामुत्तमं दानं धर्मदानं प्रकथ्यते ।
उद्योगानां सदा ध्यानं येन गच्छति निर्वृतिम्॥४०॥

सम्यक्तथागतः प्रोक्तः -

ऊर्ध्वाधस्तिर्यग्गतस्य लोकस्यानेकधर्मिणः ।
सम्यक्तथागतः प्रोक्तो धर्माणां तत्त्वदर्शकः॥४१॥

कर्माणां चार्थलब्धीनां प्रवरः[1] शान्त उच्यते ।
क्षेत्राणां त्रिविधं पुण्यं गुणदुःखमयं ततः॥४२॥

माता पितृश्च पूज्यः उपाध्यायः सदा भवेत् ।
स उन्मीलयते चक्षुर्विज्ञाचरितां प्रति ॥४३॥

निःसृता विषया मताः -

अग्राह्या वा सदा दृष्टा मुनिना तत्त्वदर्शिना ।
सुखस्य भूमयो ह्येता निःसृता विषया मताः[2]॥४४॥

(ने० ११०८०) यद्येवं[3] कुरुते धर्मं निर्मलं मार्गदर्शनम् ।
सौख्यं तस्य भवेन्नित्यं न सौख्यं देवभूमिषु॥४५॥

भवान्तरेषु सुकृतं पृष्ठतो देहिनां स्थितम् ।
स[4] साधुः[4] प्रयत्नेन सेवितव्यः सदा नरैः॥४६॥

१- शान्तप्रवरः - ५०,८० २- सरता - ५०
३- यद्य्ग - ५०,८० ४-४ तमाहुर - ५०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मदानमुत्तमम् -

दानानामुत्तमं दानं धर्मदानं प्रकथ्यते ।
उद्योगानां सदा ध्यानं येन गच्छति निर्वृतिम् ।।४०।।

सम्यक्तथागतः प्रोक्तः -

ऊर्ध्वाधस्तिर्यग्गतस्य लोकस्यानेकधर्मणः ।
सम्यक्तथागतः प्रोक्तो धर्माणां तत्त्वदर्शकः ।।४१।।

वर्णानां चार्यश्रेष्ठो प्रवरः[१] शास्त उच्यते ।
क्षेत्राणां त्रिविधं पुण्यं पुण्यदुःखभियं ततः ।।४२।।

माता पितृसमः पूज्यः उपाध्यायः सदा भवेत् ।
स उन्मीलयते चक्षुर्वर्णाक्षरतां प्रति ।।४३।।

निःसुखा विषया मताः -

अग्राह्या वा सदा दृष्टा मुनिना तत्त्वदर्शिना ।
सुखस्य भूमयो हृद्या निःसुखा विषया मताः[२] ।।४४।।

(ने० ११०७) यद्येवं[३] कुरुते धर्मं निर्मलं मार्गदर्शनम् ।
सौख्यं तस्य भवेन्नित्यं न सौख्यं देवभूमिषु ।।४५।।

भवान्तरेषु सुकृतं पृष्ठतो देहिनां स्थितम् ।
स[४] आहृत्य[४] प्रयत्नेन सेवितव्यः सदा नरैः ।।४६।।

१-	शास्त्रप्रवरः	- ४०,८०	२-	सदा	- ८०
३-	यद्गेव	- ४०,८०	४-४	समाहृत	- ४०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनागते मय यो हि पश्यति बुद्धचक्षुषा।
स पण्डितः सदा धीरो मूर्खस्त्वादतिपीडकः।।४७।।

विपत्तिं मयं दृष्ट्वा मार्गं[1] पश्यति बुद्धिमान् ।
[2]स हि विघ्ने तु सम्प्राप्ते न विषादे[2]न बाध्यते।।४८।।

अथ मूर्खमतिर्नित्यं विषयानेव सेवते ।
विमोहितः स विषयैः पश्चात्तापेन दह्यते।।४९।।

तस्मात्सम्यग् जन्य पुण्यानि करणीयानि-

यावत् सम्यग् जन्मेदं ज्ञानं याति विनाविघ्नम् ।
तावत् कुरुत पुण्यानि दुःखं ह्यकृतपुण्यकाः।।५०।।

कार्यं प्रयान्ति पुण्यानि स्वरितं याति जीवितम् ।
धर्मसंग्रहणे यत्नः कर्तव्यस्तु गते बुधैः।। ५१।।

यो हि धर्मं परित्यज्य प्रमादी[3]नहतो नरः[3]।
न सञ्चिनोति पुण्यानि स पश्चादपि तप्यते।।५२।।

न यावदायाति जरा न व्याधिः सह मृत्युना।
तावत् कार्याणि पुण्यानि मा पश्चात् परितप्यथ।।५३।।

असंगृहीतपुण्यस्य प्रमादोपहतस्य च ।
नरके कारणं दुःखं प्रादस्त्वां[4] हनिष्यति[4]।।५४।।

१- ख०,ग० कृतकार्यः नास्ति   २-२ सविघ्नेतिसंप्राप्ते न
३-३ प्रमादोपहतनुरः - ख०,ग०   विषादेन - ख०,ग०
४-४ प्रादंमुपहन्स्यति - ख०,ग०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

किं तस्य जीवितेनार्थः[१] किं भार्यैः किं च बान्धवैः ।
(नै० ११९ अ०) सकलेन्द्रियतां प्राप्य योऽनुधर्मरतः सदा ।।५५।।

अहन्यहनि कर्तव्यं धर्मसंग्रहणं मनः ।
विरतिश्चापि पापेभ्यः साधूनां दर्शने न च ।।५६।।

शीलेन यः शुरो जन्म तस्यवेदं कामयोक्षितः।
न सन्तिष्ठन्ति पुण्यानि सम्भवं नातिवर्तते[२] ।।५७।।

शान्तारम्भानुनिरतः शीतलान्तविमुक्तताः ।
कामरागाद्धि[३] ये भीता देवानां देवसम्मताः[४] ।।५८।।

दैवतास्ते सदा वन्द्या ये धर्मे निरताः सदा ।
ये तु[५] नित्यं विषयरतास्ते सर्वे निधनं गताः ।।५९।।

धर्मसेतुमिमं प्राप्य पारावारगतं महत् ।
न सन्तरति यस्तूर्णं भवादेव प्रमुच्यते ।।६०।।

<u>शुभं नैव प्रणश्यति-</u>

शुभानुचारिणश्चैव शुभं[६] भवति[७] सर्वदा ।
कल्पकोटिसहस्रेण शुभं नैव[८] प्रणश्यति[९] ।।६१।।

१- जीवितार्थेन - क०,ख०   २- संभवान्नातिवर्तते- क०,ख०
३- कामैरागस्य - क०,ख०   ४- देवसम्मतामुगता- क०,
५- तस्मा - क०,ख०   ६- शिशुभं - क०
७- शुभवति - ख०   ८-९- न परिणश्यति - क०,ख०

६६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संगृहीतं सदा शीलं ज्ञानं च परिवर्तितम् ।
दानं चाभिदाया दत्तं भवति स्वरसात्मकम्[1]।।६२।।

<u>दोषान् परित्यज्य गुणाः सेव्याः -</u>

दोषास्त्रयः प्रणश्यन्ति त्रिभिर्दानादिभिर्नृणाम् ।
तस्मात् दोषान् परित्यज्यं गुणाः सेव्याः प्रयत्नतः।।६३।।

<u>ज्ञानेन लौकिकं दुःखं नश्यति-</u>

संसर्गो धर्मशीलानां ज्ञानारम्भः प्रयत्नतः ।
नश्यति भवजं दुःखमर्कादैर्यथा तमः।। ६४।।

अभ्युपेयो देवरतो देव[2]तामिरच वन्द्यते[2] ।
(ने०१११७) प्राप्य जन्मान्तरं चापि निर्वृतिं चाशु गच्छति।।६५।।

।।इति पुण्यवर्ग एकत्रिंशः।।

---:0:---

---

१ - सरसात्मकं - ना०,सं०
२ -२ ०तैश्चाभिवन्द्यते - ना०,सं०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३२) देववर्गो द्वात्रिंशः

सम्यग्मार्गे चरन्तः पुरुषा देवतुल्याः -

पन्थानो मुनिना शास्त्रे उक्ता ये तत्त्वदर्शिना ।
तेषु सम्प्रस्थितास्ते हि पुरुषा देवसम्मताः ॥१॥

सुगतोक्तो मार्गः -

सत्यं हि दानं च तथैव मैत्री,
सत्त्वेषु रक्षा प्रियवादिता च ।
सम्यक्त्वदृष्टिर्विमलं मनश्च,
पन्थानमाहुस्त्रिदिवस्य बुद्धाः ॥२॥

शुक्लधर्मं समायुक्तः शुक्लचित्तसमन्वितः ।
सुखात् सुखतरं याति ज्योतिर्ज्योतिपरायणः ॥३॥

ज्योतिर्ज्योतिषा पूर्णं[4] दीपो दीपान्तरात् यथा ।
तस्माद्धि परमाँल्लोकान् प्रयाता सम्प्रपद्यते ॥४॥

आचारवान् देवानामन्तिकं व्रजेत्-

यस्य नित्यं शुद्धं सदा चित्तं निर्मलं मणिवत् सदा ।
स शान्तो निर्ममो धीमान् देवानामन्तिकं व्रजेत् ॥५॥

ध्यानशीलसमाधिभ्यो यस्य चित्तं[7] शुभान्वितम्[7] ।
स धीमान् काञ्चनप्रख्यो देवानामन्तिकं व्रजेत् ॥६॥

१-१ पंथानो मुनिनाख्याताइत्युक्ता - ख०,ग० २- संप्रस्थितायाँति - ख०,ग०
३- ख०,ग० पुस्तकयोः नास्ति । ४- पूर्णानि - ख०,ग०
५- परलोकान् - ख०,ग० ६-६ प्रयाति प्रपद्यते - ख०,ग०
७-७ धी [illegible] - ख०,ग०

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राणातिपाताद् विरतः सर्वसत्त्वदयापरः ।
अनुकम्पक कलुषोतो[1] देवानामन्तिकं व्रजेत् ॥७॥

गुणवान् सर्वलोकस्य क्रूरकर्मविवर्जितः ।
अलिप्तः पापकर्मैर्देवानामन्तिकं व्रजेत्॥८॥

तृणवत् काञ्चनं यस्य रामा यस्य विषोपमाः।
(नं०११२३०) स कामवर्जितो धीमान् देवानामन्तिकं व्रजेत् ॥९॥

नाकृष्यते[3] मनः[2] कामैर्विषयैः[2] रागहेतुभिः।
समन्तभावकान्तारैर्देवानामन्तिकं व्रजेत् ॥१०॥

परम्परा विभिन्नादौ भिन्नवान् घनवान्धवाः।
यः करोति सुसं[4]लब्धं देवानामन्तिकं व्रजेत्॥११॥

यस्य बुद्धिस्थितं वेश्म[5] न बुद्धिः यत्र च रागिणौ[5] ।
स जितारिर्विशुद्धात्मा देवानामन्तिकं व्रजेत्॥१२॥

प्रशस्तकायकर्मान्तो यः पापविरतः शुचिः[6] ।
स धर्मविरतो ध्याये देवानामन्तिकं व्रजेत्॥१३॥

पापमित्रविनिर्मुक्तस्तृष्णाविष विवर्जितः ।
न बद्धः स्त्रीमयैः पाशैर्देवानामन्तिकं व्रजेत् ॥१४॥

१- शांतो - क०,ख० २-२ मनापायै यो विषायै-क०,ख०
३- स्पृक्मर्थं - ख० ४- सुलेष्टं - क०,ख०
५-५ वेशौ न बुद्धिश्चरागो ६- शुचि - क० ।
टि- - क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयत्नवादी[1] यो धर्मं दानशीलसमाधिमान् ।
नित्योद्युक्तो दृढमतिर्देवानामन्तिकं व्रजेत् ।।१५।।

सम्यग्[2]वन्तुना येन पाशाश्छिन्ना यथाऽसिना[3]।
स निष्पापः[4] स्ववशी देवानामन्तिकं व्रजेत् ।।१६।।

शुभकर्मविपाकेन देवलोके उद्भवः -

मनुष्यभूता ये सत्त्वाश्चरन्ति सुकृतावहाः[5] ।
तेन कर्मविपाकेन सुरलोके प्रसूयते ।।१७।।

मनुष्याणां[6] बलाद् देवा देवानां[6] बलिनो नराः।
अन्योन्यबलिनो ते ये सद्धर्मपथमास्थिताः।। १८।।

तिस्रोऽपायभूमयः -

(ने० ११२७०) देवानां सुगतिर्मर्त्याः मर्त्यानां सुगतिः सुराः ।
अपायभूमयस्तिस्रः शुभकर्मविवर्जिताः ।। १९।।

सर्वं सुखं धर्माधीनम्-

धर्माधीनं सुखं सर्वं धर्माधीना हि निर्वृतिः ।
धर्मः सुप्तेषु जागर्ति धर्मो हि परमागतिः।।२०।।

धर्मेण निर्जितोऽधर्मः सत्येनानृतिको जितः।
ज्ञानेन वर्जितो मोहो देवैस्तु असुरा जिताः।।२१।।

१- ०वादि - ४०,४० २- सनाथ० - ४०,४०
३- ०शिरा - ४०,४० ४- निष्पाप- ४०,४०
५- सुकृतसम्पदः - ४०,४०
६-६ मनुष्यानुबलादेवादेवान-४०,४०
७-७ ज्यो - ४०,४० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सोपानभूता ये तानि कर्माणि त्रिदिवस्य हि ।
योनिं[1] त्यक्त्वा[1] नरा यान्ति देवलोकं सुखोदयम् ।।२२।।

वाक्संयमेन बुधास्त्रिदिवं सुखं भुञ्जन्ति -

चतुर्विधो वाङ्नियमः कोऽपि त्रिदिवपद्वया[2] ।
सप्तसोपानमार्ग्यं गच्छन्ति त्रिदिवं बुधाः ।। २३।।

ते दीव्यमानाः प्रभया स्वशरीरेण[2] भास्वता[3] ।
रमन्ते स्वर्गभुवने रञ्जिताः स्वेन कर्मणा ।।२४।।

नित्यामोदविहारा[4] वै[4] नित्यं सुखविहारिणः ।
यद् देवा देवभुवने शीलं तत्र हि कारणम् ।।२५।।

यदप्सरापरिवृता स्युः सूर्याग्निसन्निभाः ।
देवाः रमन्ताद् देवेषु तत्सर्वं शुभहेतुकम् ।।२६।।

यदीप्सितं सम्भवति सम्भूतं च न हीयते ।
भवति[6] च[6] सुखं नित्यं तत् सर्वं शुभहेतुकम् ।।२७।।

शुभचारी देवानां समतां व्रजेत्-

(नै०११२३७०) शुभचारी सदा दान्तो[7] सर्वभूतदयारतः ।
दानमैत्र्या सदा युक्तो देवानां समतां व्रजेत् ।।२८।।

१-१	योन्यक्त्य	- ५०,६०	२-	त्रिदिवपद्वय	-५०,६०
३-३	स्वशरीरसमुद्भवा	- ५०,६०	४-४	ेमोदाविहारिणि	-५०,६०
५-	रमन्ते	- ५०,६०	६-६	विवर्तते च सुखे	- ६०
७-	दान्तः	- ५०,६० ।			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राणातिपाताद् विरतः सर्वसत्त्वदयापरः ।
सम्यगाजीवकर्मान्तो[1] देवानां संगतिं व्रजेत् ॥२९॥

अदत्ते न रतिः किञ्चिद्[2] दाने चास्य सदामतिः ।
शान्तेन्द्रियमतिर्धीमान् गच्छति देवसंगतिम् ॥३०॥

मिथ्याकामैर्विमुक्तो[3] यः स्वदाराभिरतः सदा ।
निर्वाणकाङ्क्षी विमलो देवानामन्तिकं व्रजेत् ॥३१॥

विमनस्कं हि यत् प्रोक्ते पुरुषो कुरुते लघु ।
मद्यवर्जी परं धीरो देवानामन्तिकं व्रजेत् ॥३२॥

सुखाः[4] प्राणा हि यो देवः प्रमादं नानुसेवते ।
सुखात् सुखमवाप्नोति निर्वृतिं चाधिगच्छति ॥३३॥

दयावसानं तत् सौख्यं निर्वाणमिति[5] शाश्वतम् ।
तत् प्राप्याभिध्यानेषु रमन्ते पुरुषोत्तमाः[6] ॥३४॥

उच्चादुच्चतरो मेरुस्तस्मादुच्चं सदा सुखम् ।
सुखेन नियतो[7] जन्तुरकनिष्ठान् सुरान्[8] व्रजेत् ॥३५॥

निरुद्ध्ये[9] कुतस्तृप्तिर्देवलोके विशेषतः ।
अतीव[10] सौख्यं लभते कस्माद्[10] देवेषु सर्वदा ॥३६॥

१- ०प्रयुक्तकर्मान्तो- क०
२-२ नारतिकिञ्चिदादत्ते- क०
३- काममिथ्याविमुक्तो- क०, ख०
नादत्त० - ख०
४- सुखा हि क०, ख०
५- निर्वाणमित्यादि - क०, ख०
६- पुरुषमा क०, ख०
७- नियतो - क०, ख०
८-८ सुरोत्तमान् क०, ख०
९- विरचयेषु - क०,
विषयेषु - ख०
१०-१० अतिविवर्तैः ... कस्मात् ... - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तृष्णाग्निपरिदग्धेन[१] न सौख्यमुपलभ्यते ।
सर्वं तु तदग्धेन न सौख्यमुपलभ्यते ।। ३७ ।।

(नं० ११२ क०) त्रिविधं सुकृतं कृत्वा त्रिप्रकारं त्रिहेतुकम् ।
एतद्वर्ग्यं[२] त्रिभूमिस्थं त्रिगुणं[३] च फलं[३] महत् ।।३८।।

अहिंसादानपरमा ये धर्मपरायणाः ।
सत्यक्षान्तिदमैर्युक्ताः त्रिदिवं[४] ते समागताः[४] ।।३९।।

दिव्याभरणसम्पन्ना दिव्यमाल्यविभूषिताः ।
यद् देवा दिव्यमतयः[५] कुर्वन्ति[६] सुखमेव तत् ।।४०।।

देवानां यन्महत्सौख्यं मैथुन्यादिसमास्थितम्[७] ।
न्यूनमध्यं तु यस्मैतत् फलं पुण्यस्य दृश्यते ।।४१।।

येन यावदपि[८] यत्[८] पुण्यं कृतं भवति देहिना ।
तस्य तावद्धि[९] तत् सौख्यं देवलोकेषु[९] पच्यते ।।४२।।

रमस्व सह दैवतैः -

स्वागतं[१०] तव भो भद्र[१०] ! सुकृतं कृतवानसि ।
सप्तधा रक्षितं शीलं तस्यैतत् फलमागतम् ।।४३।।

१-	०परिदग्धानां	- क०,ख०	२-	सर्वहि	- क०,ख०
३-३	त्रिफलं	- क०,ख०	४-४	सत्रिदिवमागता	- क०,ख०
५-	देवनैरमति	- क०,ख०	६-	क०,ख० पुस्तकयोः नास्ति।	
७-	न्यूनमस्थितम्	- क०,ख०	८-८	यावदग्रे	- क०,ख०
९-९	प्रसौख्यं तेव सौख्यु	- क०,ख०	१०-१०	स्वागन्तु तवमु भद्रौ ते	- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नानोपवनशैलेषु[1] पद्माकरवनेषु च ।
कन्यागृहेषु रमस्व त्वं[2] गन्धवनेषु सदेवतैः[2] ॥४४॥

नानोपवनशैलेषु[3] वैदूर्यशिखरेषु च ।
कनकाद्रिषु[4] च नैकेषु[4] रमस्व सह देवतैः ॥४५॥

कल्पवृक्षेषु रम्येषु नदीप्रस्रवणेषु च ।
सरस्सु च[5] विशालासु रमस्व सह दैवतैः ॥४६॥

हिमवद्विन्ध्यादिकूटेषु[6] पर्वतेषु नदीषु च ।
नगरेषु[7] महार्घेषु रमस्व सह दैवतैः ॥४७॥

महान्त्यग्रोहेषु[8] नीलोत्पलवनेषु च ।
(नं० ११४७०) पद्मह्रदेषु[9] रम्येषु रमस्व सह दैवतैः ॥४८॥

भूमिभागेषु रम्येषु रत्नाकरवनेषु च ।
विमानेषु च रम्येषु रमस्व सह दैवतैः ॥४९॥

पञ्चाङ्गिकेन तूर्येण मनःप्रह्लादकारिणा ।
नृत्यमानः शुभे नित्यं रमस्व सह दैवतैः ॥५०॥

शीलबीजं रोपयित्वा शीलेषु विविधेषु च ।
क्रीड[10] त्वं[10] विविधैर्दिव्यैर्धर्ममनुमोदयसे ॥५१॥

१-	०शीलेषु - क०, ख०	२-२	सह देवतैः - क०, ख०
३-	कांचनेषु वशैलेषु - क०, ख०	४-४	कनरवरोद्रेषु वा नेरवु - क०, ख०
५-	क०, ख० पुस्तकयोः नास्ति।	६-	सप्तरत्नोपन्वितेषु - क०, ख०
७-	प्रस्थेषु - क०,	८-	महावृक्षषण्डेषु - क०, ख०
९-	सकुमीति - क०, ख०	१०-१०	क्रीडन्ते - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्क्रमामालिनो देवा रमन्ते विविधैः सुखैः ।
तच्छुभस्य फलं दृष्टं निर्मलस्य विशेषतः ॥५२॥

यदेतैर्विविधैः सार्धं देवाः क्रीडन्त्यनेकधा ।
न वयं लेखकास्तत्र[1] तत्र[1] हेतुः पुराकृतम् ॥५३॥

कूटागाराणि सर्वाणि धर्मचित्राणि[3] सर्वदा ।
पुनश्च[2] देवो देवेषु सत्कृतेनोपबृंहितः ॥५४॥

नाशत्रयविमुक्तस्य धर्माचिः पालितस्य वै ।
स्वधर्मव्यवस्थितस्य देवलोके महीयते ॥५५॥

अवहितचेतसां पुंसां स्पष्टचेष्टा समाहिता ।
आगता देवसदनं स्वधर्मफलहारिणी[4] ॥५६॥

शुभेन कर्मणा प्राणी नित्यं देवेषु जायते -

उपर्युपरि संस्थानं तथा[5] च[5] सुकृतस्य[6] वै ।
भुञ्जन्ति विबुधाः स्वर्गं यदि पुण्यकृतानुगम् ॥५७॥

शाद्वलभूता इमे सर्वकर्मणां विविधा द्रुमाः ।
(ने० ११४ क०) निरन्तरं सुसदृशं कथयन्ति मनीषिणः ॥५८॥

येन येन विपाकेन यत्र[7] यत्रोपपद्यते[7] ।
पुरुषो लभते स्वस्य प्रारब्धस्य शुभाशुभम् ॥५९॥

१-१ क०, ख० पुस्तकयोः नास्ति। २- पुनर्भवति - क०, ख०
३- ०विहितः - क०, ख० ४- ०हारिणा- क०, ख०
५-५ क०, ख० पुस्तकयोः नास्ति। ६- हित् - क०, ख०
७-७ तच्छुभस्योदि - क०, ख०।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शुभेन कर्मणा जन्तुर्नित्यं देवेषु जायते ।
तथाऽशुभेन नरके पतन्ति पुरुषाधमाः ।।६०।।

कामिनो मरणं नावगच्छन्ति-

शुभाशुभाभ्यां संयुताः कामिनः काममोहिताः ।
नावगच्छन्ति मरणं यदवश्यं भविष्यति[1] ।।६१।।

शुभाशुभविपाकोऽयं यो कृतोऽनुभूयते ।
न सौख्याद् विरमन्ते च मनः सौख्येन मोहिताः ।।६२।।

त्रिविधं सुकृतं कृत्वा यान्ति देवेषु मानवाः -

त्रिविधं सुकृतं कृत्वा भावयित्वा च सप्तधा ।
त्र्यस्त्र्याकारान्[2] रिपून्[2] हत्वा यान्ति देवेषु मानवाः ।।६३।।

नासूयति[3] क्रियाक्लेशान् न च नन्दीमसूयति[3] ।
स सन्दुष्यसूयकः[4] शुद्धो देवानामन्तिकं गतः ।।६४।।

विनिन्द्य मात्सर्यमिदं दुःखस्यायतनं महत् ।
दमं[5] च[5] त्रिविधं दत्त्वा देवानामन्तिकं गतः ।।६५।।

प्राणिनां प्रणयं नित्यं दर्शयित्वाऽनुकम्पया ।
मैत्रविद्धः सदा दान्तो देवानामन्तिकं गतः ।।६६।।

१- भविष्यतिष्यति - क०
२-२ त्र्यस्त्रान्निपवो - क०,ग०
३-३ निसूयतिक्रियक्लेशाः
न च नन्दीनिसूज्यते- क०,ग०
४- नन्दीसू० - क०,ग०
५-५ दानञ्च - ग०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अदत्तं[१] च धनं दत्त्वा दत्त्वा ऽऽनन्दं[१] च सर्वतः ।
चेतना भावितमतिर्देवानामन्तिकं व्रजेत् ॥६७॥

मातृवत् परदारांश्च दृष्ट्वा तत्त्वार्थचिन्तकः ।
अलिप्तो पापकर्मैर्देवानामन्तिकं व्रजेत् ॥६८॥

(ने०११५७०) धूर्तैः[२] स्वार्थसंप्राप्त्यर्थम्[२] जिह्वाराणिसमुद्भवः ।
कथ्यते स मृषावादस्तं हित्वा सुगतिं व्रजेत् ॥६९॥

पैशुन्यं च सदा हित्वा मैत्र्यानर्थकरं परम् ।
स्वरूपाप्तः[३] स्वरूपारतिः[३] देवानामन्तिकं व्रजेत् ॥७०॥

पारुष्यं सत्रुबंधारी वर्जयत्येव सर्वदा ।
स्वरूपप्राप्यते नित्यं सर्वेषु गतिगामिकः ॥७१॥

अधर्मं[४] कस्य जिह्वाग्रे न भूतो[५] न भविष्यति ।
सदा दुष्कालतत्त्वज्ञो देवानामन्तिकं व्रजेत् ॥७२॥

येनेदं रक्षितं शीलं सम्यक् बुद्धदेशितम् ।
स धीरः शीलतत्त्वज्ञो देवानामन्तिकं व्रजेत् ॥७३॥

विविधकर्मवशगं जन्मेदं लभते सुधीः ।
तत्प्राप्य यो न धर्मज्ञः स पश्चात् परितप्यते ॥७४॥

१-१ अदत्तमग्निधनं गत्वादानंद स्वर - ४०,८०
२-२ योऽग्निस्वविहर्यौ - ४०,८०
३-३ स्वरूपप्राप्तस्वरूपारतिः ४०,८०
४- अधर्मं - ४०,८०
५- भूर्तं - ४०,८०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत् सर्वं शुभदं फलम् -

वनोपवनरम्योऽयं तत्रावेदिमण्डपः ।
यदि विक्रयो[१] लोकस्तत् सर्वं शुभदं फलम्॥७५॥

येन येन यथा कर्म कृतं भवति शोभनम् ।
तस्य तस्य तथा दृष्टं फलं तदनुगामिनम्॥७६॥

प्रत्यक्षं[२] दृश्यते देवैर्दानिभव्योपमं सुखम् ।
येन येन यथा चीर्णं तस्य तस्य तथा फलम्॥७७॥

विचित्रवेषाः[३] संमूढा देवा मोहवशानुगाः ।
तन्नाशात्[४] मनसा मूढा न पश्यन्ति महद्भयम्॥७८॥

विचित्रकामरतयो विचित्रफलकांक्षिणः ।
(नै०२२५ क०) न वा कुर्वन्ति कर्माणि तेऽसुरा मूढचेतसः॥७९॥

फलं येषां प्रियं चित्तं न च शीले रता मतिः।
ते प्रदोषं परित्यज्य प्रेमालोकपरायणाः ॥८०॥

हेतुफलतत्त्वज्ञाः सुखिनो भवन्ति -

ये हेतुफलादृश्येच्छन्ति[५] सुखकामान्[६] ।
ते हेतुफलतत्त्वज्ञा भवन्ति सुखभागिनः॥८१॥

१-	०मयं	- क०,ख०	२-	प्रत्यक्षं	- क०,ख०
३-	विचित्रवेषावेषा	- क०,ख०	४-	तन्नाशात:	- क०,ख०
५-	०लादृश्येहंति	- क०,ख०	६-	०कामाः	- क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विना बीजं फलं नास्ति विना दीपं कुतः प्रभा ।
विना शौचैः कुतः स्वर्गो[1] मुक्तिर्ज्ञानं विना कुतः ।।८२।।

तत्सुखं यद्विमुक्तस्य गतकांक्षस्य तापिनः ।
विमुक्तकामतृष्णस्य निर्ममस्य च धीमतः ।।८३।।

यदिदं धर्मजं लोके[2] सर्वं तज्जीवकल्पनम्[2] ।
यं नेष्टकं[3] भवत्येव तत् सर्वमपरं स्मृतम् ।।८४।।

यो[4] मनोरथकृत्[5]स्तस्य बहिरन्तश्च सर्वतः[5]।
सर्वो लोकः सदालोको देवतागणसेवितः ।।८५।।

विराजते गिरिवरो रत्नमाणिक्य[6]सन्निभः[6]।
प्रभूतसलिलो[7] यस्य पद्मनीभिः[7] समावृतः ।।८६।।

वनोपवनरम्योऽयं मृगपक्षिनिषेवितः[8] ।
कन्दरोदरसंरम्भो भित्त्वा गगनमुत्थितः[9] ।।८७।।

सेव्यते[10] देवतैर्नित्यं[10] दिव्यमाल्यविभूषणैः ।
नृत्यगीतप्रकृष्टाभिर्देवताभिश्च सर्वतः ।।८८।।

१-	स्वर्ग्गः	- ४०,३०	२-२	धर्मितत्सर्वं कल्पनं	- ४०,३०
३-	निष्टकं	- ४०,३०	४-	य	- ४०,३०
५-५	कृतस्यवाहरेकश्चौभ्रमः	- ४०,३०	६-६	रत्नवाणिसंनिभः	- ४०,३०
७-७	प्रभूतशालिलातिरथ	- ४०,३०	८-	०पक्षिनिषेवितः	- ४०,३०
९-	गगणसमुत्थितः	- ४०,३०	१०-१०	सेव्यन्दे वतै नित्यं	- ४०,३०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पञ्चाङ्गिकवेन तूर्येण प्रेरिते[1] इव तद्यते ।
(नै०१९६ क०) शिरो मूलो[2] महारम्भः क्रमायातो समन्ततः ॥८९॥

हुतेन[3] हुमेनाथ[3] स्वर्णाग्नि[4]गुणेन वै ।
यं समाश्रित्य क्रीडन्ति देववृन्दाः समन्ततः ॥९०॥

दानशीलादिगुणाढ्याः स्वर्गं प्राप्नुवन्ति -

दानशीलयुक्ता[5] बुधा नित्यं प्रहृष्टमानसाः ।
ये भवन्ति सदा दान्तास्ते[6] नराः स्वर्गगामिनः ॥९१॥

शीलाप्यायनः शान्तास्ते नराः स्वर्गगामिनः ।
वीरणं विषयो[7] नित्यं प्रशान्तमनसस्तु[8] ये[8] ॥९२॥

वीतरागा[9] वीतमोहास्तेनराः[9] स्वर्गगामिनः ।
भवाभवेन[10] तीव्रेण[10] बाध्यते यस्य शासनम् ।
सुदान्तमानसो[11] वै धीरास्ते नराः स्वर्गगामिनः ॥९३॥

सत्यमार्गावलम्बेन[12] व्रताव[12] सुखगामिनः ।
सदाचाराविभिन्नाश्च ते नराः स्वर्गगामिनः ॥९४॥

१- प्रेतित - क०,ख०   २- शिरोयं - क०,ख०
३-३ हुतसोमनेनाथं - क०,ख०   ४- क्रीदन्ते - क०,ख०
५- दानशीलयो - क०,ख०   ६- दान्तास्ते - क०,ख०
७- नित्यं मिह चिता गतव्यथाः -ख० पुस्तके नास्ति।   ८-८ ०मनसस्तेनराः - क०,ख०
९-९ क०,ख० पुस्तकयोः नास्ति ।
१०-१० भवाभवैर्मता क्रेन बाध्यति - क०,ख०   ११- ०तमनसाधी० - क०,ख०
१२-१२ सत्यमार्गवद्‌ब्रताभिः -क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संसारे ये न रमन्ति[1] स्वप्नो ननु देहिनः[1] ।
निर्वाणाभिरता नित्यं ते जनाः स्वर्गगामिनः ॥९५॥

वृक्षमूले[2] श्मशाने वा तथा च गिरिकन्दरे ।
ध्यायिनः सत्त्वमनसस्ते जनाः स्वर्गगामिनः ॥९६॥

मात्रज्ञा देशकालज्ञाः पापमित्रविवर्जिताः[3] ।
मैत्रेण[4] चेतसा ये तु जनाः स्वर्गगामिनः ॥९७॥

न स्नानदर्शनरता[5] नराः ब्रह्मचारिणः ।
स्वान्तगामिनः शान्तास्ते जनाः स्वर्गगामिनः ॥९८॥

क्षणे क्षणे सदा कार्यं पश्यन्त्यनुविलम्बवम्[6] ।
कार्ये कार्यविधिज्ञा ये ते जनाः स्वर्गगामिनः ॥९९॥

(ने० ११६ख) धर्माणां धर्मतां[7] ये च पश्यन्ति विविधा सदा[7] ।
न च रमन्ति संसारे ते जनाः स्वर्गगामिनः ॥१००॥

वेदनासु मध्यतत्त्वमनेकविधसम्भवम्[8] ।
पश्यन्ति च न रमन्ति ते जनाः स्वर्गगामिनः ॥१०१॥

१-१ रमते स्वप्न: देहिन: -ग०,ख०   २- वृक्षमूले - ग०,ख०
३- ०मित्रवर्जिता: -ग०,ख०   ४- मैत्र्य - ग०,ख०
५- शमदर्श० -ग०,ख०   ६-६ पश्यन्त्य० - ग०,ख०
७-७ धर्मतं यं पश्यति विविधंसदा -ग०,ख०   ८- मध्यतत्त्वमनेकविधा-ग०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मायोपमं च दारिणकं गन्धर्वनगरोपमम् ।
ये[1] जानन्ति[1] स्वार्विद्या[2]: ते जनाः स्वर्गगामिनः ॥१०२॥

स्पृहाणातत्त्वज्ञा विलक्षणाविदःस्वयम् ।
निर्वाणारामनस्ते जनाः स्वर्गगामिनः ॥१०३॥

मातृवत् परदारं ये स्तूवत् सर्वदोऽनः।
पश्यन्ति ये भयं लोके ते जनाः स्वर्गगामिनः ॥१०४॥

शून्यवर्गितो नित्यं सत्त्वानां प्रियवादिनः ।
अक्रूरा कठिमनस्ते जनाः स्वर्गगामिनः ॥१०५॥

काष्ठवल्लोष्ठवत् सर्वं परवित्तमुदासकाः।
संतुष्टाः स्वेन वित्तेन ते जनाः स्वर्गगामिनः ॥१०६॥

न रात्रौ न दिवा येषां कोशोपद्युति वर्तते ।
नित्योद्युक्तविशारा ये ते जनाः स्वर्गगामिनः ॥१०७॥

कौटिल्यं[3] स्त्यानमिद्धं[3] च कौशार्यं च विशेषतः।
वर्जयन्ति सदा धन्यास्ते[4] जनाः स्वर्ग गामिनः ॥१०८॥

दौःशील्यं मन्वरन्त्रेभ्यः पारुष्यमनेकधा ।
संदीपयन्ति सदा दुःखं ते जनाः स्वर्ग गामिनः ॥१०९॥

१-१ श्रावति - ८०, २- विद्यं - ८०,८०
ये वान्त हि - ८० ३-३ शौक्ष्यान्यानमिद्धं - ८०,८०
४- धन्यास्ते - ८०,८० -

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपादानचतुष्कवशा: सत्यानि च तथैव च ।
(ने० ११७८०) ये पश्यन्ति बुधा: प्राज्ञा वै ते जना: स्वर्गगामिन:।।११०।।

दु:खं दु:खविपाकञ्च दु:खेषु[1] च मनश्च य:[1]।
पश्यन्ति ये सदा तत्त्वं ते जना: स्वर्गगामिन:।।१११।।

सा कुच्छ्रमापन्ना ये[2] च धर्मा विमुक्ता: ।
शान्ताश्च धर्ममतयस्ते जना स्वर्गगामिन:।।११२।।

शुक्लावदातं ये वस्त्रं पांसुकूलं[3] तथैव च ।
पिण्डपातरता नित्यं ते जना: स्वर्गगामिन:।।११३।।

अदण्डा: शान्तमनसो[4] नित्यं ध्यानविहारिण: ।
नैष्कर्म्यनिरता: सर्वे ते जना: स्वर्गगामिन:।।११४।।

मृष्टं च यदि वाऽमृष्टं[5] यथेच्छाविधिमागतम् ।
सन्तुष्यन्ति न कुप्यन्ति ते जना: स्वर्गगामिन:।।११५।।

शुभ्रावदातं ये वस्त्रं पांसुकूलं[6] तथैव च ।
संवृता[6] चैव संतुष्टास्ते जना: स्वर्गगामिन:।।११६।।

मधुयातले यथा[7] भूमौ कुर्यात्[7] वा तथाऽपरे ।
न दुष्यन्ति न तुष्यन्ति ते जना: स्वर्गगामिन:।।११७।।

१-१- दु:खोदुमनकवसेत्, - क०, ख० २- यो - क०, ख०
३- पांसुकूलं - क०, ख० ४- समममनसो - क०, ख०
५- कुप्यंति - क०, ख० ६-६ संवृतचित्तासु संतुष्टा-स्वेजना: - क०, ख०
७-७ क०, ख० पुस्तकयो: नास्ति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चतुर्विंशकमापन्नं सत्वं साम्यपरात्मकम् ।
तत्त्वतो ये प्रपश्यन्ति ते जनाः स्वर्गगामिनः ॥११८॥

अप्रियं वा प्रियं वापि ये श्रुत्वा तीव्रसम्भ्रमात्[1] ।
अक्षुब्धमतयो मुक्तास्ते जनाः स्वर्गगामिनः ॥११९॥

पञ्चेन्द्रियाणि सर्वाणि[2] विषयांस्तु[2] तथैव च ।
संदीपयन्ति न रमन्ति[3] ते जनाः स्वर्गगामिनः ॥१२०॥

यथा धर्मं कृतं सर्वं विशेषेण तत्त्वतः ।
(नै० १२७ क०) पश्यन्ति विमनसो[4] धन्यास्ते जनाः स्वर्गगामिनः ॥१२१॥

कर्मणां[6] च विपाकं च कृतं यैः धीरचेतसा[5] ।
बिभ्यति च सदा दुःखे ते जनाः स्वर्गगामिनः ॥१२२॥

सर्वेशानि महार्थानि नित्यं दुःखकराणि च ।
कुर्वन्ति विधिवत् सर्वं ते जनाः स्वर्गगामिनः ॥१२३॥

॥इति देववर्गो द्वात्रिंशः॥

---:०:---

१- खाण्डिकेऽयं क० पुस्तके निरावृतः

२- विषयाणि - क०,ख०

३- रमते - क०,ख०

४- विमना - क०,ख०

५-५ क०,ख० पुस्तकयोः नास्ति।

६- बिभेति - क०,ख०

७- मार्गगामिनः - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३३) सुखवर्गो त्रयस्त्रिंशः

निर्वाणगामिनां सुखम् -

अनुत्तरेषु सौख्येषु[१] ध्यानोपायेषु ये रताः ।
तेषां सुखं यथावत् स्यात् निर्वाणगामिनाम्[२]॥१॥

नवेन सुखदुःखेन पुराणमभिछन्द्यते ।
देवस्थैतन्नवेनैव पुराणमपि च छन्द्यते॥२॥

धूममिश्रं[३] यथा काष्ठं निष्कामिश्रं[४] यथौदनम्।
तथा सुखमिदं सर्वमस्वत्वं नावगम्यते ॥३॥

तत् सुखं यद्[५] वितृष्णानामेकान्त सुखचारिणाम् ।
निर्मोहिणामरागाणां निर्वाणगामिनाम्॥४॥

तेषां विप्रलभादुक्तं सौख्यानामपि[६] तत्[६] सुखम् ।
येषां तृष्णानुगा बाधा सर्वा नैवास्ति चेतसि॥५॥

संगृहीतस्य चित्तस्य निरात्मस्य च सर्वतः ।
कार्याकार्येषु मूढस्य सुखं नित्यमुपस्थितम्॥६॥

सा वह्निर्हता येन नन्दी संसारहेतुकी ।
स धीरः पारगः श्रेष्ठः सुखी निर्वाणमाश्रितः॥७॥

१- सौख्येषु - क०,
   सौख्येषु - ख०
२- ०पुरदर्शी: - क०,ख०
३- धर्मिश्र - क०,ख०
४- विमिश्रं - क०,ख०
५- निम्नावागमरा०- क०,ख०
६-६ ०मात्रास्वर्धानैव - ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नैतत् सुखेन तृष्णानां यद्[1] रागद्वेषसंकुलम्[1] ।
(नं० १८-७०) यत्र रागादिनिर्मुक्तं तत् सुखं निर्मलं मतम्।।८।।

देवलोके [2]सम: सायुज्यं[2] सुरो न विमन्यते ।
स सुखात् सुखतां याति यत्र तृष्णा न विद्यते[3]।।९।।

तदत्यन्तसुखं श्रेयो यत्र मृत्युर्न विद्यते ।
[4]यत् सुखं कामजनकं न तत् सौख्यं सतां मतम्।।१०।।

यत्र कामादिनिर्मुक्तस्तत् सुखात् सुखमुत्तमम्[5] ।
यत् सुखं जनयति श्रेय: पयोमिश्रं यथौदनम्।।११।।

यत्र तृष्णाविनिर्मुक्त: पयोमिश्रं यथौदनम् ।
यथा पद्मवने[6] गृद्धा यान्ति वै कृष्णपक्षिण:।।१२।।

सर्वं शान्तेष्वरण्येषु[7] न भान्त्यसुभवारिण: ।
क्वचिच्छान्तं वनं रम्यं क्वचिद् देवा:प्रभादिन:।।१३।।

विपरीतं न तद्दृष्टं[8] भानो: शीता यथा प्रभा ।
गततृष्णास्य यत् सौख्यं मुक्तदु:खस्य तादृश:।।१४।।

तस्यान्तरेण सौख्यस्य सुखमेतन्न प्राप्यते[9] ।
[10]व्याधिमस्त्वप्रमत्तस्य मुक्तपापस्य सर्वदा।।१५।।

१-१ यत्रागद्वेष० - क०,ख०   २-२ समासाद्य: - क०,ख०

३- बाधते - क०,ख०   ४- यत्र मृत्युपाशो न बद्धस्य न सुखं विद्यते क्वचित्` इत्यधिक: पाठ: ख० पुस्तके ।

५-५ वानां किं यथोदनं - क०,ख०

६- क०,ख० पुस्तकयो: नास्ति।

७- शान्तेस्वरण्येषु - क०,ख०   ८- सदृष्टं - क०, सदृशं - ख०

९- गच्छते - क०,ख०

१०- [redacted] व्याधिमाद्युप्रम० - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत् सुखं तत् परं सौख्यं नेदं तृष्णाविनर्हितम्[1] ।
मुनिसेव्यं वनमिदं सेवितं च सुभाषितैः ॥१६॥

नार्हा[2] यूयं रागगणान्[2] सेवितुं भोः सुरोत्तमाः ।
यदेतद् भवतां सौख्यमेतन्न[3] खलु शाश्वतम् ॥१७॥

तत् सुखं परमं शान्तं वीततृष्णा[4]र्हि सेव्यते[4] ।
निःसेवितं वनमिदं ये गताः परमं पदम् ॥१८॥

(ने० १९८ क०) यत् प्राप्य सर्वदुःखच्छेदो भवति[6] सर्वथा ।
ब्रह्मचर्या[5]दिनिर्मुष्टाः शीतलाभेन वञ्चिताः ॥१९॥

<u>भिक्षूणां वने वास एव सुखावहः -</u>

नार्हन्ति सेवितुं रम्यं वनं शान्तं सुभाषितम् ।
शान्तं च भावितं[7] चैव[7] रमते वनगोचरे[8] ॥२०॥

न रागचारिणां चित्तं रमते वनगोचरे ।
न रागव्याकुलं चित्तं वनेषु लभते धृतिम्[9] ॥२१॥

अध्यात्मरता मतिर्यस्य नित्यं त्रिभुवनं करे ।
स[10] परां[10] लभते शान्तिं वने पुरुषसत्तमः ॥२२॥

१-	०विंदावितं	- क०, ख०	२-२	नार्हन्विरागमणात्	- क०, ख०
३-	सौख्यमेतन्न	- क०, ख०	४-४	वतृष्णोनिसेव्यते	- क०, ख०
५-	ब्रह्मचाराविं०	- क०, ख०	६-	शीतलस्पर्शवत	- क०, ख०
७-७	भावितञ्च	- क०, ख०	८-	सुभगोचरे	- क०, ख०
९-	धृतौ :	- क०	१०-१०	परति	- क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सङ्कल्परागकुटिलो नित्यं रागादिभिर्वृतः ।
स शान्तिं नैव लभते[1] वने शान्ते सुखावहे ॥२३॥

येषां[2] तु मनसा[2] नित्यं वने ध्याननियोगिनाम्[3] ।
वनं तेषां सदाराध्यं न तु रागनिवेषिणाम् ॥२४॥

वनेषु भावितं चित्तं नगरेषु न[4] रुध्यते ।
तस्माद् वनं सदा सेव्यं नगरं नैव शस्यते॥२५॥

विक्षिप्यते हि नगरे नृणां रागादिभिर्वृतिः ।
विक्षिप्तं मोहकुटिलं वनं भूयः प्रसीदति[5]॥२६॥

तस्माद् वनं परं शान्तं योगिनामालयं महत् ।
संसेव्यं वीतमनसा[6] अस्ति[6] तद् वीतकल्मषम् ॥२७॥

प्रशान्तेन्द्रियविक्षय या रतिर्योगिनो हृदि।
नास्ति शक्तिः सहस्रस्य नगराणां[7] भविष्यति॥२८॥

सा[8] ध्यायिनो रतिर्दृष्टा व्यवदानाय सर्वदा ।
अनया[9] सेवया[9] दृष्टा नित्यं रागानुरागिणी॥२९॥

१-	नभवते	- क०	२-२	येषांतुमनसा	- क०
३-	०योगिनः	- क०,ख०	४-	ण	- क०
५-	प्रशादति	- क०	६-६	यस्यवशीतको लिखर्ण	- क०,ख०
७-	क०,ख० पुस्तकयोः नास्ति ।		८-	यो	- क०,ख०
९-९	नयामेषयिता	- क०,ख० ।			

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(नै० ११६ अ०) स्त्रियो कामवशा या तु नित्यं दुःखसम्भवा ।
या तु स्नेहवशात् प्रीतिः सा[१] प्रीतिः[१] शाश्वता न हि ॥३०॥

श्रेयो धनेषु चरितं तद्दुःखान्तं नृभिः ।
कर्मात् तत् प्रतिबद्धं हि श्रेयसां पदमुच्यते ॥३१॥

सुसम्भृतेन धर्मेण रक्षितेनैव[२] चेतसा ।
सुदुष्टं लभते स्थानं यत्र दोषो न विद्यते ॥३२॥

ये क्षिप्तमनसा नित्यं न च धर्मपरायणाः ।
तेषां वृथा सुखमिदं गच्छति न निवर्तते ॥३३॥

तत्त्वविदां धीराणां न दुःखम् -

ये तु तत्त्वविदो धीराः पश्यन्ति जगतः स्थितिम् ।
अनित्यदुःखशून्यानि तेषां दुःखं न विद्यते ॥ ३४॥

सुखधर्मस्य चरणं ज्ञानस्य च निषेवणम्[३] ।
अहिंसा सत्यवचनं तदध्येऽन्तः स्थितम् ॥३५॥

स्वधर्म[४]व्यतीता ये येऽधर्मपारिवर्जकाः[४] ।
त्रिस्थानलक्षणाविष्टास्ते नराः स्वर्गगामिनः ॥३६॥

उदयव्ययधर्मा[५]णामनित्यं कर्मजं हि तत् ।
तत्[६] सुखं शाश्वतं[६] नित्यं न भूतं न भविष्यति ॥३७॥

१-१ क०,ख० कुतस्त्यो: नास्ति। २- रक्षितेनैव - क०,ख०
३- विषेवणा - क०,ख० ४-४ व्यतितार्याधर्म० क०,ख०
५- यत्ताचव्यय - क०,ख० ६-६ शाश्वतं च शाश्वतं - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत् सुखं वीततृष्णस्य नीरागस्य[1] हि देहिनः।
विमुक्तपर्वति दोषस्य पारस्थस्य हि तादृशः॥३८॥

न तत् किञ्चित् तत्पूर्वं सौख्यं तत् सर्वं कारणं मतम् ।
रागबन्धादिनिर्मुक्तं[2] तत् सर्वं निश्चलं सुखम् ॥३९॥

(नै० १९९क०) ये न विद्यन्ति[3] दुःखेन सुखे येषां न सङ्गतिः ।
ते दुःखसुखनिर्मुक्ता निर्वाणसुखगामिनः ॥४०॥

अनुपाये ये मूढाः प्रार्थयन्ति सुखं सदा ।
वालुकाभिश्च[4] तैलं यत्लभ्यं नित्यमेव तत्॥४१॥

न वेत्ता नरः प्राज्ञो मनोरथ शतैरपि ।
शक्तोऽपि तत् सुखं कर्तुं यथा कर्म कृतं महत्॥४२॥

ससुखं यस्य तु मनः सम्मानुचरो भवेत् ।
दुःखैर्मुक्तस्यभिलाषोऽपि[5] सधर्मं कुरुते मतिम्॥४३॥

नाहेतुकं सुखं दृष्टं दुःखं वा त्रिविधात्मकम्।
सुखदुःखे पृथग्भावे तस्मान्नु सुकृतं चरेत् ॥४४॥

नेदं सौख्यं सदा सत्त्वमध्रुवं विप्रतोऽपि च ।
तृष्णाविषेण सम्मिश्रं विषमिश्रं यथौदनम्॥४५॥

तत् सौख्यं सतां स्वस्थं यत्र मृत्युर्न[6] विद्यते ।
न च प्रियेण विश्लेषो नाप्रियेण[6] समागमः॥४६॥

१-	निरागस्यहि	-	क०,ख०	२-	विनिर्मुक्तं	-	क०,ख०
३-	वियति	-	क०	४-	घातुकाभि०	-	क०,ख०
५-	०भिलाषोर्थं	-	क०,ख०	६-६	नता०निसंभवः	-	क० ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्त्रीमयं सौख्यं दुःखाय कल्पते -

यदेतत् स्त्रीमयं सौख्यमेतद् दुःखाय कल्पते ।
तन्निबन्धना दृष्टा नरकेषूपपत्तये ।।४७।।

यत् सुखं दुःखजनकं कथं तत् सुखमिष्यते ।
दुःखाद् दुःखतरं ज्ञेयं परिणामवशेन तत् ।।४८।।

यदेतद् भुज्यते सौख्यमेतत् कालेन नश्यति ।
सूर्यस्यास्तङ्गतस्येव रश्मयः सह वारिणः ।।४९।।

विकृतिं कस्य च[१] मनः सुखदुःखैर्न गच्छति ।
स धीमान् सुरलोके[२] च गत्वान्यल्लभते[२] सुखम् ।।५०।।

(नै० ११०७७) भुक्तं सुखं[३] पुराणं तु क्षीणकर्म[३] करोति च ।
पुराणं सुकृतं क्षीणं[४] मृत्युकाले न बुध्यते ।।५१।।

यदिदं दृश्यते सौख्यं मनोवाक्[५]कायमयं भृशम्[५] ।
अनित्यं[६] तद् विनाशत्वमचिरेण[६] भविष्यति ।।५२।।

फेन बुद्बुदसंकाशं मरीच्युदकसन्निभम्[८] ।
कन्दलीमिव[७] सुखं सर्वं विनिपातो भवार्णवे ।।५३।।

१- क०,ख० पुस्तकयोः नास्ति।
२-२ लोकात्स्यादन्यत्राप्यते - क०,ख०
३-३ कृतपुराणानि न कानि - क०,ख०
४- क्षीणे - क०,ख०
५-५ मनोभास्यन्द्रैमान् - क०,ख०
६-६ अनित्यताविविधत्व- भविरेण - क०,ख०
७- विप्रलीपि - क०,ख०
८- तरामतं - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निष्क्राकारनिष्काम: सर्वभूतमया[1]वह: ।
चक्रवा[2]तप्रवेगो वै [2]मृत्युराविश धावति।।५४।।

नाशयित्वा सुखं सर्वं नाशयित्वा च जीवितम्।
कर्मसं[3]कल्पबाहुल्येषु लोकमन्यत्र नेष्यति।।५५ ।।

यदतीव सुखं नृणां तद्धि सौख्याय कल्प्यते ।
यन्नैष्यति सुखं किञ्चित् तद्धि नैव विगण्यते।।५६।।

वर्तमानं तु यत्[4] सौख्यं तृष्णाविषविवर्जितम् ।
तत् सर्वमनात्मजं दुःखमनित्यं संवृतं खलु।।५७।।

लौकिकं सुखं न सुखम् -

यद् सुखं त्रिषु लोकेषु न श्रुतं तत्त्वदर्शिभिः।
तेन मत्वा कथं देवा भवन्ति विगतज्वराः।।५८।।

[5]अहो महान् [6]कालो जन्तुं[5] धावति सत्वरम् ।
यो च मोदयते सुरान् सर्वान् शुष्केन्धनमिवानलः।।५९।।

अतयाति सुखं सर्वं क्रियतां[7] न समन्ततः।
मा पश्चात् स वा योगे मृत्युकालो भविष्यति।।६०।।

१-	०भूतमय	- क०,ख०	२-२	मुनिवर्तितवेगार्थं	- क०,ख०
३-	०संकल्पावश	- क०,ख०	४-	विनियामण्णमि०	- क०,ख०
५-५	अविरामहतकालोऽयमेव	- क०,ख०	७-	कुर्यति	- क०
८-	भैय	- क०			
	भैयसमन:	- ख०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्षणिकं सुखं दुःखमेव -

जन्मान्तरसहस्रेषु यद् मुक्तं कर्मजं सुखम् ।
तरंग[1]तन्निभं तद्धि जानीयाद् [1]बालिशास्थिरम्।।६१।।

(नै० ११०८०) न सुखैस्तृप्यते बालस्तथा काष्ठैर्यथाऽनलः।
तस्मान्न सुखं सक्त[2]स्य सुखं भवति नैष्ठिकम्।।६२।।

विषास्वदोषमुक्तस्य कामदोषानुदर्शिनः।
ध्यायिनस्त्वाप्रमत्तस्य तत् सुखं यत्ना बलम्।।६३।।

सुखी भवति तत् प्राप्य न सुखं भवजन्मना[3]।
जन्मनि[4] विषं यद्वद् वर्धतेऽस्योदयस्तथा।।६४।।

तस्मात् तत्सुखसक्तानां नित्यं कामगवेषिणाम्।
भवत्यनेक[5]सौख्यानि तस्मात् कामा न वाञ्छते।।६५।।

ज्ञानेनैवेन्द्रियाणि स्वगोचरे निवर्तन्ते -

नेन्द्रियाणां जपः शक्यः कर्तुं विषयगोचरे ।
ज्ञानेन हि निवर्तन्ते इन्द्रियाणि स्वगोचरे।।६६।।

१-१ भवतद्भङ्गसंनिभं- स्वार्यं - ४०,८०   २- सक्तस्य - ४०,८०
३- भवजंत - ४०,८०
४- विषयंसक्षसौख्यं- भवोदयं - ४०,८०   ५- सौख्यं - ४०,८०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बाला एव गतिपंचके भ्रमन्ति -

दुःखे सुखाभिषक्ताश्च[1] नित्यं बाला ह्यमेधसः[1]।
स विपर्यया परिभ्रान्ता भ्रमन्ति गतिपञ्चके ॥६७॥

यदुत्पन्नं सुखं दुष्टं तत् सुखं सत्यमुच्यते[2] ।
यत्र[3] दुःखं विपाके स्यात् तत् सुखं दुःखमेवतत्॥६८॥

पापस्याकरणमेव सुखम् -

अन्यातस्य दुःखस्य प्रतिघातं[4] यतते बुधः[4] ।
पापस्य हेतुकं दुःखं पापस्याकरणं सुखम्॥६९॥

॥इति सुखकाण्डं त्रयस्त्रिंशः॥

---:०:---

१-१ ०भिषक्तानित्यं २- शस्त्रमु० - ४०,६०
क्तान्यमेधसः - ४०,६० ३- यत्र - ४०,६०
४-४ प्रतिघातायते बुधाः-४०,६०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३४) मित्रवर्गश्चतुर्विधः

तन्मित्रं यः पापान्निवारयति -

तन्मित्रं मित्रमित्युक्तं यन्मित्रं साम्परायिकम्[1] ।
यो निवर्तयति पापादशुभाच्चापि[2] रक्षति ॥१॥

हितं प्रापयति[3] नित्यं यद्धितं साम्परायिकम्।
मित्रं भवति तन्नृणां न मित्रं पापकारकम्॥२॥

अपूतिः पूतिसंश्लेषात् पूतिरेवोपजायते।
न पूतिः पूतसं[4]श्लेषमपूतिं कर्तुमर्हति[4] ॥३॥

(नै० १०६३०) यादृशेन[5] हि संश्लेषं कुरुते पुरुषः सदा ।
तद्दोषात् सदृशो दृष्टः शुभो वा यदि वाऽशुभः॥४॥

न शुभं दुःखकारणम् -

शुभार्थी पुरुषः सर्वानशुभान्[6]नैव सेवते ।
तेनासौ दुःखमाप्नोति न शुभं दुःखकारणम्॥५॥

संश्लेषजा गुणाः दृष्टा दोषाः संश्लेषजातयः[7]।
तदाणां गुणदोषाणामिदमुक्तं समाय च ॥ ६॥

१- ०राणिरागिवं - क०,ख० २- पापाद्व्यसनाच्चापि - क०,ख०
३- प्रवेशयति - क०, ४-४ श्लेषमपूतिकर्मर्हति - क०,ख०
०यत्र - ख० ५- क०,ख० पुस्तकयोः नास्ति।
६- सर्वशुभपवान्न - क०,ख० ७- ०जाति - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स[1] साधुभ्यो यो हि नित्यं साधुसमागमात्[2] ।
असाधुसंगमात्क्षिप्रं प्रयाति पुरुषाधमः ।।७।।

सारभूतमिदं कर्तव्यम् -

एतत् सारं सदा कार्यं यदसाधुविवर्जनम् ।
साधुभिश्च सदाचारो दुष्टानां[3] च विवर्जनम्[3] ।।८।।

दोषान् समुद्वीक्ष्य यत्नात् गुणवृद्धिं समाचरेत् ।
साधुमित्रं[4] प्रकुर्वीत[4] परितोषविमुक्तो भवेत् ।।९।।

न मानिनं कुशीलं च[5] नित्यं सर्वानुशङ्किनम् ।
निष्पापमभिजुष्टं मित्रं कुर्वन्ति पण्डितः ।।१०।।

अलिप्तं[6] मृदुभाषायं धर्मिष्ठं दोषवर्जितम् ।
सम्यग्दृष्टिस्वपक्षं मित्रं सेवेत[7] पण्डितः[7] ।।११।।

न पापकं भवेन्मित्रं[8] भवेदुत्तमपूरुषः[8] ।
उत्तमं भजमानस्य न दोषेभ्यो भयं भवेत् ।।१२।।

सर्वैश्वर्यसुखादीनि[9] भिद्यन्ते यस्य[9] देहिनः ।
भयप्रदं[10] श्मशानं तं[10] प्रयान्तं नैव पश्यन्ति ।।१३।।

१-	यश	- क०	२-	साधुसमात्	- क०,ख०
३-३	दुष्टतम्यवर्जनं	- क०,ख०	४-४	मित्रकुर्वीत	- क०,ख०
५-	वा	- क०,ख०	६-	उपुक्त	- क०,ख०
७-७	सेवेतपण्डितः	- क०,ख०	८-८	भवेन्मित्रमवेदुत्तमपौरुषः	- क०,ख०
९-९	सर्वैश्वर्यसुखदा-यस्यभिद्यन्ति	- क०,ख०	१०-१०	समस्मातत्पुन	- क०,ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उद्वृत्तः पुरुषो[1] नित्यं प्रमादाकुलितेन्द्रियः ।
लघुतां याति लोकेऽस्मिन् प्रेत्य पापेषु पच्यते ॥१४॥

(नी०११९क०) रूपैश्वर्यमदार्ता ये नराः पापकारिणः ।
तेषां न सुखं प्रेत्य[2] पापेषु पच्यते ॥१५॥

रूपैश्वर्यकुलार्था ये न ते तत्त्वस्य भागिनः ।
अतत्त्वबुद्धयो बाला न तरन्ति भवार्णवम् ॥१६॥

रूपं कुलं ये च विभवा यच्चान्यत्सुखमिष्यते ।
सर्वाण्येतान्यनित्यानि तस्मादेषु न विस्मयेत् ॥१७॥

न ज्ञानशीलनिर्मुक्तं कुलं यान्ति[3] पण्डिताः ।
येषां ज्ञानं च शीलं च ते कुले महति स्थिताः ॥१८॥

चारित्रमचलं शीलं शीलमेव[4] महाद्कुलम्[4] ।
महाकुलप्रसूता[5]स्ते सन्नरा बहुमानिनः ॥१९॥

दानशीलतपोध्यानसत्त्वैश्वर्यपराक्रमैः ।
संयुक्ता ये कुलीनास्ते न ये धर्मविवर्जिताः ॥२०॥

ज्ञानमयं कुलं श्रेष्ठम् -

नैश्वर्यज्ञानहीनस्य न च कुलं नापि सद्गतिः ।
तस्मात्कुलं ज्ञानमयं ज्ञानहीनं न तत् कुलम् ॥२१॥

॥ इति मित्रवर्गश्चतुस्त्रिंशः ॥

---:o:---

१- पुरुषोऽति - क० २- स्वप्रेत्य - क०
३- यान्ति - क०, ख० ४-४ शीलमिवमहत्कुलं - क०, ख०
५- क०, ख० पुस्तकयोः नास्ति।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३५) राजप्रवादवर्गः पञ्चत्रिंशः

धार्मिको राजा -

[१]भुवं परिरक्षेत्परथी[१] धर्मचारी जितेन्द्रियः ।
स राजा धार्मिको धीमान् स्वर्गलोके प्रपद्यते।।१।।

नित्यं यः करं काले धर्मेण परिभुञ्जति।
स राजा लोभनिर्मुक्तो धामानामधिपो भवेत्।।२।।

गुणवान् राजा देवानामधिपो भवति -

क्षमावान् प्रियवाक्यो यःशौचिष्ठाविचारकः ।
स महीं पालयेत्त्वेनां लोके[२]षु श्रेष्ठतां गतः।।३।।

(नै० १२२४०) कृपापालिनः [३]श्रद्धा मित्रं[३] च लभ्यते ।
[४]स राजा धर्मो[४]पेतः देवलोकाय कल्पते।।४।।

सद्दर्शी महात्मा यो गुरुपूजक एव च ।
अर्थ[५]लोगी दृढभक्तिर्देवानामन्तिकं व्रजेत्।।५।।

[६]पूर्वं ददाति यः पितॄन्[६] देवानुपदिशति च ।
न च हिंसति भूतानि स देवेषूपपद्यते ।।६।।

१-१ भुविपरिरक्षोपरस्य - म०,अ० २- लोकाणि - म०,अ०
३-३ कुशामित्रिणा - म०,अ० ४-४ सराजसमात्मेता- म०,अ०
५- बललोभयो - म०,अ० ६-६ पूर्वाणिश्रुभिदत्तं- म०,अ०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दानशीलो सदा दाता[१] धर्मवादी जितेन्द्रियः ।
स भुक्त्वायां महीं कृत्स्नां देवलोके महीपतिः[२] ।।७।।

नाधार्मिकं धारयति धार्मिकेषु च रमति[३] ।
स धर्मशोऽनुगो देवानामन्तिकं व्रजेत् ।।८।।

न स्त्रीणां वशगो राजा साधूनां च वदेत् सदा ।
स निर्मलमतिर्धीरः सुरलोकोपपद्यते ।।९ ।।

न सर्वस्य[५] वचोग्राही प्रियः[४] साधुजनस्य तु[५] ।
सोऽमृतः तत्त्वदर्शी च नाकमेवाधिरोहति ।।१०।।

यो धर्मलोभमायाति द्रविणं[६] नैव लप्स्यते ।
स लोभपरिनिर्मुक्तो यामामधियो भवेत् ।।११।।

न मिथ्यादर्शनैरक्तः[७][८] न स्त्री[७][८] दर्शन तत्परः।
सोऽक्षः सुखविचरच यामानामाधियो भवेत् ।।१२।।

प्रातः शीले सदायुक्तो दानेनाभोदरणतां गतः।
प्रविश्य महीं कृत्स्नां प्रेत्य देवप्रियो भवेत् ।।१३।।

प्रियस्य तु भवेद् वाक्यं प्रीतोत्फुल्लकारं परम् ।
(नै०१२२क) आह्लादादात्मा बहुशान्ते देवोपपद्यते ।।१४।।

१-	ददाति	- क०	२-	महीयते	- क०,ख०
३-	रमते	- क०,ख०	४-	प्रियो	- क०,ख०
५-५	परस्त्रीरताकृष्ट-स्वरोहकः	- क०,ख०	६-	तदिदं	- क०,ख०
			७-७	परदर्शनपरिकृत्य	- क०,ख०
८-८	स पुरावलोक्या	- क०,ख०			

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अविसंवादकं वाक्यं यस्य मेरुरिवाचलम् ।
सत्यसोपानमारुह्य देवानामन्तिके [1] गतः ॥१५॥

प्राणवृद्धौ च भूतानाम् क्षमात् कुरुते हि यः ।
स राजा वै परो देवैर्देवलोके च तिष्ठति [2] ॥१६॥

मनुष्यान्तरतत्त्वज्ञो यो वेत्ति हि बलाबलम् ।
स यो बलेन संयुक्तो यामानामधिपो भवेत् ॥१७॥

त्रैधातुकपदं यच्च रत्नत्रयमिहोच्यते ।
यस्तत् पूजयते राजा स देवेषूपजायते ॥१८॥

[illegible]तं नित्यदर्शी [3] यः प्रजानां च हिते रतः ।
सर्वतो भिन्नकान्तारो देवानामधिपः स्मृतः ॥१९॥

निन्दामलविनिर्मुक्तः सद्गुणदोषविवर्जितः ।
ज्ञानगोचरं सम्पूज्य नित्यं देव एव सः ॥२०॥

कोशपदोषरहितो नित्यं दृढपराक्रमः ।
नाशयित्वा स दोषौघान् प्रेत्य -- स्वर्गेषु जायते ॥२१॥

सन्मित्रैः परिवारितो राजा देवाधिपो भवति-

हि [4] तानि [4] यस्य मित्राणि धर्मिष्ठानि नित्यशः ।
स मित्रैः सम्परिवृतो नृपो देवाधिपो भवेत् ॥२२॥

१-	तप:	- [illegible]	२-	तिष्ठेत्	- [illegible]
३-	मेतका०	- [illegible]	४-४	राणि	- [illegible]

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नानुसेवति दुर्वृत्तान् वाक्दोषेण च वर्जितः।
स द्वयो[1] विषनिर्मुक्तः[1] सुराणामधिपो भवेत्॥२३॥

क्रोधहर्षौविघातार्दौ[2] न च पापेषु रमति[3]।
स पापपङ्कनिर्घातः सुरलोकाधिपः सदा॥२४॥

(ने० १२२ख०) न सक्तः पानभोज्येषु संस्थितस्तु[4] शुभे सदा।
स शुद्धधर्मसन्दर्शी देवानामन्तिकं व्रजेत्॥२५॥

सुचिन्तितं चिन्तयति यो[5] धर्मेषु च वर्तते।
धर्मोदयेन दृष्टेन यथा याति त्रिविष्टपम्॥२६॥

संसाराद् दोषबहुलाद् यस्त्वरितं धर्ममाचरेत्।
स दोषबहुलनिर्मुक्तः प्रयाति पदमुत्तमम्॥२७॥

धर्मेण प्रजापालकः स्वर्गसुखं प्राप्नोति-

धर्मेणैव प्रजा नित्यं परिपालयति[6] यो[6] नृपः।
स धार्मिकः प्रशान्तात्मा सुरलोके महायशाः॥२८॥

दशेमे कुशला धर्मा श्लोका[7]स्तत्त्वदर्शिना।
यस्तु[8] प्रकुरुते धर्मान् स सुराधिपतां व्रजेत्॥२९॥

हेतुप्रत्ययसन्दर्शी मार्गामार्गौ तथैव च।
स दृष्टिजालनिर्मुक्तो विबुधोऽधिपतां गतः॥३०॥

१-१	सर्वविषाणिमुक्तः - क०,ख०	२-	व्रतार्दो - क०,ख०
३-	रमते - क०,ख०	४-	विपाकदर्शी - क०,ख०
५-	क०,ख० पुस्तकयोः नास्ति	६-६	परिपालयते - क०,ख०
७-	दोषप्रोक्ता० - क०,ख०	८-	यस्ते - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यो देवताः पूजयति[1] यथा वाहिने[2] महीपतिः।
स देवपूजको भूयो देवानामधिपो भवेत् ॥३१॥

अनाविलेन मनसा स्कन्दाराधि[3]राधकः।
स्कन्दद्वारेण सन्तुष्टो देवानामधिपो भवेत् ॥३२॥

शक्तो[4] यो न विषादै[4] सर्वं बालापहारिभिः।
स शीलवान् दिवं याति नित्यं शीलेन रक्षितः ॥३३॥

अविद्याव[5]र्त्तिनान् नित्यं सेवते यः सुधार्मिकान्।
सद्धर्मचिन्तकः सौख्यं लभते सुरसंसदि[6] :: ॥३४॥

अव्यापन्नविधो[7] यः पार्थिवालापहारिभिः[7]।
(नै० १२२ अ०) स शीलवान् दिवं याति नित्यं शीलेन रक्षितः ॥३५॥

अव्यापारा[8]र्थमिमं पालयन् वसुधाधिपः।
प्रशास्ति च महीं कृत्स्नां याम्यानामधिपो भवेत् ॥३६॥

१- पूजयन्ते - क०, ख०
२- वाहे - क०, ख०
३- ०राधिदारकः - क०
राधिधारकः - ख०
४-४ स विषयैर्निहतो - क०, ख०
५- अवित्तवर्त्तिनः क०,
अविनीत० ख०
६- सुरसदि - क०, ख०
:: चिरावृत्तोऽयं श्लोकः क०, ख० पुस्तकयोः।
७- व्यापार्थैरालापहारिभिः - क०, ख०
८- व्यापारधर्म० - क०, ख०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्कर्मनिरतस्य राज्ञो भृत्योऽपि शोभते-

सत्कर्मनिरतो भृत्यो नृपे सद्गुणशालिनि ।
जनो निर्मलतां याति शरच्चन्द्र इवाम्बरे ॥३७॥

हेतुलक्ष्यविधिज्ञा[१] ये अविरुद्धाः परस्परम् ।
सम्यक्वाक्यार्थकर्तारः देवानां वशमागताः ॥३८॥

॥इति राजाववादवर्गः पञ्चत्रिंशः॥

---:०:---

१- ०लह्ो - ४०,७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

(३६) स्तुतिवर्गः षट्त्रिंशः

बुद्धप्रतिमास्तुतिः -

समस्तवाग्वेदाय सर्वसत्त्वेषु बान्धवे ।
सन्मार्गसार्थवाहाय भवबन्धनभेदिने ॥१॥

नानादृष्टिविभेदाय[१] सर्वसंशयमोचिने ।
सम्यग्दृष्टिनिवेशाय नमः सज्ज्ञानचक्षुषे ॥२॥

सर्वदुःखकष्टभेदाय त्रिदोषमलशोधिने ।
नमो[२] सदामृताय सर्वशोकहारिणे ॥३॥

सर्वप्रकारकाग्राय[३] सर्वध्यानाग्रवेदिने ।
सर्वरत्नोत्तमार्याय नमोऽस्त्वनागतदर्शिने[४] ॥४॥

इयं ता[५] लोकनाथस्य विप्रयुक्तस्य तायिनः ।
प्रतिमा दृश्यते शान्ता मोदास्योद्योतकारिका[६] ॥५॥

य इमामर्चति नित्यं पुरुषः शान्तमानसः[७] ।
(नै० १२४७०) स मुच्यते भवभयान्निर्वृतिं चाधिगच्छति ॥६॥

एतच्छान्तपदं रम्यमेतन्नैष्ठिकमुच्यते ।
यदयं भाषते धर्मं निर्वाणपुर देशिकः ॥७॥

१- नादृष्टि० - क०, ख०   २- नमः - क०, ख०
३- ०प्रकाराग्राय - क०, ख०   ४- नमोऽनागतदर्शिने - क०, ख०
५- ता० - क०,   ६- मोदाप्युपातक० - क०, ख०
७- शान्तमनसः - क०।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्य वाक्यं समालम्ब्य पुरुषाधीनविक्रमम्[1] ।
आप्नोति[2] पदं नित्यं यदत्यन्तसुखावहम्[3] ॥८॥

एतत् पूर्वं समारुह्य पुरुषास्तत्त्व चिन्तकाः ।
त्रिलोकीवार्णवं घोरं तरन्ति भवसागरम् ॥९॥

अयं स वसुलोकस्य सन्तादि विवर्जितः ।
अयं ज्योतिः परं ज्योतिर्यज्ज्योतिःकाष्ठसम्भवम् ॥१०॥

कल्पान्तं[4] वेत्सि यो हि नृणां[4] रागादिभिर्वृतः ।
ज्ञानतोयेन महता शोधयत्येव वाङ्नृपः ॥११॥

यन्न[5] दृष्टं पदं सर्वैस्तीर्थज्ञानपाणिभिः ।
तत्पदं किमहोवर्णितं त्वया नृणां प्रदर्शितम् ॥१२॥

प्रसादपरमो नाथो[6] भक्तो भक्तारिनाशकः[7] ।
तीर्णः[8] पारगतो नाथस्तारयत्यघनाशनात्[8] ॥१३॥

हितार्थं सर्वजातस्त्वमेकोऽव्यवस्थितः ।
अहितानां हितार्थं त्वमेव पुरुषोत्तमः ॥१४॥

१- ०विक्रमाः - क०,ख० २- प्राप्नुयन्ति - क० ख०
३- यदन्यसुख० - क०,ख० ४-४ कल्पप्राणिवेत्सि-
५- यनु - क०,ख० नृणां - क०,ख०
६- नाथ - क०,ख० ७- भक्तारिस्तथा - क०,ख०
८-८ तीर्णपारगतानाथतार-
यत्यघनाशनात् - क०,ख०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनादिमति संसारे नृणां क्लेशान्धकारकैः[1] ।
त्वया विशोधिता[2] वाचकैस्तमः सूर्योदये यथा ॥१५॥

उपायः सर्वधर्माणां ज्ञानालोककरो महान् ।
(नै० १२४क०) त्वमेवैको जगन्नाथ लोकोत्तरगुणार्णवः ॥१६॥

<u>उद्दानम्</u> -

पुण्यदेवकुलमन्त्राकलुलाभाष्ठं विदुर्बुधाः ।
तद्वदेवं तुल्यधर्मं यदा तूतस्य स्मृत्युपस्थितेः ॥ १७॥

॥इति स्तुतिवर्गः षट्त्रिंशः॥

---:o:---

१- क्लेशावृ० - क०,ख०
२- मालोचिता - क० ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

१ पुण्यमहागम्भीरोदधिदुस्तराद् मिदावलोकितसिंहेनोद्धृतमिति।।

अत्र चतुरशीतिश्लोकाधिक षट्शतोत्तर सहस्रद्वय(२६८४) ग्रन्थो दृष्टः स्फुटार्थाय ।

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः।।

(नं०१२५ अ०) ।।इति शुभम् ।।

---:०:---

१- अत्र श्लोकद्वयं लेखकप्रमादात् तथा भ्रष्टं येन तस्य प्रतिसंस्कारोऽतीव दुष्कर: -

दूरतराभिजातामयोद्धृता: ।

- पुण्यमवाप्तमत्र क्लेशं विविधाभावना भी ।
यावंकावाकुलं तर्कनिष्टः समाकुलचेतिसत्त्वावानेन।।

- मोहच्छिदार्थविदर्शितस्य बाध्यर्थस्य विपुलमस्य ।
धर्मसमुच्चयो नाम: धर्मपर्याय: समाप्त:।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सन्दर्भ ग्रन्थाः

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सन्दर्भग्रन्था:

ग्रन्थनाम		लेखक: सम्पादक: प्रकाशकश्च
१- अर्थविनिश्चयसूत्रम्	--	सम्पा० एन०एच० सम्तानी, प्रका०- के०पी० जायसवाल शोधसंस्थान पटनात: १९७१
२- अभिधर्मसमुच्चय	--	श्री दिङ्नागकृत: शान्ति निकेतनत:
३- अभिधर्मदीप:	--	सम्पा० श्रीपद्मनाभ एस० जैनी, प्रका०- के०पी० जायसवाल शोधसंस्थान पटनात:, १९७१
४- जातकमाला	--	अनु०डा०सूर्यनारायण चौधरी, प्रका०- मोतीलाल बनारसीदास, वाराणसी- १९७१
५- जीवन्मुक्तिविवेक:	--	श्रीमद्विद्यारण्यस्वामी प्रणीत: सम्पा० प्रो० एम०एल० गोस्वामी, प्रका०- चौखम्बासंस्कृत संस्थान, वाराणसी १९८४
६- धम्मपदम्	--	सम्पा०- श्री छिमेद रिंगजिन लामा, केन्द्रिय उच्चतिब्बती शिक्षासंस्थान वाराणसीत: १९८२
७- बोधिचर्यावतार	--	अनु० प्रो०शान्तिभिक्षु शास्त्री
८- बौद्धधर्मदर्शनम्	--	ले०- आचार्य नरेन्द्रदेव प्रका०-बिहारराष्ट्रभाषापरिषद् पटनात: - १९७१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

९- भारत में बौद्धधर्म का इतिहास -- डा० रिगजिन लुण्डुप लामा,
प्रा० के०पी० जायसवाल शोधसंस्थान,
पटनात: १९७१

१०- मनुस्मृति -- व्याख्याकार: श्रीचमनलाल गौतम
प्रा०- संस्कृत संस्थान, बरेली, १९८०

११- महाभारतम् -- श्री व्यासप्रणीत
प्रा०- गीताप्रेस, गोरखपुर

१२- रत्नावली -- आचार्य नागार्जुनकृता
अनु०- प्रो० एस०एस० गोस्वामी,
प्रा०- तारा प्रिंटिंग वर्क्स, वाराणसीत:
१९८४

१३- शिक्षासमुच्चय: -- सम्पा० सिसिल बण्डेल महाशय:
प्रका०- मोउटन एण्ड को० एस० ग्रेवेन्हगो,
ग्रेट ब्रिटेन, १९५७

१४- श्रीमद्भगवद् गीता -- टीकाकार- जयदयाल गोयन्दका,
प्रा०- गीताप्रेस, गोरखपुर, सं० २०४०

१५- सद्धर्मपुण्डरीकम् -- अनु० डा० राममोहनदास:
प्रका०- बिहार राष्ट्रभाषा परिषद्
पटनात:, १९६६

---:0:---

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri